.. 4. virATaparva Kumbhaghonam Edition ..

॥ ४. विराटपर्व ॥

विराटपर्व - अध्याय ००१

॥ श्रीः ॥

४.१. अध्यायः १

Mahabharata - Virata Parva - Chapter Topics

युधिष्ठिरेण ब्राह्मणाय मृगापहृतारणिभाण्डप्रत्यर्पणम् ॥ १ ॥
धौम्येन ब्राह्मणमध्ये दुर्योधनापनयादिकथनेन शोचतो
युधिष्ठिरस्य दुःखानुभवविषये देवादिनिदर्शनप्रदर्शनेन
परिसान्त्वनम् ॥ २ ॥
पाण्डवैः स्वसहचरब्राह्मणाभ्यनुज्ञानसंपादनेन तद्धितर्जनपूर्वकं
धौम्येनसह मन्त्राय क्वचिदुपवेशनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-१-० (२८११५)
॥ श्रीवेदव्यासाय नमः ॥ ४-१-०क्ष् (२९६७)
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४-१-१ (२८११६)
॥ जनमेजय उवाच ।
कथं विराटनगरे मम पूर्वपितामहाः ।
अज्ञातवासमुषिता दुर्योधनभयार्दिताः ॥ ४-१-२क्ष् (२९६८)
पतिव्रता महाभागा सततं सुखभागिनी ।
द्रौपदी सा कथं ब्रह्मन्नज्ञाता दुःखिताऽवसत् ॥ ४-१-२ (२८११७)
ते च ब्राह्मणमुख्याश्च सूतपौरोगवैः सह ।
अज्ञातवासमुषिताः कथं च परिचारकाः ॥ ४-१-३ (२८११८)
वैशम्पायन उवाच। ४-१-४क्ष् (२९६९)
यथा विराटनगरे तव पूर्वपितामहाः ।
अज्ञातवासमुषितास्तावद्वक्ष्यामि तच्छृणु ॥ ४-१-४ (२८११९)
तथा स तान्वराँल्लब्ध्वा धर्मराजो युधिष्ठिरः ।
गत्वाऽऽश्रमं ब्राह्मणेभ्य आचख्यौ वृत्तमात्मनः ॥ ४-१-५ (२८१२०)

कथयित्वा च तत्सर्वं ब्राह्मणेभ्यो युधिष्ठिरः ।
अरणीसहितं भाण्डं ब्राह्मणाय न्यवेदयत् ॥ ४-१-६ (२८१२१)
ततो युधिष्ठिरो राजा कुन्तीपुत्रो दृढव्रतः ।
समाहूयानुजान्सर्वानिति होवाच भारत ॥ ४-१-७ (२८१२२)
द्वादशेमानि वर्षाणि राष्ट्राद्विप्रोषिता वयम् ।
छद्मना हृतराज्याश्च निस्वाश्च बहुशः कृताः ॥ ४-१-८ (२८१२३)
उषिताश्च वने वासं यथा द्वादश वत्सरान् ।
अज्ञातचर्यां वत्स्यामश्छन्ना वर्षं त्रयोदशम् ॥ ४-१-९ (२८१२४)
वैशम्पायन उवाच। ४-१-१०क्ष् (२९७०)
धर्मेण तेऽभ्यनुज्ञाताः पाण्डवाः सत्यविक्रमाः ।
अज्ञातवासं वत्स्यन्तश्छन्ना वर्षं त्रयोदशम् ॥ ४-१-१० (२८१२५)
उपोपविश्य विद्वांसः स्नातकाः संशितव्रताः ।
ये तत्र ब्राह्मणा आसन्वनवाससहायिनः ।
ये च भक्ता वसन्ति स्म वनवासे तपस्विनः ॥ ४-१-११ (२८१२६)
तानब्रुवन्महात्मानो हृष्टाः प्राञ्जलयः स्थिताः ।
अभ्यनुज्ञापयिष्यन्तस्तान्प्रवासे धृतव्रताः ॥ ४-१-१२ (२८१२७)
विदितं भवतां सर्वं धार्तराष्ट्रैर्यथा वयम् ।
छद्मना हृतराज्याश्च निस्वाश्च बहुशः कृताः ॥ ४-१-१३ (२८१२८)
उषिताश्च वने वासं यथा द्वादशवत्सरान् ।
भवद्भिरेव सहिता वन्याहारा द्विजोत्तमाः ॥ ४-१-१४ (२८१२९)
अज्ञातवाससमयं शेषं वर्षं त्रयोदशम् ।
तद्वत्स्यामो वयं छन्नास्तदनुज्ञातुमर्हथ ॥ ४-१-१५ (२८१३०)
सुयोधनश्च दुष्टात्मा कर्णश्च सहसौबलः ।
जानन्तो विषमं कुर्युरस्मास्वत्यन्तवैरिणः ॥ ४-१-१६ (२८१३१)
युक्तचाराश्च यत्ताश्च दाये स्वस्य जनस्य च ।
दुरात्मनां हि कस्तेषां विश्वासं गन्तुमर्हति ॥ ४-१-१७ (२८१३२)
अपि नस्तद्भवेद्भूयो यद्वयं ब्राह्मणैः सह ।
समस्तेषु च राष्ट्रेषु स्वराज्यस्था भवेम हि ॥ ४-१-१८ (२८१३३)
इत्युक्त्वा दुःखशोकार्तः शुचिर्धर्मसुतस्तदा ।
संमूर्च्छितोऽभवद्राजा सास्रकण्ठो युधिष्ठिरः ॥ ४-१-१९ (२८१३४)
तमथाश्वासयन्सर्वे ब्राह्मणा भ्रातृभिः सह ॥ ४-१-२० (२८१३५)
प्रबुध्य दुःखमोहार्तो धौम्यं धर्मभृतांवरम् ।
प्रावैक्षत तदा राजा साश्रुकण्ठो युधिष्ठिरः ॥ ४-१-२१ (२८१३६)
अथ धौम्योऽब्रवीद्वाक्यं महार्थं नृपतिं तदा ।
आश्वासयंस्तं स नृपं भ्रातॄंश्च ब्राह्मणैः सह ॥ ४-१-२२ (२८१३७)
राजन्विद्वान्भवान्दान्तः सत्यसन्धो जितेन्द्रियः ।

नैवंविधाः प्रमुह्यन्ति धीराः कस्यांचिदापदि ॥ ४-१-२३ (२८१३८)
देवैरप्यापदः प्राप्ताश्छन्नैश्च बहुभिस्तदा ।
तत्रतत्र सपत्नानां निग्रहार्थं महात्मभिः ॥ ४-१-२४ (२८१३९)
दितिपुत्रैर्हृते राज्ये देवराजः सुदुःखितः ।
ब्रह्माणं तोषयिष्यंश्च ब्रह्मरूपं विधाय च ॥ ४-१-२५ (२८१४०)
इन्द्रेण निषधं प्राप्य गिरिप्रस्थाह्वये पुरे ।
छन्नेनोष्य कृतं कर्म द्विषतां बलनिग्रहे ॥ ४-१-२६ (२८१४१)
प्रसादाद्ब्रह्मणो राजन्दितेः पुत्रान्महाबलान् ।
निर्जित्य तरसा शत्रून्पुनर्लोकाञ्जुगोप च ॥ ४-१-२७ (२८१४२)
विष्णुनाऽश्मगिरिं प्राप्य तदा दित्यां निवत्स्यता ।
गर्भे वधार्थं दैत्यानामज्ञातेनोषितं चिरम् ॥ ४-१-२८ (२८१४३)
प्रोष्य वामनरूपेण च्छन्नेन ब्रह्मचारिणा ।
बलेर्यथा हृतं राज्यं विक्रमैस्तच्च ते श्रुतम् ॥ ४-१-२९ (२८१४४)
और्वेण वसता छन्नमूरौ ब्रह्मर्षिणा तदा ।
यत्कृतं तात लोकेषु तच्च सर्वं श्रुतं त्वया ॥ ४-१-३० (२८१४५)
प्रच्छन्नेनापि सर्वत्र हरिणा वृत्रनिग्रहे ।
वज्रं प्रविश्य शक्रस्य यत्कृतं तच्च ते श्रुतम् ॥ ४-१-३१ (२८१४६)
हुताशनेन यच्चापः प्रविश्य च्छन्नमूषितम् ।
विबुधानां हि यत्कर्म कृतं तच्चापि ते श्रुतम् ॥ ४-१-३२ (२८१४७)
यथा विवस्वता तात छन्नेनोत्तमतेजसा ।
निर्दग्धाः शत्रवः सर्वे वसता गवि वर्षशः ॥ ४-१-३३ (२८१४८)
विष्णुना वसता चात्र गृहे दशरथस्य वै ।
दशग्रीवो हतश्छन्नं संयुगे भीमकर्मणा ॥ ४-१-३४ (२८१४९)
एवमेते महात्मानः प्रच्छन्नास्तत्रतत्र हि ।
अजयञ्छात्रवान्मुख्यांस्तथा त्वमपि जेष्यसि ॥ ४-१-३५ (२८१५०)
वैशम्पायन उवाच। ४-१-३६क्ष् (२९७१)
इति धौम्येन धर्मज्ञो वाक्यैः स परिहर्षितः ।
शान्तबुद्धिः पुनर्भूत्वा व्यष्टम्भत युधिष्ठिरः ॥ ४-१-३६ (२८१५१)
अथाब्रवीन्महाबाहुर्भीमसेनो महाबलः ।
राजानं बलिनां श्रेष्ठो गिरा संपरिहर्षयन् ॥ ४-१-३७ (२८१५२)
अवेक्षय महाराज तव गाण्डीवधन्वना ।
धर्मार्थपरया बुद्ध्या न किंचित्साहसं कृतम् ॥ ४-१-३८ (२८१५३)
सहदेवो मया नित्यं नकुलश्च निवारितौ ।
शक्तौ विध्वंसने तेषां शत्रुघ्नौ भीमविक्रमौ ॥ ४-१-३९ (२८१५४)
न वयं वर्त्म हास्यामो यस्मिन्योक्ष्यति नो भवान् ।
तद्विधत्तां भवान्सर्वं क्षिप्रं जेष्यामहे परान् ॥ ४-१-४० (२८१५५)

इत्युक्तो भीमसेनेन धर्मराजो युधिष्ठिरः ।
सुखोपविष्टो विद्वद्भिस्तापसैः संशितव्रतैः ॥ ४-१-४१ (२८१५६)
ये तद्भक्त्याऽभवंस्तस्मिन्वनवासे तपस्विनः ।
तानब्रवीन्महाप्राज्ञः शिष्टान्राजा कृताञ्जलिः ।
अभ्यनुज्ञापयिष्यन्वै तस्मिन्वासे धृतव्रतः ॥ ४-१-४२ (२८१५७)
विदितं भवतां सर्वे धार्तराष्ट्रैर्यथा वयम् ।
संमन्त्राहृतराज्याश्च निस्स्वाश्च बहुशः कृताः ।
उषिताः स्मो वने कृच्छ्रं तथा वर्षाणि द्वादश ॥ ४-१-४३ (२८१५८)
अज्ञातचर्यासमयं शेषं वर्षं त्रयोदशम् ।
तद्वत्स्यामः क्वचिच्छन्नास्तदनुज्ञातुमर्हथ ॥ ४-१-४४ (२८१५९)
इत्युक्ता धर्मराजेन ब्राह्मणाः परमाशिषः ।
प्रयुज्यापृच्छ्य भरतान्यथास्वं प्रययुर्गृहान् ॥ ४-१-४५ (२८१६०)
सर्वे वेदविदो मुख्या यतयो मुनयस्तदा ।
आशीरुक्त्वा यथान्यायं पुनर्दर्शनकाङ्क्षिणः ॥ ४-१-४६ (२८१६१)
ते तु भृत्याश्च दूताश्च शिल्पिनः परिचारकाः ।
अनुज्ञाप्य यथान्यायं पुनर्दर्शनकाङ्क्षिणः ॥ ४-१-४७ (२८१६२)
सह धौम्येन विद्वांसस्तथा ते पञ्च पाण्डवाः ।
उत्थाय प्रययुर्वीराः कृष्णामादाय भारत ॥ ४-१-४८ (२८१६३)
क्रोशमात्रमतिक्रम्य तस्माद्वासान्निमित्ततः ।
श्वोभूते मनुजव्याघ्राश्छन्नवासार्थमुद्यताः ॥ ४-१-४९ (२८१६४)
पृथक् शास्त्रविदः सर्वे सर्वे मन्त्रविशारदाः ।
सन्धिविग्रहतत्वज्ञा मन्त्राय समुपाविशन् ॥ ॥ ४-१-५० (२८१६५)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
प्रथमोऽध्यायः ॥१ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-१-१अयमध्यायो झो पुस्तके वनपर्वान्तिमाध्यायतया वर्तते ।विराटो ।

विराटपर्व - अध्याय ००२
॥ श्रीः ॥
४.२. अध्यायः २

Mahabharata - Virata Parva - Chapter Topics
युधिष्ठिरेण भ्रातृभिः सह मन्त्रणेन विराटनगरे निवासनिर्धारणम्
॥१ ॥
तथा स्वस्य यतिवेपपरिग्रहेण विराटसभास्तारीभवनकथनम् ॥ २ ॥

४-२-० (२८१६६)
वैशम्पायन उवाच । ४-२-०क्ष् (२९७२)
निवृत्तवनवासास्ते सत्यसन्धा मनस्विनः ।
अकुर्वत पुनर्मन्त्रं सह धौम्येन पाण्डवाः ॥ १ ॥ ४-२-१ (२८१६७)
अथाब्रवीद्धर्मराजः कुन्तीपुत्रो युधिष्ठिरः ।
भ्रातॄन्कृष्णां च संप्रेक्ष्य धौम्यं च कुरुनन्दनः ॥ २
॥ ४-२-२ (२८१६८)
द्वादशेमानि वर्षाणि राज्याद्विप्रोषिता वयम् ।
त्रयोदशोऽयं संप्राप्तः कृच्छ्रात्परमदुर्वसः ।
स साधु कौन्तेय इतो वासमर्जुन रोचय ॥ ३ ॥ ४-२-३ (२८१६९)
त्रयोदशमिदं प्राप्तं क्वनु वत्स्यामहेऽर्जुन ।
अबुद्धा धार्तराष्ट्रैश्च समग्राः सह कृष्णया ॥ ४ ॥ ४-२-४ (२८१७०)
अर्जुन उवाच। ४-२-५क्ष् (२९७३)
तस्यैव वरदानेन धर्मस्य मनुजाधिप ।
अज्ञाता विचरिष्यामो नराणां भरतर्षभ ॥ ५ ॥ ४-२-५ (२८१७१)
यानि राष्ट्राणि वासाय कीर्तयिष्यामि कानिचित् ।
रमणीयानि गुप्तानि तेषां किंचित्तु रोचय ॥ ६ ॥ ४-२-६ (२८१७२)
रम्या जनपदाः सन्ति बहवस्त्वभितः कुरून् ।
पाञ्चालाश्चैव मत्स्याश्च साल्ववैदेहबाह्लिकाः ।
दशार्णाः शूरसेनाश्च कलिङ्गा मागधा अपि ॥ ७ ॥ ४-२-७ (२८१७३)
विराटनगरं चापि श्रूयते शत्रुसूदन ।
रमणीयं जनाकीर्णं सुभिक्षं स्फीतमेव च ॥ ८ ॥ ४-२-८ (२८१७४)
नानाराष्ट्राणि चान्यानि श्रूयन्ते सुबहूनि च ।
यत्र ते रोचते राजंस्तत्र गच्छामहे वयम् ॥ ९ ॥ ४-२-९ (२८१७५)
कतमस्मिञ्जनपदे महाराज निवत्स्यसि ।
मा विषादे मनः कार्यं राज्यभ्रंश इति क्वचित् ॥ १० ॥ ४-२-१० (२८१७६)
युधिष्ठिर उवाच। ४-२-११क्ष् (२९७४)
एवमेतन्महाबाहो यथा स भगवान्प्रभुः ।
अब्रवीत्सर्वभूतेशस्तथैतन्न तदन्यथा ॥ ११ ॥ ४-२-११ (२८१७७)
अवश्यं त्वेव वासार्थं रमणीयं शिवं सुखम् ।
संमन्त्र्य सहितैः सर्वैर्द्रव्यमकुतोऽभयम् ॥ १२ ॥ ४-२-१२ (२८१७८)
मात्स्यो विराटो बलवानभिरक्तोथ पाण्डवान् ।
धर्मशीलो वदान्यश्च वृद्धः सत्स्वपि संमतः ॥ १३ ॥ ४-२-१३ (२८१७९)

गुणवाँल्लोकविख्यातो दृढभक्तिर्जितेन्द्रियः ।
तत्र मे रोचते पार्थ मत्स्यराजान्तिकेऽनघ ॥ १४ ॥ ४-२-१४ (२८१८०)
विराटनगरे तात मासान्द्वादशसंमितान् ।
कुर्वन्तस्तस्य कर्माणि वसामो यदि रोचते ॥ १५ ॥ ४-२-१५ (२८१८१)
यानियानि च कर्माणि तस्य शक्ष्यामहे वयम् ।
कर्तुं यो यत्स तत्कर्म ब्रवीतु कुरुनन्दन ॥ १६ ॥ ४-२-१६ (२८१८२)
अर्जुन उवाच ॥ ४-२-१६क्ष् (२९७५)
नरदेव कथं कर्म तस्य राष्ट्रे करिष्यसि ।
मनुजेन्द्र विराटस्य रंस्यसे केन कर्मणा ॥ १७ ॥ ४-२-१७ (२८१८३)
अक्लिष्टवेषधारी च धार्मिको ह्यनसूयकः ।
न तवाभ्युचितं कर्म नृशंसं नापि कैतवम् ॥ १८ ॥ ४-२-१८ (२८१८४)
सत्यवागसि याज्ञीको लोभक्रोधविवर्जितः ।
मृदुर्वदान्यो ह्रीमांश्च धार्मिकः सत्यविक्रमः ॥ १९ ॥ ४-२-१९ (२८१८५)
स राजंस्तपसा क्लिष्टः कथं तस्य करिष्यसि ।
न दुःखमुचितं किंचिद्राजन्पापमतेर्यथा ।
स इमामापदं प्राप्य कथं घोरां तरिष्यसि ॥ २० ॥ ४-२-२० (२८१८६)
वैशम्पायन उवाच। ४-२-२१क्ष् (२९७६)
अर्जुनेनैवमुक्तस्तु प्रत्युवाच युधिष्ठिरः ।
शृणु त्वं यत्करिष्यामि कर्म वै कुरुनन्दन ॥ २१ ॥ ४-२-२१ (२८१८७)
विराटं समनुप्राप्य राजानं मात्स्यनन्दनम् ।
सभास्तारो भविष्यामि विराटस्येति मे मतिः ॥ २२ ॥ ४-२-२२ (२८१८८)
कङ्को नाम ब्रुवाणोऽहं मताक्षः साधुदेविता ।
वैडूर्यान्काञ्चनान्दानान्स्फाटिकान्राजतानपि ॥ २३ ॥ ४-२-२३ (२८१८९)
कृष्णाक्षाँल्लोहिताक्षांश्च निवप्स्यामि मनोरमान् ।
अरिष्टान्राजगोलिङ्गान्दर्शनीयान्सुवर्चसः ॥ २४ ॥ ४-२-२४ (२८१९०)
लोहिताश्चाश्मगर्भाश्च सन्ति तात धनानि मे ।
दर्शनीयाः सभानन्दाः कुशलैः साधुनिष्ठिताः ॥ २५ ॥ ४-२-२५ (२८१९१)
अप्येतान्पाणिना स्पृष्ट्वा संप्रहृष्यन्ति मानवाः ॥ २६ ॥ ४-२-२६ (२८१९२)
तान्विकीर्य समे देशे रमणीये विपांसुले ।
देविष्यामि यथाकामं स विहारो भविष्यति ॥ २७ ॥ ४-२-२७ (२८१९३)
कङ्को नाम्ना परिव्राट् च विराटस्य सभासदः ।
ज्योतिषे शकुनज्ञाने निमित्ते चाक्षकौशले ।
ब्राह्मे वेदे मयाऽधीते वेदाङ्गेषु च सर्वशः ॥ २८ ॥ ४-२-२८ (२८१९४)
धर्मकामार्थमोक्षेषु नीतिशास्त्रेषु पारगः ।
पृष्टोऽहं कथयिष्यामि राज्ञः प्रियतमं वचः ॥ २९ ॥ ४-२-२९ (२८१९५)
आसं युधिष्ठिरस्याहं पुरा प्राणसमः सखा ।

इति वक्ष्यामि राजानं यदि मामनुयोक्ष्यते ॥ ३० ॥ ४-२-३० (२८१९६)
विराटनगरे छन्न एवं युक्तः सदा वसे ।
इत्येवं मे प्रतिज्ञातं विचरिष्याम्यहं यथा ॥ ३१ ॥ ४-२-३१ (२८१९७)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

विराटपर्व - अध्याय ००३
॥ श्रीः ॥
४.३. अध्यायः ३

Mahabharata - Virata Parva - Chapter Topics
भीमेन युधिष्ठिरंप्रति स्वस्य सूदवेषपरिग्रहेण
विराटभवने निवासकथनम् ॥ अर्जुनेन युधिष्ठिरंप्रति स्वेन
नपुंसकवेषपरिग्रहेण राजकन्यानाटनादिकथनम् ॥
Mahabharata - Virata Parva - Chapter Text

४-३-० (२८१९८)
वैशम्पायन उवाच। ४-३-०क्ष् (२९७७)
एवं निर्दिश्य चात्मानं निश्वसन्नुष्णमार्तिजम् ।
विमुञ्चन्नश्रु नेत्राभ्यां भीमसेनमुवाच ह ॥ ४-३-१ (२८१९९)
भीमसेन कथं कर्म मात्स्यराष्ट्रे करिष्यसि ।
हत्वा क्रोधवशांस्तत्र पर्वते गन्धमादने ॥ ४-३-२ (२८२००)
यक्षान्क्रोधाभिताम्राक्षान्राक्षसांश्चापि पौरुषात् ।
प्रादाः पाञ्चालकन्यायै पद्मानि सुबहून्यपि ॥ ४-३-३ (२८२०१)
बकं राक्षसराजानं भीषणं पुरुषादकम् ।
जघ्निवानसि कौन्तेय ब्राह्मणार्थमरिन्दम ।
क्षेमा चाभयसंवीता सैकचक्रा त्वया कृता ॥ ४-३-४ (२८२०२)
हिडिम्बं च महावीर्यं किर्मीरं चैव राक्षसम् ।
त्वया हत्वा महाबाहो वनं निष्कण्टकं कृतम् ॥ ४-३-५ (२८२०३)
आपदं चापि संप्राप्ता द्रौपदी चारुहासिनी ।
जटासुरवधं कृत्वा वयं च परिमोक्षिताः ॥ ४-३-६ (२८२०४)
मत्स्यराजांन्तिके तात वीर्यपूर्णोऽत्यमर्षणः ।
वृकोदर विराटस्य बलीयान्दुर्बलीयसः ।
समीपे नगरे तस्य वत्स्यसे केन कर्मणा ॥ ४-३-७ (२८२०५)
भीम उवाच। ४-३-८क्ष् (२९७८)

सूदोऽहं वललो नाम्ना सूपकारो नराधिप ।
उपस्थास्यामि राजानं विराटमिति रोचये ॥ ४-३-८ (२८२०६)
रसान्नानाविधांश्चापि स्वादूंश्च मधुरांस्तथा ।
सूपांश्चापि करिष्यामि कुशलोस्मि महानसे ॥ ४-३-९ (२८२०७)
कृतपूर्वाणि यान्यस्य व्यञ्जनानि सुशिक्षितैः ।
तान्यप्यभिभविष्यामि प्रीतिं संजनयन्नहम् ॥ ४-३-१० (२८२०८)
पूर्वमप्राशितांस्तेन कर्ता रसगुणान्वितान् ।
स्वादु व्यञ्जनमास्वाद्य मात्स्यः प्रीतो भविष्यति ॥ ४-३-११ (२८२०९)
आहरिष्यामि दारूणां पाटितानां शतंशतम् ।
राजा कर्माणि मे दृष्ट्वा न मां परिभविष्यति ॥ ४-३-१२ (२८२१०)
ये च तस्य महामल्लाः समरेष्वपराजिताः ।
कृतप्रतापा बहुशो राज्ञः प्रत्यायिता बले ॥ ४-३-१३ (२८२११)
रङ्गोपजीविनः सर्वे परेषां च भयावहाः ।
तानहं निहनिष्यामि रतिं राज्ञः प्रवर्तयन् ॥ ४-३-१४ (२८२१२)
न च तान्युध्यमानोऽहं नयिष्ये यमसादनम् ।
तथा तान्निहनिष्यामि जीविष्यन्ति यथाऽऽतुराः ॥ ४-३-१५ (२८२१३)
वृषो वा महिषो वापि नागो वा षाष्टिहायनः ।
सिंहो व्याघ्रो ग्रहीतव्यो भविष्यति न संशयः ॥ ४-३-१६ (२८२१४)
तान्सर्वान्दुर्ग्रहानन्यैराशीविषविषोपमान् ।
बलादहं ग्रहीष्यामि मत्स्यराजस्य पश्यतः ॥ ४-३-१७ (२८२१५)
आरालिका वा सूदा वा येऽस्य युक्ता महानसे ।
तानहं प्रीणयिष्यामिं मनुष्यान्स्तेन कर्मणा ॥ ४-३-१८ (२८२१६)
आरालिको गोविकर्ता सूपकर्ता नियोधकः ।
आसं युधिष्ठिरस्याहमिति वक्ष्यामि मानवान् ॥ ४-३-१९ (२८२१७)
आत्मानमात्मना रक्षंश्चरिष्यामि विशांपते ।
इत्येवं च प्रतिज्ञातं विचरिष्याम्यहं यथा ।
विराटनगरे च्छन्नो विराटस्य समीपतः ॥ ४-३-२० (२८२१८)
युधिष्ठिर उवाच। ४-३-२१क्ष् (२९७९)
अग्निर्ब्राह्मणरूपेण प्रच्छन्नोऽन्नमयाचत ।
महाशनं ब्राह्मणं मां प्रमुञ्चार्जुन खाण्डवे ॥ ४-३-२१ (२८२१९)
संशुश्रुवे च धर्मात्मा यस्तमर्थं चकार ह ।
तस्मै ब्राह्मणरूपाय हुताशाय महायशाः ।
विजित्यैकरथेनेन्द्रं हत्वा पन्नगराक्षसान् ॥ ४-३-२२ (२८२२०)
यस्तु देवान्मनुष्यांश्च सर्वानेकरथोऽजयत् ।
स भीमधन्वा श्वेताश्वः पाण्डवः किं करिष्यति ॥ ४-३-२३ (२८२२१)
आशीविषसमस्पर्शो नागानामिव वासुकिः ।

दृष्टीविष इवाहीनामग्निस्तेजस्विनामिव ॥ ४-३-२४ (२८२२२)
समुद्र इव सिन्धूनां शैलानां हिमवानिव ।
महेन्द्र इव देवानां दानवानां बलिर्यथा ॥ ४-३-२५ (२८२२३)
सुप्रतीको गजेन्द्राणां युग्यानां तुरगो यथा ।
कुबेर इव यक्षाणां मृगाणां केसरी यथा ॥ ४-३-२६ (२८२२४)
राक्षसानां दशग्रीवो दैत्यानामिव शम्बरः ।
रुद्राणामिव कापाली विष्णुर्बलवतामिव ॥ ४-३-२७ (२८२२५)
रोषामर्षसमायुक्तो भुजङ्गानां च तक्षकः ।
वायुवेगबलोद्धूतो गरुडः पततामिव ॥ ४-३-२८ (२८२२६)
तपतामिव चादित्यः प्रजानां ब्राह्मणो यथा ।
ह्रदानामिव पातालं पर्जन्यो नर्दतामिव ॥ ४-३-२९ (२८२२७)
आयुधानां वरो वज्रः ककुद्मांश्च गवां वरः ।
धृतराष्ट्रश्च नागानां हस्तिष्वैरावतो यथा ॥ ४-३-३० (२८२२८)
पुत्रः प्रियाणामधिको भार्या च सुहृदां वरा ।
गिरीणां प्रवरो मेरुर्देवानां मधुसूदनः ।
ग्रहाणां प्रवरश्चन्द्रः सरसां मानसो यथा ॥ ४-३-३१ (२८२२९)
यथैतानि विशिष्टानि स्वस्यां जात्यां वृकोदर ।
एवं युवा गुडाकेशः श्रेष्ठः सर्वधनुष्मताम् ॥ ४-३-३२ (२८२३०)
सोयमिन्द्रादनवमो वासुदेवाच्च भारत ।
उषित्वा पञ्च वर्षाणि सहस्राक्षस्य वेश्मनि ।
ब्रह्मचारी व्रते युक्तः सर्वशस्त्रभृतांवरः ॥ ४-३-३३ (२८२३१)
अवाप चास्त्रमस्त्रज्ञः सर्वज्ञः सर्वसंमतः ।
क्षिप्रं चाशु विचित्रं च ध्रुवं च वदतां वरः ॥ ४-३-३४ (२८२३२)
अनुज्ञातः सुरेन्द्रेण पुनः प्रत्यागतो महीम् ।
धार्तराष्ट्रविनाशाय पाण्डवानां जयाय च ॥ ४-३-३५ (२८२३३)
यं मन्ये द्वादशं रुद्रमादित्यानां त्रयोदशम् ।
वसूनां नवमं मन्ये गिरीणामष्टमः स्मृतः ॥ ४-३-३६ (२८२३४)
यस्य दीर्घौ समौ बाहू ज्याघातेन किणीकृतौ ।
दक्षिणश्चैव सव्यश्च बाहू अनडुहो यथा। ४-३-३७ (२८२३५)
तलाङ्गुलित्राभ्युचितौ नागराजकरोपमौ ।
पीनौ परिघसङ्काशौ मृदुताम्रतलौ शुभौ ॥ ४-३-३८ (२८२३६)
श्यामो युवा गुडाकेशो दर्शनीयश्च पाण्डवः ।
गाण्डीवधन्वा श्वेताश्वः किरीटी वानरध्वजः ॥ ४-३-३९ (२८२३७)
किंरूपधारी किंकर्मा किंचेष्टः किंपरायणः ।
बीभत्सुर्भीमधन्वा च किं करिष्यति चार्जुनः ।
कुन्तीपुत्रो विराटस्य रमते केन कर्मणा ॥ ४-३-४० (२८२३८)

अर्जुन उवाच। ४-३-४१क्ष् (२९८०)
इमौ किणीकृतौ बाहू ज्याघाततलपीडनात् ।
नित्यं कञ्चुकसंछन्नौ नान्यथा गोप्तुमुत्सहे ॥ ४-३-४१ (२८२३९)
किं तु कार्यवशादेतदाचरिष्यामि कुत्सितम् ॥ ४-३-४२ (२८२४०)
बाहू मे भरतश्रेष्ठ महालाञ्छनलक्षितौ ।
ज्याघातेन महान्तौ मे गूहितुं नान्यथोत्सहे ॥ ४-३-४३ (२८२४१)
उभौ कम्बू प्रतीमुच्य कुण्डले परिपातुके ।
वेणीकृतशिरा भूत्वा भविष्यामि बृहन्नला ॥ ४-३-४४ (२८२४२)
पठन्नाख्यायिकां नाम स्त्रीभावेन पुनः पुनः ।
प्रजानां समुदाचारं बहुनर्मकृतं वदन् ।
रमयिष्यामि राजानमन्यं चान्तःपुरे जनम् ॥ ४-३-४५ (२८२४३)
नृत्तं गीतं च वादित्रं दिव्यं च विविधं तथा ।
शिक्षयिष्याम्यहं राजन्विराटनगरे स्त्रियः ॥ ४-३-४६ (२८२४४)
स्त्रीभावसमुदाचारान्नृत्तगीतकथाश्रयैः ।
छादयिष्यामि राजेन्द्र माययाऽऽत्मानमात्मना ॥ ४-३-४७ (२८२४५)
युधिष्ठिरस्य गेहेऽस्मिन्द्रौपद्याः परिचारिका ।
उषिताऽस्मीति वक्ष्यामि धर्मराजस्य संमता ॥ ४-३-४८ (२८२४६)
उर्वश्याश्चापि शापेन प्राप्तोस्मि नृप षण्डताम् ।
शक्रप्रसादान्मुक्तोऽहं वर्षादूर्ध्वं त्रयोदशात् ।
इत्येतन्मे प्रतिज्ञातं विचरिष्याम्यहं यथा ॥ ४-३-४९ (२८२४७)
एतेन विधिना छन्नः कृतकेन यथा नलः ।
विहरिष्यामि राजेन्द्र विराटस्य पुरे सुखम् ॥ ४-३-५० (२८२४८)
युधिष्ठिर उवाच। ४-३-५१क्ष् (२९८१)
वासुदेवसमो लोके यशसा विक्रमेण च ।
सोयं राज्ये विराटस्य भवने भरतर्षभः ॥ ४-३-५१ (२८२४९)
मेरुः प्रच्छादित इव वसन्वज्रोण मुष्टिना ।
आख्याता षण्डकोस्मीति प्रतिज्ञातं हि पातकं ॥ ॥ ४-३-५२ (२८२५०)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि तृतीयोऽध्यायः ॥

विराटपर्व - अध्याय ००४
॥ श्रीः ॥
४.४. अध्यायः ४

Mahabharata - Virata Parva - Chapter Topics
युधिष्ठिरंप्रति नकुलेन विराटनगरे अश्वपालकतया स्वस्य

निवासकथनम् ॥१ ॥
सहदेवेन गोपालकतया स्वस्य निवासकथनम् ॥ २ ॥
द्रौपद्या सैरन्ध्रीभावेन स्वस्य निवासकथनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-४-० (२८२५१)
वैशम्पायन उवाच । ४-४-०क्ष् (२९८२)
इत्येवमुक्त्वा पुरुषप्रवीरस्तथार्जुनो धर्मामृतां वरिष्ठः ।
वाक्यं तथासौ ॥॥ भूयो नृपोऽपरं भ्रातर ॥बभाषे ४-४-१ (२८२५२)
किंकर्मा किंसमाचारो नकुलोयं भविष्यति ।
सुकुमारश्च शूरश्च दर्शनीयः सुखोचितः ॥ ४-४-२ (२८२५३)
अदुःखार्हश्च बालश्च लालितश्चापि नित्यशः ।
सोयमार्तश्च शान्तश्च किं नु रोचयतात्त्विह ॥ ४-४-३ (२८२५४)
किं त्वं नकुल कुर्वाणस्तस्य तात चरिष्यसि ।
कर्म तत्त्वं समाचक्ष्व राज्ये तस्य महीपतेः ॥ ४-४-४ (२८२५५)
नकुल उवाच। ४-४-५क्ष् (२९८३)
अश्वाध्यक्षो भविष्यामि विराटस्येति मे मतिः ।
दामग्रन्थीति नाम्नाऽहं कर्मैतत्सुप्रियं मम ॥ ४-४-५ (२८२५६)
दामग्नन्थी परिज्ञातः कुशलो दामकर्मणि ।
न मां परिभविष्यन्ति जना जात्विह कर्हिचित् ॥ ४-४-६ (२८२५७)
कुशलोत्स्म्यश्वशिक्षायां तथैवाश्वचिकित्सने ।
प्रियाश्च सततं मेऽश्वाः कुरुराजा यथा तव ॥ ४-४-७ (२८२५८)
न मां परिभविष्यन्ति किशोरा वडवास्तथा ।
न दुष्टाश्च भविष्यन्ति पृष्ठे धुरि च मद्गताः ॥ ४-४-८ (२८२५९)
द्रक्ष्यन्ति ये च मां केचिद्विराटनगरे जनाः ।
तेभ्य एवं प्रवक्ष्यामि विहरिष्याम्यहं यथा ॥ ४-४-९ (२८२६०)
पाण्डवेन ह्यहं तात अश्वेष्वधिकृतः पुरा ।
इति तस्य पुरे छन्नश्चरिष्यामि महीपते ।
इत्येतद्वः प्रतिज्ञातं विहरिष्याम्यहं यथा ॥ ४-४-१० (२८२६१)
वैशम्पायन उवाच। ४-४-११क्ष् (२९८४)
नकुलेनैवमुक्तस्तु धर्मराजोऽब्रवीद्वचः ।
बृहस्पतिसमो बुद्ध्या नयेनोशनसा समः ॥ ४-४-११ (२८२६२)
मन्त्रैर्नानाविधैर्नीतः पथ्येषु परिनिष्ठितः ।
सुप्रणीतः सुमार्गस्थो राजतन्त्रमवाप यः ॥ ४-४-१२ (२८२६३)
न चास्य स्खलितं किंचिद्ददृशुस्तद्विदो जनाः ।

सुनीतिज्ञश्च शूरश्च सर्वमन्त्रविशारदः ॥ ४-४-१३ (२८२६४)
अधिको मातुरस्माकं कुन्त्याः प्रियतमः सदा ।
सहदेव कथं कर्म तस्य राज्ञः करिष्यसि ।
किं वा त्वं तात कुर्वाणः प्रच्छन्नो विचरिष्यसि ॥ ४-४-१४ (२८२६५)
सहदेव उवाच। ४-४-१५क्ष् (२९८५)
गोसङ्ख्याता भविष्यामि विराटस्येति रोचये ।
प्रतिभोक्ता च दोग्धा च सङ्ख्यानकुशलो गवाम् ।
तन्त्रीपालेति मे नाम स्वयं प्रोक्तं भविष्यति ॥ ४-४-१५ (२८२६६)
अयोगा बहुलाः पुष्टाः क्षीरवत्यो बहुप्रजाः ।
निष्पन्नसत्त्वाः सुभृता ह्यपेतज्वरकिल्विषाः ॥ ४-४-१६ (२८२६७)
दृष्टचोरभया नित्यं व्याधिव्याघ्रविवर्जिताः ।
गावः सुसहिता राजन्निरुद्विग्ना निरामयः ॥ ४-४-१७ (२८२६८)
भविष्यन्ति मया गुप्ता विराटनगरे तदा ।
निपुणत्वं चरिष्यामि प्रीतिरत्र परा हि मे ॥ ४-४-१८ (२८२६९)
अहं हि भवता गोषु प्रहितः सतत पुरा ।
तत्र मे कौशलं सर्वमनुबद्धं विशांपते ॥ ४-४-१९ (२८२७०)
लक्षणं चरितं चैव गवां यच्चापि मङ्गलम् ।
सत्सर्वं मे सुविदितमन्यच्चापि विशांपते ॥ ४-४-२० (२८२७१)
वृषभानपि जानामि राजन्पूजितलक्षणान् ।
येषां मूत्रमुपाघ्राय अपि वन्ध्या प्रसूयते ॥ ४-४-२१ (२८२७२)
सोऽहमेवं चरिष्यामि प्रीतिरत्र परा हि मे ।
विराटनगरे गूढो रंस्येऽहं तेन कर्मणा ॥ ४-४-२२ (२८२७३)
तोषयिष्ये च राजानां मा भूच्चिन्ता तवानघ ।
न च मां वेत्स्यति परस्तत्ते रोचतु पार्थिव ।
इत्येतद्वः प्रतिज्ञातं विचरिष्याम्यहं यथा ॥ ४-४-२३ (२८२७४)
युधिष्ठिर उवाच। ४-४-२४क्ष् (२९८६)
केनात्र कर्मणा कृष्णा द्रौपदी विचरिष्यति ।
न हि किंचिद्विजानाति कर्म कर्तुं यथा स्त्रियः ॥ ४-४-२४ (२८२७५)
माल्यागन्धानलङ्कारान्वस्त्राणि विविधानि च ।
एतान्येवाभिजानाति यथाजाता च भामिनी ॥ ४-४-२५ (२८२७६)
पतिव्रता महाभागा कथं नु विचरिष्यति ।
इयं तु नः प्रिया भार्या प्राणेभ्योपि गरीयसी ॥ ४-४-२६ (२८२७७)
मातेव परिपाल्या च पूज्या ज्येष्ठा स्वसेव च ।
सुकुमारी सुशीला च राजपुत्री यशस्विनी ।
कथं वत्स्यति कल्याणी विराटनगरे सती ॥ ४-४-२७ (२८२७८)
द्रौपद्युवाच। ४-४-२८क्ष् (२९८७)

अहं वत्स्यामि राजेन्द्र निर्वृतो भव पार्थिव ।
यथा ते मत्कृते शोको न भवेन्नृपते शृणु ।
यथा तु मां न जानन्ति यत्करिष्याम्यहं प्रभो ॥ ४-४-२८ (२८२७९)
छन्ना वत्स्याम्यहं यन्मां न विजानन्ति केचन ।
वृत्तं तच्च समाख्यास्ये शर्म तेस्तु विशांपते ॥ ४-४-२९ (२८२८०)
सैरन्ध्रीजातिसंपन्ना नाम्नाऽहं व्रतचारिणी ।
भविष्यामि महाराज विराटस्येति मे मतिः ॥ ४-४-३० (२८२८१)
सैरन्ध्र्यो रक्षिताः स्त्रीणां भुजिष्याः सन्ति भारत ।
एकपत्न्यः स्त्रियश्चैता इति लोकस्य निश्चयः ॥ ४-४-३१ (२८२८२)
साऽहं ब्रुवाणा सैरन्ध्री कुशला केशकर्मणि ।
प्रमदाहरिका लोके पुरुषाणां प्रवासिनाम् ॥ ४-४-३२ (२८२८३)
युधिष्ठिरस्य वै गेहे द्रौपद्याः परिचारिका ।
उषिताऽस्मीति वक्ष्यामि पृष्टा राज्ञा च भारत ।
आत्मगुप्ता चरिष्यामि यन्मां त्वं परिपृच्छसि ॥ ४-४-३३ (२८२८४)
नाहं तत्र भविष्यामि दुर्भरा राजवेश्मनि ।
कृत्वा चैव सदा रक्षां व्रतेनैव नराधिप ॥ ४-४-३४ (२८२८५)
सुदेष्णां प्रत्युपस्थास्ये राजभार्यां यशस्विनीम् ।
सा रक्षिष्यति मां प्राप्तां मा ते भूद्दुःखमीदृशम् ॥ ४-४-३५ (२८२८६)
अथ गुप्ता चरिष्यामि युष्माभिस्तत्र तस्थुषी ।
इत्येवं वः प्रतिज्ञातं विहरिष्याम्यहं यथा ॥ ४-४-३६ (२८२८७)
युधिष्ठिर उवाच। ४-४-३७क्ष् (२९८८)
यथा नो दुर्हृदः पापा भवन्ति सुखिनः पुनः ।
कुर्यास्तथा त्वं कल्याणि लक्षयेयुर्न ते जनाः ॥ ४-४-३७ (२८२८८)
४-४-३८ (२८२८९)
कल्याणं भाषसे कृष्णे यथा कौलेयकी तथा ।
न पापमभिजानासि साध्वी साधुव्रते स्थिता ॥

विराटपर्व - अध्याय ००५
॥ श्रीः ॥
४.५. अध्यायः ५

Mahabharata - Virata Parva - Chapter Topics
पाण्डवैरिन्द्रसेनादीन्प्रति द्वारकादिगमनचोदना ॥ १ ॥
पाण्डवान्प्रति धौम्येन राजगृहवासप्रकारानुशासनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-५-० (२८२९०)
युधिष्ठिर उवाच। ४-५-०क्ष् (२९८९)
कर्माण्युक्तानि युष्माभिर्यानि तानि चरिष्यथ ।
मम चापि यथा बुद्धिरुचिता हि विनिश्चयात् ॥ ४-५-१ (२८२९१)
पुरोहितोऽयमस्माकमग्निहोत्राणि रक्षतु ।
सूतपौरोगवैः सार्धं द्रुपदस्य निवेशने ॥ ४-५-२ (२८२९२)
इन्द्रसेनमुखाश्चेमे रथानादाय केवलान् ।
यान्तु द्वारवतीं शीघ्रमिति मे वर्तते मतिः ॥ ४-५-३ (२८२९३)
इमाश्च नार्यो द्रौपद्याः सर्वाश्च परिचारिका ।
पाञ्चालानेव गच्छन्तु सूतपौरोगवैः सह ॥ ४-५-४ (२८२९४)
सर्वैरपि च वक्तव्यं न प्राज्ञायन्त पाण्डवाः ।
अर्धरात्रे महात्मानो भिक्षादान्ब्राह्मणानपि ।
गता ह्यस्मानपाहाय सर्वे द्वैतवनादिति ॥ ४-५-५ (२८२९५)
वैशम्पायन उवाच। ४-५-६क्ष् (२९९०)
एवं तेऽन्योन्यमामन्त्र्य कर्माण्युक्त्वा पृथक्पृथक् ।
धौम्यमामन्त्रयामासुः स च तान्मन्त्रमब्रवीत् ॥ ४-५-६ (२८२९६)
तानन्वशात्स धर्मात्मा सर्वधर्मविशेषवित् ।
धौम्यः पुरोहितो राजन्पाण्डवान्पुरुषर्षभान् ॥ ४-५-७ (२८२९७)
धौम्य उवाच। ४-५-८क्ष् (२९९१)
विदितं वै यथा सर्वं लोके वृत्तमिदं नृप ।
विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः ॥ ४-५-८ (२८२९८)
अतोऽहमभिवक्ष्यामि हेतुमात्रं निबोधत ।
हन्तेमां राजवसतिं राजपुत्रा ब्रवीमि वः ।
यथा राजकुलं प्राप्य चरन्प्रोष्य न रिष्यति ॥ ४-५-९ (२८२९९)
दुर्वासमेव कौरव्य जातेन कुरुवेश्मनि ।
अमानितेन मानार्हं गूढेन परिवत्सरम् ॥ ४-५-१० (२८३००)
दिष्टद्वारो लभेद्द्रष्टुं राजस्वेषु न विश्वसेत् ।
न चानुशिष्याद्राजानमपृच्छन्तं कदाचन ॥ ४-५-११ (२८३०१)
तूष्णीं त्वेनमुपासीत काले समभिपूजयेत् ॥ ४-५-१२ (२८३०२)
असूयन्ति हि राजानो जनाननृतवादिनः ।
तथैव चावमन्यन्ते मन्त्रिणं वादिनं मृषा ॥ ४-५-१३ (२८३०३)
विदिते चास्य कुर्वीत कार्याणि सुलघून्यपि ।
एवं विचरतो राज्ञि न क्षतिर्जायते क्वचित् ॥ ४-५-१४ (२८३०४)
पाण्डवाग्निरयं लोके सर्वशस्त्रमयो महान ।
भर्ता गोप्ता च भूतानां राजा पुरुषविग्रहः ॥ ४-५-१५ (२८३०५)
सर्वात्मना वर्तमानं यथा दोषो न संस्पृशेत् ।

राजानमुपतिष्ठन्तं तस्य वृत्तं निबोधत ॥ ४-५-१६ (२८३०६)
क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ।
नावमन्येत मेधावी कृशानपि कदाचन ॥ ४-५-१७ (२८३०७)
एतत्रयं च पुरुषं निर्दहेदवमानितम् ।
राजा तस्माद्बुधैर्नित्यं पूजनीयः प्रयत्नतः ॥ ४-५-१८ (२८३०८)
नातिवर्तेत मर्यादां पुरुषो राजसंमतः ।
व्यवहारं पुनर्लोके मर्यादां पण्डिता विदुः ॥ ४-५-१९ (२८३०९)
न हि पुत्रं न नप्तारं न भ्रातरमरिन्दम ।
समतिक्रान्तमर्यादं पूजयन्ति पराधिपाः ॥ ४-५-२० (२८३१०)
गच्छन्नपि परां भूतिं भूमिपालनियोजितः ।
जात्यन्ध इव मन्येत मर्यादामनुचिन्तयन् ॥ ४-५-२१ (२८३११)
धृष्टो द्वारं सदा पश्यन्न च राजसु विश्वसेत् ।
तदेवासनमन्विच्छेद्यत्र नाभिलषेत्परः ॥ ४-५-२२ (२८३१२)
यत्रोपविष्टः संकल्पं नोपहन्याद्बलीयसः ।
तदासनं राजकुले ईप्सेत पुरुषो वसन् ॥ ४-५-२३ (२८३१३)
यथैनं यत्र चासीनं शङ्कयेद्दुष्टचरिणम् ।
न तत्रोपविशेज्जातु यो राजवसतिं वसेत् ॥ ४-५-२४ (२८३१४)
स्वभूमौ काममासीत तिष्ठेद्वा राजसन्निधौ ।
न त्वेवासनमन्यस्य प्रार्थयेत कदाचन ॥ ४-५-२५ (२८३१५)
परासनगतं ह्येनं परस्य परिचारकाः ।
परिषद्यपकर्षेयुः परिहास्येत शत्रुभिः ॥ ४-५-२६ (२८३१६)
नित्यं विप्रतिषिद्धं तत्पुरस्तादासनं मतम् ।
अर्थार्थं हि यदा भृत्यो राजानमुपतिष्ठते ॥ ४-५-२७ (२८३१७)
दक्षिणं वाऽथ वामं वा भागमाश्रित्य पण्डितः ।
तिष्ठेद्विनीतवद्राजन्न पुरस्तान्न पृष्ठतः ।
राक्षिणामात्तशस्त्राणां पश्चात्स्थानं विधीयते ॥ ४-५-२८ (२८३१८)
मातृगोत्रे स्वगोत्रे वा नाम्ना शीलेन वा पुनः ।
संग्रहार्थं मनुष्याणां नित्यमाभाषिता भवेत् ॥ ४-५-२९ (२८३१९)
पूज्यमानोपि यो राज्ञा नरो न प्रतिपूजयेत् ।
नैनमाराधयेज्जातु शास्ता शिष्यानिवालसान् ॥ ४-५-३० (२८३२०)
नास्य युग्यं न पर्यङ्कं नासनं न रथं तथा ।
आरोहेत्संमतोऽस्मीति यो राजवसतिं वसेत् ॥ ४-५-३१ (२८३२१)
यो वै गृहेभ्यः प्रवसन्क्रियमाणमनुस्मरन् ।
उत्थाने नित्यसंकल्पो निस्तन्द्रीः संघतात्मवान् ॥ ४-५-३२ (२८३२२)
परीतः क्षुत्पिपासाभ्यां विहाय परिदेवनम् ।
दुःखेन सुखमन्विच्छेद्यो राजवसतिं वसेत् ॥ ४-५-३३ (२८३२३)

अन्येषु प्रेष्यमाणेषु पुरस्ताद्धीर उत्पतेत् ।
करिष्याम्यहमित्येव यः स राजसु सिध्यति ॥ ४-५-३४ (२८३२४)
उष्णे वा यदि वा शीते रात्रौ वा यदि वा दिवा ।
आदिष्टो न विकल्पेत यः स राजसु सिद्ध्यति ॥ ४-५-३५ (२८३२५)
नैव प्राप्तोऽवमन्येत सदाऽमात्यो विशारदः ।
मानं प्राप्तो न हृष्येत न व्यथेच्च विमानितः ।
ऋदुर्मृदुः सत्यवादो यः स राजसु सिद्ध्यति ॥ ४-५-३६ (२८३२६)
नैव लाभाद्धर्षमियान्न व्यथेच्च विमानितः ।
समः पूर्णतुलेव स्याद्यो राजवसतिं वसेत् ॥ ४-५-३७ (२८३२७)
अल्पेच्छो धृतिमान्राजञ्छायेवानुगतः सदा ।
दक्षः प्रदक्षिणो धीरः स राजवसतिं वसेत् ॥ ४-५-३८ (२८३२८)
इतिहासपुराणज्ञः कुशलः सत्कथासु च ।
वदान्यः सत्यवाक्वापि यो राजवसतिं वसेत् ॥ ४-५-३९ (२८३२९)
न मिथो भाषितं राज्ञो मनुष्येषु प्रकाशयेत् ।
यं चासूयन्ति राजानः पुरुषं नो वदेच्च तम् ॥ ४-५-४० (२८३३०)
नैषां कर्मसु संयुक्तो धनं किंचिदुपस्पृशेत् ।
प्राप्नुयाददानो वा बन्धं वा वधमेव वा ॥ ४-५-४१ (२८३३१)
हुल्योपस्थितयोः पश्य मम चान्यस्य चोभयोः ।
अन्यं पुष्णाति मद्धीनमिति धीरो न मुह्यति ॥ ४-५-४२ (२८३३२)
श्रेयांसं हि परित्यज्य वैद्यं कर्मणिकर्मणि ।
पापीयांसं प्रकुर्वीरञ्शीलमेषां तथाविधम् ॥ ४-५-४३ (२८३३३)
नैषां दारेषु कुर्वीत प्राज्ञो मैत्रीं कथंचन ।
रक्षणं तु न सेवेत यो राजवसतिं वसेत् ॥ ४-५-४४ (२८३३४)
यदा ह्यभिसमीक्षेत प्रेष्यं स्त्रीभिः समागतम् ।
बुद्धिः परिभवेत्तस्य राजा शङ्केत वा पुनः ॥ ४-५-४५ (२८३३५)
शङ्कितस्य पुनः स्त्रीषु कस्य भृत्यस्य भूमिपः ।
जीवितं साधु मन्येत प्रकृतिस्थो बलात्कृतः ॥ ४-५-४६ (२८३३६)
हर्षवस्तुषु चाप्यत्र वर्तमानेषु केषु चित् ।
नातिगाढं प्रहृष्येत तान्येवास्यानुपूजयेत् ॥ ४७ ॥ ४-५-४७ (२८३३७)
हर्षाद्धि मन्दः पुरुषः स्वैरं कुर्वीत वैकृतम् ।
तदस्यान्तःपुरे वृत्तमीक्षां कुर्वीत भूमिपः ॥ ४-५-४८ (२८३३८)
अन्तःपुरगतं ह्येनं स्त्रियः क्लीबाश्च सर्वतः ।
वर्तमानं यथावच्च कुत्सयेयुरसंशयम् ॥ ४-५-४९ (२८३३९)
तस्माद्गम्भीरमात्मानं कृत्वा हर्षं नियम्य च ।
नित्यमन्तःपुरे राज्ञो न वृत्तं कीर्तयेद्बहिः ॥ ४-५-५० (२८३४०)
यथा हि सुमहामन्त्रो भिद्यमानो हरेत्सुखम् ।

एवमन्तःपुरे वृत्तं श्रूयमाणं बहिर्भवेत् ॥ ४-५-५१ (२८३४१)
या तु वृत्तिरबाह्यानां बाह्यानामपि केवलम् ।
उभयेषां समस्तानां शृणु राजोपजीविनाम् ॥ ४-५-५२ (२८३४२)
न स्त्रियो जातु मन्येत बाह्यो वाभ्यन्तरेऽपि वा ।
अनुजीविनां नरेन्द्रस्तु सृजेद्धि सुमहद्भयम् ॥ ४-५-५३ (२८३४३)
मत्वाऽस्य प्रियमात्मानं राजरत्नानि राजवत् ।
अराजा राजयोग्यानि नोपयुञ्जीत पण्डितः ॥ ४-५-५४ (२८३४४)
अराजानं हि रत्नानि राजकान्तानि राजवत् ।
भुञ्जानं तं नरं राजा न तितिक्षेत जीवितम् ॥ ४-५-५५ (२८३४५)
तस्मादव्यक्तभोगेन भोक्तव्यं भूतिमिच्छता ।
तुल्यभोगं हि राजा तु भृत्यं कोपेन योजयेत् ॥ ४-५-५६ (२८३४६)
न चापत्येन संप्रीतिं राज्ञः कुर्वीत केनचित् ।
अधिक्षिप्तमनर्थं च द्वेष्यं च परिवर्जयेत् ॥ ४-५-५७ (२८३४७)
एतां हि सेवमानस्य नरसीमां चतुर्विधाम् ।
द्विधा विच्छिद्यते मूलं राजमूलोपसेविनः ॥ ४-५-५८ (२८३४८)
एतैस्तु विपरीता या नरसीमा नराधमैः ।
तथा कुर्वीत संसर्गं न विरोधं कथंचन ॥ ४-५-५९ (२८३४९)
बन्धुभिश्च नरेन्द्रस्य बलवद्भिश्च मानवैः ।
साधु मन्येत संसर्गं न विरोधं कथंचन ॥ ४-५-६० (२८३५०)
ताभ्यां तु नरसीमाभ्यां विरुद्धस्याल्पतेजसः ।
प्रथमं छिद्यते मूलं द्वितीयं जायते भयम् ॥ ४-५-६१ (२८३५१)
उद्धतानां च यो वेषः कुहकानां च यो भवेत् ।
राजवेषं च विस्पष्टं सेवमानो न वर्धते ।
इतराभ्यां तु वेषाभ्यां परिहास्येत बान्धवैः ॥ ४-५-६२ (२८३५२)
अपुंभिश्चैव पुंभिश्च स्त्रीभिः स्त्रीदर्शिभिर्नरैः ।
शक्ये सति न संभाषां जातु कुर्वीत कर्हिचित् ॥ ४-५-६३ (२८३५३)
प्रतिसंभाषमाणो हि त्रिभिरेतैरचेतनः ।
श्येनः पेशीमिवादत्ते पुरुषो भूतिमात्मनः ॥ ४-५-६४ (२८३५४)
ये च राज्ञाऽभिसत्कारं लभेरन्कारणादिव ।
तैश्च सामन्तदूतैश्च न संसज्येत कर्हिचित् ॥ ४-५-६५ (२८३५५)
न चान्याचरितां भूमिमसंदिष्टो महीपतेः ।
उपसेवेत मेधावी यो राजवसतिं वसेत् ॥ ४-५-६६ (२८३५६)
न च संदर्शने राज्ञां प्रबन्धमभिसंजपेत् ।
अपि चैतद्दरिद्राणां व्यलीकस्थानमुत्तमम् ॥ ४-५-६७ (२८३५७)
अर्थकामा च या नारी राजानं स्यादुपस्थिता ।
अनुजीवी तथायुक्तां निध्यायन्दुष्यते च सः ॥ ४-५-६८ (२८३५८)

तस्मान्नारीं न निध्यायेत्तथायुक्तां विचक्षणः ।
तथा क्षुतं च वातं च निष्ठीवं चाचरेच्छनैः ॥ ४-५-६९ (२८३५९)
न नर्मसु हसेज्जातु मूढवृत्तिर्हि सा स्मृता ।
स्मितं तु मृदुपूर्वेण दर्शयीत प्रसादजम् ॥ ४-५-७० (२८३६०)
न चाक्षौ न भुजौ जातु न च वाक्यं समाक्षिपेत् ।
न च तिर्यगवेक्षेत चक्षुर्भ्यां सम्यगाचरेत् ॥ ४-५-७१ (२८३६१)
भ्रुकुटिं च न कुर्वीत न चाङ्गुष्ठैर्लिखेन्महीम् ।
न च गाढं विजृम्भेत जातु राज्ञः समीपतः ॥ ४-५-७२ (२८३६२)
न प्रशंसेन्ना चासूयेत्प्रियेषु च हितेषु च ।
स्तूयमानेषु वा तत्र दूष्यमानेषु वा पुनः ॥ ४-५-७३ (२८३६३)
अथ संदृश्यमानेषु प्रियेषु च हितेषु च ।
श्रूयमाणेषु वाक्येषु वर्णयेदमृतं यथा ॥ ४-५-७४ (२८३६४)
न राज्ञः प्रतिकूलानि सेवमानः सुखी भवेत् ।
पुत्रो वा यदि वा भ्राता यद्यप्यात्मसमो भवेत् ॥ ४-५-७५ (२८३६५)
अप्रमत्तो हि राजानं रञ्जयेच्छीलसंपदा ।
उत्थानेन तु मेधावी शौचेन विविधेन च ॥ ४-५-७६ (२८३६६)
स्नानं हि वस्त्रशुद्धिश्च शारीरं शौचमुच्यते ।
असक्तिः प्राकृतार्थेषु द्वितीयं शौचमुच्यते ॥ ४-५-७७ (२८३६७)
राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्नृपः ।
य एतैः स्तूयते शब्दैः कस्तं नार्चितुमर्हति ॥ ४-५-७८ (२८३६८)
तस्माद्भक्त्या च युक्तः सन्सत्यवादी जितेन्द्रियः ।
मेधावी धृतिमान्प्राज्ञः संश्रयीत महीपतिम् ॥ ४-५-७९ (२८३६९)
कृतज्ञं प्राज्ञमक्षुद्रं दृढभक्तिं जितेन्द्रियम् ।
वर्धमानं स्थितं स्थाने संश्रयीत महीपतिम् ॥ ४-५-८० (२८३७०)
एष वः समुदाचारः समुद्दिष्टो यथाविधि ।
यथार्थान्संप्रपत्स्यन्ते पार्थ राजोपजीविनः ॥ ४-५-८१ (२८३७१)
संवत्सरमिमं तावदेवंशीला बुभूषथः ।
ततः स्वविषयं प्राप्य यथाकामं चरिष्यथ ॥ ४-५-८२ (२८३७२)
वैशम्पायन उवाच। ४-५-८३क्ष् (२९९२)
तं तथेत्यब्रुवन्पार्थाः पितृकल्पं यशस्विनम् ।
प्रहृष्टाश्चाभिवाद्यैनमुपातिष्ठन्परंतपाः ॥ ४-५-८३ (२८३७३)
तेषां प्रतिष्ठमानानां मन्त्रांश्च ब्राह्मणोऽजपत् ।
भवाय राज्यलाभाय वीर्याय विजयाय च ॥ ४-५-८४ (२८३७४)
ततोऽब्रवीदसौ विप्रो वाचमाशीः प्रयुज्य च ।
स्वद्रव्यप्रतिलाभाय शत्रूणां मर्दनाय च ॥ ४-५-८४ (२८३७५)
स्वस्ति वोस्तु शिवः पन्था द्रक्ष्यामि पुनरागतान् ।

इत्युक्ता हृष्टमनसो गुरुणा तेन धीमता। ४-५-८५ (२८३७६)
युधिष्ठिरमुखाः सर्वे गन्तुं समुपचक्रमुः ॥ ॥ ४-५-८६ (२८३७७)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-५-१५ पाण्डवाग्निरिति पाण्डवेति छेदः । राजा
पुरुषविग्रहोऽग्निरित्यन्वयः ॥
१५ ॥
४-५-६१ प्रथमं छिद्यते निद्रा इति थो धो पाठः ॥
६१ ॥

विराटपर्व - अध्याय ००६
॥ श्रीः ॥
४.६. अध्यायः ६

Mahabharata - Virata Parva - Chapter Topics
पाण्डवैर्धौम्यविसर्जनपूर्वकं विराटनगरसमीपगमनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-६-० (२८३७८)
वैशम्पायन उवाच। ४-६-०क्ष् (२९९३)
तेऽग्निं प्रदक्षिणं कृत्वा ब्राह्मणं च पुरोहितम् ।
अभिवाद्य ततः सर्वे प्रस्थातुमुपचक्रमुः ॥ १ ॥ ४-६-१ (२८३७९)
युधिष्ठिर उवाच। ४-६-२क्ष् (२९९४)
अनुशिष्टोस्मि भद्रं ते नैतद्वक्ताऽस्ति कश्चन ।
कुन्तीमृते मातरं नः पितरं च यशस्विनम् ॥ २ ॥ ४-६-२ (२८३८०)
यदेवानन्तरं कार्यं तद्भवान्वक्तुमर्हति ।
तारणाय तु दुःखस्य प्रस्थानाय भवाय च ॥ ३ ॥ ४-६-३ (२८३८१)
वैशम्पायन उवाच। ४-६-४क्ष् (२९९५)
तेषां प्रतिष्ठमानानां धौम्यो मन्त्रानथाजपत् ।
सर्वविघ्नप्रशमनानर्थसिद्धिकरांस्तथा ।
ततः पावकमुज्ज्वाल्य मन्त्रहव्यपुरुस्कृतम् ॥ ४ ॥ ४-६-४ (२८३८२)
याज्ञसेनीं पुरस्कृत्य सर्व एव महारथाः ।
प्राद्रवन्सह धौम्येन बद्धशस्त्रा वनाद्वनम् ॥ ५ ॥ ४-६-५ (२८३८३)

ते वीरा बद्धनिस्त्रिंशा धनुर्बाणकलापिनः ।
अगच्छन्भीमधन्वानः काम्यकाद्यमुनां नदीम् ॥ ६ ॥ ४-६-६ (२८३८४)
उत्तरेण दशार्णानां पाञ्चालान्दक्षिणेन तु ।
अन्तरेण यकृल्लोम्नः शूरसेनांश्च पाण्डवाः ॥ ७ ॥ ४-६-७ (२८३८५)
ते तस्या दक्षिणं तीरमन्वगच्छन्पदातयः ।
ततः प्रत्यक्प्रयातास्ते संक्रामन्तो वनाद्वनम् ॥ ८ ॥ ४-६-८ (२८३८६)
वसाना वनदुर्गेषु रमणीयेषु धन्विनः ।
पल्वलेषु च रम्येषु नदीनां संगमेषु च ॥ ९ ॥ ४-६-९ (२८३८७)
द्रुमान्नानाविधाकारान्नानाविधलताकुलान् ।
कुसुमाढ्यान्मनःकान्ताञ्शुभगन्धान्मनोरमान् ॥ १० ॥ ४-६-१० (२८३८८)
पार्था निरीक्षमाणाश्च तान्द्रुमान्पुष्पशालिनः ।
जिघ्रन्तः पुष्पगन्धांश्च फलगन्धान्मनोरमान् ॥ ११ ॥ ४-६-११ (२८३८९)
विध्यन्तो मृगजातानि महेष्वासा महाबलाः ।
उषित्वा द्वादशसमा वने परपुरंजयाः ।
लुब्धान्ब्रुवाणा मात्स्यस्य विषयं प्राविशंस्तदा ॥ १२ ॥ ४-६-१२ (२८३९०)
तत्र धौम्यं महेष्वासाः पाण्डवेया व्यसर्जयन् ।
अग्निहोत्रं परिचरन्सोऽबुद्धोऽवसदाश्रमे ॥ १३ ॥ ४-६-१३ (२८३९१)
ततस्तेषु प्रयातेषु पाण्डवेषु महात्मसु ।
इन्द्रसेनमुखाश्चैव यथोक्तं प्राप्य निर्वृताः ।
रथानश्वांश्च रक्षन्तः सुखमूषुः सुसंवृताः ॥ १४ ॥ ४-६-१४ (२८३९२)
ततो जनपदं प्राप्य कृष्णा राजानमब्रवीत् ॥ १५ ॥ ४-६-१५ (२८३९३)
पश्यैकपद्यो दृश्यन्ते क्षेत्रे गोष्ठं समाश्रिताः ।
वृक्षांश्चोपवनोपेतान्ग्रामाणां नगरस्य च ॥ १६ ॥ ४-६-१६ (२८३९४)
व्यक्तं दूरे विराटम ाआजधानी भविष्यति ।
वसामेहापरां रात्रिं बलवान्मे परिश्रमः ॥ १७ ॥ ४-६-१७ (२८३९५)
युधिष्ठिर उवाच। ४-६-१८क्ष् (२९९६)
इमां कमलपत्राक्षीं द्रौपदीं माद्रिनन्दन ।
मुहूर्तं परिगृह्यैनां घाहुभ्यां नकुल व्रज ॥ १८ ॥ ४-६-१८ (२८३९६)
ततोऽदूरे विराटस्य नगरं भरतर्षभ ।
राजधान्यां निवत्स्यामः प्रमुक्तमिव नो वनम् ॥ १९ ॥ ४-६-१९ (२८३९७)
नकुल उवाच। ४-६-२०क्ष् (२९९७)
पूर्वाह्ले मृगयां कृत्वा मया विद्धा मृगा वने ।
अटवी च मया दूरं धृता मृगवधेप्सुना ॥ २० ॥ ४-६-२० (२८३९८)
विषमा ह्यतिदुर्गा च वेगवत्परिधावता ।
सोहं धर्माभितप्तो वै नैनामादातुमुत्सहे ॥ २१ ॥ ४-६-२१ (२८३९९)
युधिष्ठिर उवाच। ४-६-२२क्ष् (२९९८)

सहदेव त्वमादाय मुहूर्तं द्रौपदीं नय ।
राजधान्यां निवत्स्यामः सुमुक्तमिव नो वनम् ॥ २२ ॥ ४-६-२२ (२८४००)
सहदेव उवाच । ४-६-२३क्ष् (२९९९)
अहमप्यस्मि तृषितः क्षुधया परिपीडितः ।
परिश्रान्तश्च भद्रं ते नैनामादातुमुत्सहे ॥ २३ ॥ ४-६-२३ (२८४०१)
युधिष्ठिर उवाच । ४-६-२४क्ष् (३०००)
एहि वीर विशालाक्ष वीरसिंह इवार्जुन ।
इमां कमलपत्राक्षीं द्रौपदीं द्रुपदात्मजाम् ॥ २४ ॥ ४-६-२४ (२८४०२)
परिगृह्य मुहूर्तं त्वं बाहुभ्यां कुशलं व्रज ।
राजधान्यां निवत्स्यामः प्रमुक्तमिव नो वनम् ॥ २५ ॥ ४-६-२५ (२८४०३)
वैशम्पायन उवाच। ४-६-२६क्ष् (३००१)
गुरोर्वचनमाज्ञाय संप्रहृष्टो जितेन्द्रियः ।
बाहुभ्यां परिगृह्याथ राजपुत्रीमनिन्दिताम् ।
प्रवव्राज महाबाहुरर्जुनः प्रियदर्शनाम् ॥ २६ ॥ ४-६-२६ (२८४०४)
जटिलो वल्कलधरः शततूणीधनुर्धरः ।
स्कन्धे कृत्वा वरारोहां बालामायतलोचनाम् । ४-६-२७ (२८४०५)
आनीय नगराभ्याशमवातारयदर्जुनः ॥ २७ ॥ ॥ ४-६-२८ (२८४०६)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

विराटपर्व - अध्याय ००७
॥ श्रीः ॥
४.७. अध्यायः ७

Mahabharata - Virata Parva - Chapter Topics
पाण्डवैर्वनमध्ये श्मशानसंनिहिते शमीवृक्षे स्वायुधनिक्षेपः ॥ १ ॥
तथा स्वेषां साङ्केतिकनामकल्पनेन विराटनगरपरिसरगमनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-७-० (२८४०७)
वैशम्पायन उवाच। ४-७-०क्ष् (३००२)
स राजधानीं संप्राप्य पार्थिवोऽर्जुनमब्रवीत् ।
इमानि पुरुषव्याघ्र आयुधानि परंतप ।
कस्मिन्न्यासयितव्यानि गुप्तिश्चैषां कथं भवेत् ॥ १ ॥ ४-७-१ (२८४०८)
सायुधा हि वयं तात प्रवेक्ष्यामः पुरं यदि ।

समुद्वेगं जनस्यास्य करिष्यामो न संशयः ॥ २ ॥ ४-७-२ (२८४०९)
गाण्डीवं हि नरव्याघ्र त्रिषु लोकेषु विश्रुतम् ।
कथं नाविष्कृताः स्यामो धार्तराष्ट्रस्य मारिष ॥ ३ ॥ ४-७-३ (२८४१०)
यदीद ॥ धनुरादाय चरेम सजने पुरे ।
क्षिप्र नः प्रतिजानीयुर्मनुष्या नात्र संशयः ॥ ४ ॥ ४-७-४ (२८४११)
एकस्मिन्नपि विज्ञाते समयं नो व्यतीत्य च ।
भूयो द्वादशवर्षाणि प्रविशेम वनं वयम् ॥ ५ ॥ ४-७-५ (२८४१२)
तस्मात्सर्वाणि शस्त्राणि प्रच्छाद्यान्यत्र यत्र वा ।
प्रविशेम पुरश्रेष्ठं तथा सम्यक्कृतं भवेत् ॥ ६ ॥ ४-७-६ (२८४१३)
वैशम्पायन उवाच। ४-७-७क्ष् (३००३)
अजातशत्रोर्वचनं श्रुत्वा चैव महायशाः ।
उवाच धर्मपुत्रं तमर्जुनः परवीरहा ॥ ७ ॥ ४-७-७ (२८४१४)
इयं वने मनुष्येन्द्र महती दृश्यते शमी ।
भीमशाखा दुरारोहा श्मशानस्य समीपतः ॥ ८ ॥ ४-७-८ (२८४१५)
उत्पथे चापि जातेयं मनुष्यैर्न निषेव्यते ।
विपुलाऽऽकीर्णशाखा च वायसैरुपसेविता ॥ ९ ॥ ४-७-९ (२८४१६)
स्नेहानुबद्धां पश्यामि दुरारोहामिमां शमीम् ॥ १० ॥ ४-७-१० (२८४१७)
समीपे च श्मशानस्य गृहं नास्य विशेषतः ।
समासज्यायुधान्यस्यां गच्छामो नगरं नृप ॥ ११ ॥ ४-७-११ (२८४१८)
न चास्यां चारयिष्यन्ति मनुष्याः पार्थ केचन ॥ १२ ॥ ४-७-१२ (२८४१९)
धनुर्भिः पुरुषं कृत्वा चर्मकेशास्थिसंवृतम् ।
उद्बन्धमिव कृत्वा च धनुर्ज्यापाशसंवृतम् ।
अस्यामायुधमासज्य गच्छाम नगरं वयम् ॥ १३ ॥ ४-७-१३ (२८४२०)
एवं परिहरिष्यन्ति मनुष्या वनचारिणः ।
अत्रैवं नावबुध्यन्ते मनुष्याः केचिदायुधम् ॥ १४ ॥ ४-७-१४ (२८४२१)
वैशम्पायन उवाच । ४-७-१५क्ष् (३००४)
एवमुक्त्वा स राजानं धर्मात्मानं धनञ्जयः ।
प्रचक्रमे निधानाय शस्त्राणां भरतर्षभ ॥ १५ ॥ ४-७-१५ (२८४२२)
तानि सर्वाणि संनह्य पञ्च पञ्चाचलोपमाः ।
आयुधानि कलापांश्च निस्त्रिंशानतुलप्रभान् ॥ १६ ॥ ४-७-१६ (२८४२३)
ततो युधिष्ठिरो राजा सहदेवमुवाच ह ।
आरुह्येमां शमीं वीर निधत्स्वेहायुधानि नः ॥ १७ ॥ ४-७-१७ (२८४२४)
इति संदिश्य तं पार्थः पुनरेव धनञ्जयम् ।
अब्रवीदायुधानीह निधातुं भरतर्षभः ॥ १८ ॥ ४-७-१८ (२८४२५)
वैशम्पायन उवाच। ४-७-१९क्ष् (३००५)
येन देवान्मनुष्यांश्च पिशाचोरगराक्षसान् ।

निवातकवचांश्चापि पौलोमांश्च परंतपः ।
कालकेयांश्च दुर्धाषान्सर्वांश्चैकरथोऽजयत् ॥ १९ ॥ ४-७-१९ (२८४२६)
स्फीताञ्जनपदांश्चान्यानजयत्कुरुनन्दनः ।
तदुदग्रं महाघोरं सपत्नगणसूदनम् ।
अपज्यमकरोत्पार्थो गाण्डीवं च भयंकरम् ॥ २० ॥ ४-७-२० (२८४२७)
येन वीरः कुरुक्षेत्रमभ्यरक्षत्परंतपः ।
जृम्भिते च धनुःश्रेष्ठे न्यासार्थं नृपसत्तमः ॥ २१ ॥ ४-७-२१
(२८४२८)
धर्मपुत्रो महातेजाः सर्वलोकवशंकरम् ।
भुजङ्गभोगसदृशं मणिकाञ्चनभूषितम् ॥ २२ ॥ ४-७-२२ (२८४२९)
वित्रासनं दानवानां राक्षसानां च नित्यशः ।
धनूरत्नं महातेजा जृम्भयामास पाण्डवः ॥ २३ ॥ ४-७-२३ (२८४३०)
पाञ्चालान्येन संग्रामे भीमसेनोऽजयत्पुरा ।
प्रत्यषेधद्बहूनेकः सपत्नांश्चापि दिग्जये ॥ २४ ॥ ४-७-२४ (२८४३१)
निशम्य यस्य विष्कारं विद्रवन्ति रणे परे ।
पर्वतस्येव दीर्णस्य विस्फोटमशनेरिव ॥ २५ ॥ ४-७-२५ (२८४३२)
सैन्धवं येन राजानं जित्वा क्रुद्धः परामृशत् ।
येन क्रोधवशाञ्जघ्ने पर्वते गन्धमादने ॥ २६ ॥ ४-७-२६ (२८४३३)
दिव्यं सौगन्धिकं पुष्पं येनाजैषीत्स पाण्डवः ।
त्रिगर्तान्येन संग्रामे जित्वा त्रैगर्तमानयत् ॥ २७ ॥ ४-७-२७ (२८४३४)
इन्द्राशनिसमस्पर्शं वज्रहाटकभूषितम् ।
ज्यापाशं धनुषस्तस्य भीमसेनोऽवतारयत् ॥ २८ ॥ ४-७-२८ (२८४३५)
नकुलं पुनराहूय धर्मराजो युधिष्ठिरः ।
उवाच येन संग्रामे सर्वशत्रूञ्जिघांससि ॥ २९ ॥ ४-७-२९ (२८४३६)
सुराष्ट्राञ्जितवान्येन शार्ङ्गगाण्डीवसन्निभम् ।
सुवर्णविकृतं सारमिन्द्रायुधनिभं वरम् ॥ ३० ॥ ४-७-३० (२८४३७)
तवानुरूपं सुकृतं चापमेतदलङ्कृतम् ।
तद्ध्वंसयित्वा ज्यापाशं निधातुं धनुराहर ॥ ३१ ॥ ४-७-३१ (२८४३८)
वैशम्पायन उवाच। ४-७-३२क्ष् (३००६)
अजयत्पश्चिमामाशां धनुषा येन पाण्डवः ।
माद्रीपुत्रो महाबाहुस्ताम्रास्यो मितभाषिता ॥ ३२ ॥ ४-७-३२ (२८४३९)
तस्य मौर्वीमपाकर्षच्छूरः संक्रन्दनो युधि ।
कुले नास्ति समो रूपे यस्येति नकुलः स्मृतः ॥ ३३ ॥ ४-७-३३ (२८४४०)
सहदेवं च संप्रेक्ष्य पुनर्धर्मसुतोऽब्रवीत् ।
कलिङ्गान्द्राक्षिणात्यांश्च मागधांश्चाजिशोभनः ॥ ३४ ॥ ४-७-३४ (२८४४१)
येनैव शत्रून्समरे अधाक्षीररिमर्दन ।

तत्स्रंसयित्वा ज्यापाशं निधातुं धनुराहर ॥ ३५ ॥ ४-७-३५ (२८४४२)
वैशम्पायन उवाच। ४-७-३६क्ष् (३००७)
दक्षिणां दक्षिणाचारो दिशं येनाजयत्प्रभुः ।
अपज्यमकरोद्वीरः सहदेवस्तदायुधम् ॥ ३६ ॥ ४-७-३६ (२८४४३)
दीप्तान्खण्डांश्च सुदृढान्सुतीक्ष्णान्कनकत्सरून् ।
विविधान्क्षुरनाराचान्निस्त्रिंशांश्च शरानपि ।
आयुधानि कलापांश्च गदाश्च निदधुः सह ॥ ३७ ॥ ४-७-३७ (२८४४४)
अथाब्रवीद्धर्मराजः सहदेवं परन्तपः ।
आरुह्येमां शमीं वीर निधत्स्वेहायुधानि नः ॥ ३८ ॥ ४-७-३८ (२८४४५)
इदं गोमृगमभ्याशे गतसत्वमचेतनम् ।
एतदुत्कृत्य वै वीर धनूंषि परिवेष्टय ॥ ३९ ॥ ४-७-३९ (२८४४६)
एवमुक्तो महाबाहुः सहदेवो यथोक्तवत् ।
शमीमारुह्य त्वरितो धनूंषि परिवेष्टयत् ॥ ४० ॥ ४-७-४० (२८४४७)
शीतवातातपभयाद्दर्पत्राणाय दुर्जयः ।
तानि वीरो यथा जानन्निरावाधानि सर्वशः ।
पुनः पुनः सुसंवेष्ट्य कृत्वा सुकृतमावरम् ॥ ४१ ॥ ४-७-४१ (२८४४८)
यत्र चापश्यत स वै तिरोवर्षाणि वर्षति ।
तत्र तानि दृढैः पाशैः सुगाढं पर्यवन्धत ॥ ४२ ॥ ४-७-४२ (२८४४९)
ततः परमदूरस्थमुञ्छवृत्तिकलेवरम् ।
प्रायोपवेशनाच्छुष्कं स्नायुचर्मास्थिसंयुतम् ॥ ४३ ॥ ४-७-४३ (२८४५०)
तच्चानीय धनुर्मध्ये निबबन्धु पाण्डवाः ।
उपायकुशलाः सर्वे प्रणदन्तः समब्रुवन् ॥ ४४ ॥ ४-७-४४ (२८४५१)
अस्य बद्धस्य दौर्गन्ध्यान्मनुष्या वनचारिणः ।
दूरात्परिहरिष्यन्ति सशवेयं शमी इति ॥ ४५ ॥ ४-७-४५ (२८४५२)
अथाब्रवीन्महाराजो धर्मात्मा स युधिष्ठिरः ।
रज्जुभिः सुकृतं प्राज्ञ विनिर्वध्नीहि पाण्डव ॥ ४६ ॥ ४-७-४६ (२८४५३)
यानि चात्र विशालानि रूढमूलानि मन्यसे ।
तेषामुपरि बध्नीहि इदं विप्रकलवरम् ॥ ४७ ॥ ४-७-४७ (२८४५४)
वैशम्पायन उवाच। ४-७-४८क्ष् (३००८)
तच्छ्रुत्वा सहदेवस्तु पर्यबध्नत तच्छवम् ॥ ४८ ॥ ४-७-४८ (२८४५५)
युधिष्ठिरः शुचिर्भूत्वा मनसाऽभिप्रणम्य च ।
ब्रह्माणामिन्द्रं वरदं कुबेरं वरुणानिलौ ॥ ४९ ॥ ४-७-४९ (२८४५६)
रुद्रं यमं च विष्णुं च सोमार्कौ धर्ममेव च ।
पृथिवीमन्तरिक्षं च दिशश्चोपदिशस्तथा ।
वसूंश्च मरुतश्चैव ज्वलनं चातितेजसम् ॥ ५० ॥ ४-७-५० (२८४५७)
दिवाचरा रात्रिचराणि वाऽपि यानीह भूतान्यनुकीर्तितानि ।

तेभ्यो नमस्कृत्य च सुव्रतेभ्यः प्रणम्य तेषां शरणं गतोऽहम्
॥ ५१ ॥ ४-७-५१ (२८४५८)
सर्वायुधानीह महाबलानि न्यासं महादेवसमीपतो वै ।
न्यस्याम्यहं वायुसमीपतश्च वनस्पतीनां च सपर्वतानाम् ॥ ५२
॥ ४-७-५२ (२८४५९)
एष न्यासो मया दत्तः सोमसूर्यानिलान्तिके ।
मम पार्थस्य वा देयं पूर्णे वर्षे त्रयोदशे ॥ ५३ ॥ ४-७-५३ (२८४६०)
नेदं भीमे प्रदातव्यमयं क्रुद्धो वृकोदरः ।
आमर्षान्नित्यसंक्रुद्धो धृतराष्ट्रसुतान्प्रति ।
अपूर्णकाले प्रहरेत्क्रोधसंजातमत्सरः ॥ ५४ ॥ ४-७-५४ (२८४६१)
पुनः प्रवेशो नः स्यात्तु वनवासाय सर्वदा ।
समये परिपूर्णे तु धार्तराष्ट्रान्निहन्महे ॥ ५५ ॥ ४-७-५५ (२८४६२)
एष चार्थश्च धर्मश्च कामः कीर्तिरलं यशः ।
मदायत्तमिदं सर्वं जीवितं च न संशयः ॥ ५६ ॥ ४-७-५६ (२८४६३)
वैशम्पायन उवाच। ४-७-५७ (२८४६४)
दैवतेभ्यो नमस्कृत्य शमीं कृत्वा प्रदक्षिणम् ।
नगरं गन्तुमायाताः सर्वे ते भ्रातरः सह ॥ ५७ ॥ ४-७-५७ (२८४६५)
आगोपालाविपालेभ्यः कर्षकेभ्यः परंतप ।
आजग्मुर्नगराभ्याशं दर्शयन्तः पुनः पुनः ॥ ५८ ॥ ४-७-५८ (२८४६६)
अशीतिशतवर्षेयं माताऽस्माकमिहान्तिके ।
बहुकालपरीणामा मृत्योस्तु वशमेयुषी ।
न चाग्निसंस्कारमियं प्रापिता कुलधर्मतः ॥ ५९ ॥ ४-७-५९ (२८४६७)
यः समासाद्यते कश्चित्तस्मिन्देशे यदृच्छया ।
तमेवमूचुर्धर्मज्ञाः कुलधर्मो न ईदृशः ॥ ६० ॥ ४-७-६० (२८४६८)
विश्रावयन्तस्ते हृष्टा दिशः सर्वा व्यनादयन् ।
स्वर्गतेयमिहास्माकं जननी शोकविह्वला ॥ ६१ ॥ ४-७-६१ (२८४६९)
वने विचरमाणानां लुब्धानां वनचारिणाम् ।
कुलधर्मोऽयमस्माकं पूर्वैराचरितः पुरा ॥ ६२ ॥ ४-७-६२ (२८४७०)
एवं ते सुकृतं कृत्वा समन्तादवघुष्य च ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रावुभावपि ॥ ६३ ॥ ४-७-६३ (२८४७१)
युधिष्ठिरश्च कृष्णा च राजपत्नी सुमध्यमा ।
ततो यथासमाज्ञप्तं नगरं प्राविशंस्तदा ॥ ६४ ॥ ४-७-६४ (२८४७२)
मत्स्यराज्ञो विराटस्य समीपं वस्तुमञ्जसा ।
अज्ञातचर्यां चरितुं वर्षं राष्ट्रे त्रयोदशम् ॥ ६५ ॥ ४-७-६५ (२८४७३)
अतश्छन्नानि नामानि चकारैषां युधिष्ठिरः ।
जयो जयेशो विजयो जयत्सेनो जयद्बलः। ४-७-६६ (२८४७४)

आपत्सु नामभिस्त्वेतैः समाह्वामः परस्परम् ॥ ६६ ॥
ततो यथाप्रतिज्ञाभिः प्राविशन्नगरं महत्। ४-७-६७ (२८४७५)
अज्ञातचर्यां वत्स्यन्तो राष्ट्रे वर्षं त्रयोदशम् ॥ ६७ ॥ ॥
४-७-६८ (२८४७६)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

विराटपर्व - अध्याय ००८
॥ श्रीः ॥
४.८. अध्यायः ८

Mahabharata - Virata Parva - Chapter Topics
विराटनगरं गच्छता युधिष्ठिरेण दुर्गायाः स्तवनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-८-० (२८४७७)
श्वैशम्पायन उवाच। ४-८-०क्ष् (३००९)
विराटनगरं रम्यं गच्छमानो युधिष्ठिरः ।
अस्तुवन्मनसा देवीं दुर्गां त्रिभुवनेश्वरीम् ॥ १ ॥ ४-८-१ (२८४७८)
यशोदागर्भसंभूतां नारायणवरप्रियाम् ।
नन्दगोपकुले जातां मङ्गल्यां कुलवर्धनीम् ॥ २ ॥ ४-८-२ (२८४७९)
कंसविद्रावणकरीमसुराणां क्षयंकरीम् ।
शिलातटविनिक्षिप्तामाकाशं प्रति गामिनीम् ॥ ३ ॥ ४-८-३ (२८४८०)
वासुदेवस्य भगिनीं दिव्यमाल्यविभूषिताम् ।
दिव्याम्बरधरां देवीं खड्गखेटकधारिणीम् ॥ ४ ॥ ४-८-४ (२८४८१)
भारावतरणे पुण्ये ये स्मरन्ति सदा शिवाम् ।
तान्वै तारयते पापात्पङ्के गामिव दुर्बलाम् ॥ ५ ॥ ४-८-५ (२८४८२)
स्तोतुं प्रचक्रमे भूयो विविधैः स्तोत्रसंभवैः ।
आमन्त्र्य दर्शनाकाङ्क्षी राजा देवीं सहानुजः ॥ ६ ॥ ४-८-६ (२८४८३)
नमोस्तु वरदे कृष्णे कुमारि ब्रह्मचारिणि ।
बालार्कसदृशाकारे पूर्णचन्द्रनिभानने ॥ ७ ॥ ४-८-७ (२८४८४)
चतुर्भुजे चतुर्वक्त्रे पीनश्रोणिपयोधरे ।
मयूरपिच्छवलये केयूराङ्गदधारिणि ॥ ८ ॥ ४-८-८ (२८४८५)
भासि देवि यथा पद्मा नारायणपरिग्रहः ।
स्वरूपं ब्रह्मचर्यं च विशदं तव खेचरि ॥ ९ ॥ ४-८-९ (२८४८६)

कृष्णच्छविसमा कृष्णा संकर्षणसमानना ।
बिभ्रती विपुलौ बाहु शक्रध्वजसमुच्छ्रयौ ॥ १० ॥ ४-८-१० (२८४८७)
पात्री च पङ्कजी घण्टी स्त्री विशुद्धा च या भुवि ।
पाशं धनुर्महाचक्रं विविधान्यायुधानि च ॥ ११ ॥ ४-८-११ (२८४८८)
कुण्डलाभ्यां सुपूर्णाभ्यां कर्णाभ्यां च विभूषिता ।
चन्द्रविस्पर्धिना देवि मुखेन त्वं विराजसे ॥ १२ ॥ ४-८-१२ (२८४८९)
मुकुटेन विचित्रेण केशबन्धेन शोभिना ।
भुजङ्गाभोगवासेन श्रोणिसूत्रेण राजता ॥ १३ ॥ ४-८-१३ (२८४९०)
विभ्राजसे चाऽऽबद्धेन भोगेनेवेह मन्दरः ।
ध्वजेन शिखिपिच्छानामुच्छ्रितेन विराजसे ॥ १४ ॥ ४-८-१४ (२८४९१)
कौमारं व्रतमास्थाय त्रिदिवं पावितं त्वया ।
तेन त्वं स्तूयसे देवि त्रिदशैः पूज्यसेऽपि च ॥ १५ ॥ ४-८-१५ (२८४९२)
त्रैलोक्यरक्षणार्थाय महिषासुरनाशिनि ।
प्रसन्ना मे सुरश्रेष्ठे दयां कुरु शिवा भव ॥ १६ ॥ ४-८-१६ (२८४९३)
जया त्वं विजया चैव संग्रामे च जयप्रदा ।
ममापि विजयं देहि वरदा त्वं च सांप्रतम् ॥ १७ ॥ ४-८-१७ (२८४९४)
विन्ध्ये चैव नगश्रेष्ठे तव स्थानं हि शाश्वतम् ।
कालि कालि महाकालि शीधुमांसपशुप्रिये ॥ १८ ॥ ४-८-१८ (२८४९५)
कृतानुयात्रा भूतैस्त्वं वरदा कामचारिणी ।
भारावतारे ये च त्वां संस्मरिष्यन्ति मानवाः ॥ १९ ॥ ४-८-१९ (२८४९६)
प्रणमन्ति च ये त्वां हि प्रभाते तु नरा भुवि ।
न तेषां दुर्लभं किंचित्पुत्रतो धनतोपि वा ॥ २० ॥ ४-८-२० (२८४९७)
दुर्गात्तारयसे दुर्गे तत्त्वं दुर्गा स्मृता जनैः ।
कान्तारेष्ववसन्नानां मग्नानां च महार्णवे ।
दस्युभिर्वा निरुद्धानां त्वं गतिः परमा नृणाम् ॥ २१ ॥ ४-८-२१ (२८४९८)
जलप्रतरणे चैव कान्तारेष्वटवीषु च ।
ये स्मरन्ति महादेवि न च सीदन्ति ते नराः ॥ २२ ॥ ४-८-२२ (२८४९९)
त्वं कीर्तिः श्रीर्धृतिः सिद्धिर्ह्रीर्विद्या संततिर्मतिः ।
संध्या रात्रिः प्रभा निद्रा ज्योत्स्ना कांतिःक्षमादया ॥ २३ ॥ ४-८-२३ (२८५००)
नृणां च बन्धनं मोहं पुत्रनाशं धनक्षयम् ।
व्याधिं मृत्युं भयं चैव पूजिता नाशयिष्यसि ॥ २४ ॥ ४-८-२४ (२८५०१)
सोहं राज्यात्परिभ्रष्टः शरणं त्वां प्रपन्नवान् ।
प्रणतश्च यथा मूर्ध्ना तव देवि सुरेश्वरि ॥ २५ ॥ ४-८-२५ (२८५०२)
त्राहि मां पद्मपत्राक्षि सत्ये सत्या भवस्व नः ।
शरणं भव मे दुर्गे शरण्ये भक्तवत्सले ॥ २६ ॥ ४-८-२६ (२८५०३)
एवं स्तुता हि सा देवी दर्शयामास पाण्डवम् ।

उपगम्य तु राजानमिदं वचनमब्रवीत् ॥ २७ ॥ ४-८-२७ (२८५०४)
देव्युवाच । ४-८-२८क्ष् (३०१०)
शृणु राजन्महाबाहो मदीयं वचनं प्रभो ।
भविष्यत्यचिरादेव संग्रामे विजयस्तव ॥ २८ ॥ ४-८-२८ (२८५०५)
मम प्रसादान्निर्जित्य हत्वा कौरववाहिनीम् ।
राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं पुनः ॥ २९ ॥ ४-८-२९ (२८५०६)
भ्रातृभिः सहितो राजन्प्रीतिं प्राप्स्यसि पुष्कलाम् ।
मत्प्रसादाच्च ते सौख्यमारोग्यं च भविष्यति ॥ ३० ॥ ४-८-३० (२८५०७)
ये च संकीर्तयिष्यन्ति लोके विगतकल्मषाः ।
तेषां तुष्टा प्रदास्यामि राज्यमायुर्वपुः सुतम् ॥ ३१ ॥ ४-८-३१ (२८५०८)
प्रवासे नगरे वाऽपि संग्रामे शत्रुसंकटे ।
अटव्यां दुर्गकान्तारे सागरे गहने गिरौ ॥ ३२ ॥ ४-८-३२ (२८५०९)
ये स्मरिष्यन्ति मां राजन्यथाऽहं भवता स्मृता ।
न तेषां दुर्लभं किंचितस्मिँल्लोके भविष्यति ॥ ३३ ॥ ४-८-३३ (२८५१०)
इदं स्तोत्रवरं भक्त्या शृणुयाद्वा पठेत वा ।
तस्य सर्वाणि कार्याणि सिद्धिं यास्यन्ति पाण्डवाः ॥ ३४ ॥ ४-८-३४ (२८५११)
मत्प्रसादाच्च वः सर्वान्विराटनगरे स्थितान् ।
न प्रज्ञास्यन्ति कुरवो नरा वा तन्निवासिनः ॥ ३५ ॥ ४-८-३५ (२८५१२)
इत्युक्त्वा वरदा देवी युधिष्ठिरमरिंदमम् ।
रक्षां कृत्वा च पाण्डूनां तत्रैवान्तरधीयत ॥ ३६ ॥ ॥ ४-८-३६ (२८५१३)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-८-३ शिलातटे कंसेनैव विनिक्षिप्ता सती आकाशं गता ताम् ॥
३ ॥
४-८-६ स्तोत्रार्थमेव संभव उद्भवो येषां नाम्नां वरदे इत्यादीनांतैः
। आमन्त्र्य संबोध्य ॥
६ ॥
४-८-९ पद्मा लक्ष्मीं अत एव नारायणपरिग्रहो विष्णुकान्ता ॥
९ ॥
४-८-१० कृष्णच्छविर्नीलमेघस्तेन समा अत एव कृष्णा
। अष्टभुजामाह बिभ्रतीति। विपुलौ वराभयप्रदत्वेन ऊर्जितौ द्वौ
बाहू ॥
१० ॥

४-८-११ तत एकः पात्री पात्रवान्पङ्कजी पङ्कजवान् घण्टी घण्टावान्
पञ्चमः पाशं धनुर्महाचक्रं च बिभ्रतीति पूर्वेणान्वयः ॥
११ ॥

विराटपर्व - अध्याय ००९
॥ श्रीः ॥
४.९. अध्यायः ९

Mahabharata - Virata Parva - Chapter Topics
युधिष्ठिरेण यतिवेषपरिग्रहेण विराटसभाप्रवेशः ॥ १ ॥
प्रत्युत्थानादिना सत्कृतेन युधिष्ठिरेण विराटभवने निवासः ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-९-० (२८५१४)
वैशम्पायन उवाच। ४-९-०क्ष् (३०११)
ततस्तु ते पुण्यजलां शिवां शुभां महर्षिगन्धर्वनिषेवितोदकाम् ।
त्रिलोककान्तामवतीर्य जाह्नवीमृषींश्च देवांश्च पितृनतपर्यन्
॥ १ ॥ ४-९-१ (२८५१५)
वरप्रदानं ह्यनुचिन्त्य पार्थिवे हुत्वाऽग्निहोत्रं कृतजप्यमङ्गलः ।
दिशं तथैन्द्रीमभितः प्रपेदिवान्कृताञ्जलिर्धर्ममुपाह्वयच्छनैः
॥ २ ॥ ४-९-२ (२८५१६)
युधिष्ठिर उवाच। ४-९-३क्ष् (३०१२)
वरप्रदानं मम दत्तवान्पिता प्रसन्नचेता वरदः प्रजापतिः ।
जलार्थिनो मे तृषितस्य सोदरा मया प्रयुक्ता विविशुर्जलाशयम् ॥ ३
॥ ४-९-३ (२८५१७)
निपातिता यक्षवरेण ते वने महाहवे वज्रभृतेव दानवाः ।
मया च गत्वा वरदो हि तोषितो विवक्षता प्रश्नसमुच्चयं गुरुः
॥ ४ ॥ ४-९-४ (२८५१८)
स मे प्रसन्नो भगवान्वरं ददौ परिष्वजंश्चाह तथैव सौहृदात् ।
वृणीष्व यद्वाञ्छसि पाण्डुनन्दन स्थितोऽन्तरिक्षे वरदोऽस्मि पश्य
माम् ॥ ५ ॥ ४-९-५ (२८५१९)
स वै मयोक्तो वरदः पिता प्रभुः सदैव मे धर्मरता मतिर्भवेत् ।
इमे च जीवन्तु ममानुजाः प्रभो वयं स्वरूपं च जयं तथाऽऽप्नुमः
॥ ६ ॥ ४-९-६ (२८५२०)
क्षमा च कीर्तिश्च यथेप्सितं भवेद्व्रतं तु सत्यं च समाप्तिरेव च ।
वरो ममैषोस्तु यथाऽनुकीर्तितो न तन्मृषा देववृषो यथाऽब्रवीत्

॥ ७ ॥ ४-९-७ (२८५२१)
वैशम्पायन उवाच। ४-९-८क्ष् (३०१३)
इत्येवमुक्त्वा धर्मात्मा धर्ममेवानुचिन्तयन् ।
तदैव तत्प्रसादेन रूपमेवाभवत्स्वयम् ॥ ८ ॥ ४-९-८ (२८५२२)
स वै द्विजातिस्तरुणस्त्रिदण्डभृत्कमण्डलूष्णीषधरो व्यजायत ।
सुरक्तमाञ्जिष्ठवराम्बरः शिखी पवित्रपाणिर्ददृशे तदाऽद्भुतम्
॥ ९ ॥ ४-९-९ (२८५२३)
तथैव तेषामपि धर्मचारिणां यथोचिताहार्भरणाम्बरस्रजः ।
क्षणेन राजन्नभवन्महात्मनां प्रशस्तधर्माग्र्यफलाभिकाङ्क्षिणाम्
॥ १० ॥ ४-९-१० (२८५२४)
नवेन रूपेण विशांपतिर्युतस्त्वथर्वरूपेण बभौ प्रतापवान् ।
निबद्धवैडूर्यसितान्सकाञ्चनान्नृपस्तथाऽक्षान्परिवेष्ट्य वाससः
॥ ११ ॥ ४-९-११ (२८५२५)
ततो विराटं प्रथमं युधिष्ठिरो ददर्श दूरात्सुसमृद्धतेजसम् ।
अनन्ततेजोज्वलितं हुताशनं दुरासदं तीक्ष्णविषं यथोरगम् ॥ १२
॥ ४-९-१२ (२८५२६)
सभासदं प्राञ्जलिभिर्जनैर्वृतं विचित्रनानाविधशस्त्रपाणिभिः ।
उपायनौघैः प्रविशद्भिराचितं द्विजैश्च
शिक्षाक्षरमन्त्रधारिभिः ॥ १३ ॥ ४-९-१३ (२८५२७)
गजैरुदीर्णं तुरगैश्च सङ्कुलं मृगद्विपैः कुब्जगणैः समावृतम् ।
सितोच्छ्रितोष्णीषनिरुद्धमूर्धजं विचित्रवैडूर्यविकारकुण्डलम् ।
विराटमायाच्च युधिष्ठिरस्तदा बृहस्पतिः शक्रमिव त्रिविष्टपे
॥ १४ ॥ ४-९-१४ (२८५२८)
तमाव्रजन्तं प्रसमीक्ष्य पाण्डवं विराटराजो मुदितेन चक्षुषा ।
पप्रच्छ चैनं स नराधिपो मुहुर्द्विजाश्च ये चास्य सभासदस्तदा
॥ १५ ॥ ४-९-१५ (२८५२९)
विराट उवाच । ४-९-१६क्ष् (३०१४)
को वा विजानाति पुराऽस्य दर्शनं युवा सभां योऽयमुपैति मामिकाम् ।
रूपेण सारेण विराजयन्महीं श्रिया ह्ययं वैश्रवणो द्विजो यथा ॥ १६
॥ ४-९-१६ (२८५३०)
मृगेन्द्रराड्वारणयूथपोपमः प्रभात्ययं काञ्चनपर्वतो यथा ।
विराजते पावकसूर्यसन्निभं सचन्द्रनक्षत्र इवांशुमान्ग्रहः ॥ १७
॥ ४-९-१७ (२८५३१)
न दृश्यतेऽस्यानुचरो न कुञ्जरो न चोष्णरश्म्यावरणं समुच्छ्रितम् ।
न कुण्डलं नाङ्गदमस्य न स्रजो विचित्रिताङ्गश्च रथश्चतुर्युजः
॥ ३८ ॥ ४-९-१८ (२८५३२)

क्षात्रं च रूपं हि बिभर्त्ययं भृशं गजेन्द्रशार्दूलमहर्षभोपमः ।
अभ्यागतोऽस्माननलंकृतोपि सन् विरोचते भानुरिवाचिरोदितः ॥ १९
॥ ४-९-१९ (२८५३३)
विभात्ययं क्षत्रिय एव सर्वथा विराट इत्येवमुवाच तं प्रति ।
ससागरान्तामयमद्य मेदिनीं प्रशासितुं चार्हति वासवोपमः ॥ २०
॥ ४-९-२० (२८५३४)
नाक्षत्रियो नूनमयं भविष्यति मूर्धाभिषिक्तः प्रतिभाति मां प्रति ।
तुल्यं हि रूपं प्रतिदृश्यतेऽस्य गजस्य सिंहस्य तथर्षभस्य
॥ २१ ॥ ४-९-२१ (२८५३५)
यमेष कामं परिमार्गते द्विजः स चास्य सर्वः क्रियतामसंशयम् ।
प्रियं च मे दर्शनमीदृशे जने द्विजेषु मुख्येषु तथाऽतिथिष्वपि
॥ २२ ॥ ४-९-२२ (२८५३६)
धनेषु रत्नेष्वथ गोषु वेश्मसु प्रकामतो मे विचरत्ववारितः
॥ २३ ॥ ४-९-२३ (२८५३७)
वैशम्पायन उवाच । ४-९-२४क्ष् (३०१५)
एवं ब्रुवाणस्तमनन्ततेजसं विराजमानं सहसोत्थितो नृपः ।
अन्येन रूपेण समीपमागतं त्रिदण्डकुण्ड्यङ्कुशशिक्यपाणिनम् ॥ २४
॥ ४-९-२४ (२८५३८)
समुत्थिता सा हि सभा सपार्थिवा सविप्रराजन्यविशा सशूद्रका ।
सभागत प्रेक्ष्य तपन्तमर्चिषां विनिःसृतं राहुमुखाद्यथा रविम्
॥ २५ ॥ ४-९-२५ (२८५३९)
स तेन पूर्वं जयतां भवानिह द्विजातिनोक्तोऽभिमुखः कृताञ्जलिः ।
जयं जयार्हेण समेत्य वर्धितो विराटराजो ह्यभिवादयच्च तम् ॥ २६
॥ ४-९-२६ (२८५४०)
तमब्रवीत्प्राञ्जलिरेष पार्थिवो विराटराजो मधुराक्षरं वचः ।
प्राप्तः कुतस्त्वं भगवन्किमिच्छसि क्व यास्यसे किं करवाणि ते द्विज
॥ २७ ॥ ४-९-२७ (२८५४१)
श्रुतं च शीलं च कुलं च शंस मे गोत्रं तथा नाम च देशमेव ते ।
सत्यप्रतिज्ञा हि भवन्ति साधवो विशेषतः प्रव्रजिता द्विजातयः
॥ २८ ॥ ४-९-२८ (२८५४२)
यथाऽनुरूपं प्रचरामि ते त्वहं न चावमन्ता न तवाभिभाषितम् ।
अपूजिता ह्यग्निसमा द्विजातयः कुलं दहेयुः सविषा इवोरगाः ॥ २९
॥ ४-९-२९ (२८५४३)
सर्वां च भूमिं तव दातुमुत्सहे सदण्डकोशां विसृजामि ते पुरम् ।
कस्यासि राज्ञो विषयादिहागतः किं कर्म चात्राचरसि द्विजोत्तम ॥ ३०
॥ ४-९-३० (२८५४४)

वैशम्पायन उवाच। ४-९-३१क्ष् (३०१६)
एवं ब्रुवाणं तमुवाच पार्थिवं युधिष्ठिरो धर्ममवेक्ष्य चासकृत् ।
सत्यं वचः को न्विह वक्तुमुत्सहेद्यथाप्रतिज्ञं तु शृणुष्व
पार्थिव ॥ ३१ ॥ ४-९-३१ (२८५४५)
श्रुतं च शीलं च कुलं च कर्म च शृणुष्व मे जन्म च
देशमेव च ।
गुरूपदेशान्नियमाच्च मे व्रतं कुलक्रमार्थं पितृभिर्नियोजितम्
॥ ३२ ॥ ४-९-३२ (२८५४६)
द्विजो व्रतेनास्मि न च स्वतः प्रभो संमुण्डितः प्रव्रजितस्त्रिदण्डभृत् ।
इदं शरीरं मम पश्य मानुषं समावृतं पञ्चभिरेव धातुभिः
॥ ३३ ॥ ४-९-३३ (२८५४७)
ममेह पञ्चेन्द्रियगात्रदर्शिनो वदन्ति पञ्चैव पितॄन्यथा श्रुतिः ।
मनुष्यजातित्वमचिन्तयन्नहं न चास्मि तुल्यः पितृभिः स्वभावतः
॥ ३४ ॥ ४-९-३४ (२८५४८)
कङ्को हि नाम्ना विषयं तवागतो व्रती द्विजातिः स्वकृतेन कर्मणा ।
द्यूतप्रसङ्गादधनोऽस्मि राजन्सत्यप्रतिज्ञा व्रतिनश्चरामः ॥ ३५
॥ ४-९-३५ (२८५४९)
युधिष्ठिरस्यापि सखाऽभवं पुरा गृहप्रवेशी च शरीरमेव च ।
गृहे च तस्योपितवानहं सुखं राजाऽस्मि तस्य स्वपुरेऽभवं पुरा
॥ ३६ ॥ ४-९-३६ (२८५५०)
ममाज्ञया तत्र विचेरुरङ्गना मम प्रियार्थं दमयन्ति वाजिनः ।
मया कृतं तस्य पुरे तु यत्पुरा न तत्कदाचित्कृतवाञ्जनोऽन्यथा
॥ ३७ ॥ ४-९-३७ (२८५५१)
सोहं पुरा तस्य वयस्समः सखा चरामि सर्वां वसुधां सुदुःखितः ।
न तु प्रशान्तिं क्वचिदाप्तवानहं व्रतोपदेशान्नियमेन भारिकः ॥ ३८
॥ ४-९-३८ (२८५५२)
वैयाघ्रपद्योस्मि नरेन्द्र गोत्रतस्तदेव सौख्यं मृगयामहे वयम् ।
कृतज्ञभावेन मयाऽनुकीर्तितं युधिष्ठिरस्यात्मसमस्य चेष्टितम्
॥ ३९ ॥ ४-९-३९ (२८५५३)
इमं हि मोक्षाश्रममास्थितस्य मे युधिष्ठिरस्तुल्यगुणो भवानपि ।
न मेऽस्ति माता न पिता न बान्धवा न मेऽस्ति रूपं न रतिर्न सन्ततिः
॥ ४० ॥ ४-९-४० (२८५५४)
सुखं च दुःखं च हि तुल्यमद्य मे प्रियाप्रिये तुल्यगते गतागते ।
मुक्तोस्मि कामाच्च धनाच्च सांप्रतं त्वदाश्रये वस्तुमिहाभ्युपागतः
॥ ४१ ॥ ४-९-४१ (२८५५५)
संवत्सरेणेह समाप्यते त्विदं मम व्रतं दुष्करकर्मकारिणः ।

ततो भवन्तं परितोष्य कर्मभिः पुनर्व्रजिष्ये च कुतूहलं यतः
॥ ४२ ॥ ४-९-४२ (२८५५६)
अक्षान्निवप्तुं कुशलोस्म्यहं सदा पराजितः शकुनिरुतानि चिन्तयन् ।
मृगद्विजानां च रुतानि चिन्तयन्निराश्रयः प्रव्रजितोस्मि भिक्षुकः
॥ ४३ ॥ ४-९-४३ (२८५५७)
वैशम्पायन उवाच । ४-९-४४क्ष् (३०१७)
तेनैवमुक्ते वचने नराधिपः कृताञ्जलिः प्रव्रजितं विलोक्य च ।
अथाब्रवीद्धृष्टमनाः शुभाक्षरं मनोनुगं सर्वसभागतं वचः
॥ ४४ ॥ ४-९-४४ (२८५५८)
ददामि ते हन्त वरं यदीप्सितं प्रशाधि मत्स्यान्यदि मन्यते भवान् ।
प्रिया हि धूर्ता मम चाक्षकोविदास्त्वं चापि देवो मम राज्यमर्हसि
॥ ४५ ॥ ४-९-४५ (२८५५९)
समानयानासनवस्त्रभोजनं प्रभूतमाल्याभरणानुलेपनम् ।
स सार्वभौमोपम सर्वदाऽर्हसि प्रियं हि मन्ये तव नित्यदर्शनम्
॥ ४६ ॥ ४-९-४६ (२८५६०)
ये त्वाऽभिधावेयुरनर्थपीडिता द्विजातिमुख्या यदि वेतरे जनाः ।
सर्वाणि कार्याण्यहमर्थितस्त्वया तेषां करिष्यामि न मेऽत्र संशयः
॥ ४७ ॥ ४-९-४७ (२८५६१)
ममान्तिके यश्च तवाप्रियं चरेत्प्रवासये तं परिचिन्त्य मानवम् ।
यच्चापि किंचिद्वसु विद्यते मम प्रभुर्भवांस्तस्य वशी वसेह च
॥ ४८ ॥ ४-९-४८ (२८५६२)
युधिष्ठिर उवाच। ४-९-४९क्ष् (३०१८)
अतोऽभिलाषः परमो न विद्यते न मे जितं किंचन धारये धनम् ।
न भोजनं किंचन संस्पृशेयं हविष्यभोजी निशि च क्षितीशयः
॥ ४९ ॥ ४-९-४९ (२८५६३)
व्रतोपदेशात्समयो हि नैष्ठिको न क्रोधितव्यं नरदेव कस्यचित् ।
एवंप्रतिज्ञस्य ममेह भूपते निवासबुद्धिर्भविता तु नान्यथा ॥ ५०
॥ ४-९-५० (२८५६४)
एवं वरं मात्स्य वृणे प्रदापितं कृति भविष्यामि वरेण तेऽनघ
॥ ५१ ॥ ४-९-५१ (२८५६५)
वैशम्पायन उवाच। ४-९-५२क्ष् (३०१९)
एवं तु राज्ञः प्रथमः समागमो बभूव मात्स्यस्य युधिष्ठिरस्य च ।
विराटराजस्य हि तेन सङ्गमो बभूव विष्णोरिव वज्रपाणिना ॥ ५२
॥ ४-९-५२ (२८५६६)
तमासनस्थं प्रियरूपदर्शनं निरीक्षमाणो न ततर्प भूमिपः ।
सभां च तां प्रज्वलयन्युधिष्ठिरः श्रिया यथा शक्रइव

त्रिविष्टपम् ॥ ५३ ॥ ४-९-५३ (२८५६७)
एवं स लब्ध्वा नृपतिः समागमं विराटराजेन नरर्षभस्तदा ।
उवास वीरः परमार्चितः सुखी न चास्य कश्चिच्चरितं बुबोध तत्
॥ ५४ ॥ ॥ ४-९-५४ (२८५६८)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
नवमोऽध्यायः ॥ ९ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-९-६ वयश्च रूपं च बलं तथाऽऽप्नुयुरिति थो धो पाठः ॥
६ ॥
४-९-२४ अन्येन रूपेण यतिवेषेण आगतं दृष्ट्वेति शेषः ॥
२४ ॥

विराटपर्व - अध्याय ०१०
॥ श्रीः ॥
४.१०. अध्यायः १०

Mahabharata - Virata Parva - Chapter Topics
भीमेन सूदवेषपरिग्रहेण विराटसभाप्रवेशः ॥ १ ॥
विराटेन भीमस्य पाकाधिकारे नियोजनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-१०-० (२८५६९)
वैशम्पायन उवाच । ४-१०-०क्ष् (३०२०)
अथापरस्यां दिशि भीमदर्शनो वृकोदरोऽदृश्यत सिंहविक्रमः ।
असिप्रवेके प्रतिमुच्य शाणिते खजां च दर्वी च करेण धारयन् ॥ १
॥ ४-१०-१ (२८५७०)
त्वचं च गोचर्ममयीं सुमर्दितां समुक्षितां पानकरागषाडवैः ।
किलासमालम्ब्य करेण चायसं सशृङ्गिबेरार्द्रकभूस्तृणाङ्कुरम्
॥ २ ॥ ४-१०-२ (२८५७१)
गम्भीररूपः परमेण तेजसा रविर्यथा लोकमिमं प्रकाशयन् ।
स कृष्णवासा गिरिराजसारवान् स मत्स्यराजं समुपेत्य तस्थिवान् ॥ ३
॥ ४-१०-३ (२८५७२)
सभागतो वारणयूथपोपमस्तमिस्रहा रात्रिमिवावभासयन् ।
सहस्रनेत्रावरजान्तकोपमस्त्रिलोकपालाधिपतिर्यथा हरिः ॥ ४

॥ ४-१०-४ (२८५७३)
तमाव्रजन्तं गजयूथपोपमं निरीक्षमाणो नवसूर्यवर्चसम् ।
भयात्समुद्विग्नविपण्णचेतनो दिशश्च सर्वाः प्रसमीक्ष्य चासकृत्
॥ ५ ॥ ४-१०-५ (२८५७४)
तमेकवस्त्रं परसैन्यवारणं सभाऽविदूरान्नृपतिर्नृपात्मजम् ।
समीक्ष्य वैक्लब्यमुपेयिवाञ्शनैर्जनाश्च भीताः परिसर्पिरे भृशम्
॥ ६ ॥ ४-१०-६ (२८५७५)
अथाब्रवीन्मात्स्यपतिः सभागतान् भृशातुरोष्णं परिनिश्वसन्निव ।
कोऽयं युवा वारणराजसन्निभः सभामभिप्रैति हि मामिकामिमाम् ॥ ७
॥ ४-१०-७ (२८५७६)
को वा विजानाति पुराऽस्य दर्शनं मृगेन्द्रशार्दूलगतिं हि मामकः ।
व्यूढान्तरांसो मृगराडिवोत्कटो य एष दिव्यः पुरुषः प्रकाशते ॥ ८
॥ ४-१०-८ (२८५७७)
राजश्रिया ह्येष विभाति राजवद्विरोचते रुक्मगिरिप्रभोपमः ।
नाक्षत्रियो नूनमयं भविष्यति सहस्रनेत्रप्रतिमस्तथा ह्यसौ ॥ ९
॥ ४-१०-९ (२८५७८)
रूपेण यश्चाप्रतिमो ह्ययं महान्महीमिमां शत्रः इवाभिपालयेत् ।
नाभूमिपोऽयं हि रतिर्ममेति च च्युतः समृद्ध्या नभसीव नाहुषः
॥ १० ॥ ४-१०-१० (२८५७९)
वैशम्पायन उवाच। ४-१०-११क्ष् (३०२१)
वितर्कमाणस्य च तस्य पाण्डवः सभामतिक्रम्य वृकोदरोऽब्रवीत् ।
जयेति राजानमभिप्रमोदयन्सुखेन सभ्यं च सभागतं जनम् ॥ ११
॥ ४-१०-११ (२८५८०)
ततो नृपं वाक्यमुवाच पाण्डवो यथाऽनुपूर्व्यात्कृपयान्वितोत्तरम् ।
त्वां जीवितुं शत्रुहन्नागतोऽहं त्वमेव लोके परमो हि संश्रयः
॥ १२ ॥ ४-१०-१२ (२८५८१)
नरेन्द्र शूद्रोस्मि चतुर्थवर्णभाग्गुरूपदेशात्परिचारकर्मकृत् ।
जानामि सूपांश्च रसांश्च संस्कृतान्मांसान्यपूपांश्च पचामि शोभनान् ।
रागप्रकाराश्च बहून्फलाश्रयान्महानसे मे न समोस्ति सूपकृत्
॥ १३ ॥ ४-१०-१३ (२८५८२)
वैशम्पायन उवाच । ४-१०-१४क्ष् (३०२२)
तमब्रवीन्मत्स्यपतिः प्रहृष्टवत्प्रियं प्रगल्भं मधुरं विनीतवत् ।
न शूद्रतां कांचन लक्षयामि ते कुबेरचन्द्रेन्द्रदिवाकरप्रभ
॥ १४ ॥ ४-१०-१४ (२८५८३)
हुताशनाशीविषतुल्यतेजसो न कर्म ते योग्यमिदं महानसे ।
न सूपकारो भवितुं त्वमर्हसि सुपर्णगन्धर्वमहोरगोपम ॥ १५

॥ ४-१०-१५ (२८५८४)
अनीककर्णाग्रधरो ध्वजी रथी भवाद्य मे वारणवाहिनीपतिः ।
न नीचकर्मा भवितुं त्वमर्हसि प्रशासितुं भूमिमिमां त्वमर्हसि
॥ १६ ॥ ४-१०-१६ (२८५८५)
भीम उवाच । ४-१०-१७क्ष् (३०२३)
चतुर्थवर्णोस्म्यहमुग्रशासन न वै वृणे त्वामहमीदृशं पदम् ।
जात्याऽस्मि शूद्रो बललेति नाम्ना जिजीविषुस्त्वद्विषयं समागतः ॥ १७
॥ ४-१०-१७ (२८५८६)
युधिष्ठिरस्यास्मि महानसे पुरा बभूव सर्वप्रभुरन्नपानदः ।
अथापि मामुत्सृजसे महीपते व्रजाम्यहं यावदितो यथागतम् ॥ १८
॥ ४-१०-१८ (२८५८७)
त्वमन्नसंस्कारविधौ प्रशाधि मां भवामि तेऽहं नरदेव सूपकृत् ।
बलेन तुल्यश्च न विद्यते मया नियुद्धशीलोस्मि सदा हि पार्थिव
॥ १९ ॥ ४-१०-१९ (२८५८८)
गजांश्च सिंहांश्च समेयिवानहं सदा करिष्यामि तवानघ प्रियम् ।
न नीचकर्मा तव मादृशः प्रभो बलस्य नेताऽप्यबलो भवेदिति
॥ २० ॥ ४-१०-२० (२८५८९)
स्वकर्मतुष्टाश्च वयं नराधिप प्रशाधि मां सूदपदे यदीच्छसि ।
ये सन्ति मल्ला बलवीर्यसंमतास्तानेव योत्स्यामि तवाभिहर्षयन् ॥ २१
॥ ४-१०-२१ (२८५९०)
वैशम्पायन उवाच। ४-१०-२२क्ष् (३०२४)
तमेवमुक्ते वचने नराधिपः प्रत्यब्रवीन्मत्स्यपतिः प्रहृष्टवत् ।
सोहं न मन्ये तव कर्म तत्समं समुद्रनेमिं पृथिवीं त्वमर्हसि
॥ २२ ॥ ४-१०-२२ (२८५९१)
त्रिलोकपालो हि यथा विराजसे तथाऽद्य मे विष्णुरिवातिरोचसे ।
यथा तु कामस्तव तत्तथा कृतं महानसे मे भव मे पुरस्कृतः ।
नराश्च मे तत्र मया सदाऽर्चिता भवाद्य तेषामधिपो मया कृतः
॥ २३ ॥ ४-१०-२३ (२८५९२)
तथा स भीमो विहितो महानसे विराटराजस्य बभूव वै प्रियः ।
उवास राजन्न च तं पृथग्जनो बुबोध तस्यानुचरश्च कश्चन
॥ २४ ॥ ॥ ४-१०-२४ (२८५९३)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
दशमोऽध्यायः ॥ १० ॥

विराटपर्व - अध्याय ०११
॥ श्रीः ॥

४.११. अध्यायः ११

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन षण्डवेषपरिग्रहेण विराटसभाप्रवेशः ॥ १ ॥
विराटेनार्जुनस्य कन्यानाटने नियोजनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-११-० (२८५९४)
वैशम्पायन उवाच। ४-११-०क्ष् (३०२५)
अथापरोऽदृश्यत वर्णवान्युवा स्त्रीवेषधारी समलंकृतो भृशम् ।
प्रवालचित्रे प्रविमुच्य कुण्डले उभे च कम्बू परिपातुके तथा ॥ १
॥ ४-११-१ (२८५९५)
कृष्णे च रक्ते च निबध्य वाससी शरीरवाञ्शुक्रबृहस्पतिप्रभः ।
बहूंश्च दीर्घांश्च विकीर्य मूर्धजान्महाभुजो मत्तगजेन्द्रविक्रमः
॥ २ ॥ ४-११-२ (२८५९६)
क्लैब्येन वेषेण न भति भाति च ग्रहाभिपन्नो नभसीव चन्द्रमाः ।
गतेन चोर्वी परिकम्पयंस्तदा विराटमासाद्य सभासमीपतः ॥ ३
॥ ४-११-३ (२८५९७)
तं प्रेक्ष्य राजोपगतं सभातले व्याजाप्रतिच्छन्नममित्रमर्दनम् ।
विराजमानं सुरराजवर्चसं सुतं सुरेन्द्रस्य गजेन्द्रविक्रमम् ॥ ४
॥ ४-११-४ (२८५९८)
सर्वानपृच्छच्च समीपचारिणः कुतोऽयमायाति न मे पुरा श्रुतः ।
न चैनमूचुर्विदितं नरास्तदा सविस्मयं वाक्यमिदं नृपोऽब्रवीत्
॥ ५ ॥ ४-११-५ (२८५९९)
विराट उवाच। ४-११-६क्ष् (३०२६)
गजेन्द्रलीलो मृगराजगामी वृषेक्षणो देवसुतोग्रतेजाः ।
पीनांसबाहुः कनकावदातः कोऽयं नरो मे नगरं प्रविष्टः ॥ ६
॥ ४-११-६ (२८६००)
किमेष देवेन्द्रसुतः किमेष ब्रह्मात्मजो वा किमयं स्वयंभूः ।
उमासुतो वैश्रवणात्मजो वा प्रेक्ष्यैनमासीदिति मे वितर्कः ॥ ७
॥ ४-११-७ (२८६०१)
वैशम्पायन उवाच। ४-११-८क्ष् (३०२७)
सभामतिक्रम्य स वासवोपमो निरीक्षमाणो बहुभिः सभागतैः ।
स तत्र राजनममित्रहाऽब्रवीद्बृहन्नलाहं नरदेव नर्तकी ॥ ८
॥ ४-११-८ (२८६०२)

वेणीं प्रकुर्यां रुचिरे च कुण्डले ग्रथे स्रजः प्रावरणानि संहरे ।
स्नानं चरेयं विमृजे च दर्पणं विशेषकेष्वेव च कौशलं
मम ॥ ९ । ४-११-९ (२८६०३)
क्लीबेषु बालेषु जनेषु नर्तने शिक्षाप्रदानेषु च योग्यता मम ।
करोमि वेणीषु च पुष्पपूरकं न मे स्त्रियः कर्मणि कौशलाधिकाः
॥ १० ॥ ४-११-१० (२८६०४)
इत्यर्जुनस्तं नरदेवमोजसा विज्ञाप्य तस्थौ विधिनाऽऽत्मनः क्रियाम् ।
तमब्रवीत्प्रांशुमुदीक्ष्य विस्मितो विराटराजोपसृतं महायशाः ॥ ११
॥ ४-११-११ (२८६०५)
नार्हस्तु वेषोऽयमनूर्जितस्ते नापुंस्त्वमर्हं नरदेवसिंह ।
तवैव वेषः शुभवेषभूषणैर्विभूषितो भूतपतेरिव प्रभो
॥ १२ ॥ ४-११-१२ (२८६०६)
विभाति भानोरिव रश्मिमालिनो घनावरुद्धे गगने घनैरिव ।
धनुर्हि मन्ये तव शोभयेद्भुजौ तथाहि पीनावतिमात्रमायतौ ॥ १३
॥ ४-११-१३ (२८६०७)
प्रगृह्य चापं त्वनुरूपमात्मनो रक्षस्व देशं पुरमद्य सुस्थिरः ।
पुत्रेण तुल्यो भव मे बृहन्नले वृद्धोस्मि वित्तं प्रतिपादयामि ते
॥ १४ ॥ ४-११-१४ (२८६०८)
त्वं रक्ष मे सर्वमिदं पुरं प्रभो न षण्डतां कांचन लक्षयामि ते ।
प्रशाधि मत्स्यांस्तरसा विवर्धयन्ददामि राज्यं तव सत्यवागहम्
॥ १५ ॥ ४-११-१५ (२८६०९)
वैशम्पायन उवाच। ४-११-१६क्ष् (३०२८)
तस्याग्रतः स्वानि धनूंषि पार्थिवो बहूनि दीर्घाणि च वर्णवन्ति च ।
ददौ स सज्यानि बलान्वितानि जिज्ञासमानः किमयं करिष्यति ॥ १६
॥ ४-११-१६ (२८६१०)
ततोऽर्जुनः क्लीबतरं वचोऽब्रवीन्न मे धनुर्धारितमीदृशं विभो ।
न चापि दृष्टं धनुरीदृशं क्वचिन्न मादृशाः सन्ति धनुर्धरा
भुवि ॥ १७ ॥ ४-११-१७ (२८६११)
नृत्याम गायामि च वादयाम्यहं प्रानर्तने कौशलनैपुणं मम ।
तदुत्तरायाः परिधत्स्व नर्तने भवामि देव्या नरदेव नर्तकी ॥ १८
॥ ४-११-१८ (२८६१२)
विराट उवाच। ४-११-१९क्ष् (३०२९)
ददामि ते तं हि वरं बृहन्नले सुतां हि मे नर्तय याश्च तादृशीः ।
ततो विराटः स्वयमाह्वयत्सुतां नराधिपस्तां च सुमध्यसुन्दरीम् ॥ १९
॥ ४-११-१९ (२८६१३)
उवाच चैनां मुदितेन चेतसा बृहन्नला नाम सखी भवत्वियम् ।

सुगात्रि संप्रीतिसुबद्धसौहृदा तवाङ्गने प्राणसमा च नित्यदा ॥ २०
॥ ४-११-२० (२८६१४)
प्रकामभक्ष्याभरणाम्बरा शुभा चरत्वियं सर्वजनेष्ववारिता ।
न दुष्कुलानामियमाकृतिर्भवेन्न वृत्तभेदी भवतीदृशो जनः
॥ २१ ॥ ४-११-२१ (२८६१५)
वैशम्पायन उवाच। ४-११-२२क्ष् (३०३०)
संमन्त्र्य राजा विविधैः स्वमन्त्रिभिः परीक्ष्य चैनं प्रमदाभिराशु वै ।
अपुंस्त्वमप्यस्य निशम्य च स्थिरं ततः कुमारीपुरमुत्ससर्ज तम्
॥ २२ ॥ ४-११-२२ (२८६१६)
स शिक्षयामास च गीतवदनं सुतां विराटस्य धनंजयः प्रभुः ।
सखीश्च तस्याः परिचारिकास्तथा प्रियश्च तस्याः स बभूव पाण्डवः
॥ २३ ॥ ४-११-२३ (२८६१७)
तथा स तत्रैव धनंजयोऽवसत्प्रियाणि कुर्वन्त्सह ताभिरात्मवान् ।
तथा गतं तत्र न जज्ञिरे जना बहिश्चरा वाऽप्यथवेतरे जनाः
॥ २४ ॥ ॥ ४-११-२४ (२८६१८)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

विराटपर्व - अध्याय ०१२
॥ श्रीः ॥
४.१२. अध्यायः १२

Mahabharata - Virata Parva - Chapter Topics
नकुलेन विराटमेत्य स्वस्याश्वशास्त्रे कौशलाभिधानम् ॥ १ ॥
विराटेन नकुलस्याश्वपालने नियोजनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-१२-० (२८६१९)
वैशम्पायन उवाच। ४-१२-०क्ष् (३०३१)
अथापरोऽदृश्यत पाण्डवः प्रभुर्विराटराजे तुरगान्समीक्षति ।
तमापतन्तं ददृशुः पृथग्जनाः प्रमुक्तमभ्रादिव चन्द्रमण्डलम्
॥ १ ॥ ४-१२-१ (२८६२०)
स वै हयानैक्षत तानितस्ततः समीक्षमाणं च ददर्श मत्स्यराट् ।
दृष्ट्वा तथैनं स कुरूत्तमं तमः पप्रच्छ तान्सर्बसभासदस्तदा
॥ २ ॥ ४-१२-२ (२८६२१)

को वा विजानाति पुराऽस्य दर्शनं योऽयं युवाऽभ्येति हि मासिकां सभाम् ।
प्रियो हि मे दर्शनतोपि संमतो ब्रवीतु कश्चिद्यदि दृष्टवानिमम्
॥ ३ ॥ ४-१२-३ (२८६२२)
अयं हयान्पश्यति मामकान्मुहुर्ध्रुवं हयज्ञो भविता विचक्षणः ।
प्रवेश्यतामेष समीपमाशु वै विभाति वीरो हि यथाऽमरस्तथा ॥ ४
॥ ४-१२-४ (२८६२३)
वितर्कयत्येव हि मत्स्यराजनि त्वरन्कुरूणामृषभः सभामगात् ।
ततः प्रणम्योपनतः कुरूत्तमो विराटराजानमुवाच पार्थिवम् ॥ ५
॥ ४-१२-५ (२८६२४)
तवागतोऽहं पुरमद्य भूपते जिजीविषुर्वेतनभोजनार्थिकः ।
तवाश्वबन्धः सुभृतो भवाम्यहं कुरुष्व मामश्वपतिं यदीच्छसि
॥ ६ ॥ ४-१२-६ (२८६२५)
विराट उवाच। ४-१२-७क्ष् (३०३२)
ददानि यानानि धनानि वेतनं न चाश्वसूतो भवितुं त्वमर्हसि ।
कुतोसि कस्यामि कथं त्वमागतो ब्रवीहि शिल्पं तव विद्यते च यत्
॥ ७ ॥ ४-१२-७ (२८६२६)
नकुल उवाच। ४-१२-८क्ष् (३०३३)
पञ्चानां पाण्डुपुत्राणां ज्येष्ठो राजा युधिष्ठिरः ।
तेनाहमश्वेषु पुरा प्रकृतः शत्रुकर्शन ॥ ८ ॥ ४-१२-८ (२८६२७)
अश्वानां प्रकृतिं वेद्मि विनयं चापि सर्वशः ।
दुष्टानां प्रतिपत्तिं च कृत्स्नं चैव चिकित्सितम् ॥ ९ ॥ ४-१२-९ (२८६२८)
न कातरं स्यान्मम वाजिवाहनं न मेऽस्ति दुष्टा बडवा कुतो हयः ।
जानंस्तु मामाह स चापि पाण्डवो युधिष्ठिरो ग्रन्थिकमेव नामतः
॥ १० ॥ ४-१२-१० (२८६२९)
मातलिरिव देवपतेर्दशरथनृपतेः सुमत्र इव यन्ता ।
सुमह इव जामदग्नेस्तथैव तव शिक्षयाम्यश्वान् ॥ ११ ॥ ४-१२-११ (२८६३०)
युधिष्ठिरस्य राजेन्द्र नरराजस्य शासनात् ।
शतसाहस्रकोटीनामश्वानामस्मि रक्षिता ॥ १२ ॥ ४-१२-१२ (२८६३१)
विराट उवाच। ४-१२-१३क्ष् (३०३४)
यदस्ति किंचिन्मम वाजिवाहनं तदस्तु सर्वं त्वदधीनमद्य वै ।
ये चापि केचिन्मम वाजियोधास्त्वदाश्रयाः सारथयश्च सन्तु मे ॥ १३
॥ ४-१२-१३ (२८६३२)
इदं तवेष्टं विहितं सुरोपम ।इ यत्ते प्रसमीक्षितं वरम् ।
॥ऽनुरूपं हयकर्म दृश्यते विभाति राजेव न कर्म वाजिनाम् ॥ १४
॥ ४-१२-१४ (२८६३३)
युधिष्ठिरस्यैव हि दर्शनेन मे समं तवेदं प्रियदर्श दर्शनम् ।

कथं नु भृत्यैः स विनाकृतो वने चरत्यनिन्द्यो रमते च पाण्डवः
॥ १५ ॥ ४-१२-१५ (२८६३४)
वैशम्पायन उवाच । ४-१२-१६क्ष् (३०३५)
तथा स गन्धर्ववरोपमो युवा विराटराज्ञा मुदितेन पूजितः ।
न चैवमन्येऽपि विदुः कथंचन प्रियाभिरामं विचरन्तमन्तरा
॥ १६ ॥ ॥ ४-१२-१६ (२८६३५)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

विराटपर्व - अध्याय ०१३
॥ श्रीः ॥
४.१३. अध्यायः १३

Mahabharata - Virata Parva - Chapter Topics
सहदेवेन गोपालवेषधारणेन विराटंप्रति गमनम् ॥ १ ॥
विराटेन सहदेवस्य गोपालने नियोजनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-१३-० (२८६३६)
वैशम्पायन उवाच। ४-१३-०क्ष् (३०३६)
अथापरोऽदृश्यत वै शशी यथा हुतो हविर्भिर्हि यथाऽध्वरे शिखी ।
तथा समालक्ष्यत चारुदर्शनः प्रकाशयन्सूर्य इवाचिरोदितः ॥ १
॥ ४-१३-१ (२८६३७)
तमाव्रजन्तं सहदेवमग्रणीर्नृपो विराटो नचिरात्समैक्षत ।
प्रैक्षन्त तं तत्र पृथक्समागताः सभागताः सर्वमनोहरप्रभम् ।
युवानमायान्तममित्रकर्शनं प्रमुक्तमभ्रादिव चन्द्रमण्डलम् ॥ २ ॥
४-१३-२ (२८६३८)
यष्ट्या प्रमाणान्वितया सुदर्शनं दामानि पाशं च निबद्धय पृष्ठतः ।
मौर्वी च तन्त्रीं महतीं सुसंहितां बालैश्च तारैर्बहुभिः
समावृताम् ॥ ३ ॥ ४-१३-३ (२८६३९)
स चापि राजानमुवाच वीर्यवान्कुरुष्व मां पार्थिव गोष्ववस्थितम् ।
मया हि गुप्ताः पशवो भवन्तु ते प्रसन्ननिद्राः प्रभवोस्मि वल्लवः
॥ ४ ॥ ४-१३-४ (२८६४०)
न श्वापदेभ्यो न च रोगतो भयं न चापि दावान्न च तस्कराद्भयम् ।
पयःप्रभूता बहुला निरामया भवन्ति गावः सुभृता नराधिप ॥ ५

॥ ४-१३-५ (२८६४१)
निशम्य राजा सहदेवभाषितं निरीक्ष्य माद्रीसुतमभ्यनन्दत् ।
उवाच हृष्टो मुदितेन चेतसा न बल्लवत्वं त्वयि वीर लक्षये ॥ ६ ।
४-१३-६ (२८६४२)
धैर्याद्वपुः क्षात्रमिवेह ते दृढं प्रकाशते कौरववंशजस्य वा ।
नापण्डितेयं तव दृश्यते तनुर्भवेह राज्ये मम मन्त्रधर्मभृत्
॥ ७ ॥ ४-१३-७ (२८६४३)
प्रशाधि मत्स्यान्सहराजकानिमान्बृहस्पतिः शत्रुयुतानिवामरान् ।
बलं च मे रक्ष सुवेष सर्वशो गृहाण खड्गं प्रतिरूपमात्मः
॥ ८ ॥ ४-१३-८ (२८६४४)
अनीककर्णाग्रधरो बलस्य मे प्रभुर्भवानस्तु गृहाण कार्मुकम् ॥ ९ ।
४-१३-९ (२८६४५)
वैशम्पायन उवाच। ४-१३-१०क्ष् (३०३७)
विराटराज्ञाऽभिहितः कुरूत्तमः प्रशस्य राजानमभिप्रणम्य च ।
उवाच मत्स्यप्रवरं महापतिः शृणुष्व राजन्मम वाक्यमुत्तमम्
॥ १० ॥ ४-१३-१० (२८६४६)
बालो ह्यहं जातिविशेषदूषितः कुतोऽद्य मे नीतिषु युक्तमन्त्रता ।
स्वकर्मतुष्टाश्च वयं नराधिप प्रशाधि मां गोपरिरक्षणेऽनघ
॥ ११ ॥ ४-१३-११ (२८६४७)
वैश्योस्मि नाम्नाऽहमरिष्टनेमिर्गोसङ्ख्य आसं कुरुपुङ्गवानाम् ।
वस्तुं त्वयीच्छामि विशांवरिष्ठ तान्राजसिंहान्न हि वेद्मि पार्थान्
॥ १२ ॥ ४-१३-१२ (२८६४८)
न जीवितुं शक्यमतोऽन्यकर्मणा न च त्वदन्यो मम रोचते विभो
॥ १३ ॥ ४-१३-१३ (२८६४९)
विराट उवाच। ४-१३-१४क्ष् (३०३८)
त्वं ब्राह्मणो वा यदि वाऽपि भूमिपः समुद्रनेमीश्वररूपवानसि ।
आचक्ष्व तत्वं त्वममित्रकर्शन न बल्लवत्वं त्वयि विद्यते समम्
॥ १४ ॥ ४-१३-१४ (२८६५०)
कस्यामि राज्ञो विषयादिहागतः किं चापि शिल्पं तव विद्यते कृतम् ।
कथं त्वमस्मासु निवत्स्यसे सदा वदस्व किं चापि तवेह वेतनम् ॥ १५
॥ ४-१३-१५ (२८६५१)
सहदेव उवाच। ४-१३-१६क्ष् (३०३९)
पञ्चानां पाण्डुपुत्राणां ज्येष्ठो राजा युधिष्ठिरः ।
तस्याष्टौ शतसाहस्रं गवां वर्गाः शतंशतम् ॥ १६ ॥ ४-१३-१६ (२८६५२)
अपरे दशसाहस्रा द्विस्तावन्तस्तथा परे ।
तेषां गोसङ्ख्य आसं वै तन्त्रीपालेति मां विदुः ॥ १७ ॥ ४-१३-१७ (२८६५३)

भूतं भव्यं भविष्यच्च यच्चान्यद्गोगतं क्वचित् ।
न मेऽस्त्यविदितं किंचित्समन्ताद्दशयोजनम् ॥ १८ ॥ ४-१३-१८ (२८६५४)
गुणाः सुविदिता ह्यासन्मया तस्य महात्मनः ।
आसीच्च स मया तुष्टः कुरुराजो युधिष्ठिरः ॥ १९ ॥ ४-१३-१९ (२८६५५)
अनेन गणिता गावो दुर्विज्ञेया महत्तराः ।
बहुक्षीरतरास्ता वै बह्व्यः सत्यः सपुत्रिकाः ॥ २० ॥ ४-१३-२० (२८६५६)
क्षिप्रं च गावो बहुला भवन्ति न तासु रोगो भवतीह कश्चित् ।
तैस्तैरुपयैर्विदितं मयैतदेतानि शिल्पानि मयि स्थितानि ॥ २१
॥ ४-१३-२१ (२८६५७)
ऋषभानपि जानामि राजन्पूजितलक्षणान् ।
येषां मूत्रमुपाघ्राय वन्ध्या अपि प्रसूयते ॥ २२ ॥ ४-१३-२२ (२८६५८)
वैशम्पायन उवाच। ४-१३-२३क्ष् (३०४०)
मत्स्याधिपो हर्षकलेन चेतसा माद्रीसुतं पाण्डवमभ्यभाषत ।
नैवानुमन्ये तव कर्म कुत्सितं महीं समग्रामभिपातुमर्हसि ॥ २३
॥ ४-१३-२३ (२८६५९)
अथ त्विदानीं तव रोचते विभो यथेष्टतो गव्यमवेक्ष मामकम् ।
त्वदर्पणा मे पशवो भवन्तु वै पशून्सपालान्भवते ददाम्यहम् ॥ २४
॥ ४-१३-२४ (२८६६०)
शतं सहस्राणि गवां हि सन्ति वर्णस्यवर्णस्य पृथग्गणानाम् ।
ददामि तेऽहं वरमीप्सितं च यत्त्वदर्पणा मे पशवो भवन्त्विति
॥ २५ ॥ ४-१३-२५ (२८६६१)
वैशम्पायन उवाच। ४-१३-२६क्ष् (३०४१)
एवं विराटेन समेत्य पाण्डवो लब्ध्वा च गोबल्लवतां यथेष्टतः ।
अज्ञातचर्यामवसन्महात्मा यथा रविश्चास्तगिरिं प्रविष्टः ॥ २६
॥ ४-१३-२६ (२८६६२)
एवं विराटे न्यवसंश्च पाण्डवा यथा प्रतिज्ञाभिरमोघविक्रमाः ।
अबुद्धचर्यां चरितुं यथातथं समुद्रनेमीमभिशास्तुमुद्यताः ॥ २७
॥ ॥ ४-१३-२७ (२८६६३)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

विराटपर्व - अध्याय ०१४
॥ श्रीः ॥
४.१४. अध्यायः १४

द्रौपद्या सैरन्ध्रीवेषधारणेन सुदेष्णागृहे निवासः ॥१ ॥

Mahabharata - Virata Parva - Chapter Text

४-१४-० (२८६६४)
वैशम्पायन उवाच ।४-१४-०क्ष् (३०४२)
ततः कृष्णा सुकेशी सा दर्शनीया शुचिस्मिता ।
वेणीकेशान्समुत्क्षिप्य पीनवृत्तकुचा शुभा ।
जुगूहे दक्षिणे पार्श्वे मृदूनसितलोचना ॥१ ॥ ४-१४-१ (२८६६५)
वासश्च परिधायैकं कृष्णा सुमलिनं महत् ।
कृत्वा वेषं च सैरन्ध्र्याः कृष्णा व्यचरदार्तवत् ॥२ ॥ ४-१४-२
(२८६६६)
प्रविष्टा नगरं भीरुः सैरन्ध्रीवेषसंयुता ।
तां नराः परिधावन्तः स्त्रियश्च समुपाद्रवन् ॥३ ॥ ४-१४-३ (२८६६७)
अपृच्छंस्ते च तां दृष्ट्वा का त्वं किं च चिकीर्षसि ।
सा तानुवाच राजेन्द्र सैरन्ध्र्यहमुपागता ।
कर्म चेच्छामि वै कर्तुं तस्य या मां भरिष्यति ॥४ ॥ ४-१४-४ (२८६६८)
वैशम्पायन उवाच।४-१४-५क्ष् (३०४३)
तस्या रूपेण वेषेण श्लक्ष्णया च गिरा तथा ।
न श्रद्दधानास्तां देवीमन्नहेतोरुपस्थिताम् ॥५ ॥४-१४-५ (२८६६९)
विराटस्य तु कैकेयी भार्या परमसंमता ।
आलोकयन्ती ददृशे प्रासादाद्द्रुपदात्मजाम् ॥६ ॥४-१४-६ (२८६७०)
सा समीक्ष्य तथारूपामनाथामेकवाससम् ।
स्त्रीभिश्च पुरुषैश्चापि सर्वतः परिवारिताम् ॥७ ॥४-१४-७ (२८६७१)
विराटभार्या तां देवी कारुण्याज्जातसंभ्रमा ।
अप्रेषयत्समीपस्थाः स्त्रियो वृद्धाश्च तत्पराः ॥८ ॥४-१४-८ (२८६७२)
अपनीय ततः सर्वा आनयध्वमिहैव ताम् ।
यदा दृष्टा मया साध्वी कम्पते मे मनस्तदा ।
तस्माच्छीघ्रमिहानाय दर्शयध्वं यदीच्छथ ॥९ ॥ ४-१४-९ (२८६७३)
तास्तथोक्ता उपागम्य द्रौपदीं परिसंगताः ।
आनीय सर्वथा त्वेनामब्रुवन्मधुराक्षरम् ॥१० ॥४-१४-१० (२८६७४)
भद्रे त्वां द्रष्टुमिच्छन्ती सुदेष्णा हर्म्यभूतले ।
त्वदर्थं प्रैषयच्चास्मान्द्रष्टुं तां त्वं यदीच्छसि ।
आयाह्यस्माभिरेवाद्य रक्ष्यमाणा यथेष्टतः ॥११ ॥ ४-१४-११ (२८६७५)
तच्छ्रुत्वा द्रौपदी तासां वचनं वाक्यकोविदा ।
ईप्सितर्थातिलाभेन हृष्टाऽऽयाता गृहोत्तमम् ॥१२ ॥४-१४-१२ (२८६७६)

राजवेश्म ह्युपाक्रम्य यत्राग्र्यमहिषी स्थिता ।
सुदेष्णामगमत्कृष्णा राजभार्यां यशस्विनीम् ॥ १३ ॥ ४-१४-१३ (२८६७७)
कृष्णान्केशान्मृदून्दीर्घान्समुद्ग्रथ्यासितेक्षणा ।
कुञ्चिताग्रांस्तु सूक्ष्माग्रान्दर्शनीयान्निबध्य च ।
जुगूहे दक्षिणे पार्श्वे मृदूनायतलोचना ॥ १४ ॥ ४-१४-१४ (२८६७८)
सा प्रविश्य विराटस्य द्रौपद्यन्तःपुरं शुभा ।
ह्रीनिषेवान्विता बाला कम्पमाना लतेव सा ॥ १५ ॥ ४-१४-१५ (२८६७९)
अभिगम्य च सुश्रोणी सर्वलक्षणसंयुता ।
ददर्शावस्थितां हैमे पीठे रत्नपरिच्छदे ॥ १६ ॥ ४-१४-१६ (२८६८०)
रक्तसूक्ष्माम्बरधरां मेघे सौदामिनीमिव ।
नानावर्णविचित्रां च सर्वाभरणभूषिताम् ॥ १७ ॥ ४-१४-१७ (२८६८१)
सुभ्रूं सुकेशीं सुश्रोणीं कुब्जवामनमध्यगाम् ।
बहुपुष्पोपकीर्णायां भूम्यां वेदिमिवाध्वरे ॥ १८ ॥ ४-१४-१८ (२८६८२)
सुदेष्णां राजमहिषीं सर्वालंकारभूषिताम् ।
श्रीमतीं राजपुत्रीणां शतेन परिवारिताम् ॥ १९ ॥ ४-१४-१९ (२८६८३)
ताः सर्वा द्रौपदीं दृष्ट्वा सन्तप्ताः परमाङ्गनाः ।
परितश्चोपतस्थुस्ताः सहसोत्थाय चासनात् ॥ २० ॥ ४-१४-२० (२८६८४)
निरीक्षमाणाः सर्वास्ताः शचीं देवीमिवागताम् ।
गूढगुल्फां वरारोहां कृष्णां ताम्रायतेक्षणाम् ।
अतिसर्वानवद्याङ्गीं नतगात्रीं सुमध्यमाम् ॥ २१ ॥ ४-१४-२१ (२८६८५)
न ह्रस्वां नातिमहतीं जातां बहुतृणे वने ।
ऋश्यरोहीमिवानिन्द्यां सुकेशीं मृगलोचनाम् ॥ २२ ॥ ४-१४-२२ (२८६८६)
तां मृगीमिव वित्रस्तां यूथभ्रष्टामिव द्विपाम् ।
लक्ष्मीमिव विशालाक्षीं विद्यामिव यशस्विनीम् ॥ २३ ॥ ४-१४-२३ (२८६८७)
रोहिणीमिव ताराणां दीप्तामग्निशिखामिव ।
पार्वतीमिव रुद्राणीं वेलामिव महोदधेः ॥ २४ ॥ ४-१४-२४ (२८६८८)
सुलभामिव नागीनां मृगीणामिव किन्नरीम् ।
गङ्गामिव विशुद्धाङ्गीं शारदीमिव शर्वरीम् ॥ २५ ॥ ४-१४-२५ (२८६८९)
तामचिन्त्यतमां लोके इलामिव यशस्विनीम् ।
सावित्रीमिव दुर्धर्षां ब्राह्म्या लक्ष्म्या समन्वितां ॥ २६ ॥ ४-१४-२६ (२८६९०)
सीतामिव सतीं शुद्धामरुन्धतीमिव प्रियाम् ।
सुदेष्णा पर्यपृच्छत्तां विस्मयोत्फुल्ललोचना ॥ २७ ॥ ४-१४-२७ (२८६९१)
का त्वं सर्वानवद्याङ्गि कुतोसि त्वमिहागता ।
कस्य वा त्वं विशालाक्षि किं वा ते करवाण्यहम् ॥ २८ ॥ ४-१४-२८ (२८६९२)
गूढगुल्फा समानोरूस्त्रिगम्भीरा षडुन्नता ।
स्निग्धा पञ्चसु रक्तेषु हंसगद्गदभाषिणी ॥ २९ ॥ ४-१४-२९ (२८६९३)

शुकेशी सुस्वरा श्यामा पीनश्रोणीपयोधरा ।
अरालपक्ष्मनयना बिम्बोष्ठी तनुमध्यमा ॥ ३० ॥ ४-१४-३० (२८६९४)
कम्बुग्रीवा गूढसिरा पूर्णचन्द्रनिभानना ।
दानवी किन्नरी वा त्वं गन्धर्वी वनदेवता ॥ ३१ ॥ ४-१४-३१ (२८६९५)
अप्सरा वाऽसि नागी वा तारा वा त्वं विलासिनी ।
अलम्बुसा मिश्रकेशी पुण्डरीकाऽथ मालिनी ॥ ३२ ॥ ४-१४-३२ (२८६९६)
तेनतेनैव संपन्ना काश्मीरीव तुरंगमा ।
इन्द्राणी त्वथ रुद्राणी स्वधा वाऽप्यथवा रतिः ॥ ३३ ॥ ४-१४-३३ (२८६९७)
देवि देवेषु विख्याता ब्रूहि का त्वमिहागता ।
तव ह्यनुपमं रूपं भूषणैरपि वर्जितम् ॥ ३४ ॥ ४-१४-३४ (२८६९८)
त्वां सृष्ट्वोपरतं मन्ये लोककर्तारमीश्वरम् ।
न तृप्यन्ति स्त्रियो दृष्ट्वा का न पुंसां रतिर्भवेत् ॥ ३५ ॥ ४-१४-३५
(२८६९९)
प्रवालपुष्पस्तबकैराचिता वनदेवताः ।
त्वामेव हि निरीक्षन्ते विस्मिता रूपसंपदा ॥ ३६ ॥ ४-१४-३६ (२८७००)
अन्तःपुरगता नार्यो मृगाः पक्षिगणा नराः ।
सर्वे त्वामेव कल्याणि निरीक्षन्ते सुविस्मिताः ॥ ३७ ॥ ४-१४-३७ (२८७०१)
न त्वादृशी काचन मे त्रिषु लोकेषु सुन्दरी ।
दृष्टपूर्वा श्रुता वाऽपि चक्षुपा विद्यते शुभा ॥ ३८ ॥ ४-१४-३८ (२८७०२)
द्रौपद्युवाच। ४-१४-३९क्ष् (३०४४)
नास्ति देवी न गन्धर्वी न यक्षी न च किन्नरी ।
सैरन्ध्री नाम मे जातिर्वन्यमूलफलाशना ॥ ३९ ॥ ४-१४-३९ (२८७०३)
पतीनां प्रेक्षमाणानां कस्मिंश्चित्कारणान्तरे ।
केशपाशे परामृष्टा साऽहं त्रस्ता वनं गता ॥ ४० ॥ ४-१४-४० (२८७०४)
तत्र द्वादशवर्षाणि वन्यमूलफलाशना ।
चराम्यनिलया सुभ्रूः सा तवान्तिकमागता ॥ ४१ ॥ ४-१४-४१ (२८७०५)
जानामि केशान्ग्रथितुं विचित्रान्ग्रथितुं मणीन् ।
मल्लिकोत्पलपद्मानां जानामि ग्रथितुं स्रजः ॥ ४२ ॥ ४-१४-४२ (२८७०६)
सिन्धुवारकजातीनां रचयाम्यवतंसकान् ।
पत्रं मृगाङ्कमगरुं पिषे च हरिचन्दनम् ।
ग्रथयिष्यामि चित्राश्च स्रजः परमशोभनाः ॥ ४३ ॥ ४-१४-४३ (२८७०७)
आराधनं सत्यभामां कृष्णस्य महिषीं प्रियाम् ।
कृष्णां च भार्यां पार्थानां नारीणामुत्तमां तथा ॥ ४४ ॥ ४-१४-४४ (२८७०८)
तथाऽस्मि सुभ्रुवा चाहमिष्टलाभेन तोषिता ।
मालिनी चेति मे नाम स्वयं देवी चकार ह ।
कृष्णा कमलपत्राक्षी सा मे प्राणसमा सखी ॥ ४५ ॥ ४-१४-४५ (२८७०९)

न चाहं चिरमिच्छामि क्वचिद्वस्तुं शुभानने ।
व्रतं किलैतदस्माकं कुलधर्मोऽयमीदृशः ॥ ४६ ॥ ४-१४-४६ (२८७१०)
योऽस्माकं तु हरेद्द्रव्यं देशं वसनमेव वा ।
न क्रोद्धव्यं किलास्माभिरस्मद्गुरुरमर्षणः ॥ ४७ ॥ ४-१४-४७ (२८७११)
साऽहं वनानि दुर्गाणि तीर्थानि च सरांसि च ।
शैलांश्च विविधान्रम्यान्सरितश्च समुद्रगाः ॥ ४८ ॥ ४-१४-४८ (२८७१२)
भर्तृशोकपरीताङ्गी भर्तृसब्रह्मचारिणी ।
विचरामि महीं दुर्गां यत्र सायंनिवेशना ॥ ४९ ॥ ४-१४-४९ (२८७१३)
वीरपत्नी यदा देवी चरमाणेषु भर्तृषु ।
साऽहं विवत्सा विधिना गन्धमादनपर्वतात् ।
शृणोमि तव सौशील्यं भर्तुर्मधुरभाषिणि ॥ ५० ॥ ४-१४-५० (२८७१४)
माहात्म्यं च ततः श्रुत्वा ब्राह्मणानां समीपतः ।
त्वामुपस्थातुमिच्छामि ततश्चाहमिहागता ॥ ५१ ॥ ४-१४-५१ (२८७१५)
गुरवो मम धर्मश्च वायुः शक्रस्तथाऽश्विनौ ।
तेषां प्रसादाच्च न मां कश्चिद्धर्षयते पुमान् ॥ ५२ ॥ ४-१४-५२ (२८७१६)
वैशम्पायन उवाच। ४-१४-५३क्ष् (३०४५)
एवमुक्त्वा सुदेष्णां तां कृताञ्जलिपुटा स्थिता ।
साऽब्रवीद्विस्मयाविष्टा द्रौपदीं योषितां वराम् ॥ ५३ ॥ ४-१४-५३ (२८७१७)
न भरेयमहं भद्रे संशयो मम विद्यते ।
राजा त्वयं हि त्वां दृष्ट्वा मतिं पापां करिष्यति ॥ ५४ ॥ ४-१४-५४ (२८७१८)
साऽहं त्वां न क्षमां मन्ये वसन्तीमिह वेश्मनि ।
एष दोषोस्ति सुश्रोणि कथं वाभीरु मन्यसे ॥ ५५ ॥ ४-१४-५५ (२८७१९)
स्थिता राजकुले नार्यो याश्चेमा मम वेश्मनि ।
त्वामेवैकां निरीक्षन्ते विस्मयाद्वरवर्णिनि ॥ ५६ ॥ ४-१४-५६ (२८७२०)
वृक्षांश्चोपस्थितान्पश्य य इमे मम वेश्मनि ।
विनमन्ते हि त्वां दृष्ट्वा पुमांसं कं न लोभयेः ॥ ५७ ॥ ४-१४-५७ (२८७२१)
बिभर्षि परमं रूपमतिमानुषमद्भुतम् ।
तिर्यग्योनिगताश्चापि निरीक्षन्ते सविस्मयाः ।
तव रूपमनिन्द्याङ्गि किं पुनर्मानवा भुवि ॥ ५८ ॥ ४-१४-५८ (२८७२२)
राजा विराटः सुश्रोणि दृष्ट्वा ते परमं वपुः ।
मां विहाय वरारोहे त्वां गच्छेत्सर्वचेतसा ॥ ५९ ॥ ४-१४-५९ (२८७२३)
यं हि त्वमनवद्याङ्गी नरमायतलोचने ।
सुप्रसन्ना हि वीक्षेथाः स कामवरागो भवेत् ॥ ६० ॥ ४-१४-६० (२८७२४)
सुस्नाताऽलंकृता हि त्वं यमीक्षेथा हि मानुषम् ।
ग्लानिर्न तस्य दुःखं वा न तन्द्रिर्न पराजयः ॥ ६१ ॥ ४-१४-६१ (२८७२५)
न शोको न च सन्तापो न क्रोधो नानृतं वदे ।

यं त्वं सर्वातवद्याङ्गि भजेथाः समलंकृता ॥ ६२ ॥ ४-१४-६२ (२८७२६)
न व्याधिर्न जरा तस्य न तृष्णा न क्षुधा भवेत् ।
यस्य त्वं वशगा सुभ्रु भवेरङ्कगता सती ॥ ६३ । ४-१४-६३ (२८७२७)
पञ्चत्वमपि संप्राप्तं यं च त्वं परिपस्वजेः ।
बाहुभ्यामनुरूपाभ्यां स जीवेदिति मे मतिः ॥ ६४ ॥ ४-१४-६४ (२८७२८)
यस्य हि त्वं भवेर्भार्या यं च हृष्टा परिष्वजेः ।
अतिजीवेस्य सर्वेषु देवेष्विव पुरन्दरः ॥ ६५ ॥ ४-१४-६५ (२८७२९)
अध्यारोहेद्यथा वृक्षं यथा वाऽऽरुह्य तक्षति ।
राजवेश्मनि वामोरु ननु स्यास्त्वं तथा मम ॥ ६६ ॥ ४-१४-६६ (२८७३०)
यथा कर्कटकी गर्भमाधत्ते मृत्युमात्मनः ।
तथाविधमहं मन्ये तव सुभ्रु समागमम् ॥ ६७ ॥ ४-१४-६७ (२८७३१)
अनुमानये त्वां सैरन्ध्रि नावमन्ये कथंचन ।
भर्तृशीलभयाद्भद्रे तव वासं न रोचये ॥ ६८ ॥ ४-१४-६८ (२८७३२)
सैरन्ध्र्युवाच। ४-१४-६९क्ष् (३०४६)
नाहं शक्या विराटेन यद्वा चान्येन केनचित् ।
देवगन्धर्वयक्षैर्वा द्रष्टुं दुष्टेन चेतसा ॥ ६९ ॥ ४-१४-६९ (२८७३३)
गन्धर्वाः पालयन्ते मां सुकुलाः पञ्च सुव्रताः ।
पुत्रा देवादिदेवानां सूर्यपावकवर्चसः ॥ ७० ॥ ४-१४-७० (२८७३४)
यश्च दुःशीलवान्मर्त्यो मां स्पृशेद्दुष्टचेतसा ।
स तामेव निशां शीघ्रं शयीत मुसलैर्हतः ॥ ७१ ॥ ४-१४-७१ (२८७३५)
यस्यापि हि शतं पूर्णं बान्धवानां भवेदपि ।
सहस्रं वा विशालाक्षि कोटिर्वापि सहस्रिका ।
दुष्टचित्तश्च मां ब्रूयान्न स जीवेत्तवाग्रतः ॥ ७२ ॥ ४-१४-७२ (२८७३६)
न तस्य त्रिदशा देवा नासुरा न च पन्नगाः ।
तेभ्यो गन्धर्वराजेभ्यस्त्राणं कुर्युरसंशयम् ॥ ७३ ॥ ४-१४-७३ (२८७३७)
सुदेष्णे विश्वस त्वं मां स्वजने बान्धवेऽपि वा ।
नाहं शक्या नरैर्द्रष्टुं न च मे वृत्तमीदृशम् ॥ ७४ ॥ ४-१४-७४
(२८७३८)
यो मे न दद्यादुच्छिष्टं न च पादौ प्रधावयेत् ।
प्रीयेरंस्तेन वासेन गन्धर्वाः पतयो मम ॥ ७५ ॥ ४-१४-७५ (२८७३९)
यो हि मां पुरुषो गृद्धयेद्यथाऽन्याः प्राकृतस्त्रियः ।
तामेव स इमां रात्रिं प्रविशेदपरां तनुम् ॥ ७६ ॥ ४-१४-७६ (२८७४०)
न चाप्यहं चालयितुं शक्या केनचिदङ्गने ।
दुःखशीलाश्च गन्धर्वास्त इमे बलिनः प्रियाः ।
एवं निवसमानायां मयि मा ते भयं हि भूत् ॥ ७७ ॥ ४-१४-७७ (२८७४१)
वैशम्पायन उवाच। ४-१४-७८क्ष् (३०४७)

एवमुक्ता तु सैरन्ध्र्या सुदेष्णा वाक्यमब्रवीत् ।
वसेह मयि कल्याणि यदि ते वृत्तमीदृशम् ॥ ७८ ॥ ४-१४-७८ (२८७४२)
कश्च ते दातुमुच्छिष्टं पुमानर्हति भामिनि ।
प्रसारयेच्च कः पादौ लक्ष्मीं दृष्ट्वैव बुद्धिमान् ॥ ७९
॥ ४-१४-७९ (२८७४३)
एवमाचारसंपन्ना एवं देवपरायणा ।
रक्ष्या त्वमसि भूतानां सावित्रीवद्द्विजन्मनाम् ॥ ८० ॥ ४-१४-८० (२८७४४)
देवता इव कल्याणि पूजिता वरवर्णिनी ।
वस भद्रे मयि प्रीता प्रीतिर्हि मयि वर्तते ।
सर्वकामैः प्रमुदिता निरुद्विग्नमनाः सुखम् ॥ ८१ ॥ ४-१४-८१ (२८७४५)
वैशम्पायन उवाच। ४-१४-८२क्ष् (३०४८)
सुदेष्णयैवमुक्ता सा संप्रीता चारुहासिनी ।
निर्विशङ्का विराटस्य विवेशान्तःपुरं सुखम् ॥ ८२ ॥ ४-१४-८२ (२८७४६)
याज्ञसेनी सुदेष्णां तु शुश्रूपन्ती विशांपते ।
अवसत्परिचारार्हा सुदुःखं जनमेजय ॥ ८३ ॥ ४-१४-८३ (२८७४७)
एवं विराटे न्यवसंस्तु पाण्डवाः कृष्णा तथाऽन्तःपुरमेत्य शोभना ।
अज्ञातचर्यां प्रतिरुद्धमानसा यथाऽग्रथो भस्मनि गूढतेजसः
॥ ८४ ॥ ॥ ४-१४-८४ (२८७४८)

इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-१४-१ समुत्क्षिप्य वल्गिताग्रानिनिन्दितानिति खो थो धो पाठः ॥
१ ॥
चतुर्दशोऽध्यायः ॥
१४ ॥

विराटपर्व - अध्याय ०१५
॥ श्रीः ॥
४.१५. अध्यायः १५

Mahabharata - Virata Parva - Chapter Topics
अथ समयपलनपर्व ॥ २ ॥
पाण्डवैः स्वस्वव्यापारैर्विराटपरितोपणम् ॥ १ ॥
भीमेन शङ्करोत्सवे महामल्लमारणम् ॥ २ ॥

४-१५-० (२८७४९)
जनमेजय उवाच। ४-१५-०क्ष् (३०४९)
एवं विराटनगरे वसन्तः सत्यविक्रमाः ।
अत ऊर्ध्वं नरव्याघ्राः किमकुर्वत पाण्डवाः ॥ १ ॥ ४-१५-१ (२८७५०)
वैशम्पायन उवाच। ४-१५-२क्ष् (३०५०)
एवं ते न्यवसंस्तत्र प्रच्छन्नाः कुरुनन्दनाः ।
आराधयन्तो राजानां यदकुर्वत तच्छृणु ॥ २ ॥ ४-१५-२ (२८७५१)
युधिष्ठिरः सभास्तारः सभ्यानामभवत्प्रियः ।
तथैव च विराटस्य सपुत्रस्य विशांपते ॥ ३ ॥ ४-१५-३ (२८७५२)
स ह्यक्षहृदयज्ञस्तान्क्रीडयामास पाण्डवः ।
अक्षबद्धान्यथाकामं सूत्रबद्धानिव द्विजान् ॥ ४ ॥ ४-१५-४ (२८७५३)
अज्ञातं च विराटस्य विजित्य वसु धर्मराट् ।
भ्रातृभ्यः पुरुषव्याघ्रो यथेष्टं संप्रयच्छति ॥ ५ ॥ ४-१५-५ (२८७५४)
भीमसेनोपि मांसानि भक्ष्याणि विविधानि च ।
अतिसृष्टानि मत्स्येन विक्रीणन्निव भ्रातृषु ॥ ६ ॥ ४-१५-६ (२८७५५)
वासांसि परिजीर्णानि लब्धान्यन्तःपुरेऽर्जुनः ।
विक्रीणन्निव सर्वेभ्यः पाण्डवेभ्यः प्रयच्छति ॥ ७ ॥ ४-१५-७ (२८७५६)
नकुलोपि धनं लब्ध्वा कृते कर्मणि वाजिनाम् ।
तुष्टे तस्मिन्नरपतौ पाण्डवेभ्यः प्रयच्छति ॥ ८ ॥ ४-१५-८ (२८७५७)
सहदेवोपि गोपानां वेषमास्थाय पाण्डवः ।
दधि क्षीरं घृतं चैव पाण्डवेभ्यः प्रयच्छति ॥ ९ ॥ ४-१५-९ (२८७५८)
कृष्णा तु सर्वान्भ्रातॄंस्तान्निरीक्षन्ती तपस्विनी ।
यथा पुनरविज्ञाता तथा चरति भामिनी ॥ १० ॥ ४-१५-१० (२८७५९)
एवं संभावयन्तस्ते तदाऽन्योन्यं महारथाः ।
विराटनगरे चेरुः पुनर्गर्भधृता इव ॥ ११ ॥ ४-१५-११ (२८७६०)
साशङ्का धार्तराष्ट्रस्य भयात्पाण्डुसुतास्तदा ।
प्रेक्षमाणास्तदा कृष्णामूपुश्छन्ना नराधिप ॥ १२ ॥ ४-१५-१२ (२८७६१)
अथ मासे चतुर्थे तु शङ्करस्य महोत्सवः ।
आसीत्समृद्धो मत्स्येषु पुरुषाणां सुसंमतः ॥ १३ ॥ ४-१५-१३ (२८७६२)
तत्र मल्लाः समापेतुर्दिग्भ्यो राजन्सहस्रशः ॥ १४ ॥ ४-१५-१४ (२८७६३)
महाकाया महावीर्याः कालकेया इवासुराः ।
वीर्योन्मत्ता बलोदग्रा राज्ञा समभिपूजिताः ॥ १५ ॥ ४-१५-१५ (२८७६४)
सिंहस्कन्धकटिग्रीवाः स्ववदाता मनस्विनः ।
असकृल्लब्धलक्षास्ते रङ्गे पार्थिवसन्निधौ ॥ १६ ॥ ४-१५-१६ (२८७६५)

तेषामेको महानासीत्सर्वमल्लानथाह्वयत् ।
व्यावल्गमानो ददृशे गर्जितोद्गतिभिः स्थितः ॥ १७ ॥ ४-१५-१७ (२८७६६)
वित्रस्तमनसः सर्वे मल्लास्ते हतचेतसः ।
अवाङ्भुखाश्च भीताश्च मल्लाश्चान्ये विचेतसः ॥ १८ ॥ ४-१५-१८ (२८७६७)
व्यसुत्वमपरे चैव वाञ्छन्ति प्रतिविह्वलाः ।
गां प्रवेष्टुमथेच्छन्ति खं गन्तुमिव चोत्थिताः ॥ १९ ॥ ४-१५-१९ (२८७६८)
त्रस्ताः शान्ता विषणाङ्गा निःशब्दं विह्वलेक्षणाः ।
विराटराजमल्लास्ते भग्नदर्पा हतप्रभाः ॥ २० ॥ ४-१५-२० (२८७६९)
मल्लेन्द्रनिहताः सर्वे न किंचित्प्रवदन्ति ते ।
मल्ल उद्वीक्ष्य तान्मल्लांस्त्रस्तान्वाक्यमुवाचह ॥ २१ ॥ ४-१५-२१ (२८७७०)
आगतं मल्लराजं मां कृत्स्ने पृथिविमण्डले ।
सिंहव्याघ्रगणैः सार्धं क्रीडन्तं विद्धि भूपते ॥ २२ ॥ ४-१५-२२ (२८७७१)
मल्लेन्द्रस्य वचः श्रुत्वा बलदर्पसमन्वितम् ।
विराटो वीक्ष्य तान्मल्लांस्त्रस्तान्वाक्यमुवाच ह ॥ २३ ॥ ४-१५-२३ (२८७७२)
अनेन सह मल्लेन को योद्धुं शक्तिमान्नरः ॥ २४ ॥ ४-१५-२४ (२८७७३)
इत्युक्तास्ते विराटेन सर्वे मल्ला विशांपते ।
तूष्णीमासंस्ततो राजा क्रोधाविष्ट उवाच ह ॥ २५ ॥ ४-१५-२५ (२८७७४)
ग्रामांश्च वेतनान्येपां मल्लानां हारयाम्यहम् ।
ततो युधिष्ठिरोऽवादीच्छ्रुत्वा मात्स्यपतेर्वचः ॥ २६ ॥ ४-१५-२६ (२८७७५)
अस्ति मल्लो महाराज मया दृष्टो युधिष्ठिरे ।
अनेन सह मल्लेन योद्धुं शक्नोति भूपते ॥ २७ ॥ ४-१५-२७ (२८७७६)
योसौ मल्लो मया दृष्टः पूर्वं यौधिष्ठिरे पुरे ।
सोयं मल्लो वसत्येप राजंस्तव महानसे ॥ २८ ॥ ४-१५-२८ (२८७७७)
वैशम्पायन उवाच। ४-१५-२९क्ष् (३०५१)
युधिष्ठिरवचः श्रुत्वा व्यक्तमाहेति पार्थिवः ।
सोप्यथाहूयतां क्षिप्रं योद्धुं मल्लेन संप्रति ॥ २९ ॥ ४-१५-२९ (२८७७८)
भीमसेनो विराटेन आहूतश्चोदितस्तथा ।
योद्धुं ततोऽब्रवीद्वाक्यं योद्धुं शक्नोमि भूपते ॥ ३० ॥ ४-१५-३० (२८७७९)
नरेन्द्र ते प्रभावेन श्रिया शक्त्या च शासनात् ।
अनेन सह मल्लेन योद्धुं राजेन्द्र शक्नुयाम् ॥ ३१ ॥ ४-१५-३१ (२८७८०)
युधिष्ठिरकृतं ज्ञात्वा श्रिया तव विशांपते ।
महादेवस्य भक्त्या च तं मल्लं पातयाम्यहम् ॥ ३२ ॥ ४-१५-३२ (२८७८१)
वैशम्पायन उवाच। ४-१५-३३क्ष् (३०५२)
चोदितो भीमसेनस्तु मल्लमाहूय मण्डले ।
योद्धुं व्यवस्थितो वीरो रेणुं संमृज्य हस्तयोः ।
मत्तो गज इवान्यं तु योद्धुं समुपचक्रमे ॥ ३३ ॥ ४-१५-३३ (२८७८२)

अथ सूदेन तं मल्लं योधयामास मत्स्यराट् ॥ ३४ ॥ ४-१५-३४ (२८७८३)
नोद्यमानस्तदा भीमो दुःखेनेवाकरोन्मतिम् ।
न हि शक्नोम्यशक्तोपि प्रत्याख्यातुं नराधिपं ॥ ३५ ॥ ४-१५-३५ (२८७८४)
ततः स पुरुषव्याघ्रः शार्दूलशिथिलं चरन् ।
प्रविवेश महारङ्गं विराटमभिहर्षयन् ॥ ३६ ॥ ४-१५-३६ (२८७८५)
बवन्ध कक्षां कौन्तेयस्ततः संहर्षयञ्जनम् ।
ततस्तु वृत्रसङ्काशं भीमो मल्लं समाह्वयत् ॥ ३७ ॥ ४-१५-३७ (२८७८६)
जीमूतं नाम तं तत्र मल्लप्रख्यातविक्रमम् ।
कक्षे मल्लं गृहीत्वाऽथ ननाद बहु सिंहवत् ॥ ३८ ॥ ४-१५-३८ (२८७८७)
तावुभौ सुमहोत्साहावुभौ भीमपराक्रमौ ।
मत्ताविव महाकायौ वारणौ षष्ठिहायनौ ॥ ३९ ॥ ४-१५-३९ (२८७८८)
ततस्तौ नरशार्दूलौ बाहुयुद्धं समीयतु ।
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ॥ ४० ॥ ४-१५-४० (२८७८९)
उभौ परमसंहृष्टौ बलेनातिबलावुभौ ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ ॥ ४१ ॥ ४-१५-४१ (२८७९०)
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥ ४२ ॥ ४-१५-४२ (२८७९१)
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्स्वनैः ।
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ॥ ४३ ॥ ४-१५-४३ (२८७९२)
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः ॥ ४४ ॥ ४-१५-४४ (२८७९३)
तद्युद्धमभवद्धोरमशस्त्रं बाहुतेजसा ।
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ॥ ४५ ॥ ४-१५-४५ (२८७९४)
अरज्यत जनः सर्वः सोत्कुष्टनिनदोत्थितः ।
बलिनोः संयुगे राजन्वृत्रवासवयोरिव ॥ ४६ ॥ ४-१५-४६ (२८७९५)
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ।
आकर्षतुरथान्योन्यं जानुभिश्चापि जन्घतुः ॥ ४७ ॥ ४-१५-४७ (२८७९६)
ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ।
बाहुभिः समसज्जेतामायसैः परिघैरिव ॥ ४८ ॥ ४-१५-४८ (२८७९७)
उत्पपाताथ वेगेन मल्लं कक्षे गृहीतवान् ।
पार्श्वं निगृह्य हस्तेन पातयामास मल्लकम् ॥ ४९ ॥ ४-१५-४९ (२८७९८)
चकर्ष दोर्भ्यामुत्पात्य भीमो मल्लममित्रहा ।
निनदं तमभिक्रोशञ्शार्दूल इव वारणम् ॥ ५० ॥ ४-१५-५० (२८७९९)
समुद्यम्य महाबाहुर्भ्रामयामास वीर्यवान् ।
ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परम् ॥ ५१ ॥ ४-१५-५१ (२८८००)

भ्रामयित्वा शतगुणं गतसत्वमचेतनम् ।
प्रत्यपिंषन्महाबाहुर्मल्लं भुवि वृकोदरः ॥ ५२ ॥ ४-१५-५२ (२८८०१)
तस्मिन्विनिहते वीरे जीमूते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्बान्धवैः सह ॥ ५३ ॥ ४-१५-५३ (२८८०२)
प्रहर्षात्प्रददौ वित्तं बहु राज महामनाः ।
वललाय महारङ्गे यथा वैश्रवणस्तथा ॥ ५४ ॥ ४-१५-५४ (२८८०३)
एवं स सुबहून्मल्लान्पुरुषांश्च महाबलान् ।
विनिघ्नन्मत्स्यराजस्य प्रीतिमाहरदुत्तमाम् ॥ ५५ ॥ ४-१५-५५ (२८८०४)
यदाऽस्य तुल्यः पुरुषो न कश्चितत्र विद्यते ।
ततो व्याघ्रैश्च सिंहैश्च द्विरदैश्चाप्ययोधयत् ॥ ५६ ॥ ४-१५-५६
(२८८०५)
विराटेन प्रदत्तानि चित्राणि विविधानि च ।
स्थितेभ्यः पुरुषेभ्यश्च दत्त्वा द्रव्याणि जग्मिवान् ॥ ५७ ॥ ४-१५-५७ (२८८०६)
पुनरन्तःपुरगतः स्त्रीणां मध्ये वृकोदरः ।
योध्यते स विराटस्य गजैः सिंहैर्महाबलैः ॥ ५८ ॥ ४-१५-५८ (२८८०७)
बीभत्सुरपि गीतेन नृत्तेनापि च पाण्डवः ।
विराटं तोषयामास सर्वाश्चान्तःपुरस्त्रियः ॥ ५९ ॥ ४-१५-५९ (२८८०८)
अश्वैर्विनीतैर्जवनैस्तत्रतत्र समागतः ।
तोपयामास राजानं नकुलो नृपसत्तमम् ।
तस्मै प्रदेयं प्रायच्छत्प्रीतो राजा धनं बहु ॥ ६० ॥ ४-१५-६० (२८८०९)
विनीतान्वृपभान्दृष्ट्वा सहदेवस्य चाभितः ।
धनं ददौ बहुविधं विराटः पुरुषर्षभः ॥ ६१ ॥ ४-१५-६१ (२८८१०)
द्रौपदी प्रेक्ष्य तान्सर्वान्क्लिश्यमानान्महारथान् ।
नातिप्रीतमना राजन्निश्वासपरमाऽभवत् ॥ ६२ ॥ ४-१५-६२ (२८८११)
एवं ते न्यवसंस्तत्र प्रच्छन्नाः पुरुषर्षभाः ।
कर्माणि तस्य कुर्वाणा विराटनृपतेस्तदा ॥ ६३ ॥ ॥ ४-१५-६३ (२८८१२)

इति श्रीमन्महाभारते विराटपर्वणि समयपालनपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ समाप्तं चेदं समयपालनपर्व
॥ २ ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-१५-४२ कृतप्रतिकृतादयो मल्लयुद्धविशेषाः ॥
४२ ॥

विराटपर्व - अध्याय ०१६
॥ श्रीः ॥
४.१६. अध्यायः १६

Mahabharata - Virata Parva - Chapter Topics
द्रौपद्या स्वात्मानं कामयमानस्य कीचकस्य परुषभाषणैः
प्रत्याख्यानम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-१६-० (२८८१३)
वैशम्पायन उवाच। ४-१६-०क्ष् (३०५३)
वसमानेषु पार्थेषु मत्स्यस्य नगरे तदा ।
महारथेषु च्छन्नेषु मासा दश समाययुः ॥ १ ॥ ४-१६-१ (२८८१४)
याज्ञसेनी सुदेष्णां तु शुश्रूषन्ती विशांपते ।
आवसत्परिचारार्हा सुदुःखं जनमेजय ॥ २ ॥ ४-१६-२ (२८८१५)
तथा चरन्तीं पाञ्चाली सुदेष्णाया निवेशने ।
ता देवीं तोपयामास तथा चान्तःपुरस्त्रियः ॥ ३ ॥ ४-१६-३ (२८८१६)
तस्मिन्वर्षे गतप्राये कीचकस्तु महाबलः ।
सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम् ॥ ४ ॥ ४-१६-४ (२८८१७)
तां दृष्ट्वा देवगर्भायां चरन्तीं देवतामिव ।
कीचकः कामयामास कामबाणप्रपीडितः ॥ ५ ॥ ४-१६-५ (२८८१८)
स तु कामाग्निसंतप्तः सुदेष्णामभिगम्य वै ।
प्रहसन्निव सेनानीरिदं वचनमब्रवीत् ॥ ६ ॥ ४-१६-६ (२८८१९)
नेयं मया जातु पुरेह दृष्टा राज्ञी विराटस्य निवेशने शुभा ।
रूपेण चोन्मादयतीव मां भृशं गन्धेन जाता मदिरेव भामिनी ॥ ७
॥ ४-१६-७ (२८८२०)
का देवरूपा हृदयंगमा शुभे ह्याचक्ष्व मे कस्य कुतोत्र शोभने ।
चित्तं हि निर्मथ्य करोति मां वशे न चान्यदत्रौपधमस्ति मे मतम्
॥ ८ ॥ ४-१६-८ (२८८२१)
अहो तवेयं परिचारिका शुभा प्रत्यग्ररूपा प्रतिभाति मामियम् ।
अयुक्तरूपं हि करोति कर्म ते प्रशास्तु मां यच्च ममास्ति किंचन
॥ ९ ॥ ४-१६-९ (२८८२२)
प्रभूतनागाश्वरथं महाजनं समृद्धियुक्तं बहुपानयोजनम् ।
मनोहरं काञ्चनचित्रभूषणं गृहं महच्छोभयतामियं मम
॥ १० ॥ ४-१६-१० (२८८२३)

ततः सुदेष्णामनुमन्त्र्य कीचकस्ततः समभ्येत्य नराधिपात्मजाम् ।
उवाच कृष्णामभिसान्त्वयंस्तदा मृगेन्द्रकन्यामिव जम्बुको वने
॥ ११ ॥ ४-१६-११ (२८८२४)
का त्वं कस्यासि कल्याणि कुतो वा त्वं वरानने ।
प्राप्ता विराटनगरं तत्त्वमाचक्ष्व शोभने ॥ १२ ॥ ४-१६-१२ (२८८२५)
रूपमग्र्यं तथा कान्तिः सौकुमार्यमनुत्तमम् ।
कान्त्या विभाति वक्त्रं ते शशाङ्क इव निर्मलं ॥ १३ ॥ ४-१६-१३ (२८८२६)
नेत्रे सुविपुले सुभ्रु पद्मपत्रनिभेशुभे ।
वाक्यं ते चारुसर्वाङ्गि परपुष्टरुतोपमम् ॥ १४ ॥ ४-१६-१४ (२८८२७)
एवंरूपा मया नारी काचिदन्या महीतले ।
न दृष्टपूर्वा सुश्रोणि यादृशी त्वमनिन्दिते ॥ १५ ॥ ४-१६-१५ (२८८२८)
लक्ष्मीः पद्मालया का त्वमथ भूतिः सुमध्यमे ।
ह्रीः श्रीः कीर्तिरथो कान्तिरासां का त्वं वरानने ॥ १६ ॥ ४-१६-१६ (२८८२९)
अतीव रूपिणी किं त्वमनङ्गविहारिणी ।
अतीव भ्राजसे सुभ्रु प्रभेवेन्दोरनुत्तमा ॥ १७ ॥ ४-१६-१७ (२८८३०)
अपि चेक्षणपक्ष्माणां स्थितज्योत्स्नोपमं शुभम् ।
दिव्यांशुरश्मिभिर्वृत्तं दिव्यकान्तिमनोरमम् ॥ १८ ॥ ४-१६-१८ (२८८३१)
निरीक्ष्य वक्त्रचन्द्रं ते लक्ष्म्याऽनुपमया युतम् ।
कृत्स्ने जगति को नेह कामस्य वशगो भवेत् ॥ १९ ॥ ४-१६-१९ (२८८३२)
हारालंकारयोग्यौ तु स्तनौ चोभौ शुभोभनौ ।
सुजातौ सहितौ लक्ष्म्या पीनौ वृत्तौ निरन्तरौ ॥ २० ॥ ४-१६-२० (२८८३३)
कुड्मलाम्बुरुहाकारौ तव सुभ्रु पयोधरौ ।
कामप्रतोदाविव मां तुदतश्चारुहासिनि ॥ २१ ॥ ४-१६-२१ (२८८३४)
वलीविभङ्गचतुरं स्तनभारविनामितम् ।
कराग्रसंमितं मध्यं तवेदं तनुमध्यमे ॥ २२ ॥ ४-१६-२२ (२८८३५)
दृष्ट्वैव चारुजघनं सरित्पुलिनसंनिभम् ।
कामव्याधिरसाध्यो मामप्याक्रामति भामिनि ॥ २३ ॥ ४-१६-२३ (२८८३६)
जज्वाल चाग्निमदनो दावाग्निरिव निर्दयः ।
त्वत्सङ्गमाभिसंकल्पविवृद्धो मां दहत्ययम् ॥ २४ ॥ ४-१६-२४ (२८८३७)
आत्मप्रदानवर्षेण संगमाम्भोधरेण च ।
शमयस्व वरारोहे ज्वलन्तं मन्मथानलम् ॥ २५ ॥ ४-१६-२५ (२८८३८)
मच्चित्तोन्मादनकरा मन्मथस्य शरोत्कराः ।
त्वत्सङ्गमाशानिशितास्तीव्राः शशिनिभानने ।
मह्यं विदार्य हृदयमिदं निर्दयवेगिताः ॥ २६ ॥ ४-१६-२६ (२८८३९)
प्रविष्टा ह्यसितापाङ्गि प्रचण्डाश्चण्डदारुणाः ।
अत्युन्मादसमारम्भाः प्रीत्युन्मादकरा मम ।

आत्मप्रदानसंभोगैर्मामुद्धर्तुमिहार्हसि ॥ २७ ॥ ४-१६-२७ (२८८४०)
चित्रमाल्याम्बरधरा सर्वाभरणभूषिता ।
कामं प्रकामं सेव त्वं मया सह विलासिनि ॥ २८ ॥ ४-१६-२८ (२८८४१)
नार्हसीहासुखं वस्तुं सुखार्हा सुखवर्जिता ।
प्राप्नुह्यनुत्तमं सौख्यं मत्तस्त्वं मत्तगामिनि ॥ २९ ॥ ४-१६-२९ (२८८४२)
स्वादून्यमृतकल्पानि पेयानि विविधानि च ।
पिबमाना मनोज्ञानि रममाणा यथासुखम् ॥ ३० ॥ ४-१६-३० (२८८४३)
भोगोपचारान्विविधान्सौभाग्यं चाप्यनुत्तमम् ।
पानं पिब महाभागे भोगैश्चानुत्तमैः शुभैः ॥ ३१ ॥ ४-१६-३१ (२८८४४)
इदं हि रूपं प्रथमं तवानघे निरर्थकं केवलमद्य भामिनि ।
अधार्यमाणा स्नगिवोत्तमा शुभा न शोभसे सुन्दरि शोभना सती ॥ ३२
॥ ४-१६-३२ (२८८४५)
त्यजामि दारान्मम ये पुरातना भवन्तु दास्यस्तव चारुहासिनि ।
अहं च ते सुन्दरि दासवत्स्थितः सदा भविष्ये वशगो वरानने ॥ ३३
॥ ॥ ४-१६-३३ (२८८४६)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि षोडशोऽध्यायः
॥ १६ ॥

विराटपर्व - अध्याय ०१७
॥ श्रीः ॥
४.१७. अध्यायः १७

Mahabharata - Virata Parva - Chapter Topics
द्रौपद्या स्वात्मानं कामयमानस्य कीचकस्य परुषभाषणैः
प्रत्याख्यानम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-१७-० (२८८४७)
वैशम्पायन उवाच। ४-१७-०क्ष् (३०५४)
एवमुक्ताऽनवद्याङ्गी कीचकेन दुरात्मना ।
द्रौपदी तमुवाचेदं सैरन्ध्रीवेषधारिणी ॥ १ ॥ ४-१७-१ (२८८४८)
अप्रार्थनीयामिहं मां सूतपुत्राभिमन्यसे ।
निहीनवर्णां सैरेन्ध्रीं बीभत्सां केशकारिणीम् ॥ २ ॥ ४-१७-२ (२८८४९)
परदाराऽस्मि भद्रं ते न युक्तं तव सांप्रतम् ।
दयिताः प्राणिनां दारा धर्मं समनुचिन्तय ॥ ३ ॥ ४-१७-३ (२८८५०)

परदारे न ते बुद्धिर्जातु कार्या कथंचन ।
विवर्जनं ह्यकार्याणामेतत्सुपुरुषव्रतम् ॥ ४ ॥ ४-१७-४ (२८८५१)
मिथ्याभिगृध्नो हि नरः पापात्मा मोहमास्थितः ।
अयशः प्राप्नुयाद्घोरं महद्वा प्राप्नुयाद्भयम् ॥ ५ ॥ ४-१७-५ (२८८५२)
वैशम्पायन उवाच। ४-१७-६क्ष् (३०५५)
एवमुक्तस्तु सैरन्ध्र्या कीचकः काममोहितः ।
जानन्नपि सुदुर्बुद्धिः परदाराभिमर्शने ॥ ६ ॥ ४-१७-६ (२८८५३)
दोषान्बहून्प्राणहरान्सर्वलोकविगर्हितान् ।
प्रोवाचेदं सुदुर्बुद्धिर्द्रौपदीमजितेन्द्रियः ॥ ७ ॥ ४-१७-७ (२८८५४)
नार्हस्येवं वरारोहे प्रत्याख्यातुं वरानने ।
मां मन्मथसमाविष्टं त्वत्कृते चारुहासिनि ॥ ८ ॥ ४-१७-८ (२८८५५)
प्रत्याख्याय च मां भीरु वशगं प्रियवादिनम् ।
नूनं त्वमसितापाङ्गि पश्चात्तापं करिष्यसि ॥ ९ ॥ ४-१७-९ (२८८५६)
अहं हि सुभ्रु राज्यस्य कृत्स्नस्यास्य सुमध्यमे ।
प्रभुर्वासयिता चैव वीर्ये चाप्रतिमः क्षितौ ॥ १० ॥ ४-१७-१० (२८८५७)
पृथिव्यां मत्समो नास्ति कश्चिदन्यः पुमानिह ।
रूपयौवनसौभाग्यैर्भोगैश्चानुत्तमैः शुभैः ॥ ११ ॥ ४-१७-११ (२८८५८)
सर्वकामसमृद्धेषु भोगेष्वनुपमेष्विह ।
भोक्तव्येषु च कल्याणि कस्माद्दास्ये रता ह्यसि ॥ १२ ॥ ४-१७-१२ (२८८५९)
मया दत्तमिदं राज्यं स्वामिन्यसि शुभानने ।
भजस्व मां वरारोहे भुङ्क्ष्व भोगाननुत्तमान् ॥ १३ ॥ ४-१७-१३ (२८८६०)
एवमुक्ता तु सा साध्वी कीचकेनाशुभं वचः ।
कीचकं प्रत्युवाचेदं गर्हयन्त्यस्य तद्वचः ॥ १४ ॥ ४-१७-१४ (२८८६१)
सैरन्ध्र्युवाच। ४-१७-१५क्ष् (३०५६)
मा सूतपुत्र मुह्यस्व माऽद्य त्यक्ष्यस्व जीवितम् ।
जानीहि पञ्चभिर्घोरैर्नित्यं मामभिरक्षिताम् ॥ १५ ॥ ४-१७-१५ (२८८६२)
न चाप्यहं त्वया लभ्या गन्धर्वाः पतयो मम ।
ते त्वां निहन्युः कुपिताः साध्वलं मा व्यनीनशः ॥ १६ ॥ ४-१७-१६ (२८८६३)
अशक्यरूपं पुरुषैरध्वानं गन्तुमिच्छसि ॥ १७ ॥ ४-१७-१७ (२८८६४)
यथा निश्चेतनो बालः कूलस्थः कूलमुत्तरम् ।
तर्तुमिच्छति मन्दात्मा तथा त्वं कर्तुमिच्छसि ॥ १८ ॥ ४-१७-१८ (२८८६५)
अन्तर्महीं वा यदि वोर्ध्वमुत्पतेः समुद्रपारं यदि वा प्रधावसि ।
तथापि तेषां न विमोक्षमर्हसि प्रमाथिनो देवसुता हि खेचराः ॥ १९
॥ ४-१७-१९ (२८८६६)
त्वं कालरात्रीमिव कश्चिदातुरः किं मां दृढं पार्थयसेऽद्य कीचक ।
किं मातुरङ्के शयितो यथा शिशुश्चन्द्रं जिघृक्षुरिव मन्यसे

हि माम् ॥ २० ॥ ४-१७-२० (२८८६७)
तेषां प्रियां प्रार्थयतो न ते भुवि गत्वा दिवं वा शरणं भविष्यति ।
न वर्तते कीचक ते दृशा शुभं या तेन संजीवनमर्थयेत सा
॥ २१ ॥ ॥ ४-१७-२१ (२८८६८)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-१७-१६ भूतिः ईश्वरी ऐश्वर्याभिमानिनी देवता ॥
१६ ॥
४-१७-१७ अनङ्गाङ्गविहारिणी रतिरित्यर्थः ॥
१७ ॥
४-१७-१८ ईक्षणपक्ष्माणां नेत्रपक्ष्मणां स्मितं ईषदुन्मीलं तदेव
ज्योत्स्नोपम मनस आह्लादकरम् ॥
१८ ॥
४-१७-२० सुजातौ उन्नतौ । निरन्तरौ पृथत्वात्सांश्लिष्टौ ॥
२० ॥
४-१७-२१ कुड्भलेति मुकुलीभूतपद्माकारौ ॥
२१ ॥
४-१७-२४ अग्निमदनो मदनाग्निः ॥
२४ ॥
४-१७-२८ कामं स्मरम् । प्रकाममतिशयितम् ॥
२८ ॥

विराटपर्व - अध्याय ०१८
॥ श्रीः ॥
४.१८. अध्यायः १८

Mahabharata - Virata Parva - Chapter Topics
कीचकेन सुदेष्णांप्रति द्रौपद्याः स्ववशीकरणप्रार्थना ॥ १ ॥
सुदेष्णया कीचके सुराहरणव्याजेन तद्गृहंप्रति
द्रौपदीप्रेषणप्रतिज्ञानम् ॥ २ ॥
तथा बलात्कारेण द्रौपद्याः सुरानयनाय कीचकगृहंप्रति
गमनचोदना ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-१८-० (२८८६९)
वैशम्पायन उवाच। ४-१८-०क्ष् (३०५७)
प्रत्याख्यातश्च पाञ्चाल्या कीचकः काममोहितः ।
प्रविश्य राजभवनं भगिन्या अग्रतः स्थितः ॥ १ ॥ ४-१८-१ (२८८७०)
सोभिवीक्ष्य सुकेशान्तां सुदेष्णां भगिनीं प्रियाम् ।
अमर्यादेन कामेन घोरेणाभिपरिप्लुतः ॥ २ ॥ ४-१८-२ (२८८७१)
स तु मूध्र्न्यञ्जलिं कृत्वा भगिन्याश्चरणावुभौ ।
संमोहाभिहतस्तूर्णं वातोद्धूत इवार्णवः ॥ ३ ॥ ४-१८-३ (२८८७२)
स प्रोवाच सुदुःखार्तो भगिनीं निश्वसन्मुहुः ।
अव्यक्तमृदुना साम्ना शुष्यता च पुनःपुनः ॥ ४ ॥ ४-१८-४ (२८८७३)
यथा सुदेष्णे सैरन्ध्र्या संगच्छेयं सकामया ।
तथा शीघ्रं कुरुष्वाद्य माऽहं प्राणान्प्रहासिषम् ॥ ५ ॥ ४-१८-५ (२८८७४)
यदीयमनवद्याङ्गी न मामद्यापि काङ्क्षते ।
चेतसाऽभिप्रसन्नेन गतोस्मि यमसादनम् ॥ ६ ॥ ४-१८-६ (२८८७५)
वैशम्पायन उवाच। ४-१८-७क्ष् (३०५८)
तमुवाच परिष्वज्य सुदेष्णा भ्रातरं प्रियम् ।
भ्रातुर्जीवितरक्षार्थं समाश्वास्यासितेक्षणा ॥ ७ ॥ ४-१८-७ (२८८७६)
शरणागतेयं सुश्रोणी मया दत्ताभया च सा ।
शुभाचारा च भद्रं ते नैनां वक्तुमिहोत्सहे ॥ ८ ॥ ४-१८-८ (२८८७७)
एषा हि शक्या नान्येन स्प्रष्टुं पापेन चेतसा ।
गन्धर्वाः किल पञ्चेमां रक्षन्ति रमयन्ति च ॥ ९ ॥ ४-१८-९ (२८८७८)
एवमेषा ममाचष्टे तथा प्रथमसंगमे ।
तथैव गजनासोरूः सत्यमाह ममान्तिके ।
ते हि क्रुद्धा महात्मानो नाशयेयुर्हि जीवितम् ॥ १० ॥ ४-१८-१० (२८८७९)
राजा चैव समीक्ष्यैनां संमोहं गतवानिह ।
मया च सत्यवचनैरनुनीतो महीपतिः ॥ ११ ॥ ४-१८-११ (२८८८०)
सोप्येनामनिशं दृष्ट्वा मनसैवाभ्यनन्दत ।
भयाद्गन्धर्वमुख्यानां जीवितस्योपघातिनाम् ।
मनसाऽपि ततस्त्वेनां न चिन्तयति पार्थिवः ॥ १२ ॥ ४-१८-१२ (२८८८१)
ते हि क्रुद्धा महात्मानो गरुडानिलतेजसः ।
दहेयुरपि लोकांस्त्रीन्युगान्तेष्विव भास्करः ॥ १३ ॥ ४-१८-१३ (२८८८२)
सैनन्ध्र्या ह्येतदाख्यातं मम तेषां महद्बलम् ।
तव चाहमिदं गुह्यं स्नेहाद्वक्ष्यामि बन्धुवत् ॥ १४ ॥ ४-१८-१४ (२८८८३)
मा गमिष्यसि वै कृच्छ्रां गतिं परमदुर्गमाम् ।
बलिनस्ते रुजं कुर्युः कुलस्य च धनस्य च ॥ १५ ॥ ४-१८-१५ (२८८८४)

तस्मान्नास्यां मनः कर्तुं यदि प्राणा प्रियास्तव ।
न चिन्तयेथा मागास्त्वं मत्प्रियं च यदीच्छसि ॥ १६ ॥ ४-१८-१६ (२८८८५)
वैशम्पायन उवाच। ४-१८-१७क्ष् (३०५९)
एवमुक्तस्तु दुष्टात्मा भगिनीं कीचकोऽब्रवीत् ।
गन्धर्वाणां शतं वाऽपि सहस्रमयुतानि वा ।
अहमेको वधिष्यामि गन्धर्वान्पञ्च किं पुनः ॥ १७ ॥ ४-१८-१७ (२८८८६)
न च त्वमभिजानीषे स्त्रीणां गुह्यमनुत्तमम् ।
पुत्रं वा किल पौत्रं वा भ्रातरं वा मनस्विनम् ॥ १८ ॥ ४-१८-१८ (२८८८७)
रहसीह नरं दृष्ट्वा नानागन्धविभूषितम् ।
योनिरुत्स्विद्यते स्त्रीणां सतीनामपि च श्रुतम् ॥ १९ ॥ ४-१८-१९ (२८८८८)
मां निरीक्ष्यानुलिप्ताङ्गं सर्वाभरणभूषितम् ।
वशमेष्यति सैरन्ध्री मन्मथेनाभिपीडिता ।
सा त्वं दृष्ट्वा ब्रूहि चैनां मम चेज्जीवितं प्रियं ॥ २० ॥
४-१८-२० (२८८८९)
वैशम्पायन उवाच। ४-१८-२१क्ष् (३०६०)
एवमुक्ता सुदेष्णा तु शोकेनाभिप्रपीडिता ।
अहो दुःखमहो कृच्छ्रमहो पापमिति स्मह ॥ २१ ॥ ४-१८-२१ (२८८९०)
प्रारुदद्भृशदुःखार्ता विपाकं तस्य वीक्ष्य सा ।
पातालेषु पतत्येष विलपन्बडवामुखे ॥ २२ ॥ ४-१८-२२ (२८८९१)
त्वत्कृते विनशिष्यन्ति भ्रातरः सुहृदश्च मे ।
किंनु शक्यं मया कर्तुं यत्त्वमेवमभिप्लुतः ॥ २३ ॥ ४-१८-२३ (२८८९२)
न च श्रेयोऽभिजानीषे काममेवानुवर्तसे ।
ध्रुवं गतायुस्त्वं पाप यदेवं काममोहितः ।
अकर्तव्ये हि मां पापे नियुनङ्क्षि नराधम ॥ २४ ॥ ४-१८-२४ (२८८९३)
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः ।
एकस्तु कुरुते पापं स्वजातिस्तेन हन्यते ॥ २५ ॥ ४-१८-२५ (२८८९४)
गतस्त्वं धर्मराजस्य विषयं नात्र संशयः ।
अदूषितमिदं सर्वं स्वजनं घातयिष्यसि ॥ २६ ॥ ४-१८-२६ (२८८९५)
एतत्तु मे दुःखतरं येनाहं भ्रातृसौहृदात् ।
विदितार्था करिष्यामि तुष्टो भव कुलक्षये ॥ २७ ॥ ४-१८-२७ (२८८९६)
गच्छ शीघ्रमितस्त्वं हि स्वमेव भवनं शुभम् ।
किंचित्कार्यं समुद्दिश्य सुरामन्नं च कारय ॥ २८ ॥ ४-१८-२८ (२८८९७)
कृते चान्ने सुरायां च प्रेषयिष्यसि मे पुनः ।
तामहं प्रेषयिष्यामि मध्वन्नार्थं तवान्तिकम् ॥ २९ ॥ ४-१८-२९ (२८८९८)
ततः संप्रेषितामेनां विजने निरवग्रहाम् ।
सान्त्वयेथा यथान्यायं यदि साम सहिष्यति ॥ ३० ॥ ४-१८-३० (२८८९९)

सद्यः कृतमिदं सर्वं शेषमत्रानुचिन्तय ॥ ३१ ॥ ४-१८-३१ (२८९००)
वैशम्पायन उवाच। ४-१८-३२क्ष् (३०६१)
सुदेष्णयैवमुक्तस्तु कीचकः कालचोदितः ।
त्वरमाणः प्रचक्राम स्वगृहं राजवेश्मनः ॥ ३२ ॥ ४-१८-३२ (२८९०१)
आगम्य च गृहं रम्यं सुरामन्नं चकार ह ।
अजैडकं च सुकृतं बहु चोच्चावचान्मृगान् ॥ ३३ ॥ ४-१८-३३ (२८९०२)
भक्षांश्च विविधाकारान्बहूंश्चोच्चावचांस्तदा ।
कारयामास कुशलैरन्नपानैः सुसंस्कृतम् ॥ ३४ ॥ ४-१८-३४ (२८९०३)
त्वरावान्कालपाशेन कण्ठे बद्धः पशुर्यथा ।
नावबुध्यत मूढात्मा मरणं समुपस्थितम् ॥ ३५ ॥ ४-१८-३५ (२८९०४)
आनीतायां सुरायां तु कृते चान्ने सुसंस्कृते ।
कीचकः पुनरागम्य सुदेष्णां वाक्यमब्रवीत् ॥ ३६ ॥ ४-१८-३६ (२८९०५)
मधु मांसं च बहुधा भक्ष्याश्च बहुधा कृताः ।
सुदेष्णे ब्रूहि सैरन्ध्रीं यथा सा मे गृहं व्रजेत् ॥ ३७ ॥ ४-१८-३७ (२८९०६)
केनचित्त्वद्य कार्येण त्वर शीघ्रं मम प्रियम् ।
अहं हि शरणं देवं प्रतिपद्ये वृषध्वजम् ।
समागमं मे सैरन्ध्र्या मरणं वा दिशेति वै ॥ ३८ । ४-१८-३८ (२८९०७)
वैशम्पायन उवाच। ४-१८-३९क्ष् (३०६२)
सा तमाह विनिःश्वस्य प्रतिगच्छ स्वकं गृहम् ।
एषाऽहमपि सैरन्ध्रीं सुरार्थे तूर्णमादिशे ॥ ३९ ॥ ४-१८-३९ (२८९०८)
एवमुक्तस्तु पापात्मा कीचकस्त्वरितः पुनः ।
स्वगृहं प्राविशत्तूर्णं सैरन्ध्रीगतमानसः ॥ ४० ॥ ४-१८-४० (२८९०९)
कीचकं तु गतं ज्ञात्वा त्वरमाणं स्वकं गृहम् ।
सैरन्ध्रीं तत आहूय सदेष्णा वाक्यमब्रवीत् ॥ ४१ ॥ ४-१८-४१ (२८९१०)
गच्छ सैरन्ध्रि मत्प्रीत्यै कीचकस्य निवेशनम् ।
सुरामानय सुश्रोणि तृषिताऽहं विलासिनि ॥ ४२ ॥ ४-१८-४२ (२८९११)
वैशम्पायन उवाच। ४-१८-४३क्ष् (३०६३)
सुदेष्णयैवमुक्ता सा निःश्वसन्ती नृपात्मजा ।
अब्रवीच्छोकसन्तप्ता नाहं तत्र व्रजामि वैः ॥ ४३ ॥ ४-१८-४३ (२८९१२)
सूतपुत्रो हि मां भद्रे कामात्मा चाभिमन्यते ।
न गच्छेयमहं तस्य राजपुत्रि निवेशनम् ।
त्वमेव भद्रे जानासि यथा स निरपत्रपः ॥ ४४ ॥ ४-१८-४४ (२८९१३)
समयश्च कृतो भद्रे यथा प्रथमसंगमे ।
तथा निवसमानायां यथाऽहं नान्यचारिणी ॥ ४५ ॥ ४-१८-४५ (२८९१४)
कीचकश्च सुकेशान्ते मूढो मदनगर्वितः ।
स मामिह गतां दृष्ट्वा व्यवस्यति निराकृतिम् ।

कथं नु वै तत्र गतां मर्षयेन्मामबान्धवाम् ॥ ४६ ॥ ४-१८-४६ (२८९१५)
बह्व्यः सन्ति तव प्रेष्या राजपुत्रि वशानुगाः ।
अन्यां प्रेषय कैकेयि संरक्ष्याऽहमिह त्वया ॥ ४७ ॥ ४-१८-४७ (२८९१६)
कीचकस्यालयं देवि न यामि भयकम्पिता ।
यद्यदन्यच्च मे कर्म करोमि च सुदुष्करम् ॥ ४८ ॥ ४-१८-४८ (२८९१७)
एवमुक्ता तु पाञ्चाल्या दैवयोगेन कैकयी ।
तां विराटस्य माहिषी क्रुद्धा भूयोऽन्वशासत ॥ ४९ ॥ ४-१८-४९ (२८९१८)
कीचकं चैव गच्छ त्वं बलात्कारे चोदिता ।
नास्ति मेऽन्या त्वया तुल्या सा त्वं शीघ्रतरं व्रज ॥ ५० ॥ ४-१८-५० (२८९१९)
अवश्यं त्वेव गन्तव्यं किमर्थं मां विवक्षसि ।
शीघ्रं गच्छ त्वरस्वेति मत्प्रीतिवशमाचर ॥ ५१ ॥ ४-१८-५१ (२८९२०)
न हीदृशो मम भ्राता किं त्वं समभिशङ्कसे ।
उक्त्वा चैनां बलाच्चैव विनियुज्य प्रभुत्वतः ॥ ५२ ॥ ४-१८-५२ (२८९२१)
भाजनं प्रददौ चास्यै सपिधानं हिरण्मयम् ।
या सुजाता सुगन्धा च तामानय सुरामिति ॥ ५३ ॥ ४-१८-५३ (२८९२२)
सा शङ्कमाना रुदती वेपन्ती द्रुपदात्मजा ।
दैवतेभ्यो नमस्कृत्वा श्वशुरेभ्यस्तथाऽब्रवीत् ॥ ५४ ॥ ४-१८-५४ (२८९२३)
यथाऽहमन्यं पार्थेभ्यो नाभिजानापि मानवम् ।
तेन सत्येन मां दृष्ट्वा कीचको मा वशं नयेत् ॥ ५५ ॥ ४-१८-५५ (२८९२४)
यथाऽहं पाण्डुपुत्रेभ्यः पञ्चभ्यो नान्यगामिनी ।
तेन सत्येन मां दृष्ट्वा कीचको मा वशं नयेत् ॥ ५६ ॥ ॥ ४-१८-५६ (२८९२५)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥ ---------

Mahabharata - Virata Parva - Chapter Footnotes

४-१८-२ अभिमन्यसे कामयसे ॥
२ ॥
४-१८-५ मिथ्याभिगृध्नः वितथाभिनिवेशी । महद्भयं मृत्युम् ॥
५ ॥
४-१८-२० मन्यसे लिप्ससे शिशोश्चन्द्रवदहं तव दुर्लभास्मीति भावः ॥
२० ॥
४-१८-२१ या स्वीयं अर्थयेत कामयेत शुभेच्छारूपा तव नास्तीत्यर्थः
। तेन च शुभेन परदारनिवृत्तिरूपेण कामितेन संजीवनं भवतीति
शेषः। अन्यथा मरिष्यसीत्यर्थः ॥
२१ ॥

विराटपर्व - अध्याय ०१९
॥ श्रीः ॥
४.१९. अध्यायः १९

Mahabharata - Virata Parva - Chapter Topics
कीचकगृहंप्रति प्रस्थितया द्रौपद्या तेन स्वस्यादूषणाय
सूर्यादिदेवताप्रार्थना ॥ १ ॥
सूर्येण तद्रक्षणाय निगूढस्य रक्षसः प्रेषणम् ॥ २ ॥
कीचकेन द्रौपदींप्रति स्ववशीभवनयाचनम् ॥ ३ ॥
तथा तदनङ्गीकाररोषात्तस्याः पादेन ताडनम् ॥ ४ ॥
सूर्यदूतेन रक्षसा कीचकस्य भूमौ निपातनम् ॥ ५ ॥
युधिष्ठिरेन कीचकजिघांसोर्भीमस्य संकेतेन प्रतिषेधनम् ॥ ६ ॥

Mahabharata - Virata Parva - Chapter Text

४-१९-० (२८९२६)
वैशम्पायन उवाच। ४-१९-०क्ष् (३०६४)
अकीर्तयत सुश्रोणी धर्मं शक्रं दिवाकरम् ।
मारुतं चाश्विनौ देवौ कुबेरं वरुणं यमम् ॥ १ ॥ ४-१९-१ (२८९२७)
रुद्रमग्निं भगं विष्णुं स्कन्दं पूषणमेव च ।
सावित्रीसहितं चापि ब्रह्माणं पर्यकीर्तयत् ॥ २ ॥ ४-१९-२ (२८९२८)
इत्येवं मृगशवाक्षी सुश्रोणी धर्मचारिणी ।
उपातिष्ठत सा सूर्यं मुहूर्तमबला तदा ॥ ३ ॥ ४-१९-३ (२८९२९)
तदस्यास्तनुमध्यायाः सर्वं सूर्योऽवबुद्धवान् ।
अन्तर्हितं ततस्तस्या रक्षो रक्षार्थमादिशत् ॥ ४ ॥ ४-१९-४ (२८९३०)
तच्चैनां नाजहात्तत्र सर्वावस्थास्वनिन्दिताम् ॥ ५ ॥ ४-१९-५ (२८९३१)
प्रतस्थे सा सुकेशान्ता त्वरमाणा पुनःपुनः ।
विलम्बमाना विवशा कीचकस्य निवेशनम् ॥ ६ ॥ ४-१९-६ (२८९३२)
तां मृगीमिव वित्रस्तां दृष्ट्वा कृष्णां समागताम् ।
उत्पपातासनात्तूर्णं नावं लब्ध्वेव पारगः ॥ ७ ॥ ४-१९-७ (२८९३३)
श्लक्ष्णं चोवाच वाक्यं स कीचकः काममूर्च्छितः ।
स्वागतं ते सुकेशान्ते सुव्युष्टा रजनी मम ॥ ८ ॥ ४-१९-८ (२८९३४)
स्वामिनी त्वमनुप्राप्ता चिरस्य भवनं शुभे ।
कुरुष्व च मयि प्रीतिं वशं चोपानयस्व माम् ॥ ९ ॥ ४-१९-९ (२८९३५)
प्रतिगृह्णीष्व मे भोगांस्त्वदर्थमुपकल्पितान् ।
सर्वरत्नमयीं मालां कुण्डले च हिरण्मये ॥ १० । ४-१९-१० (२८९३६)

वासांसि चन्दनं माल्यं धूपशुद्धां च वारुणीम् ।
प्रतिगृह्णीष्व भद्रं ते विहर त्वं यथेच्छसि ।
प्रीत्या मे कुरु मद्माक्षि प्रसादं प्रियदर्शने ॥ ११ ॥ ४-१९-११ (२८९३७)
स्वास्तीर्णमस्ति शयनं सितसूक्ष्मोत्तरच्छदम् ।
अत्रारुह्य मया सार्धं पिबेमां वरवारुणीम् ॥ १२ ॥ ४-१९-१२ (२८९३८)
भजस्व मां विशालाक्षि भर्ता ते सदृशोस्म्यहम् ।
उपसर्प वरारोहे मेरुमर्कप्रभा यथा ॥ १३ ॥ ४-१९-१३ (२८९३९)
वैशम्पायन उवाच। ४-१९-१४क्ष् (३०६५)
स मूढः कीचकस्तत्र प्राप्तां राजीवलोचनाम् ।
अब्रवीद्द्रौपदीं दृष्ट्वा दुरात्मा ह्यात्मसंमतः ॥ १४ ॥ ४-१९-१४ (२८९४०)
कीचकेनैवमुक्ता सा द्रौपदी वरवर्णिनी ।
अब्रवीत्तमनाचारं नेदृशं वक्तुमर्हसि ॥ १५ ॥ ४-१९-१५ (२८९४१)
नाहं शक्या त्वया स्प्रष्टुं श्वपचेनेव ब्राह्मणी ।
गन्तुमिच्छसि दुर्बुद्धे गतिं दुर्गतरान्तराम् ॥ १६ ॥ ४-१९-१६ (२८९४२)
यत्र गच्छन्ति बहवः परदाराभिमर्शकाः ।
नराः संभिन्नमर्यादाः कीटवच्चाशुभाश्रयाः ॥ १७ ॥ ४-१९-१७ (२८९४३)
अप्रैषीन्मां सुराहारीं सुदेष्णा त्वन्निवेशनम् ।
तस्यै नयिष्ये मदिरां भगिनी तृषिता तव ॥ १८ ॥ ४-१९-१८ (२८९४४)
पिपासिता च कैकेयी तूर्णं मामादिशत्ततः ।
दीयतां मे सुरा शीघ्रं सूतपुत्र व्रजाम्यहम् ॥ १९ ॥ ४-१९-१९ (२८९४५)
कीचक उवाच। ४-१९-२०क्ष् (३०६६)
अन्या भद्रे हरिष्यन्ति राजपुत्र्याः सुरामिमाम् ।
किं त्वं यास्यसि कल्याणि मदर्थं त्वमिहागता ॥ २० ॥ ४-१९-२० (२८९४६)
वैशम्पायन उवाच। ४-१९-२१क्ष् (३०६७)
इत्युक्त्वा दक्षिणे पाणौ सूतपुत्रः परामृशत् ।
सा गृहीता विधून्वन्ती भूमौ निक्षिप्य भाजनम् ।
सभां शरणमाधावद्यत्र राजा युधिष्ठिरः ॥ २१ ॥ ४-१९-२१ (२८९४७)
तां कीचकः प्रधावन्तीं केशपक्षे परामृशत् ।
पातयित्वा तु तां भूमौ सूतपुत्रः पदाऽवधीत् ॥ २२ ॥ ४-१९-२२ (२८९४८)
सभायां पश्यतो राज्ञो विराटस्य महात्मनः ।
ब्राह्मणानां च वृद्धानां क्षत्रियाणां च पश्यतां ॥ २३ ॥ ४-१९-२३
(२८९४९)
तस्याः पादाभितप्ताया मुखाद्रुधिरमास्रवत् ॥ २४ ॥ ४-१९-२४ (२८९५०)
ततो दिवाकरेणाशु राक्षसः संनियोजितः ।
स कीचकमपोवाह वातवेगेन भारत ॥ २५ ॥ ४-१९-२५ (२८९५१)
स पपात तदा भूमौ रक्षोबलसमीरितः ।

विघूर्णमानो निश्चेष्टश्छिन्नमूल इव द्रुमः ॥ २६ ॥ ४-१९-२६ (२८९५२)
तां दृष्ट्वा तत्र ते सभ्या हाहाभूताः समन्ततः ।
न युक्तं सूतपुत्रेति कीचकेति च तेऽवदन् ।
किमियं वध्यते बाला कृपणा चाप्यबान्धवा ॥ २७ ॥ ४-१९-२७ (२८९५३)
तस्यामासन्हि ते पार्थाः सभायां भ्रातरस्तथा ।
अमृष्यमाणाः कृष्णायाः कीचकेन पदा वधं ॥ २८ ॥ ४-१९-२८ (२८९५४)
तां दृष्ट्वा भीमसेनस्य क्रोधादास्रमवर्तत ।
धूमोच्छ्वासः समभवन्नेत्रे चोच्छ्रितपक्ष्मणी ।
सस्वेदा भ्रुकुटी चोग्रा ललाटे समवर्तत ॥ २९ ॥ ४-१९-२९ (२८९५५)
तस्य भीमो वधप्रेप्सुः कीचकस्य दुरात्मनः ।
दन्तैर्दन्तांस्तदा रोपान्निष्पिपेष महामनाः ॥ ३० ॥ ४-१९-३० (२८९५६)
भूयः संचरितः क्रुद्धः सहसोत्थाय चासनात् ।
निरैक्षत द्रुमं दीर्घं राजानं चाप्यवैक्षत ॥ ३१ ॥ ४-१९-३१ (२८९५७)
वधमाकाङ्क्षमाणं तं कीचकस्य दुरात्मनः ।
आकारेणैव भीमं स प्रत्यपेधद्युधिष्ठिरः ॥ ३२ ॥ ४-१९-३२ (२८९५८)
तस्य राजा शनैः संज्ञां कुन्तीपुत्रो युधिष्ठिरः ।
चकार भीमसेनस्य रोषाविष्टस्य धीमतः ॥ ३३ ॥ ४-१९-३३ (२८९५९)
प्रत्याख्यानं तदा चाह कङ्को नाम युधिष्ठिरः ॥ ३४ ॥ ४-१९-३४ (२८९६०)
सूद मा साहसं कार्षीः फलितोऽयं वनस्पतिः ।
नात्र शुष्काणि काष्ठानि सन्ति यानि च कानि च ॥ ३५ ॥ ४-१९-३५ (२८९६१)
यदि ते दारुकृत्यं स्यान्निष्क्रम्य नगराद्बहिः ।
समूलं शातयेर्वृक्षं श्रमस्ते न भविष्यति ॥ ३६ ॥ ४-१९-३६ (२८९६२)
यस्य चार्द्रस्य वृक्षस्य शीतच्छायां समाश्रयेत् ।
न तस्य पर्णे द्रुह्येत पूर्ववृत्तमनुस्मरन् ॥ ३७ ॥ ४-१९-३७ (२८९६३)
न क्रोधकालसमयः सूद मा चापलं कृथाः ।
अपूर्णोऽयं द्विपक्षोनो नेदं बलवतां बहु ॥ ३८ ॥ ४-१९-३८ (२८९६४)
अथाङ्गुष्ठेनावमृद्नादङ्गुष्ठं तत्र धर्मराट् ।
प्रबोधनभयाद्राज्ञो भीमं तं प्रत्यषेधयत् ॥ ३९ ॥ ४-१९-३९ (२८९६५)
भीमसेनस्तु तद्वाक्यं श्रुत्वा परपुरञ्जयः ।
सहसोत्पतितं क्रोधं न्ययच्छद्धृतिमान्बलात् ।
इङ्गितज्ञः स तु भ्रातुस्तूष्णीमासीद्वृकोदरः ॥ ४० ॥ ४-१९-४० (२८९६६)
भीमस्य च समारम्भं दृष्ट्वा राज्ञोऽस्य चेष्टितम् ।
द्रौपदी चाधिकं क्रोधात्प्रारुदत्सा पुनःपुनः ॥ ४१ ॥ ४-१९-४१ (२८९६७)
कीचकेनानुगमनात्कृष्णा ताम्रायतेक्षणा ।
सभाद्वारमुपगम्य रुदन्ती वाक्यमब्रवीत् ॥ ४२ ॥ ४-१९-४२ (२८९६८)
अवेक्षमाणा सुश्रोणी पतींस्तान्दीनचेतसः ।

आकारं परिरक्षन्ती प्रतिज्ञां धर्मसंयुताम् ।
दह्यमानेव रौद्रेण चक्षुषा द्रुपदात्मजा ॥ ४३ ॥ ४-१९-४३ (२८९६९)
प्रजारक्षणशीलानां राज्ञां ह्यमिततेजसाम् ।
कार्याऽनुपालनं नित्यं धर्मे सत्ये च तिष्ठताम् ॥ ४४ ॥ ४-१९-४४ (२८९७०)
स्वप्रजायां प्रजायां च विशेषं नाधिगच्छताम् ।
प्रियेष्वपि च वध्येषु समत्वं ये समाश्रिताः ॥ ४५ ॥ ४-१९-४५ (२८९७१)
विवादेषु प्रवृत्तेषु समं कार्यानुदर्शिना ।
राज्ञा धर्मासनस्थेन जितौ लोकावुभावपि ॥ ४६ ॥ ४-१९-४६ (२८९७२)
राजन्धर्मासनस्थो हि रक्ष मां त्वमनागसम् ॥ ४७ ॥ ४-१९-४७ (२८९७३)
अहं त्वनपराध्यन्ती कीचकेन दुरात्मना ।
पश्यतस्ते महाराज हता पादेन दासिवात् ॥ ४८ ॥ ४-१९-४८ (२८९७४)
त्वत्समक्षं नृपश्रेष्ठ निष्पिष्टा वसुधातले ।
अनागसं कृपार्हां मां स्त्रियं त्वं परिपालय ॥ ४९ ॥ ४-१९-४९ (२८९७५)
रक्ष मां कीचकाद्भीतां धर्मं रक्ष नरेश्वर ।
मत्स्याधिप प्रजा रक्ष पिता पुत्रानिवौरसान् ॥ ५० ॥ ४-१९-५० (२८९७६)
यस्त्वधर्मेण कार्याणि मोहात्मा कुरुते नृपः ।
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ॥ ५१ ॥ ४-१९-५१ (२८९७७)
मत्स्यानां कुलजस्त्वं हि तेषां सत्यं परायणम् ।
त्वं किलैवंविधो जातः कुले धर्मपरायणे ॥ ५२ ॥ ४-१९-५२ (२८९७८)
अतस्त्वाहमभिक्रन्दे शरणार्थं नराधिप ।
त्राहि मामद्य राजेन्द्र कीचकात्पापपूरुषात् ॥ ५३ ॥ ४-१९-५३ (२८९७९)
अनाथामिह मां ज्ञात्वा कीचकः पुरुषाधमः ।
प्रहरत्येव नीचात्मा न तु धर्ममवेक्षते ॥ ५४ ॥ ४-१९-५४ (२८९८०)
अकार्याणामनारम्भात्कार्याणामनुपालनात् ।
प्रजासु ये सुवृत्तास्ते स्वर्गमायान्ति भूमिपाः ॥ ५५ ॥ ४-१९-५५ (२८९८१)
कार्याकार्यविशेषज्ञाः कामकारेण पार्थिवाः ।
प्रजासु किल्बिषं कृत्वा नरकं यान्त्यधोमुखाः ॥ ५६ ॥ ४-१९-५६ (२८९८२)
नैव यज्ञैर्न वा दानैर्न गुरोरुपसेवनात् ।
प्राप्नुवन्ति तथा धर्मं यथा कार्यानुपालनात् ॥ ५७ ॥ ४-१९-५७ (२८९८३)
अपि चेदं पुरा ब्रह्मा प्रोवाचेन्द्राय पृच्छते ।
द्वन्द्वं कार्यमकार्यं च लोके चासीत्परं यथा ॥ ५८ ॥ ४-१९-५८ (२८९८४)
धर्माधर्मौ पुनर्द्वन्द्वं विनियुक्तमथापि वा ।
क्रियाणामक्रियाणां च प्रापणे पुण्यपापयोः ॥ ५९ ॥ ४-१९-५९ (२८९८५)
प्रजायां सृज्यमानायां पुरा ह्येतदुदाहृतम् ।
एतद्वो मानुषाः सम्यक्कार्यं द्वन्द्वत्रयं भुवि ॥ ६० ॥ ४-१९-६० (२८९८६)
अस्मिन्सुनीते दुर्नीते लभते कर्मजं फलम् ।

कल्याणकारी कल्याणं पापकारी च पापकम् ॥ ६१ ॥ ४-१९-६१ (२८९८७)
तेन गच्छति संसर्गं स्वर्गाय नरकाय वा ।
सुकृतं दुष्कृतं वाऽपि कृत्वा मोहेन मानवः ।
पश्चात्तापेन तप्येत स्वबुद्ध्या मरणं गतः ॥ ६२ ॥ ४-१९-६२ (२८९८८)
एवमुक्त्वा परं वाक्यं विससर्ज शतक्रतुम् ।
शक्रोप्यापृच्छ्य ब्रह्माणं देवराज्यमपालयत् ॥ ६३ ॥ ४-१९-६३ (२८९८९)
यथोक्तं देवराजेन ब्रह्मणा परमेष्ठिना ।
तथा त्वमपि राजेन्द्र कार्याकार्ये स्थिरो भव ॥ ६४ ॥ ॥ ४-१९-६४ (२८९९०)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-१९-१७ कीटवच्च गुहाश्रया इति को थो पाठः ॥
१७ ॥

विराटपर्व - अध्याय ०२०
॥ श्रीः ॥
४.२०. अध्यायः २०

Mahabharata - Virata Parva - Chapter Topics
विराटेन कीचकस्य दण्डाप्रयोगाद्रुष्ट्या द्रौपद्या तंप्रत्युपालम्भनम् ॥ १ ॥
युधिष्ठिरेण द्रौपद्याः सान्त्वनम् ॥ २ ॥
द्रौपद्याऽज्ञानादिव स्वशोकहेतुं पृच्छन्तीं सुदेष्णांप्रति
गन्धर्वैः कीचकवधस्य भावित्वकथनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-२०-० (२८९९१)
वैशम्पायन उवाच। ४-२०-०क्ष् (३०६८)
एवं विलपमानायां पाञ्चाल्यां मत्स्यपुङ्गवः ।
अशक्तः कीचकं तत्र शासितुं बलदर्पितम् ।
विराटराजः मूतं तु सान्त्वेनैव न्यवारयत् ॥ १ ॥ ४-२०-१ (२८९९२)
कीचकं मत्स्यराजेन कृतागसमनिन्दिता ।
नापराधानुरूपेण दण्डेन प्रतिपादितम् ॥ २ ॥ ४-२०-२ (२८९९३)
पाञ्चालराजस्य सुता दृष्ट्वा सुरसुतोपमा ।
धर्मज्ञा व्यवहाराणां कीचके कृतकिल्बिषे ।

पुनः प्रोवाच राजानं स्मरन्ती धर्ममुत्तमम् ॥ ३ ॥ ४-२०-३ (२८९९४)
संप्रेक्ष्य च वरारोहा सर्वांस्तत्र सभासदः ।
राजानुवर्तनपरान्कीचकं च कृतागसम् ।
विराटं चाह पाञ्चाली दुःखेनाविष्टचेतना ॥ ४ ॥ ४-२०-४ (२८९९५)
न राजन्राजवत्किंचित्समाचरसि कीचके ।
दस्यूनामिव ते धर्मो न सत्सु परिवर्तते ॥ ५ ॥ ४-२०-५ (२८९९६)
न कीचकः स्वधर्मस्थो न च मत्स्यः कथंचन ।
सभासदोऽप्यधर्मज्ञा य इमं पर्युपासते ॥ ६ ॥ ४-२०-६ (२८९९७)
न धर्मं कीचको वेत्ति राजभृत्यास्तथैव च ।
न राजा विनयं ब्रूते अमात्याश्च न जानते ॥ ७ ॥ ४-२०-७ (२८९९८)
नोपालभे त्वां नृपते विराटं नृपसंसदि ।
नाहमेतेन युक्ता वै हन्तुं मात्स्य तवान्तिके ॥ ८ ॥ ४-२०-८ (२८९९९)
सभासदस्तु पश्यन्तु कीचकं धर्मलङ्घिनम् ।
विराटनृपते पश्य मामनाथामनागसम् ॥ ९ ॥ ४-२०-९ (२९०००)
न साम फलते दुष्टे दुष्टे दण्डः प्रयुज्यते ॥ १० ॥ ४-२०-१० (२९००१)
अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
स राजा न भवेल्लोके राजशब्दस्य भाजनम् ॥ ११ ॥ ४-२०-११ (२९००२)
दीनान्धकृपणाशक्तपङ्गुकुब्जजडादिकान् ।
अनाथबालवृद्धांश्च पुरुषान्वा स्त्रियोऽपि वा ।
दुष्टचोराभिभूतांश्च पालयेदवनीपतिः ॥ १२ ॥ ४-२०-१२ (२९००३)
अनाथानां च नाथः स्यादपितॄणां पिता नृपः ।
माता भवेदमातॄणामगुरूणां गुरुर्भवेत् ।
अगतीनां गती राजा नृणां राजा परायणम् ॥ १३ ॥ ४-२०-१३ (२९००४)
विशेषतः परैर्दुष्टैः परामृष्टं नरोत्तमः ।
स्त्रियं साध्वीमनाथां च पालयेत्स्वसुतामिव ॥ १४ ॥ ४-२०-१४ (२९००५)
त्वद्गृहावसतिं राजन्नेतावत्कालपर्ययम् ।
अधिकां त्वत्सुतायाश्च पश्य मां कीचकाहताम् ॥ १५ ॥ ४-२०-१५ (२९००६)
विराट उवाच। ४-२०-१६क्ष् (३०६९)
परोक्षं नाभिजानामि विग्रहं युवयोरहम् ।
अर्थतत्त्वमविज्ञाय किं स्यादकुशलं मम ॥ १६ ॥ ४-२०-१६ (२९००७)
द्रौपद्युवाच। ४-२०-१७क्ष् (३०७०)
येषां न वैरी स्वपिति पदा भूमिमुपस्पृशन् ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् ॥ १७ ॥ ४-२०-१७ (२९००८)
ये च दद्युर्न याचेयुर्ब्रह्मण्याः सत्यवादिनः ।
येषां दुन्दुभिनिर्घोषो ज्याघोषः श्रूयते भृशम् ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत् ॥ १८ ॥ ४-२०-१८ (२९००९)

तेजस्विनस्तथा क्षान्ता बलवन्तश्च मानिनः ।
महेष्वासा रणे शूरा गर्विता मानतत्पराः ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् ॥१९ ॥ ४-२०-१९ (२९०१०)
सर्वलोकमिमं हन्युर्यदि क्रुद्धा महाबलाः ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत् ॥ २० ॥ ४-२०-२० (२९०११)
येषां नास्ति समः कश्चिद्वीर्ये सत्ये बले दमे ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत् ॥ २१ ॥ ४-२०-२१ (२९०१२)
येषां न सदृशः कश्चिद्धनाद्यैर्भुवि मानवः ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत् ॥ २२ ॥ ४-२०-२२ (२९०१३)
तवाग्रतो विशेषेण प्रजानां च हितैषिणः ।
पश्यतो निहता राजंस्तेनेह जगतीपते ॥ २३ ॥ ४-२०-२३ (२९०१४)
शरणं ये प्रपन्नानां भवन्ति शरणार्थिनाम् ।
चरन्ति लोके प्रच्छन्नाः क्वनु तेऽद्य महाबलाः ॥ २४ ॥ ४-२०-२४ (२९०१५)
कथं ते सूतपुत्रेण वध्यमानां प्रियां सतीम् ।
मर्षयन्ति यथा क्लीबा बलवन्तोऽतितेजसः ॥ २५ ॥ ४-२०-२५ (२९०१६)
क्वनु तेषाममर्षश्च वीर्यं तेषां च तद्बलम् ।
न परीप्सन्ति ये भार्यां वध्यमानां दुरात्माना ॥ २६ ॥ ४-२०-२६ (२९०१७)
मयाऽपि शक्यं किं कर्तुं विराटे धर्मदूषणे ।
मां मर्षयति यः पश्यन्वध्यमानामनागसम् ॥ २७ ॥ ४-२०-२७ (२९०१८)
धर्मो विद्धो ह्यधर्मेण सभां यत्रोपतिष्ठति ।
न चेद्विशल्यः क्रियते सर्वे विद्धाः सभासदः ॥ २८ ॥ ४-२०-२८ (२९०१९)
यत्र धर्मो ह्यधर्मेम सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥ २९ ॥ ४-२०-२९ (२९०२०)
वैशम्पायन उवाच। ४-२०-३०क्ष् (३०७१)
तस्यास्तत्कृपणं श्रुत्वा सैरन्ध्र्याः परिदेवितम् ।
ततः सभ्यास्तु ते सर्वे भूयः कृष्णामपूजयन् ।
साधुसाध्विति चाप्याहुः कीचकं चाप्यगर्हयन् ॥ ३० ॥ ४-२०-३० (२९०२१)
केचित्कृष्णां प्रशंसन्ति केचिन्निन्दन्ति कीचकम् ।
केचिन्निन्दन्ति राजानं केचिद्देवीं च तां नराः ॥ ३१ ॥ ४-२०-३१ (२९०२२)
सभ्या ऊचुः । ४-२०-३२क्ष् (३०७२)
यस्येयं चारुसर्वाङ्गी भार्या स्यादायतेक्षणा ।
परो लाभश्च तस्य स्यान्न स शोचेत्कदाचन ॥ ३२ ॥ ४-२०-३२ (२९०२३)
यस्या गात्रं शुभं पीनं मुखं जयति पङ्कजम् ।
गतिर्हंसं स्मितं कुन्दं सैषा नार्हति पद्वधम् ॥ ३३ ॥ ४-२०-३३ (२९०२४)
द्वात्रिंशद्दशना यस्याः श्वेता मांसनिबन्धनाः ।
स्निग्धाश्च मृदवः केशाः सैषा नार्हति पद्वधम् ॥ ३४ ॥ ४-२०-३४

(२९०२५)
पद्मं चक्रं ध्वजं शङ्खं प्रासादो मकरस्तथा ।
यस्याः पाणितले सन्ति सैषा नार्हति पद्बधम् ॥ ३५ ॥ ४-२०-३५ (२९०२६)
आवर्ताः खलु चत्वारः सर्वे चैव प्रदक्षिणाः ।
समं गात्रं शुभं स्निग्धं यस्या नार्हति पद्बधम् ॥ ३६ ॥ ४-२०-३६ (२९०२७)
अच्छिद्रहस्तपादा च अच्छिद्रदशना च या ।
कन्या कमलपत्राक्षी कथमर्हति पद्बधम् ॥ ३७ ॥ ४-२०-३७ (२९०२८)
सेयं लक्षणसंपन्ना पूर्णचन्द्रनिभानना ।
सुरूपिणी सुवदना नेयं योग्या पदा वधम् ॥ ३८ ॥ ४-२०-३८ (२९०२९)
देवदेवीव सुभगा शक्रदेवीव शोभना ।
अप्सरा इव सारूप्यान्नेयं योग्या पदा वधम् ॥ ३९ ॥ ४-२०-३९ (२९०३०)
इति स्मापूजसंस्तत्र कृष्णां प्रेक्ष्य सभासदः ॥ ४० ॥ ४-२०-४० (२९०३१)
सा विनिःश्वस्य सुश्रोणी भूमावन्तर्मुखी स्थिता ।
तूष्णीमासीत्तदा दृष्ट्वा विवक्षन्तं युधिष्ठिरम् ॥ ४१ ॥ ४-२०-४१ (२९०३२)
युधिष्ठिरस्य कोपात्तु ललाटे स्वेद आस्रवत् ।
अब्रवीद्धर्मपुत्रोऽथ सैरन्ध्रीं महिषीं प्रियाम् ।
कृष्णां तत्र नृपाभ्याशे परिव्राजकरूपधृत् ॥ ४२ ॥ ४-२०-४२ (२९०३३)
गच्छ सैरन्ध्रि मा भैस्त्वं सुदेष्णाया निवेशनम् ।
राजा ह्ययं धर्मशीलो विराटः परलोकभीः ।
यतस्त्वां न परित्राति सत्ये धर्मपथे स्थितः ॥ ४३ ॥ ४-२०-४३ (२९०३४)
भर्तारमनुरुन्धन्त्यः क्लिश्यन्ते वीरपत्नयः ।
शुश्रूषया क्लिश्यमानाः पतिलोकं जयन्त्युत ॥ ४४ ॥ ४-२०-४४ (२९०३५)
मन्ये न कालः क्रोधस्य पश्यन्ति पतयस्तव ।
तेन त्वां नाभिधावन्ति गन्धर्वाः सूर्यवर्चसः ॥ ४५ ॥ ४-२०-४५ (२९०३६)
श्रूयन्तां ते सुकेशान्ते मोक्षधर्माश्रयाः कथाः ।
यथा धर्मः कुलस्त्रीणां दृष्टो धर्मानुरोधनात् ॥ ४६ ॥ ४-२०-४६ (२९०३७)
नास्ति यज्ञः स्त्रियाः कश्चिन्न श्राद्धं नाप्युपोषणम् ।
या तु भर्तारि शुश्रूषा सा स्वर्गायाभिजायते ॥ ४७ ॥ ४-२०-४७ (२९०३८)
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ ४८ ॥ ४-२०-४८ (२९०३९)
भीरु भर्तृभयात्पत्न्यो न क्रुध्यन्ति कदाचन ।
बहुभिश्च परिक्लेशैरवज्ञाताश्च शत्रुभिः ।
अनन्यभावाः शुद्धाश्च पुण्यलोकं जयन्त्युत ॥ ४९ ॥ ४-२०-४९ (२९०४०)
न क्रोधकालं नियतं पश्यन्ति पतयस्तव ।
न क्रुद्धान्प्रतियायाद्धि पतींस्ते वृत्रहा अपि ।
तेन त्वां नाभिधावन्ति गन्धर्वाः कामरूपिणः ॥ ५० ॥ ४-२०-५० (२९०४१)

यदि ते समयः कश्चित्कृतो ह्यायतलोचने ।
तं स्मरस्व क्षमाशीले क्षमा धर्मो ह्यनुत्तमः ॥ ५१ ॥ ४-२०-५१ (२९०४२)
क्षमा धर्मः क्षमा सत्यं क्षमा दानं क्षमा तपः ।
क्षमावतामयं लोकः परलोकः क्षमावताम् ॥ ५२ ॥ ४-२०-५२ (२९०४३)
द्व्यंशिनो द्वादशाङ्गस्य चतुर्विंशतिपर्वणः ।
कस्त्रिषष्ठिशतारस्य मासोनस्याक्षमी भवेत् ॥ ५३ ॥ ४-२०-५३ (२९०४४)
गच्छ सैरन्ध्रि गन्धर्वाः करिष्यन्ति तव प्रियम् ।
व्यपनेष्यन्ति ते दुःखं येन ते विप्रियं कृतम् ॥ ५४ ॥ ४-२०-५४ (२९०४५)
इत्येवमुक्ते तिष्ठन्तीं पुनरेवाह धर्मराट् ।
विघ्नं करोषि वै भद्रे दीव्यतां राजसंसदि ॥ ५५ ॥ ४-२०-५५ (२९०४६)
तस्मात्त्वमपि सुश्रोणि शैलूषीव विभासि नः ।
एवमुक्ता तु सा भर्त्रा समुद्वीक्ष्याब्रवीदिदम् ॥ ५६ ॥ ४-२०-५६ (२९०४७)
सत्यमुक्तं त्वया विद्वञ्शैलूषीं विद्धि मां पुनः ।
शैलूषकस्य तस्याहं येषां ज्येष्ठोऽक्षकोविदः ॥ ५७ ॥ ४-२०-५७ (२९०४८)
एवमुक्त्वा वरारोहा परिमृज्याननं शुभम् ।
केशान्विमुक्तान्संयम्य रुधिरेण समुक्षितान् ॥ ५८ । ४-२०-५८ (२९०४९)
पांसुकुण्ठितसर्वाङ्गी गजराजवधूरिव ।
प्रतस्थे नागनासोरूर्भर्तुराज्ञाय शासनम् ॥ ५९ ॥ ४-२०-५९ (२९०५०)
विमुक्ता मृगशावाक्षी निरन्तरपयोधरा ।
प्रभा नक्षत्रराजस्य कालमेघैरिवावृता ॥ ६० ॥ ४-२०-६० (२९०५१)
यस्यार्थे पाण्डवेयास्तु त्यजेयुरपि जीवितम् ।
तां ते दृष्ट्वा तथा कृष्णां क्षमिणो धर्मचारिणः ।
समयं नातिवर्तन्ते वेलामिव महोदधिः ॥ ६१ ॥ ४-२०-६१ (२९०५२)
सा प्रविश्य प्रवेपन्ती सुदेष्णाया निवेशनम् ।
रुदन्ती चारुसर्वाङ्गी तस्यास्तस्थावथाग्रतः ॥ ६२ ॥ ४-२०-६२ (२९०५३)
तामुवाच विराटस्य महिषी शाद्यमास्थिता ।
किमिदं पद्मसंकाशं सुदन्तोष्ठाक्षिनासिकम् ॥ ६३ ॥ ४-२०-६३ (२९०५४)
रुदन्त्या अवमृष्टास्रं पूर्णेन्दुसमवर्चसम् ।
बिम्बोष्ठं कृष्णताराभ्यामत्यन्तरुचिरप्रभम् ।
नयनाभ्यामजिह्माभ्यां मुखं ते मुञ्चते जलम् ॥ ६४ ॥ ४-२०-६४ (२९०५५)
कस्त्वाऽवधीद्वरारोहे कस्माद्रोदिषि शोभने ।
को विप्रयुज्यते दारैः सपुत्रैः सहबान्धवैः ॥ ६५ ॥ ४-२०-६५ (२९०५६)
कस्याद्य राजा कुपितो वधमाज्ञापयिष्यति ।
ब्रूहि किं ते प्रियं कर्म कं त्यजे घातयामि वा ॥ ६६ ॥ ४-२०-६६ (२९०५७)
वैशम्पायन उवाच। ४-२०-६७क्ष् (३०७३)
तां निःश्वस्याब्रवीत्कृष्णा जानन्ती नाम पृच्छसि ।

भ्रातुस्त्वं मामनुप्रेष्य किमेवं हि विकत्थसे ॥ ६७ ॥ ४-२०-६७ (२९०५८)
कीचको माऽवधीत्तत्र सुराहारीमितोगताम् ।
सभायां पश्यतो राज्ञो यथा वै निर्जने वने ॥ ६८ ॥ ४-२०-६८ (२९०५९)
सुदेष्णोवाच। ४-२०-६९क्ष् (३०७४)
घातयामि सुदन्तोष्ठि कीचकं यदि मन्यसे ।
भ्राता यद्येष मे व्यक्तं योऽतीतो धर्मचारिणीम् ।
यस्त्वां कामाभिभूतात्मा दुर्लभामवमन्यते ॥ ६९ ॥ ४-२०-६९ (२९०६०)
द्रौपद्युवाच। ४-२०-७०क्ष् (३०७५)
अद्यैव तं हनिष्यन्ति येषामागस्करो हि सः ।
मन्येऽहमद्य वा श्वो वा परलोकं गमिष्यति ॥ ७० ॥ ४-२०-७० (२९०६१)
भ्रातुः प्रयच्छ त्वरिता जीवच्छ्राद्धं त्वमद्य वै ।
सुहृष्टं कुरु वै चैनं नासून्मन्ये धरिष्यति ॥ ७१ ॥ ४-२०-७१ (२९०६२)
तेषां हि मम भर्तॄणां पञ्चानां धर्मचारिणाम् ।
एको दुर्धषणोऽत्यर्थं बले चाप्रतिमो भुवि ॥ ७२ ॥ ४-२०-७२ (२९०६३)
निर्मनुष्यमिमं लोकं कुर्यात्क्रुद्धो निशामिमाम् ।
न स संक्रुध्यते तावद्गन्धर्वः कामरूपधृत् ॥ ७३ ॥ ४-२०-७३ (२९०६४)
नूनं ज्ञास्यति यावद्धि ममैतत्पादघातनम् ।
तत्क्षणात्कीचकः पापः सपुत्रभ्रातृबान्धवः ।
विनशिष्यति दुष्टात्मा यथा दुष्कृतकर्मकृत् ॥ ७४ ॥ ४-२०-७४ (२९०६५)
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः ।
एकस्तु कुरुते पापं कालपाशवशं गतः ।
नीचेनात्मापराधेन कुलं तेन विनश्यति ॥ ७५ ॥ ४-२०-७५ (२९०६६)
वैशम्पायन उवाच। ४-२०-७६क्ष् (३०७६)
सुदेष्णामेवमुक्त्वा तु सैरन्ध्री दुःखमोहिता ।
कीचकस्य वधार्थाय व्रतदीक्षामुपागमत् ॥ ७६ ॥ ४-२०-७६ (२९०६७)
अभ्यर्थिता च नारीभिर्मानिता च सुदेष्णया ।
न च स्नाति न चाश्नाति न पांसून्परिमार्जति ।
रुधिरक्लिन्नवदना बभूव मृदितेक्षणा ॥ ७७ ॥ ४-२०-७७ (२९०६८)
तां तथा शोकसन्तप्तां दृष्ट्वा प्ररुदितां स्त्रियः ।
कीचकस्य वधं सर्वा मनोभिश्च शशंसिरे ॥ ७८ ॥ ॥ ४-२०-७८ (२९०६९)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि विंशोऽध्यायः
॥ २० ॥

विराटपर्व - अध्याय ०२१
॥ श्रीः ॥
४.२१. अध्यायः २१

Mahabharata - Virata Parva - Chapter Topics
वैशम्पायनेन जनमेजयंप्रति कीचकोत्पत्तिप्रकारादिकथनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-२१-० (२९०७०)
जनमेजय उवाच। ४-२१-०क्ष् (३०७७)
अहो दुःखतरं प्राप्ता कीचकेन पदा हता ।
पतिव्रता महाभागा द्रौपदी योषितांवरा ॥ १ ॥ ४-२१-१ (२९०७१)
दुःशलां स्मारयन्ती सा भर्तॄणां भगिनीं शुभाम् ।
नाशपत्सिन्धुराजं सा बलात्कारेण वाहिता ॥ २ ॥ ४-२१-२ (२९०७२)
किमर्थमिह संप्राप्ता कीचकेन दुरात्मना ।
नाशपत्तं महाभागा कृष्णा पादेन ताडिता ॥ ३ ॥ ४-२१-३ (२९०७३)
तेजोराशिरियं देवी धर्मज्ञा सत्यवादिनी ।
केशपांशे परामृष्टा मर्षयन्ती ह्यशक्तवत् ॥ ४ ॥ ४-२१-४ (२९०७४)
नैतत्कारणमल्पं हि श्रोतुकामोऽस्मि सत्तम ।
कृष्णायास्तु परिक्लेशान्मनो मे दूयते भृशम् ॥ ५ ॥ ४-२१-५ (२९०७५)
कस्य वंशे समुद्भूतः स च दुर्ललितो मुने ।
बलोन्मत्तः कथं चासीत्स्यालो मात्स्यस्य कीचकः ॥ ६ ॥ ४-२१-६ (२९०७६)
दृष्ट्वापि तां प्रियां भार्यां सूतपुत्रेण ताडिताम् ।
नैव चुक्षुभिरे वीराः किमकुर्वन्त तं प्रति ॥ ७ ॥ ४-२१-७ (२९०७७)
वैशम्पायन उवाच। ४-२१-८क्ष् (३०७८)
त्वदुक्तोऽयमनुप्रश्नः कुरूणां कीर्तिवर्धनः ।
एतत्सर्वं यथा वक्ष्ये विस्तरेणेह पार्थिव ॥ ८ ॥ ४-२१-८ (२९०७८)
ब्राह्मण्यां क्षत्रियाञ्जातः सूतो भवति पार्थिव ।
प्रातिलोम्येन जातानां स ह्येको द्विज एव तु ॥ ९ ॥ ४-२१-९ (२९०७९)
रथकारमितीमं हि क्रियायुक्तं द्विजन्मनाम् ।
क्षत्रियादवरो वैश्याद्विशिष्ट इति चक्षते ॥ १० ॥ ४-२१-१० (२९०८०)
सह सूतेन संबन्धः कृतः पूर्वं नराधिपैः ।
तेन तु प्रातिलोम्येन राजशब्दो न लभ्यते ॥ ११ ॥ ४-२१-११ (२९०८१)
तेषां तु सूतविषयः सूतानां नामतः कृतः ।
उपजीव्यं च यत्क्षेत्रं राजन्सूतेन वै पुरा ॥ १२ ॥ ४-२१-१२ (२९०८२)
सूतानामधिपो राजा केकयो नाम विश्रुतः ।
राजकन्यासमुद्भूतः सारथ्येऽनुपमोऽभवत् ॥ १३ ॥ ४-२१-१३ (२९०८३)
पुत्रास्तस्य कुरुश्रेष्ठ मालव्यां जज्ञिरे तदा ।

कीचका इति विख्याताः शतं षट् चैव भारत ॥ १४ ॥ ४-२१-१४ (२९०८४)
तेषामासीद्बलश्रेष्ठः कीचकः सर्वजित्प्रभो ।
अग्रजो बलसंमत्तस्तेनासीत्सूतषट्शतम् ॥ १५ ॥ ४-२१-१५ (२९०८५)
मालव्या एव कौरव्य तत्र ह्यवरजाऽभवत् ।
तस्यां केकयराज्ञस्तु सुदेष्णा दुहिताऽभवत् ॥ १६ ॥ ४-२१-१६ (२९०८६)
तां विराटस्य मात्स्यस्य केकयः प्रददौ मुदा ।
सुरथायां मृतायां तु कौसल्यां श्वेतमातरि ॥ १७ ॥ ४-२१-१७ (२९०८७)
श्वेते विनष्टे शङ्खे च गते मातुलवेश्मनि ।
सुदेष्णां महिषीं लब्ध्वा राज दुःखमपानुदत् ॥ १८ ॥ ४-२१-१८ (२९०८८)
उत्तरं चोत्तरां चैव विराटात्पृथिवीपते ।
सुदेष्णा सुषुवे देवी कैकेयी कुलवृद्धये ॥ १९ ॥ ४-२१-१९ (२९०८९)
मातृष्वसृसुतां राजन्कीचकस्तामनिन्दिताम् ।
सदा परिचरन्प्रीत्या विराटे न्यवसत्सुखी ॥ २० ॥ ४-२१-२० (२९०९०)
भ्रातरश्चास्य विक्रान्ताः सर्वे च तमनुव्रताः ।
विराटस्यैव संहृष्टा बलं कोशं त्ववर्धयन् ॥ २१ ॥ ४-२१-२१ (२९०९१)
कालेया नाम ते दैत्याः प्रायशो भुवि विश्रुताः ।
जज्ञिरे कीचका राजन्बाणो ज्येष्ठस्तथाऽभवत् ॥ २२ ॥ ४-२१-२२ (२९०९२)
स हि सर्वास्त्रसंपन्नो बलवान्भीमविक्रमः ।
कीचको नष्टमर्यादो बभूव भयदो नृणाम् ॥ २३ ॥ ४-२१-२३ (२९०९३)
तं प्राप्य बलसंमत्तं विराटः पृथिवीपतिः ।
जिगाय सर्वांश्च रिपून्यथेन्द्रो दानवान्पुरा ॥ २४ ॥ ४-२१-२४ (२९०९४)
मेखलांश्च त्रिगर्तांश्च दशार्णांश्च कशेरुकान् ।
मालवांश्चैव यवनान्सिलिन्दान्काशिकोसलान् ॥ २५ ॥ ४-२१-२५ (२९०९५)
करदांश्च निषिद्धांश्च शिवान्मचुलकांस्तथा ।
पुलिन्दांश्च कलिङ्गांश्च तङ्कणान्परतङ्कणान् ॥ २६ ॥ ४-२१-२६ (२९०९६)
अन्ये च बहवः शूरा नानाजनपदेश्वराः ।
कीचकेन रणे भग्ना विद्रवन्ति दिशो दश ॥ २७ ॥ ४-२१-२७ (२९०९७)
तमेवंवीर्यसंपन्नं नागायुतसमं बले ।
विराटस्तत्र सेनायाश्चकार पतिमात्मनः ॥ २८ ॥ ४-२१-२८ (२९०९८)
विराटभ्रातरश्चैव दश दाशरथेः समाः ।
ते चैनानन्ववर्तन्त कीचकान्बलवत्तरान् ॥ २९ ॥ ४-२१-२९ (२९०९९)
एवंविधबलो भीमः कीचकस्ते च तद्विधाः ।
राज्ञः स्याला महात्मानो विराटस्य हितैषिणः ॥ ३० ॥ ४-२१-३० (२९१००)
एतत्ते कथितं सर्वं कीचकस्य पराक्रमम् ।
द्रौपदी न शशापैनं यस्मात्तद्गदतः शृणु ॥ ३१ ॥ ४-२१-३१ (२९१०१)
रक्षन्ति हि तपः क्रोधादृषयो न शपन्ति च ।

जानन्ती तद्यथातत्त्वं द्रौपदी न शशाप तम् ॥ ३२ ॥ ४-२१-३२ (२९१०२)
क्षमा धर्मः क्षमा दानं क्षमा यज्ञः क्षमा तपः ।
क्षमा सत्यं क्षमा शीलं क्षमा सर्वमिति श्रुतिः ॥ ३३ ॥ ४-२१-३३ (२९१०३)
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
एतत्सर्वं विजानन्ती सा क्षमामन्वपद्यत ॥ ३४ ॥ ४-२१-३४ (२९१०४)
भर्तॄणां मतमाज्ञाय क्षमिणां धर्मचारिणाम् ।
नाशपत्तं विशालाक्षी सती शक्ताऽपि भारत ॥ ३५ ॥ ४-२१-३५ (२९१०५)
पाण्डवाश्चापि ते सर्वे द्रौपदीं प्रेक्ष्य दुःखिताम् ।
क्रोधाग्निनाऽप्यदह्यन्त तदा लज्जाव्यपेक्षया ॥ ३६ ॥ ४-२१-३६ (२९१०६)
अथ भीमो महाबाहुः मूदयिष्यंस्तु कीचकम् ।
वारितो धर्मपुत्रेण वेलयेव महोदधिः ॥ ३७ ॥ ४-२१-३७ (२९१०७)
संधार्य मनसा रोषं दिवारात्रं विनिश्वसन् ।
महानसे तदा कृच्छ्रात्सुष्वाप रजनीं च ताम् ॥ ३८ ॥ ॥ ४-२१-३८ (२९१०८)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

विराटपर्व - अध्याय ०२२
॥ श्रीः ॥
४.२२. अध्यायः २२

Mahabharata - Virata Parva - Chapter Topics
कीचकं जिघांसन्त्या द्रौपद्या रात्रौ महानसमेत्य स्वपतो भीमस्य
प्रबोधनम् ॥ १ ॥
तथा कीचकमारणाभावे स्वप्राणविमोक्षणप्रतिज्ञानम् ॥ २ ॥
तथा युधिष्ठिरादीन्प्रति प्रत्येकं नामनिर्देशपूर्वकमनुशोचनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-२२-० (२९१०९)
वैशम्पायन उवाच। ४-२२-०क्ष् (३०७९)
सा सूतपुत्राभिहता राजपुत्री सुदुःखिता ।
वधं कृष्णा परीप्सन्ती सूतपुत्रस्य भामिनी ॥ १ ॥ ४-२२-१ (२९११०)
जगामावासमेवाथ तदा सा द्रुपदात्मजा ।
कृत्वा शौचं यथान्यायं कृष्णा सा तनुमध्यमा ॥ २ ॥ ४-२२-२ (२९१११)
गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा ।
चिन्तयामास रुदती तस्य दुःखस्य निर्णयम् ॥ ३ ॥ ४-२२-३ (२९११२)

किं करोमि क्व गच्छामि कथं कार्यं भवेन्मम ।
इत्येवं चिन्तयित्वा सा भीमं तं मनसाऽगमत् ।
अन्यः कर्ता विना भीमान्न मेऽद्य मनसेप्सितम् ॥ ४ ॥ ४-२२-४ (२९११३)
प्रादुर्भूते क्षणे रात्रौ विहाय शयनं स्वकम् ।
दुःखेन महता युक्ता मानसेन मनस्विनी ।
प्राद्रवन्नाथमिच्छन्ती तथा नाथवती सती ॥ ५ ॥ ४-२२-५ (२९११४)
सा वै महानसं प्राप्य भीमसेनं सुचिस्मिता ।
उपासर्पत पाञ्चाली वासितेव महागजम् ॥ ६ ॥ ४-२२-६ (२९११५)
सर्वश्वेतेव माहेयी वने वृद्धा त्रिहायणी ।
महर्षभं यथा सुप्तमर्थिनी वननिर्झरे ।
संप्रसुप्तं तथा सिंहिं मृगराजवधूरिव ॥ ७ ॥ ४-२२-७ (२९११६)
अभिप्रसार्य बाहुभ्यां पतिं सुप्तं समाश्लिषत् ।
सुजातं गोमतीतीरे सालं वल्लीव पुष्पिता ॥ ८ ॥ ४-२२-८ (२९११७)
परिस्पृस्य च पाणिभ्यां पतिं सुप्तमबोधयत् ।
श्रीरिवान्या महोत्साहं सुप्तं विष्णुमिवार्णवे ।
क्षौमावदाते शयने शयानं वृषभेक्षणम् ॥ ९ ॥ ४-२२-९ (२९११८)
यथा शची देवराजं रुद्राणी शंकरं यथा ।
ब्रह्माणमिव सावित्री देवसेना गुहं यथा ॥ १० ॥ ४-२२-१० (२९११९)
दिशागजसमाकारं गजं गजवधूरिव ।
भीमं प्राबोधयत्कान्ता लक्ष्मीर्दामोदरं यथा ॥ ११ ॥ ४-२२-११ (२९१२०)
वीणेव मधुरालापा स्वरं गान्धारमाश्रिता ।
अभ्यभाषत पाञ्चाली कौरवं पाण्डुनन्दनम् ॥ १२ ॥ ४-२२-१२ (२९१२१)
उत्तिष्ठोत्तिष्ठ किं शेषे भीमसेन मृतो यथा ।
न मृतः स हि पापीयान्भार्यामालम्ब्य जीवति ॥ १३ ॥ ४-२२-१३ (२९१२२)
तस्मिञ्जीवति पापिष्ठे सेनावाहे मम द्विषि ।
तत्कर्म कृतवत्यद्य कथं निद्रां निषेवसे ॥ १४ ॥ ४-२२-१४ (२९१२३)
वैशम्पायन उवाच। ४-२२-१५क्ष् (३०८०)
सुखसुप्तश्च तं शब्दं निशम्य स वृकोदरः ।
संवेदितः कुरुश्रेष्ठः तोत्रैरिव महागजः ॥ १५ ॥ ४-२२-१५ (२९१२४)
स वै विहाय शयनं यस्मिन्सुप्तः प्रबोधितः ।
उदतिष्ठदमेयात्मा पर्यङ्के सोत्तरच्छदे ॥ १६ ॥ ४-२२-१६ (२९१२५)
उपवेश्य च दुर्धर्षः पाञ्चालकुलवर्धनीम् ।
अथाब्रवीद्राजपुत्रीं कौरव्यो महिषीं प्रियाम् ॥ १७ ॥ ४-२२-१७ (२९१२६)
केनार्थेन च संप्राप्ता त्वरितेव ममान्तिकम् ।
न ते प्रकृतिमान्वर्णः कृशा त्वमभिलक्ष्यसे ॥ १८ ॥ ४-२२-१८ (२९१२७)
प्रकाशं यदि वा गुह्यं सर्वमाख्यातुमर्हसि ।

आचक्ष्व त्वमशेषेण सर्वं विद्यामहं यथा ॥ १९ ॥ ४-२२-१९ (२९१२८)
सुखं वा यदि वा दुःखं शुभं वा यदि वाऽशुभम् ।
यद्यप्यसुकरं कर्म कृतमित्यवधारय ॥ २० ॥ ४-२२-२० (२९१२९)
अहमेव हि ते कृष्णे विश्वास्यः सर्वकर्मसु ।
अहमापत्सु चापि त्वां मोक्षयामि पुनः पुनः ॥ २१ ॥ ४-२२-२१ (२९१३०)
शीघ्रमुक्त्वा यथाकामं यत्ते कार्यं विवक्षितम् ।
गच्छ वै शयनायैव यावदन्यो न बुध्यते ॥ २२ ॥ ४-२२-२२ (२९१३१)
वैशम्पायन उवाच। ४-२२-२३क्ष् (३०८१)
सा लज्जमाना भीता च अधोमुखमुखी ततः ।
नोवाच किंचिद्वचनं बाष्पदूषितलोचना ॥ २३ ॥ ४-२२-२३ (२९१३२)
अथाब्रवीद्भीमपराक्रमो बली वृकोदरः पाण्डवमुख्यसंमतः ।
प्रब्रूहि किं ते करवाणि सुन्दरि प्रियं प्रिये वारणमत्तगामिनि ॥ २४
॥ ४-२२-२४ (२९१३३)
द्रौपद्युवाच। ४-२२-२५क्ष् (३०८२)
अशोच्यता कुतस्तस्या यस्या भर्ता युधिष्ठिरः ।
जानन्सर्वाणि दुःखानि किं मां भीमानुपृच्छसि ॥ २५ ॥ ४-२२-२५ (२९१३४)
यन्मां दासीप्रवादेन प्रातिकामी तदाऽनयत् ।
सभायां परिषन्मध्ये तन्मे मर्माणि कृन्तति ॥ २६ ॥ ४-२२-२६ (२९१३५)
विकृष्टा हास्तिनपुरे सभायां राजसंसदि ।
दुःशासनेन केशान्ते परामृष्टा रजस्वला ॥ २७ ॥ ४-२२-२७ (२९१३६)
क्षत्रियैस्तत्र कर्णाद्यैर्दृष्टा दुर्योधनेन च ।
श्वशुराभ्यां च भीष्मेण विदुरेण च धीमता ।
द्रोणेन च महाबाहो कृपेण च परंतप ॥ २८ ॥ ४-२२-२८ (२९१३७)
साऽहं श्वशुरयोर्मध्ये भ्रातृमध्ये च पाण्डव ।
केशे गृहीत्वा च सभां नीता जीवति वै त्वयि ॥ २९ ॥ ४-२२-२९ (२९१३८)
विप्रयुक्ता ततश्चाहं वने राज्याद्वनं गता ।
साऽहं वने दुर्वसतिं वसती त्वध्वकर्शिता ।
जटासुरपरिक्लेशात्प्राप्तापि सुमहद्भयम् ॥ ३० ॥ ४-२२-३० (२९१३९)
पार्थिवस्य सुता नाम कानु जीवेन मादृशी ।
अनुभूय भृशं दुःखमन्यत्र द्रौपदीं प्रभो ॥ ३१ ॥ ४-२२-३१ (२९१४०)
वनवासगता चाहं सैन्धवेन दुरात्मना ।
परामृष्टा द्वितीयं च सोढुमुत्सहते तु का ॥ ३२ ॥ ४-२२-३२ (२९१४१)
पद्भयां पर्यचरं चाहं देशान्विषमसंस्थितान् ।
दुर्गाञ्श्वापदसंकीर्णांस्त्वयि जीवति पाण्डवे ॥ ३३ ॥ ४-२२-३३ (२९१४२)
ततोऽहं द्वादशे वर्षे वन्यमूलफलाशना ।
इदं पुरमनुप्राप्ता सुदेष्णापरिचारिका ।

परस्त्रियमुपातिष्ठे सत्यधर्मपरायणा ॥ ३४ ॥ ४-२२-३४ (२९१४३)
गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम् ।
नित्यं पिषे विराटस्य त्वयि जीवति पाण्डव ॥ ३५ ॥ ४-२२-३५ (२९१४४)
साऽहं बहूनिः दुःखानि गणयामि न ते कृते ॥ ३६ ॥ ४-२२-३६ (२९१४५)
मत्स्यराजसमक्षं तु तस्य धूर्तस्य पश्यतः ।
कीचकेन पदा स्पृष्टा का नु जीवेत मादृशी ॥ ३७ ॥ ४-२२-३७ (२९१४६)
एवं बहुविधैर्दुःखैः क्लिश्यमाना च पाण्डव ।
न मां जानासि कौन्तेय किं फलं जीवितेन मे ॥ ३८ ॥ ४-२२-३८ (२९१४७)
द्रुपदस्य सुता चाहं धृष्टद्युम्नस्य चानुजा ।
अग्निकुण्डात्समुद्भूता नोर्व्यां जातु चराम्यहम् ॥ ३९ ॥ ४-२२-३९ (२९१४८)
कीचकं चेन्न हन्यास्त्वं ग्रीवां बद्ध्वा जले म्रिये ।
विषमालेड्य पास्यामि प्रवेक्ष्याम्यथवाऽनलं ॥ ४० ॥ ४-२२-४० (२९१४९)
आत्मानं नाशयिष्यामि वृक्षमारुह्य वा पते ।
शस्त्रेणाङ्गं च भेत्स्यामि किं फलं जीवितेन मे ॥ ४१ ॥ ४-२२-४१ (२९१५०)
योऽयं राज्ञो विराटस्य कीचको नाम भारत ।
सेनानीः पुरुषव्याघ्र स्यालः परमदुर्मतिः ॥ ४२ ॥ ४-२२-४२ (२९१५१)
स मां सैरन्ध्रिवेषेण वसन्तीं राजवेश्मनि ।
नित्यमेवाह दुष्टात्मा भार्या मम भवेति वै ॥ ४३ ॥ ४-२२-४३ (२९१५२)
तेनैवमुच्यमानाया वधार्हेणारिसूदन ।
कालेनेव फलं पक्वं हृदयं मे विदीर्यते ॥ ४४ ॥ ४-२२-४४ (२९१५३)
शरणं भव कौन्तेय मा स्म गच्छे युधिष्ठिरम् ।
निरुद्योगं निरामर्षं निर्वीर्यमरिमर्दन ॥ ४५ ॥ ४-२२-४५ (२९१५४)
मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम् ॥ ४६ ॥ ४-२२-४६ (२९१५५)
विजानामि तवामर्षं बलं वीर्यं च पाण्डव ।
ततोऽहं परिदेवामि चाग्रतस्ते महाबल ॥ ४७ ॥ ४-२२-४७ (२९१५६)
यथा यूथपतिर्मत्तः कुञ्जरः षाष्टिहायनः ।
भूमौ निपतितं बिल्वं पद्भ्यमाक्रम्य पीडयेत् ॥ ४८ ॥ ४-२२-४८ (२९१५७)
तथैव च शिरस्तस्य निपात्य धरणीतले ।
वामेन पुरुषव्याघ्र मर्द मादेन पाण्डव ॥ ४९ ॥ ४-२२-४९ (२९१५८)
स चेदुद्यन्तमादित्यं प्रातरुत्थाय पश्यति ।
कीचकः शर्वरीं व्युष्टां नाहं जीवितुमुत्सहे ॥ ५० ॥ ४-२२-५० (२९१५९)
शापितोसि मम प्राणैः सुकृतेनार्जुनस्य च ।
युधिष्ठिरस्य पादाभ्यां यमयोर्जीवितेन च ।
कीचकस्य वधं नाद्य प्रतिजानासि भारत ॥ ५१ ॥ ४-२२-५१ (२९१६०)
भ्रात च विगर्हस्व ज्येष्टं दुर्द्यूतदेविनम् ।
यस्मास्मि कर्मणा प्राप्ता दुःखमेतदनन्तकम् ॥ ५२ ॥ ४-२२-५२ (२९१६१)

येषां मुख्यतमो ज्येष्ठो भवेत्तु कुलपांसनः ।
भ्रातरं परमन्वीयुस्तेऽपि शालीनबुद्धयः ॥ ५३ ॥ ४-२२-५३ (२९१६२)
को हि राज्यं परित्यज्य सपुत्रपशुबान्धवम् ।
प्रव्रजेत महारण्यमजिनैः परिवारितः ॥ ५४ ॥ ४-२२-५४ (२९१६३)
यदि निष्कसहस्राणि यद्वाऽन्यत्सारवद्धनम् ।
सायं प्रातरदेविष्यदपि संवत्सरायुतम् ॥ ५५ ॥ ४-२२-५५ (२९१६४)
रुक्मं हिरण्यं वासांसि यानं युग्यमजाविकम् ।
अश्वाश्वतरसङ्घाश्च न जातु क्षयमाव्रजेत् ॥ ५६ ॥ ४-२२-५६ (२९१६५)
सोयं द्यूतप्रवादेन श्रियश्चैवावरोपितः ।
तूष्णीमास्ते यथा मूढः स्वानि कर्माणि चिन्तयन् ॥ ५७ ॥ ४-२२-५७ (२९१६६)
पुरा दशसहस्राणि दन्तिनां वाजिनामपि ।
यं यान्तमनुयान्ति स्म सोयं द्यूतेन जीवति ॥ ५८ ॥ ४-२२-५८ (२९१६७)
तथा शतसहस्राणि स्त्रीणाममिततेजसाम् ।
उपासते स्म राजानमिन्द्रप्रस्थे युधिष्ठिरम् ॥ ५९ ॥ ४-२२-५९ (२९१६८)
शतं दासीसहस्राणां यस्य नित्यं महानसे ।
पात्रहस्ता दिवारात्रमतिथीन्भोजयन्त्युत ॥ ६० ॥ ४-२२-६० (२९१६९)
एष निष्कसहस्राणि दत्त्वा प्रातर्दिनेदिने ।
द्यूतजेन ह्यनर्थेन महता समुपावृतः ॥ ६१ ॥ ४-२२-६१ (२९१७०)
एनं सुस्वरसंपन्ना बहवः सूतमागधाः ।
सुप्तं प्रातरुपातिष्ठन्सुमृष्टमणिकुण्डलाः ॥ ६२ ॥ ४-२२-६२ (२९१७१)
श्सहस्रं वालखिल्यानां सहस्रमुदवासिनाम् ।
सहस्रमश्मकुट्टानां सहस्रं वायुभोजिनाम् ॥ ६३ ॥ ४-२२-६३ (२९१७२)
सहस्रं मुनिपत्नीनां सहस्रं ब्रह्मचारिणाम् ।
सहस्रं मौनशीलानां सहस्रं गृहमेधिनाम् ॥ ६४ ॥ ४-२२-६४ (२९१७३)
हंसाः परमहंसाश्च योगिनश्च द्विजातयः ।
कुटीरकाः परिव्राजो ये चान्ये वनचारिणः ॥ ६५ ॥ ४-२२-६५ (२९१७४)
संविभक्तात्मकाश्चैव बहवश्चोर्ध्वरेतसः ।
चतुर्वेदविदो विप्राः शिक्षामीमांसपारगाः ।
क्रमपाठाश्च ये विप्राः सामाध्यायनिकाश्च ये ॥ ६६ ॥ ४-२२-६६ (२९१७५)
सहस्रमृषयो यस्य नित्यमासन्सभासदः ।
तपःश्रुतोपसंपन्नाः सर्वकामैरुपास्थिताः ॥ ६७ ॥ ४-२२-६७ (२९१७६)
अन्धान्वृद्धाननाथांस्तु सर्वराष्ट्रेषु दुःखितान् ।
बिभर्त्यन्नार्थिनो नित्यमानृशंस्याद्युधिष्ठिरः ॥ ६८ ॥ ४-२२-६८ (२९१७७)
स एष निलयं प्राप्तो मत्स्यस्य परिचारकः ।
सभायां विनतो राज्ञः कङ्को नाम युधिष्ठिरः ॥ ६९ ॥ ४-२२-६९ (२९१७८)
इन्द्रप्रस्थे निवसतः समये यस्य पार्थिवाः ।

आसन्बलिकराः सर्वे सोन्येभ्यो भृतिमिच्छति ॥ ७० ॥ ४-२२-७० (२९१७९)
पार्थिवाः पृथिवीपाला यस्यासन्वशवर्तिनः ।
स वशे विवशो राज्ञां परेषामद्य वर्तते ॥ ७१ ॥ ४-२२-७१ (२९१८०)
संप्राप्य पृथिवीं कृत्स्नां रश्मिवानिव तेजसा ।
सोद्य राज्ञो विराटस्य सभास्तारो युधिष्ठिरः ॥ ७२ ॥ ४-२२-७२ (२९१८१)
यमुपासत राजानं सभायामृषिसत्तमाः ।
तमुपासीनमद्यान्यं पश्य पाण्डव पाण्डवम् ॥ ७३ ॥ ४-२२-७३ (२९१८२)
अनवद्यं महाप्राज्ञं जीवितार्थेन संवृतम् ।
दृष्ट्वा कस्य न दुःखं स्याद्धर्मराजं युधिष्ठिरम् ॥ ७४
॥ ४-२२-७४ (२९१८३)
उपास्ते स्म सभायां यं कृत्स्नाऽपि च वसुन्धरा ।
तमुपासीनमद्यान्यं पश्य भारत भारतम् ॥ ७५ ॥ ४-२२-७५ (२९१८४)
एवं बहुविदैर्दुःखैः पीड्यमानामनाथवत् ।
शोकसागरमध्यस्थां किं मां भीम न पश्यसि ॥ ७६ ॥ ४-२२-७६ (२९१८५)
इदं तु मे दुःखतरं यत्त्वां वक्ष्यामि भारत ।
न मेऽभ्यसूया कर्तव्या दुःखादेतद्ब्रवीम्यहम् ॥ ७७ ॥ ४-२२-७७ (२९१८६)
शार्दूलैर्महिषैर्नागैरगारे योत्स्यसे सदा ।
कैकेय्याः प्रेक्षमाणायास्तदा मे कश्मलोऽभवत् ॥ ७८ ॥ ४-२२-७८ (२९१८७)
हसन्त्यन्तःपुरे नार्यो मम चेष्टां निरीक्ष्य च ॥ ७९ ॥ ४-२२-७९ (२९१८८)
तत उत्थाय कैकेयी सर्वास्ताः प्रत्यभाषत ।
प्रेक्ष्य मामनवद्याङ्गीं कश्मलाभिहतामिव ॥ ८० ॥ ४-२२-८० (२९१८९)
स्नेहात्संवासजादेव तदा वै चारुहासिनी ।
युध्यमानं महावीर्यमिमं समनुशोचति ॥ ८१ ॥ ४-२२-८१ (२९१९०)
कल्याणरूपा सैरन्ध्री वललश्चापि सुन्दरः ।
स्त्रीणां चित्तं हि दुर्ज्ञेयं युक्तरूपौ हि मे मतौ ॥ ८२ ॥ ४-२२-८२ (२९१९१)
सैरन्ध्री प्रियसंवासान्नित्यं करुणवादिनी ।
अस्मिन्राजकुले चैतौ तुल्यकालनिवासिनौ ॥ ८३ ॥ ४-२२-८३ (२९१९२)
इति ब्रुवाणा वाक्यानि सा मां नित्यमजीजपत् ।
क्रुध्यन्तीं मां च संप्रेक्ष्य पर्यशङ्कत मां त्वयि ॥ ८४
॥ ४-२२-८४ (२९१९३)
तस्यां तथा ब्रुवन्त्यां तु भीमो भीमपराक्रमः ।
नोवाच किंचिद्वचनं संरम्भाद्रक्तलोचनः ॥ ८५ ॥ ४-२२-८५ (२९१९४)
ज्ञात्वा-तु रुषितं भीमं द्रौपदी पुनरब्रवीत् ।
शोके यौधिष्ठिरे मग्ना नाहं जीवितुमुत्सहे ॥ ८६ ॥ ४-२२-८६ (२९१९५)
यंस्तु देवान्मनुष्यांश्च सर्वानेकरथोऽजयत् ।
सोयं राज्ञो विराटस्य कन्यानां नर्तको युवा ।

आस्ते वेषप्रतिच्छन्नः कन्यानां परिचारकः ॥ ८७ ॥ ४-२२-८७ (२९१९६)
योऽतर्पयदमेयात्मा खाण्डवे जातवेदसम् ।
सोऽन्तःपुरगतः पार्थः कूपेऽग्निरिव संवृतः ॥ ८८ ॥ ४-२२-८८ (२९१९७)
यस्माद्भयममित्राणां सदैव पुरुषर्षभात् ।
स लोकपरिभूतेन वेषेणास्ते धनंजयः ॥ ८९ ॥ ४-२२-८९ (२९१९८)
यस्यं ज्यातलनिर्घोषात्समकम्पन्त शत्रवः ।
षण्डरूपं वहन्तं तं गीतं नृत्तावलम्बनम् ।
कुर्वन्तमर्जुनं दृष्ट्वा न मे स्वास्थ्यं मनो व्रजेत् ॥ ९० ॥
४-२२-९० (२९१९९)
स्त्रियो गीतस्वरात्तस्य मुदिताः पर्युपासते ॥ ९१ ॥ ४-२२-९१ (२९२००)
किरीटं सूर्यसंकाशं यस्य मूर्धन्यशोभत ।
वेणीविकृतकेशान्तः सोऽयमद्य धनंजयः ॥ ९२ ॥ ४-२२-९२ (२९२०१)
यस्मिन्नस्त्राणि दिव्यानि समस्तानि महात्मनि ।
आधारः सर्वविद्यानां यो धारयति कुण्डले ॥ ९३ ॥ ४-२२-९३ (२९२०२)
यं वै राजसहस्राणि तेजसाऽप्रतिमं भुवि ।
समरे नातिवर्तन्ते वेलामिव महोर्मयः ॥ ९४ ॥ ४-२२-९४ (२९२०३)
सोयं राज्ञो विराटस्य कन्यानां नर्तको युवा ।
आस्ते वेषप्रतिच्छन्नः कन्यानां परिचारकः ॥ ९५ ॥ ४-२२-९५ (२९२०४)
यस्य स्म रथनिर्घोषात्समकम्पत मेदिनी ।
सपर्वतवनाकाशा सहस्थावरजङ्गमा ॥ ९६ ॥ ४-२२-९६ (२९२०५)
यस्मिञ्जाते महेष्वासे कुन्त्याः प्रीतिरवर्धत ।
न स शोचति मामद्य भीमसेन तवानुजः ॥ ९७ ॥ ४-२२-९७ (२९२०६)
विभूषितमलंकारैः कुण्डलैः परिपातुकैः ।
कम्बुपाणिमथायान्तं दृष्ट्वा सीदति मे मनः ॥ ९८ ॥ ४-२२-९८ (२९२०७)
वेणीविकृतकेशान्तं भीमधन्वानमर्जुनम् ।
कन्यापरिवृतं दृष्ट्वा शोकं गच्छति मे मनः ॥ ९९ ॥ ४-२२-९९ (२९२०८)
यदा ह्येनं परिवृतं कन्याभिर्देवरूपिणम् ।
प्रच्छन्नमिव मातङ्गं परिपूर्णं करेणुभिः ॥ १०० ॥ ४-२२-१०० (२९२०९)
मात्स्यं पार्थं च गायन्तं विराटं समुपस्थितम् ।
पश्यामि तूर्यमध्यस्थं दृष्ट्वा मुह्यति मे मनः ॥ १०१ ॥ ४-२२-१०१
(२९२१०)
नूनमार्या न जानाति कृच्छ्रं प्राप्तं धनंजयम् ।
अजातशत्रुं कौरव्यं मग्नं द्युर्द्यूतदेविनम् ॥ १०२ ॥ ४-२२-१०२ (२९२११)
ऐन्द्रवारुणवायव्यब्रह्माग्नेयैः सवैष्णवैः ।
अग्नीन्संतर्पयन्पार्थः सर्वशत्रुनिबर्हणः ।
दिव्यैरस्त्रैरमेयात्मा सर्वांश्चैकरथोऽजयत् ॥ १०३ ॥ ४-२२-१०३ (२९२१२)

कौबेरं वैष्णवं शैवमस्त्राण्यन्यानि भारत ।
दर्शयन्नस्त्रवीर्यं च वासुदेवसहायवान् ॥१०४ ॥ ४-२२-१०४ (२९२१३)
दिव्यं गान्धर्वमस्त्रं च वायव्यमथ वैष्णवम् ।
ब्राह्मं पाशुपतं चैव स्थूणाकर्णं च दर्शयन् ॥१०५ ॥ ४-२२-१०५
(२९२१४)
पौलोमान्कालकेयांश्च इन्द्रशत्रून्महाबलान् ।
निवातकवचैः सार्धं घोरानेकरथोऽजयत् ।
सोन्तःपुरगतः पार्थः कूपेऽग्निरिव संवृतः ॥१०६ ॥ ४-२२-१०६ (२९२१५)
यो वै महातपः कुर्वन्महाबलपराक्रमः ।
युद्धेन तोषयामास शंकरं शूलपाणिनम् ॥१०७ ॥ ४-२२-१०७ (२९२१६)
कन्यापुरगतं दृष्ट्वा गोष्ठेष्विव महावृषम् ।
स्त्रीवेषविकृतं पार्थं कुन्तीं गच्छति मे मनः ॥१०८ ॥ ४-२२-१०८
(२९२१७)
यः स्त्रीभिर्नित्यसंपन्नो रूपेणास्त्रेण मेधया ।
सोऽश्वबन्धो विराटस्य पश्य कालस्य पर्ययम् ॥१०९ ॥ ४-२२-१०९ (२९२१८)
राजकन्याश्च वेश्याश्च विशां दुहितरश्च याः ।
सर्वाः सारयुता नार्यो दामग्रन्थिवशं गताः ।
प्रेष्यकर्मणि तं दृष्ट्वा शोचामि विलपामि च ॥१२० ॥ ४-२२-११० (२९२१९)
विराटमुपतिष्ठन्तं दर्शयन्तं च वाजिनम् ।
अभ्यकीर्यन्त बृन्दानि दामग्रन्थिमुदीक्षितुम् ।
विनयन्तं जवेनाश्वान्धर्मराजस्य पश्यतः ॥१११ ॥ ४-२२-१११ (२९२२०)
किंनु मां मन्यसे पार्थ सुखितेति परन्तप ।
तथा दृष्ट्वा यवीयांसं सहदेवं युधांपतिम् ॥११२ ॥ ४-२२-११२ (२९२२१)
तं दृष्ट्वा गोषु गोसङ्ख्यं वत्सचर्मक्षितीशयम् ।
दुःखशोकपरीताङ्गी पाण्डुभूताऽस्मि पाण्डव ॥११३ ॥ ४-२२-११३ (२९२२२)
सहदेवस्य वृत्तानि चिन्तयन्ती पुनःपुनः ।
न पश्यामि महाभाग सहदेवस्य दुःष्कृतम् ।
यस्मादेवंविधं क्लेशं प्राप्नुयात्सत्यविक्रमः ॥११४ ॥ ४-२२-११४ (२९२२३)
दूयामि भरतश्रेष्ठ दृष्ट्वा ते भ्रातरं प्रियम् ।
गोषु गोवृषसंकाशं मात्स्येनापि निवेशितम् ॥११५ ॥ ४-२२-११५ (२९२२४)
संरब्धतररक्ताक्षं गोपालानां पुरोगमम् ।
विराटमभिनन्दन्तं वित्ते मे भवति ज्वरः ॥११६ ॥ ४-२२-११६ (२९२२५)
सहदेवं हि मे नित्यं वीरमार्या प्रशंसति ।
महाभिजनसंपन्नो नीतिमान्कुलवानपि ॥११७ ॥ ४-२२-११७ (२९२२६)
ह्रीनिषेवो ह्यनवमो धार्मिकश्च प्रियश्च मे ।
स तेऽरण्येषु वोढव्यः पाञ्चालि रजनीष्वपि ॥११८ ॥ ४-२२-११८ (२९२२७)

सुकुमारश्च शूरश्च राजानं चाप्यनुव्रतः ।
ज्येष्ठापचायिनं वीरं स्वयं पाञ्चालि भोजयेः ॥११९ ॥ ४-२२-११९ (२९२२८)
इत्युवाच हि मां कुन्ती रुदती पुत्रगृद्धिनी ।
प्रव्रजन्तं महारण्यं तं परिष्वज्य तिष्ठती ॥१२० ॥ ४-२२-१२० (२९२२९)
तं दृष्ट्वा गोषु गोपालवेषमास्थाय धिष्ठितम् ।
सहदेवं युधांश्रेष्ठं किंनु जीवामि पाण्डवः ॥१२१ ॥ ४-२२-१२१ (२९२३०)
एवं दुःखशताविष्टा युधिष्ठिरनिमित्ततः ॥१२२ ॥ ४-२२-१२२ (२९२३१)
पुनः प्रतिविशिष्टानि दुःखानि शृणु भारत ।
वर्धन्ते मयि कौन्तेय वक्ष्याम्यन्यानि तानि वै ॥१२३ ॥ ४-२२-१२३ (२९२३२)
युष्मासु ध्रियमाणेषु दुःखानि विविधान्युत ।
शोषयन्ति शरीरं मे किंनु दुःखतरं ततः ॥१२४ ॥ ४-२२-१२४ (२९२३३)
४-२२-१२५ (२९२३४)
एकभर्ता तु या नारी सा सुखेनैव वर्तते ।
पञ्च मे पतयः सन्ति मम दुःखमनन्तकम् ॥१२५ ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-२२-७ सर्वश्वेता बकी इति नीलकण्ठः ॥
७ ॥
४-२२-१० तथा इति खो पाठः ॥
१० ॥
४-२२-१३ नाभृतस्य हि पापीयान्भार्यामालभ्य जीवतीति झो पाठः ॥
१३ ॥
४-२२-५४ महारण्यमनुजैः परिवारितः इति खो पाठः ॥
५४ ॥(इमे चत्वारः श्लोकाः धो पुस्तक एव वर्तन्ते ॥)

विराटपर्व - अध्याय ०२३
॥ श्रीः ॥
४.२३. अध्यायः २३

Mahabharata - Virata Parva - Chapter Topics

द्रौपद्या भीमंप्रति स्ववैभवानुस्मारणेन परिशोचनपूर्वकं
कीचकहननचोदना ॥१ ॥

Mahabharata - Virata Parva - Chapter Text

४-२३-० (२९२३५)

द्रौपद्युवाच। ४-२३-०क्ष् (३०८३)
अहं सैरन्ध्रिवेषेण वसन्ती राजवेश्मनि ।
वशगाऽस्मि सुदेष्णाया अक्षधूर्तस्य कारणात् ॥ १ ॥ ४-२३-१ (२९२३६)
विक्रियां पश्य मे तीव्रां राजपुत्र्याः परन्तप ।
आसे कालमुपासीना सर्वदुःखसहा पुनः ॥ २ ॥ ४-२३-२ (२९२३७)
अनित्याः खलु मर्त्यानामर्थाश्च व्यसनानि च ।
इति मत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः ॥ ३ ॥ ४-२३-३ (२९२३८)
चक्रवत्परिवर्तन्ते ह्यर्थाश्च व्यसनानि च ।
इति कृत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः ॥ ४ ॥ ४-२३-४ (२९२३९)
य एव हेतुर्भवति पुरुषस्य जयावहः ।
पराजये च हेतुः स इति च प्रतिपालये ॥ ५ ॥ ४-२३-५ (२९२४०)
दत्त्वा याचन्ति पुरुषा हत्वा हन्यन्त एव ते ।
पातयित्वा च पात्यन्ते परैरिति च मे श्रुतम् ॥ ६ ॥ ४-२३-६ (२९२४१)
न दैवस्यातिभारोस्ति न चैवास्यातिवर्तनम् ।
इति चाप्यागमं भूयो दैवस्य प्रतिपालये ॥ ७ ॥ ४-२३-७ (२९२४२)
स्थितं पूर्वं जलं यत्र न पुनस्तत्र तिष्ठति ।
इति पर्यायमिच्छन्ति प्रतीक्षाम्युदयं पुनः ॥ ८ ॥ ४-२३-८ (२९२४३)
दैवेन किल यस्यार्थः सुनीतोपि विपद्यते ।
सदा दैवागमे यत्नस्तेन कार्यो विजानता ॥ ९ ॥ ४-२३-९ (२९२४४)
किंनु मे वचनस्याद्य कथितस्य प्रयोजनम् ।
पृच्छ मां दुःखितामेनामपृष्टाऽपि ब्रवीमि ते ॥ १० ॥ ४-२३-१० (२९२४५)
महिषी पाण्डुपुत्राणां दुहिता द्रुपदस्य च ।
इमामवस्थां संप्राप्ता मदन्या का जिजीविषेत् ॥ ११ ॥ ४-२३-११ (२९२४६)
कुरून्परिहरन्सर्वान्पाञ्चालानपि भारत ।
पाण्डवेयांश्च संप्राप्तो मम शोको ह्यरिन्दम ॥ १२ ॥ ४-२३-१२ (२९२४७)
भ्रातृभिः श्वशुरैः पुत्रैर्बहुभिः परिवारिता ।
एवं समुदिता नारी कान्वेयं दुःखभागिनी ॥ १३ ॥ ४-२३-१३ (२९२४८)
नूनं बालतया धातुर्मया वै विप्रियं कृतम् ।
तस्य प्रभावाद्दुर्नीतं प्राप्ताऽस्मि भरतर्षभ ॥ १४ ॥ ४-२३-१४ (२९२४९)
वर्णं विकारमपि मे पश्य पाण्डव यादृशम् ।
ईदृशो मे न तत्रासीद्दुःखे परमके पुरा ॥ १५ ॥ ४-२३-१५ (२९२५०)
त्वमेव भीम जानीषे यन्मे पार्थ सुखं पुरा ।
साऽहं दासीत्वमापन्ना न शान्तिं मनसा लभे ॥ १६ ॥ ४-२३-१६ (२९२५१)
तद्दैविकमिदं मन्ये यत्र पार्थो धनञ्जयः ।
भीमधन्वा महारङ्गे चास्ते शान्त इवानलः ॥ १७ ॥ ४-२३-१७ (२९२५२)
अशक्या वेदितुं पार्थ प्राणिनां वै गतिर्नरैः ।

विनिपातमिमं पश्य युष्माकमविचिन्तितम् ॥ १८ ॥ ४-२३-१८ (२९२५३)
यस्या मम मुखप्रेक्षा यूयमिन्द्रसमाः सदा ।
सा प्रेक्ष्य मुखमन्यासामवराणां वरा सती ॥ १९ ॥ ४-२३-१९ (२९२५४)
पश्य पाण्डव मेऽवस्थां यथा नार्हामि वै तथा ।
युष्मासु ध्रियमाणेषु पाञ्चालेषु च मानद ॥ २० ॥ ४-२३-२० (२९२५५)
यस्याः सागरपर्यन्ता पृथिवी वशवर्तिनी ।
आसीत्साऽद्य सुदेष्णायाः पाञ्चाली वशवर्तिनी ॥ २१ ॥ ४-२३-२१ (२९२५६)
यस्याः पुरश्चरा ह्यासन्पृष्ठतश्चानुगामिनः ।
साहमद्य सुदेष्णायाः पुरः पश्चाच्च गामिनी ॥ २२ ॥ ४-२३-२२ (२९२५७)
इदं तु दुःखं कौन्तेय ममासह्यं निबोध तत् ।
या न जातु स्वयं पिंषे गात्रोद्वर्तनमात्मनः ।
अन्यत्र कुन्त्या भद्रं ते सा पिनष्म्यद्य चन्दनं ॥ २३ ॥ ४-२३-२३ (२९२५८)
पश्य कौन्तेय पाणी मे नैवं वै भवतः पुरा ।
इत्यस्मै दर्शयामास किणवन्तौ करावुभौ ॥ २४ ॥ ४-२३-२४ (२९२५९)
बिभेमि कुन्त्या या नाऽहं युष्माकं वा कदाचन ।
साऽद्याग्रतो विराटस्य भीता तिष्ठामि किंकरी ॥ २५ ॥ ४-२३-२५ (२९२६०)
किंनु वक्ष्यति सम्राण्मां वर्णकः सुकृतो न वा ।
नान्यपिष्टं विराटस्य चन्दनं किल रोचते ॥ २६ ॥ ४-२३-२६ (२९२६१)
वैशम्पायन उवाच। ४-२३-२७क्ष् (३०८४)
सा कीर्तयन्ती दुःखानि भीमसेनस्य भामिनी ।
रुरोद शनकैः कृष्णा भीमस्योरस्समाश्रिता ॥ २७ ॥ ४-२३-२७ (२९२६२)
सा बाष्पकलया वाचा निश्वसन्ती पुनःपुनः ।
हृदयं भीमसेनस्य घटयन्तीदमब्रवीत् ॥ २८ ॥ ४-२३-२८ (२९२६३)
नाल्पं कृतं मया भीम देवानां किल्बिषं पुरा ।
अभाग्या या तु जीवामि मर्तव्ये सति पाण्डव ॥ २९ ॥ ४-२३-२९ (२९२६४)
कीचकं चेन्न हन्यास्त्वं स्वात्मानं नाशयाम्यहम् ।
विषमालोड्य पास्यामि प्रवेक्ष्याम्यथवाऽनलम् ।
अभाग्याऽहमपुण्याऽहं नित्यदुःखा च विक्लवा ॥ ३० ॥ ४-२३-३० (२९२६५)
पापे निपतितायाश्च किं फलं जीवितेन मे ।
इत्यस्मै दर्शयामास किणबद्धौ करावुभौ ॥ ३१ ॥ ४-२३-३१ (२९२६६)
ततस्तस्याः करौ पीनौ किणबद्धौ वृकोदरः ।
मुखमानीय वेपन्त्या रुरोद परवीरहा ॥ ३२ ॥ ४-२३-३२ (२९२६७)
तौ गृहीत्वा च कौन्तेयो बाष्पमुत्सृज्य वीर्यवान् ।
ततः परमदुःखार्त इदं वचनमब्रवीत् ॥ ३२ ॥ ॥ ४-२३-३३ (२९२६८)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि

त्रयोविंशोऽध्यायः ॥ २३ ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-२३-६ मानयित्वा च मान्यन्ते नरा दैवविपर्यये इति थो पाठः ॥
६ ॥

विराटपर्व - अध्याय ०२४
॥ श्रीः ॥
४.२४. अध्यायः २४

Mahabharata - Virata Parva - Chapter Topics
द्रौपदीभीमसंवादः ॥ १ ॥
द्रौपद्या भीमंप्रति हटात्कीचकसंहारचोदना ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-२४-० (२९२६९)
वैशम्पायन उवाच। ४-२४-०क्ष् (३०८५)
आश्वासयंस्तां पाञ्चालीं भीमसेन उवाच ह ।
शृणु भद्रे वरारोहे क्रोधात्तत्र तु चिन्तितम् ॥ १ ॥ ४-२४-१ (२९२७०)
त्वं वै सभागतां दृष्ट्वा मात्स्यानां कदनं महत् ।
कर्तुकामेन भद्रं ते वृक्षश्चावेक्षितो मया ॥ २ ॥ ४-२४-२ (२९२७१)
तत्र मां धर्मराजस्तु कटाक्षेण न्यवारयत् ।
तज्ज्ञात्वाऽवाङ्मुखस्तूष्णीमास्थितोस्मि महानसं ॥ ३ ॥ ४-२४-३ (२९२७२)
शृणुष्वान्यत्प्रतिज्ञातं यद्वदामीह भामिनि ।
धिगस्तु मे बाहुबलं गाण्डीवं फल्गुनस्य च ।
यत्ते रक्तौ पुरा भूत्वा पाणी कृतकिणाविमौ ॥ ४ ॥ ४-२४-४ (२९२७३)
तदद्य मां तु तपति यत्कृतं न मया पुरा ।
सभायां स्म विराटस्य करोमि कदनं महत् ॥ ५ ॥ ४-२४-५ (२९२७४)
तत्र मे कारणं भाति कौन्तेयो यत्प्रतीक्षते ।
तदहं तस्य विज्ञाय स्थितो धर्मस्य शासने ॥ ६ ॥ ४-२४-६ (२९२७५)
यच्च राज्यात्प्रच्यवनं कुरूणामवधश्च यः ।
सुयोधनस्य कर्णस्य शकुनेः सौबलस्य च ॥ ७ ॥ ४-२४-७ (२९२७६)
दुःशासनस्य पापस्य यन्मया न हृतं शिरः ।
तन्मां दहति कल्याणि हृदि शल्यमिवार्पितम् ॥ ८ ॥ ४-२४-८ (२९२७७)
अपि चान्यद्वरारोहे स्मरिष्यसि वचो मम ।
पुण्ये तीरे सरस्वत्या यत्प्रतिष्ठाम संगताः ।

तत्राहमब्रवं कृष्णे सर्वक्लेशाननुस्मरन् ॥९ ॥ ४-२४-९ (२९२७८)
न चाहमनुगच्छेयं धर्मराजं युधिष्ठिरम् ।
धनञ्जयं च पाञ्चालि माद्रिपुत्रौ च भ्रातरौ ।
कृत्वैतां च मतिं कृष्णे युधिष्ठिरमगर्हयम् ॥१० ॥ ४-२४-१०
(२९२७९)
परुषं वचनं श्रुत्वा मम धर्मात्मजस्तदा ।
ह्रीमान्वाक्यमहीनार्थं ब्रुवन्राजा युधिष्ठिरः ।
सर्वानन्वनयद्भ्रातॄन्मुनेर्धौम्यस्य पश्यतः ॥११ ॥ ४-२४-११ (२९२८०)
मा रोदी राज्ञि लोकानां सर्वागमगुणान्विता ।
रक्षितव्यं सहास्माभिः सत्यमप्रतिमं भुवि ॥१२ ॥४-२४-१२ (२९२८१)
अनुनीतेषु चास्मासु अनुनीता त्वमप्यसि ।
मा धर्मं जहि सुश्रोणि क्रोधं जहि महामते ॥१३ ॥४-२४-१३ (२९२८२)
इमं तु समुपालम्भं त्वत्तो राजा युधिष्ठिरः ।
शृणुयाद्यदि कल्याणि कृत्स्नं जह्यात्स जीवितं ॥१४ ॥४-२४-१४ (२९२८३)
धनञ्जयो वा सुश्रोणि यमौ चापि सुमध्यमे ।
लोकान्तरगतेष्वेषु नाहं शक्ष्यामि जीवितुम् ॥१५ ॥४-२४-१५ (२९२८४)
धर्मं शृणुष्व पाञ्चालि यत्ते वक्ष्यामि मानिनि ॥१६ ॥ ४-२४-१६ (२९२८५)
दुहिता जनकस्यासीद्वैदेही यदि ते श्रुता ।
पतिमन्वचरत्सीता महारण्यनिवासिनम् ॥१७ ॥४-२४-१७ (२९२८६)
वसन्ती च महारण्ये रामस्य महिषी प्रिया ।
रावणेन हृता सीता राक्षसीभिश्च तर्जिता ।
सा क्लिश्यमाना सुश्रोणी राममेवान्वपद्यत ॥१८ ॥ ४-२४-१८ (२९२८७)
लोपामुद्रा तथा भीरु भर्तारमृषिसत्तमम् ।
भगवन्तमगस्त्यं सा वनायैवान्वपद्यत ॥१९ ॥४-२४-१९ (२९२८८)
सुकन्या नाम शर्यातेर्भार्गवच्यवनं वने ।
वल्मीकभूतं साध्वी तमन्वपद्यत भामिनी ॥२० ॥४-२४-२० (२९२८९)
नालायनी चेन्द्रसेना रूपेणाप्रतिमा भुवि ।
पतिमन्वचरद्वृद्धं पुरा वर्षसहस्रिणम् ॥२१ ॥४-२४-२१ (२९२९०)
नलं राजानमेवाथ दमयन्ती वनान्तरे ।
अन्वगच्छत्पुरा कृष्णे तथा भर्तॄंस्त्वमन्वगाः ॥२२ ॥४-२४-२२ (२९२९१)
यथैताः कीर्तिता नार्यो रूपवत्यः पतिव्रताः ।
तथा त्वमपि कल्याणि सर्वैः समुदिता गुणैः ॥२३ ॥४-२४-२३ (२९२९२)
मा दीर्घं क्षम कालं त्वं त्रिंशद्रात्रमनिन्दिते ।
पूर्णे त्रयोदशे वर्षे राज्ञां राज्ञी भविष्यसि ॥२४ ॥४-२४-२४ (२९२९३)
सत्येन ते शपे चाहं भविता नान्यथेति च ॥२५ ॥ ४-२४-२५ (२९२९४)
सर्वासां परमस्त्रीणां प्रामाण्यं कर्तुमर्हसि ।

सर्वेषां च नरेन्द्राणां मूर्ध्नि स्थास्यसि भामिनि ॥ २६ ॥ ४-२४-२६ (२९२९५)
भर्तृभक्त्या च वृत्तेन भोगानाप्स्यसि दुर्लभान् ।
यातायां तु प्रतिज्ञायां महान्तं भोगमाप्नुयाः ॥ २७ ॥ ४-२४-२७ (२९२९६)
गुरुभक्तिकृतं ज्ञात्वा राज्ञां मूर्ध्नि स्थिता भवेः ॥ २८ ॥
४-२४-२८ (२९२९७)
द्रौपद्युवाच। ४-२४-२९क्ष् (३०८६)
आर्तप्रलापा कौन्तेय न राजानमुपालभे ।
अपारयन्त्या दुःखानि कृतं बाष्पप्रमोचनम् ॥ २९ ॥ ४-२४-२९ (२९२९८)
इदं तु दुःखं कौन्तेय ममासह्यं निबोध तत् ॥ ३० ॥ ४-२४-३० (२९२९९)
योऽयं राज्ञो विराटस्य सूतपुत्रस्तु कीचकः ।
स्यालो नाम प्रवादेन भोजस्त्रैगर्तदेशजः ॥ ३१ ॥ ४-२४-३१ (२९३००)
त्यक्तधर्मो नृशंसश्च सर्वार्थेषु च वल्लभः ।
नित्यमेवाह दुष्टात्मा भार्या मे भव शोभने ।
अविनीतः सुदुष्टात्मा मामनाथेति चिन्तयन् ॥ ३२ ॥ ४-२४-३२ (२९३०१)
किमुक्तेन व्यतीतेन भीमसेन महाबल ।
प्रत्युपस्थितकालस्य कार्यस्यानन्तरो भव ॥ ३३ ॥ ४-२४-३३ (२९३०२)
ममेह भीम कैकेयी रूपाद्धि भयशङ्किता ।
नित्यमुद्विजते राजा कथं नेयादिमामिति ॥ ३४ ॥ ४-२४-३४ (२९३०३)
तस्या विदित्वा तं भावं स्वयं चानृतदर्शनः ।
कीचकोपि च दुष्टात्मा पुनः प्रार्थयते च मां ॥ ३५ ॥ ४-२४-३५ (२९३०४)
तमहं कुपिता भीम पुनः कोपं नियम्य च ।
अब्रवं कामसंमूढमात्मानं रक्ष कीचक ॥ ३६ ॥ ४-२४-३६ (२९३०५)
गन्धर्वाणामहं भार्या पञ्चानां महिषी प्रिया ।
ते त्वां निहन्युर्दुर्धर्षाः शूराः साहसकारिणः ॥ ३७ ॥ ४-२४-३७ (२९३०६)
एवमुक्तस्तु दुष्टात्मा कीचकः प्रत्युवाच ह ।
नाहं बिभेमि भैरन्ध्रि गन्धर्वाणां शुचिस्मिते ॥ ३८ ॥ ४-२४-३८ (२९३०७)
शतं सहस्रमपि वा गन्धर्वाणामहं रणे ।
समागतं हनिष्यामि त्वं भीरु कुरु मे क्षणम् ॥ ३९ ॥ ४-२४-३९ (२९३०८)
इत्युक्ता चाब्रवं सूतं कामातुरमहं पुनः ।
न त्वं प्रतिबलस्तेषां गन्धर्वाणां यशस्विनाम् ॥ ४० ॥ ४-२४-४० (२९३०९)
धर्मे स्थिताऽस्मि सततं कुलशीलसमन्विता ।
नेच्छामि किंचिद्वध्यं त्वां तस्माज्जीवसि कीचक ॥ ४१ ॥ ४-२४-४१ (२९३१०)
एवमुक्तस्तु दुष्टात्मा प्रहस्य स्वनवत्ततः ।
न तिष्ठिति स सन्मार्गे न च धर्मं बुभूषति ॥ ४२ ॥ ४-२४-४२ (२९३११)
पापात्मा पापकारी च कामराजवशानुगः ।
अविनीतश्च दुष्टात्मा प्रत्याख्यातः पुनः पुनः ॥ ४३ ॥ ४-२४-४३ (२९३१२)

दर्शनेदर्शने हन्याद्यदि जह्यां च जीवितम् ।
धर्मे प्रयतमानानां महान्धर्मो नशिष्यति ॥ ४४ ॥ ४-२४-४४ (२९३१३)
समयं रक्षमाणानां दारा वो न भवन्ति च ।
भार्याजां रक्ष्यमाणायां प्रजा भवति रक्षिता ।
प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः ॥ ४५ ॥ ४-२४-४५ (२९३१४)
वंदतां वर्णधर्मांश्च ब्राह्मणानां च मे श्रुतम् ।
क्षत्रियस्य सदा धर्मो नान्यो दस्युनिबर्हणात् ॥ ४६ ॥ ४-२४-४६ (२९३१५)
पश्यतो धर्मराजस्य कीचको माऽन्वधावत ।
तवेव च समक्षं वै भीमसेन महाबल ॥ ४७ ॥ ४-२४-४७ (२९३१६)
त्वया चाहं परित्राता भीम तस्माज्जटासुरात् ॥ ४८ ॥ ४-२४-४८ (२९३१७)
जयद्रथं तथैव त्वमजैषीर्भ्रातृभिः सह ।
जहीममपि पापिष्ठं योयं मामवमन्यते ।
कीचको राजवाल्लभ्याच्छोककृन्मम भारत ॥ ४९ ॥ ४-२४-४९ (२९३१८)
कीचकं कामसन्तप्तं भिन्धि कुम्भमिवाश्मनि ।
यो निमित्तमनर्थानां बहूनां मम भारत ॥ ५० ॥ ४-२४-५० (२९३१९)
तं चेञ्जीवन्तमादित्यः प्रातरभ्युदयिष्यति ।
विषमालोड्य पास्यामि मा कीचकवशंगमम् ॥ ५१ ॥ ४-२४-५१ (२९३२०)
श्रेयो हि मरणं मह्यं भीमसेन तवाग्रतः ।
इत्युक्त्वा प्रारुदत्कृष्णा भीमस्योरसि संश्रिता ॥ ५२ ॥ ४-२४-५२ (२९३२१)
भीमश्च तां परिष्वज्य महत्सान्त्वं प्रयुज्य च ।
कीचकं मनसाऽगच्छत्सृक्किणी परिलेलिहन् ॥ ५३ ॥ ४-२४-५३ (२९३२२)
आश्वासयित्वा बहुशो भृशमार्तां सुमध्यमाम् ।
हेतुतत्वार्थसंयुक्तैर्वचोभिर्द्रुपदात्मजाम् ॥ ५४ ॥ ४-२४-५४ (२९३२३)
प्रमृज्य वदनं तस्याः पाणिनाऽश्रुसमाकुलम् ।
उवाच चैनां दुःखार्तां भीमः क्रोधसमन्वितः ॥ ५५ ॥ ॥ ४-२४-५५ (२९३२४)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-२४-२४ मा दीर्घं क्षम कालं त्वं मासमर्धं च संमितमिति झो पाठः ॥
२४ ॥
४-२४-२६ प्राधान्यं कर्तुमर्हसि इति खो पाठः ॥
२६ ॥
४-२४-३३ दुःखस्यान्तकरो भवेति धो पाठः ॥
३३ ॥

विराटपर्व - अध्याय ०२५
॥ श्रीः ॥
४.२५. अध्यायः २५

Mahabharata - Virata Parva - Chapter Topics
द्रौपद्या भीमवचनात्कीचकंप्रति नर्तनशालाया उभयोः समागमे संकेतस्थानत्वनिर्धारणेन रात्रौ तत्रागमनचादना ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-२५-० (२९३२५)
भीम उवाच। ४-२५-०क्ष् (३०८७)
तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
अद्यैनं सूदयिष्यामि कीचकं सह बान्धवैः ॥ १ ॥ ४-२५-१ (२९३२६)
अस्याः प्रदोषे शर्वर्याः कुरुष्वानेन संविदम् ।
दुःखं शोकं च निर्धूय याज्ञसेनि शुचिस्मिते ॥ २ ॥ ४-२५-२ (२९३२७)
यैषा नर्तनशालेह मत्स्यराजेन कारिता ।
दिवात्र कन्या नृत्यन्ति रात्रौ यान्ति तथा गृहं ॥ ३ ॥ ४-२५-३ (२९३२८)
तत्रास्ति शयनं भीरु दृढाङ्गं सुप्रतिष्ठितम् ।
तत्रैनं दर्शयिष्यामि पूर्वप्रेतान्पितामहान् ।
त्वद्दर्शनसमुत्थेन कामेनाकुलितेन्द्रियम् ॥ ४ ॥ ४-२५-४ (२९३२९)
संकेतं सूतपुत्रस्य कारयस्व शुभानने ।
यथा परे न पश्येयुः कुर्वन्तीं तेन संविदम् ॥ ५ ॥ ४-२५-५ (२९३३०)
तथा कुरुष्व कल्याणि यथा सन्निहितो भवेत् ।
तथा कुर्याश्च संकेतं सूतपुत्रस्य संवृतम् ॥ ६ ॥ ४-२५-६ (२९३३१)
आवयोः संगमं भीरु यथा मार्त्यो न बुध्यति ।
कीचकस्य विनाशाय तथा कुरु नृपात्मजे ॥ ७ ॥ ४-२५-७ (२९३३२)
वैशम्पायन उवाच । ४-२५-८क्ष् (३०८८)
तत्र तौ कथयित्वा तु बाष्पमुत्सृज्य दुःखितौ ।
रात्रिशेषं तमत्युग्रं धारयामासतुर्हृदि ॥ ८ ॥ ४-२५-८ (२९३३३)
भीमेन च प्रतिज्ञाते कीचकस्य वधे तदा ।
द्रौपदी च सुदेष्णायाः प्रविवेश पुनर्गृहम् ॥ ९ ॥ ४-२५-९ (२९३३४)
तस्यां रजन्यां व्युष्टायां प्रातरुत्थाय कीचकः ।
गत्वा राजकुलायैव द्रौपदीमिदमब्रवीत् ॥ १० ॥ ४-२५-१० (२९३३५)
यत्त्वाऽहं पश्यतो राज्ञः पातयित्वा पदाऽहनम् ।
न कंचिल्लभसे नाथमभिपन्ना बलीयसा ॥ ११ ॥ ४-२५-११ (२९३३६)

प्रवादेन तु मात्स्यानामयं राजेति चोच्यते ।
अहमेव हि राजा वै मात्स्यानां वाहिनीपतिः ॥ १२ ॥ ४-२५-१२ (२९३३७)
सा सुखं प्रतिपद्यस्व दासो भीरु भवामि ते ।
न ह्यहं त्वामृते भीरु चिरं जीवितुमुत्सहे ॥ १३ ॥ ४-२५-१३ (२९३३८)
अहन्यहनि सुश्रोणि शतनिष्कं ददामि ते ।
दासीशतं च ते दद्यां दासानामपि चापरम् ॥ १४ ॥ ४-२५-१४ (२९३३९)
रथांश्चाश्वतरीयुक्तानस्तु नौ भीरु संगमः ।
सुदासानां सहस्रं च महिषाणां सहस्रकम् ॥ १५ ॥ ४-२५-१५ (२९३४०)
अन्तःपुरसहस्रं च हेमकूटसहस्रकम् ।
तुभ्यं दास्यामि सर्वाणि राजार्हाण्यम्बराणि च ॥ १६ ॥ ४-२५-१६ (२९३४१)
द्रौपद्युवाच। ४-२५-१७क्ष् (३०८९)
एतन्मे वचनं सत्यं प्रतिपद्यस्व कीचक ।
न ते सखा वा भ्राता वा जानीयात्संगमं मया ॥ १७ ॥ ४-२५-१७ (२९३४२)
अनुप्रवादाद्भीताऽस्मि गन्धर्वाणां यशस्विनाम् ।
अनुबोधाद्धनर्थः स्यादयशश्च महद्भवेत ।
एतन्मे प्रतिजानीहि ततोऽहं वशगा तव ॥ १८ ॥ ४-२५-१८ (२९३४३)
कीचक उवाच। ४-२५-१९क्ष् (३०९०)
एवमेतत्करिष्यामि यथा सुश्रोणि भाषसे ।
एकोऽहमागमिष्यामि शून्यमावसथं तव ॥ १९ ॥ ४-२५-१९ (२९३४४)
समागमार्थं रम्भोरु त्वया मदनदर्पितः ।
यथा त्वां नैव पश्येयुर्गन्धर्वाः सूर्यवर्चसः ॥ २० ॥ ४-२५-२० (२९३४५)
द्रौपद्युवाच। ४-२५-२१क्ष् (३०९१)
यदेतन्नर्तनागारं मात्स्यराजेन कारितम् ।
दिवात्र कन्या नृत्यन्ति रात्रौ यान्ति स्वकं गृहं ॥ २१ ॥ ४-२५-२१ (२९३४६)
निशायां तत्र गच्छेथा गन्धर्वास्तन्न जानते ।
तत्र दोषः परिहृतो भविष्यति न संशयः ॥ २२ ॥ ४-२५-२२ (२९३४७)
एकस्त्वं नर्तनागारं रात्रौ संकेतमाव्रज ।
तत्राहं भविता तुभ्यं वशगा नात्र संशयः ॥ २३ ॥ ४-२५-२३ (२९३४८)
कीचक उवाच। ४-२५-२४क्ष् (३०९२)
तथा भद्रे करिष्यामि यथा त्वं भीरु वक्ष्यसि ।
एकः सन्नर्तनागारमागमिष्यामि भामिनि ।
समागमार्थं सुश्रोणि शपे च सुकृतेन मे ॥ २४ ॥ ४-२५-२४ (२९३४९)
यथा त्वां नावबुध्यन्ति गन्धर्वा वरवर्णिनि ।
सत्यं ते प्रतिजानामि गन्धर्वेभ्यो न ते भयम् ।
अलंकरिष्याम्यद्याहं त्वत्समागमनाय वै ॥ २५ ॥ ४-२५-२५ (२९३५०)
वासांसि च विचित्राणि मनोज्ञानि तवापि च ।

यथा मां न त्यजेथास्त्वं तथ रंस्ये त्वया सह ॥ २६ ॥ ४-२५-२६ (२९३५१)
द्रौपद्युवाच। ४-२५-२७क्ष् (३०९३)
तथा चेदप्यहं सूत दर्शयिष्यामि ते सुखम् ।
यन्नानुभूतं भवता जन्मप्रभृति कीचक ॥ २७ ॥ ४-२५-२७ (२९३५२)
वैशम्पायन उवाच। ४-२५-२८क्ष् (३०९४)
तमर्थमपि जल्पन्त्या द्रौपद्याः कीचकस्य ह ।
क्षणमात्रं तदभवन्मासेनैव समं नृप ॥ २८ ॥ ४-२५-२८ (२९३५३)
कीचकोऽथ गृहं गत्वा भृशं हर्षपरिप्लुतः ।
सैरन्ध्रीरूपिणीं मूढो मृत्युं तां नावबुद्धवान् ॥ २९ ॥ ४-२५-२९ (२९३५४)
गन्धाभरणमाल्येषु व्यासक्तः स विशेषतः ।
अलंचक्रे तदाऽऽत्मानं सत्वरः काममोहितः ॥ ३० ॥ ४-२५-३० (२९३५५)
तस्य तत्कुर्वतः कर्म कालो दीर्घ इवाभवत् ।
अनुचिन्तयतश्चापि तामेवायतलोचनाम् ॥ ३१ ॥ ४-२५-३१ (२९३५६)
आसीदभ्यधिका चापि श्रीः श्रियं प्रमुमुक्षतः ।
निर्वाणकाले दीपस्य वर्तीमिव दिधक्षतः ॥ ३२ ॥ ४-२५-३२ (२९३५७)
कृतसंप्रत्ययस्तस्याः कीचकः काममोहितः ।
नाजानात्पतनं स्वस्य चिन्तयंस्तां शुभाननाम् ॥ ३३ ॥ ४-२५-३३ (२९३५८)
ततस्तु द्रौपदी गत्वा भीमसेनं महानसे ।
उपातिष्ठत कल्याणी कौरव्यं पतिमन्तिकात् ॥ ३४ ॥ ४-२५-३४ (२९३५९)
तमुवाच सुकेशान्ता कीचकस्य कृतो मया ।
सङ्गमो नर्तनागारे यथाऽवोचः परन्तप ॥ ३५ ॥ ४-२५-३५ (२९३६०)
कालेन नियतं बद्धः कामेन च बलात्कृतः ।
शून्यं स नर्तनागारमागमिष्यति कीचकः ।
एको निशि महाबाहो कीचकं तं निषूदय ॥ ३६ ॥ ४-२५-३६ (२९३६१)
तं मूतपुत्रं कौन्तेय कीचकं मददर्पितम् ।
गत्वा त्वं नर्तनागारं निर्जीवं कुरु पाण्डव ॥ ३७ ॥ ४-२५-३७ (२९३६२)
गर्वितः मूतपुत्रोऽसौ गन्धर्वानवमन्यते ।
स त्वं प्रहरतांश्रेष्ठ नालं नाग इवोद्धर ॥ ३८ ॥ ४-२५-३८ (२९३६३)
अस्रं दुःखाभिभूताया मम मार्जस्व भारत ।
बाहुवीर्यानुरूपं च दर्शयाद्य पराक्रमम् ।
आत्मनश्चैव भद्रं ते कुरु मानं कुलस्य च ॥ ३९ ॥ ४-२५-३९ (२९३६४)
भीम उवाच। ४-२५-४०क्ष् (३०९५)
स्वागतं ते वरारोहे यन्मां वेदयसे प्रियम् ।
नह्यस्य कंचिदिच्छामि सहायं वरवर्णिनि ॥ ४० ॥ ४-२५-४० (२९३६५)
सा मे प्रीतिस्त्वयाऽऽख्याता कीचकस्य समागमे ।
हत्वा हिडिम्बं या प्रीतिर्ममासीत्सा शुचिस्मिते ॥ ४१ ॥ ४-२५-४१ (२९३६६)

सत्यं भ्रातॄंश्च पुत्रांश्च पुरस्कृत्य शपामि ते ।
कीचकं निहनिष्यामि वृत्रं देवपतिर्यथा ॥ ४२ ॥ ४-२५-४२ (२९३६७)
प्रसह्य निहनिष्यामि केशवः केशिनं यथा ।
रहस्यं वा प्रकाशं वा सूदयिष्यामि कीचकम् ॥ ४३ ॥ ४-२५-४३ (२९३६८)
अहं भद्रे हनिष्यामि कीचकं मदनान्वितम् ।
यस्त्वां कामाभिभूतात्मा दुर्लभामभिमन्यते ॥ ४४ ॥ ४-२५-४४ (२९३६९)
अथ चेदवबुध्यन्ति सूतपुत्रं मया हतम् ।
निर्मनुष्यं करिष्यामि मत्स्यानामिदमालयम् ॥ ४५ ॥ ४-२५-४५ (२९३७०)
मया हतांश्चेन्मात्स्यांस्तु धार्तराष्ट्रो विबुध्यति ।
दुर्योधनं ततो हत्वा सानुबन्धं सबान्धवम् ।
कुरुणामखिलं राज्यं प्रतिपत्स्यामि भामिनि ॥ ४६ ॥ ४-२५-४६ (२९३७१)
नाहं शक्तोऽनुनयितुं कुन्तीपुत्रं युधिष्ठिरम् ।
कामं सत्यमुपासीत कुन्तीपुत्रो युधिष्ठिरः ।
काममन्ये ह्युपासन्तु विनीता धर्मचारिणः ॥ ४७ ॥ ४-२५-४७ (२९३७२)
त्वां तु दुःखमिदं प्राप्तां नाहं शक्नोम्युपेक्षितुम् ।
निर्वृता भव पाञ्चालि कीचकस्य वधात्पुनः ॥ ४८ ॥ ४-२५-४८ (२९३७३)
द्रौपद्युवाच। ४-२५-४९क्ष् (३०९६)
कीचकस्य वधं भीम यदि जानन्ति नागराः ।
त्वया कृतं महाबाहो नाहं जीवितुमुत्सहे ॥ ४९ ॥ ४-२५-४९ (२९३७४)
कथं सत्याच्च नापेयाद्राजाऽयं मत्कृते प्रभो ।
निशि गूढं तथा भीम कीचकं तं निपातय ॥ ५० ॥ ४-२५-५० (२९३७५)
अनुबुद्धे हि कौन्तेयो धर्मराजो युधिष्ठिरः ।
पुनर्वनं व्रजेद्धीमाननुजैः परिवारितः ॥ ५१ ॥ ४-२५-५१ (२९३७६)
कश्च धर्मपरं ज्येष्ठमतिवर्तेत भारत ।
भीम भीताऽस्मि संबोधात्साधु मा चापलं कृथाः ॥ ५२ ॥ ४-२५-५२ (२९३७७)
यथा न कश्चिञ्जानीते सूतपुत्रं त्वया हतम् ।
तथा कुरुष्व कौरव्य बलवन्नरिमर्दन ।
अदृश्यमानस्त्वंतस्य भिन्धि प्राणानरिन्दम ॥ ५३ ॥ ॥ ४-२५-५३ (२९३७८)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

विराटपर्व - अध्याय ०२६
॥ श्रीः ॥
४.२६. अध्यायः २६

भीमेन कीचकागमनात्पूर्वमेव नर्तनागारमेत्य शय्यायां शयनम् ॥ १ ॥
पश्चात्समागतेन कीचकेन भीमंप्रति द्रौपदी बुद्ध्या
संस्पर्शनपूर्वकं संभाषणम् ॥ २ ॥
भीमेन नियुद्धेन कीचकमारणम् ॥ ३ ॥
पश्चाद्द्रौपद्या समाह्वानादुपकीचकानां तत्र समागमनम् ॥ ४ ॥

Mahabharata - Virata Parva - Chapter Text

४-२६-० (२९३७९)
भीम उवाच। ४-२६-०क्ष् (३०९७)
तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
अदृश्यमानस्तस्याहं तमिस्रायां सकुण्डलम् ॥ १ ॥ ४-२६-१ (२९३८०)
नागो बिल्वमिवाक्रम्य पोथयिष्यामि तच्छिरः ।
अलभ्यामिच्छतस्तस्य कीचकस्य दुरात्मनः ॥ २ ॥ ४-२६-२ (२९३८१)
मया यदुक्तं पाञ्चालि धर्मराजसुतं प्रति ।
कोपादृते किमन्यत्तु नानुवर्तेत को नृपम् ॥ ३ ॥ ४-२६-३ (२९३८२)
वैशम्पायन उवाच। ४-२६-४क्ष् (३०९८)
एवमुक्तवा महाबाहुस्तत्र पाण्डवनन्दनः ।
अर्धरात्रे तदोत्थाय सत्ववान्भीमविक्रमः ॥ ४ ॥ ४-२६-४ (२९३८३)
अवदातेन मृदुना पटेनाच्छादितस्तथा ।
द्रौपदीं पृष्ठतः कृत्वा यत्रासीन्नर्तनालयः ॥ ५ ॥ ४-२६-५ (२९३८४)
स भीमः प्रथमं गत्वा तमिस्रायामुपाविशत् ।
मृगं सिंह इवादृश्यः प्रत्याकाङ्क्षत्स कीचकम् ॥ ६ ॥ ४-२६-६ (२९३८५)
कीचकस्तु शिरःस्नातो निशायां समलंकृतः ।
सङ्केतमगमत्तूर्णं शून्यागारमपावृतम् ॥ ७ ॥ ४-२६-७ (२९३८६)
तदेव नर्तनागारं पाञ्चाली यदभाषत ।
तां मन्यमानः संकेते सैरन्ध्रीं काममोहितः ॥ ८ ॥ ४-२६-८ (२९३८७)
प्रविश्य नर्तनागारं ततस्तं पुरुषर्षभम् ।
पूर्वागतं भीमसेनं दृप्तमप्रतिमजसम् ॥ ९ ॥ ४-२६-९ (२९३८८)
शयानं शयने तत्र मृत्युं मूढः परामृशत् ।
जाज्वल्यमानं कोपेन कृष्णाधर्षणजेन च ॥ १० ॥ ४-२६-१० (२९३८९)
एकान्ते भीममासाद्य कीचकः कालचोदितः ।
हर्षोन्मथितचित्तात्मा स्मयमानोऽभ्यभाषत ॥ ११ ॥ ४-२६-११ (२९३९०)
प्रहितं ते मया भद्रे बहुवित्तं शुचिस्मिते ।
त्वयि तिष्ठतु तत्सर्वं यथाऽसि स्वयमागता ॥ १२ ॥ ४-२६-१२ (२९३९१)
अकस्मान्मां प्रशंसन्ति सदा गृहगताः स्त्रियः ।

बलवान्दर्शनीयश्च नान्यस्ते सदृशः पुमान् ॥१३ ॥ ४-२६-१३ (२९३९२)
अहं रूपेण संपन्नः स्नातो गुरुविभूषितः ।
नित्यमेव प्रियः स्त्रीणां सौभाग्यात्प्रियदर्शनः ।
रूपस्य तन्मया प्राप्तं फलं कमललोचने ॥१४ ॥ ४-२६-१४ (२९३९३)
भीम उवाच। ४-२६-१५क्ष् (३०९९)
दिष्ट्या त्वं दर्शनीयोसि दिष्ट्याऽऽत्मानं प्रशंससि ॥१५ ॥
४-२६-१५ (२९३९४)
त्वयाऽपीदृग्गुणा नारी रूपशीलसमन्विता ।
अदृष्टपूर्वा पश्य त्वं यतो जानासि सूतज ।
द्रक्ष्यसि त्वं मुहूर्तेन यथेयं स्त्री गुणान्विता ॥१६ ॥ ४-२६-१६ (२९३९५)
उपरंस्यसि कामाच्च शीघ्रं त्वं स्प्रष्टुमर्हसि ।
ईदृशस्तु त्वया स्पर्शः स्पृष्टपूर्वो न कर्हिचित् ॥१७ ॥ ४-२६-१७
(२९३९६)
स्पर्शं वेत्सि विदग्धस्त्वं कामधर्मविचक्षणः ।
स्त्रीणां प्रीतिकरो नान्यस्त्वत्समः पुरुषस्त्विह ॥१८ ॥ ४-२६-१८ (२९३९७)
वैशम्पायन उवाच। ४-२६-१९क्ष् (३१००)
इत्युक्त्वा तं महाबाहुर्भीमो भीमपराक्रमः ।
सहसोत्पत्य कौन्तेयः प्रहस्येदमुवाच ह ॥१९ ॥ ४-२६-१९ (२९३९८)
अद्य त्वां भगिनी पापं कृष्यमाणं मया भुवि ।
द्रक्ष्यतेऽद्रिप्रतीकाशं सिंहेनेव महागजम् ॥२० ॥ ४-२६-२० (२९३९९)
निराबाधा त्वयि हते सैरन्ध्री विचरिष्यति ।
सुखमेव चरिष्यन्ति सैरन्ध्र्याः पतयः सदा ॥२१ ॥ ४-२६-२१ (२९४००)
ततो जग्राह केशेषु माल्यवत्सु सुगन्धिषु ॥२२ ॥ ४-२६-२२ (२९४०१)
गृहीत्वा कीचकं भीमो विरराज महाबलः ।
गृहीत्वा ग्रासकामस्तु सिंहः क्षुद्रमृगं यथा ॥२३ ॥ ४-२६-२३ (२९४०२)
स केशेषु परामृष्टो बलेन बलिनां वरः ।
आक्षिप्य केशान्वेगेन बाह्वोर्जग्राह पाण्डवम् ॥२४ ॥ ४-२६-२४ (२९४०३)
बाहुयुद्धं तयोरासीत्क्रुद्धयोर्नरसिंहयोः ।
वसन्ते वासिताहेतोर्बलिनोर्नागयोरिव ॥२५ ॥ ४-२६-२५ (२९४०४)
कीचकानां तु मुख्यस्य नराणामुत्तमस्य च ।
वालिसुग्रीवयोर्भ्रात्रोः पुरेव कपिसिंहयोः ॥२६ ॥ ४-२६-२६ (२९४०५)
शार्दूलाविव गर्जन्तौ तार्क्ष्यनागाविवोद्यतौ ।
समयत्नौ समक्रोधौ पतितौ भीमकीचकौ ॥२७ ॥ ४-२६-२७ (२९४०६)
गजाविव मदोन्मत्तौ नदन्तौ पतितौ क्षितौ ।
वृषभाविव वल्मीकं मृद्नन्तौ समविक्रमौ ।॥२८ ॥ ४-२६-२८ (२९४०७)
ईषदागलितं चापि क्रोधाच्चावाङ्मुखं स्थितम् ।

कीचको बलवान्भीमं जानुभ्यां पातयद्भुवि ॥ २९ ॥ ४-२६-२९ (२९४०८)
पातितो भीमसेनस्तु कीचकेन बलीयसा ।
उत्पपाताथ वेगेन दण्डाहत इवोरगः ॥ ३० ॥ ४-२६-३० (२९४०९)
स्पर्धया च बलोन्मत्तौ तावुभौ भीमकीचकौ ।
निश्शब्दं पर्यकर्षेतामन्योन्यस्य विनिर्जये ॥ ३१ ॥ ४-२६-३१ (२९४१०)
ततस्तद्भवनश्रेष्ठं प्राकम्पत तदा भृशम् ।
तौ क्रोधवशमापन्नावन्योन्यमभिजघ्नतुः ॥ ३२ ॥ ४-२६-३२ (२९४११)
तलाभ्यां भीमसेनेन वक्षस्यभिहतो बली ।
कीचको रोषरक्ताक्षो न चचाल पदात्पदम् ॥ ३३ ॥ ४-२६-३३ (२९४१२)
मुहूर्तमशकत्सोढुं वेगं तस्य महात्मनः ।
कीचको भीमसेनेन पश्चात्पश्चादहीयत ॥ ३४ ॥ ४-२६-३४ (२९४१३)
तं हीयमानं विज्ञाय भीमसेनो महाबलः ।
वक्षस्यानीय वेगेन प्रममाथ विचेतसम् ॥ ३५ ॥ ४-२६-३५ (२९४१४)
क्रोधाविष्टो विनिश्वस्य पुनश्चैनं वृकोदरः ।
जग्राह जयतांश्रेष्ठः केशेष्वेव भृशं तदा ॥ ३६ ॥ ४-२६-३६ (२९४१५)
गृहीत्वा कीचकं भीमो विरराज महाबलः ।
आमिषार्थे गृहीत्वैव शार्दूलो मृगयूथपम् ॥ ३७ ॥ ४-२६-३७ (२९४१६)
पुनश्चातिबलस्तत्र कीचको बलदर्पितः ।
व्यायच्छन्नेव दुर्धर्षः पाण्डवेन तरस्विना ॥ ३८ ॥ ४-२६-३८ (२९४१७)
मुष्टिना भीमसेनेन शिरस्यभिहतो भृशम् ।
कीचको वृत्तरक्ताक्षो गतासुरपतद्भुवि ॥ ३९ ॥ ४-२६-३९ (२९४१८)
आस्ये पाणी च पादौ च शिरोग्रीवां सकुण्डलाम् ।
काये प्रवेशयामास मृदित्वाऽङ्गानि सर्वशः ॥ ४० ॥ ४-२६-४० (२९४१९)
स तं मथितसर्वाङ्गं मांसपिण्डमथाकरोत् ॥ ४१ ॥ ४-२६-४१ (२९४२०)
तत्राग्निं स्वयमुज्ज्वाल्य पाणिसंघर्षजं बली ।
कष्णायै दर्शयामास भीमसेनो महाबलः ॥ ४२ ॥ ४-२६-४२ (२९४२१)
उवाच च महातेजा द्रौपदीं योषितां वराम् ।
त्वयि कामुकमत्यन्तं पापिनं पारदारिकम् ।
पश्यैनमेहि पाञ्चालि कामुकोऽयं मया हतः ॥ ४३ ॥ ४-२६-४३ (२९४२२)
प्रार्थयन्ते सुकेशान्ते ये त्वां शीलसमन्विताम् ।
एवं स्वपन्ति ते भीरु शेतेऽयं कीचको यथा ।
यस्त्वामभ्यहनद्भद्रे पदा भूमौ निपात्य च ॥ ४४ ॥ ४-२६-४४ (२९४२३)
एवमुक्त्वा महाबाहुर्गन्धर्वेण हतं तदा ।
विज्ञापनार्थमन्येषां विरराम महाहवम् ॥ ४५ ॥ ४-२६-४५ (२९४२४)
तथा स कीचकं हत्वा गत्वा रोषस्य निष्कृतिम् ।
आमन्त्र्य द्रौपदीं पश्चात्क्षिप्रमायान्महानसम् ॥ ४६ ॥ ४-२६-४६ (२९४२५)

स्नात्वाऽनुलेपनं कृत्वा व्यापूर्य च मनोरथम् ।
सुखोपविष्टः शयने भीमो भीमपराक्रमः ॥ ४७ ॥ ४-२६-४७ (२९४२६)
ततः कृष्णा यदा मेने गतं भीमं महानसम् ।
कीचकं घातयित्वा च द्रौपदी योषितां वरा ।
प्रहृष्टा गतसंत्रासा सभापालानुवाच ह ॥ ४८ ॥ ४-२६-४८ (२९४२७)
कीचको निहतः शेते गन्धर्वैः पतिभिर्मम ।
परस्त्रीकामसंतप्तं समागच्छन्त पश्यत ॥ ४९ ॥ ४-२६-४९ (२९४२८)
तच्छ्रुत्वा भाषितं तस्या नर्तनागाररक्षिणः ।
सहसैव समुत्तस्थुरुल्कामादाय सर्वशः ॥ ५० ॥ ४-२६-५० (२९४२९)
तस्यास्तं निहतं श्रुत्वा कीचकस्य सहोदराः ।
ततो गत्वा तु तद्वेश्म कीचकं विनिपातितम् ।
गतासुं ददृशुर्भूमौ रुधिरेण समुक्षितम् ॥ ५१ ॥ ४-२६-५१ (२९४३०)
पार्ष्णिपामिशिरोहीनं दृष्ट्वा ते विस्मिताऽभवन् ॥ ५२ ॥ ४-२६-५२ (२९४३१)
क्वास्य ग्रीवा क्व चरमौ क्व पामी क्व शिरः क्व दृक् ।
इति स्म ते परीक्षन्ते गन्धर्वेण हतं तदा ॥ ५३ ॥ ४-२६-५३ (२९४३२)
अमानुषं कृतं कर्म तं दृष्ट्वा विनिपातितम् ।
निरीक्षन्ते ततः सर्वे परं विस्मयमागताः ॥ ५४ ॥ ॥ ४-२६-५४ (२९४३३)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

विराटपर्व - अध्याय ०२७
॥ श्रीः ॥
४.२७. अध्यायः २७

Mahabharata - Virata Parva - Chapter Topics
भ्रातृवधामर्पितैरुपकीचकैः पाञ्चाल्याः कीचकेन सह
चरमविमानसमारोपणेन श्मशानप्रापणम् ॥ १ ॥
द्रौपदीसमाक्रन्दनिनदश्रवणात्पितृवनमुपागतवता
भीमेनोपकीचकानां पञ्चाधिकशतस्य पञ्चताप्रापणम् ॥ २ ॥
भीमेन द्रौपद्याः पतिव्रतोपाख्यानकथनात्समाश्वासनेन
स्वावासप्रेपणपूर्वकं महानसप्रवेशः ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-२७-० (२९४३४)

वैशम्पायन उवाच। ४-२७-०क्ष् (३१०१)
तत्काले तु समागम्य सर्वे तत्रास्य बान्धवाः ।
रुरुदुः कीचकं दृष्ट्वा परिवार्योपतस्थिरे ॥ १ । ४-२७-१ (२९४३५)
सर्वे संहृष्टरोमाणः संत्रस्ताः प्रेक्ष्य कीचकम् ।
तथा संभुग्नसर्वाङ्गं कूर्मं स्थल इवोद्धृतम् ॥ २ ॥ ४-२७-२ (२९४३६)
पोथितं भीमसेनेन महेन्द्रेणेव दानवम् ।
कीचकं बलसंमत्तं दुर्धर्षं येन केन चित् ॥ ३ ॥ ४-२७-३ (२९४३७)
गन्धर्वेण हतं श्रुत्वा कीचकं पुरुषर्षभम् ।
संस्कारयितुमिच्छन्तो बहिर्नेतुं प्रचक्रमुः ॥ ४ ॥ ४-२७-४ (२९४३८)
अपश्यन्नथ ते कृष्णां सूतपुत्राः समागताः ।
अदूरादनवद्याङ्गीं स्तम्भमालिङ्ग्य तिष्ठतीम् ॥ ५ ॥ ४-२७-५ (२९४३९)
समागतेषु सूतेषु तानुवाचोपकीचकः ।
हसन्निव पदाऽमर्षान्निर्दहन्निव चक्षुषा ॥ ६ ॥ ४-२७-६ (२९४४०)
हन्यतां शीघ्रमसती यत्कृते कीचको हतः ।
अथवा नैव हन्तव्या दह्यतां कामिना सह ॥ ७ ॥ ४-२७-७ (२९४४१)
मृतस्यापि प्रियं कार्यं सूतपुत्रस्य सर्वथा ।
इयं हि दुष्टचरिता मम भ्रातुरमित्रिणी ॥ ८ ॥ ४-२७-८ (२९४४२)
यत्कृते मरणं प्राप्तो नेयं जीवितुमर्हति ।
सहेयं दह्यतां सूता आमन्त्र्य च जनाधिपम् ।
हतस्यापि हि गन्धर्वैः कीचकस्य प्रियं भवेत् ॥ ९ ॥ ४-२७-९ (२९४४३)
वैशम्पायन उवाच ॥ ४-२७-१०क्ष् (३१०२)
ततो विराटमासाद्य सूताः प्राञ्जलयोऽब्रुवन् ।
कीचकोऽयं हतः शेते गन्धर्वैः कामरूपिभिः ॥ १० ॥ ४-२७-१० (२९४४४)
सैरन्ध्र्या घातितो रात्रौ तं दहेम सहानया ।
मानिताः स्मस्त्वया वीर तदनुज्ञातुमर्हसि ॥ ११ ॥ ४-२७-११ (२९४४५)
पराक्रमं तु सूतानां ज्ञात्वा राजाऽन्वमन्यत ।
सैरन्ध्र्याः सूतपुत्रेण सह दाहं नराधिपः ॥ १२ ॥ ४-२७-१२ (२९४४६)
ततस्ते समनुज्ञाताः सर्वे तत्रास्य बान्धवाः ।
रुरुदुः कीचकं दृष्ट्वा परिवार्याभितः स्थिताः ॥ १३ ॥ ४-२७-१३ (२९४४७)
आरोप्य कृष्णां सह कीचकेन निबध्य केशेषु च पादयोश्च ।
ते चापि सूता वचनैरवोचन्नुद्दिश्य चैनामभिवीक्ष्य कृष्णाम्
॥ १४ ॥ ४-२७-१४ (२९४४८)
यस्याः कृतेऽयं निहतो महात्मा तस्माद्धि सा कीचकमार्गमेतु ।
अवार्यसत्वेन च कीचकेन गतासुना सुन्दरी स्वर्गलोकम् ॥ १५
॥ ४-२७-१५ (२९४४९)
सा तेन कृष्णा शयने निबद्धा यशस्विनी चैव मनस्विनी च ।

अनार्यसत्त्वेन महार्यसत्त्वा गतासुना सा प्ररुरोद कृष्णा ।
विलम्बमाना विवशा हि दुष्टैस्तत्रैव पर्यङ्कवरे शुभाङ्गी ॥१६ ॥
४-२७-१६ (२९४५०)
ह्रियमाणाऽथ सुश्रोणी सूतपुत्रैरनिन्दिता ।
प्राक्रोशन्नाथमिच्छन्ती कृष्णा नाथवती सती ॥१७ ॥ ४-२७-१७ (२९४५१)
मृतेन सह बद्धाङ्गी निराशा जीविते तदा ।
श्मशानाभिमुखं नीता करेणुरिव रौति सा ॥१८ ॥ ४-२७-१८ (२९४५२)
द्रौपद्युवाच। ४-२७-१९क्ष् (३१०३)
जयो जयेशो विजयो जयत्सेनो जयद्बलः ।
त मे वाचं विजानन्तु सूतपुत्रा नयन्ति माम् ॥१९ ॥ ४-२७-१९ (२९४५३)
येषां दुन्दुभिनिर्घोषो ज्याघोषः श्रूयते महान् ।
ते मे वाचं विजानन्तु सूतपुत्रा नयन्ति माम् ॥२० ॥ ४-२७-२० (२९४५४)
येषां ज्यातलनिर्घोषो विस्फूर्जितमिवाशनेः ।
अश्रूयत महान्युद्धे भीमघोपस्तरस्विनाम् ॥२१ ॥ ४-२७-२१ (२९४५५)
रथघोपश्च बलवान्गन्धर्वाणां तरस्विनाम् ।
ते मे वाचं बिजानन्तु सूतपुत्रा नयन्ति माम् ॥२२ ॥ ४-२७-२२ (२९४५६)
येषां वीर्यमतुल्यं तु शक्रस्येव बलं यशः ।
राजसिंहा इवाग्र्यास्ते मां जानन्तु सुदुःखितां ॥२३ ॥ ४-२७-२३ (२९४५७)
इत्यस्याः कृपणा वाचः कृष्णायाः परिदेविताः ।
श्रुत्वैवाभ्युत्थितो भीमः शयनादविचारयन् ॥२४ ॥ ४-२७-२४ (२९४५८)
भीम उवाच। ४-२७-२५क्ष् (३१०४)
अहं सैरन्ध्रि ते वाचः शृणोमि तव भाषिताः ।
तस्मात्ते सूतपुत्रेभ्यो न भयं जातु विद्यते ॥२५ ॥ ४-२७-२५ (२९४५९)
वैशम्पायन उवाच। ४-२७-२६क्ष् (३१०५)
इत्युक्त्वा स महाबाहुर्विजजृम्भे जिघांसया ॥२६ ॥ ४-२७-२६ (२९४६०)
ततः स व्यायतं बद्ध्वा वस्त्रं विपरिवेष्ट्य च ।
अद्वारेणाभ्यवस्कन्द्य निर्जगाम बहिस्तदा ॥२७ ॥ ४-२७-२७ (२९४६१)
स लङ्घयित्वा प्राकारमारुह्य तरसा द्रुमम् ।
श्मशानाभिमुखः प्रायाद्यत्र ते कीचका गताः ॥२८ ॥ ४-२७-२८ (२९४६२)
स लङ्घयित्वा प्राकारं निःसृत्य च पुरोत्तमात् ।
जवेनोत्पतितो भीमः सूतानामग्रतस्तदा ॥२९ ॥ ४-२७-२९ (२९४६३)
चितासमीपं गत्वा स तत्रापश्यन्महाबलः ।
तालमात्रं महास्कन्धमूर्ध्वशुष्कं वनस्पतिम् ॥३० ॥ ४-२७-३० (२९४६४)
तं नागवदुपक्रम्य बाहुभ्यां परिरभ्य च ।
वृक्षमुत्पाटयामास भीमो भीमपराक्रमः ॥३१ ॥ ४-२७-३१ (२९४६५)
ततो वृक्षं दशव्यामं निष्पत्रमकरोत्तदा ॥३२ ॥ ४-२७-३२ (२९४६६)

तं महाकायमुद्यम्य भ्रामयित्वा च वेगितः ।
प्रगृह्याभ्यपतत्सूतान्दण्डपाणिरिवान्तकः ॥ ३३ ॥ ४-२७-३३ (२९४६७)
ऊरुवेगेन तस्याथ न्यग्रोधाश्वत्थकिंशुकाः ।
भूमौ निपतिता वृक्षाः संभग्नास्तत्र शेरते ॥ ३४ ॥ ४-२७-३४ (२९४६८)
तं सिंहमिव संक्रुद्धं दृष्ट्वा गन्धर्वमागतम् ।
वित्रेसुश्च तदा सूता विषादभयपीडिताः ॥ ३५ ॥ ४-२७-३५ (२९४६९)
तमन्तकमिव क्रुद्धं गन्धर्वभयशङ्किताः ।
दिधक्षन्तस्तथा ज्येष्ठं भ्रातरं चोपकीचकाः ।
परस्परमथोचुस्ते विषादभयमोहिताः ॥ ३६ ॥ ४-२७-३६ (२९४७०)
गन्धर्वो बलवानेति क्रुद्ध उद्यम्य पादपम् ।
प्रबुद्धाः सुमहाभागा गन्धर्वाः सूर्यवर्चसः ।
सैरन्ध्री मुच्यतां शीघ्रं भयं नो महदागतम् ॥ ३७ ॥ ४-२७-३७ (२९४७१)
वैशम्पायन उवाच। ४-२७-३८क्ष् (३१०६)
ते दृष्ट्वाऽथ समाविद्धं भीमसेनेन पादपम् ।
विमुच्य द्रौपदीं त्रस्ताः प्राद्रवन्नगरं प्रति ॥ ३८ ॥ ४-२७-३८ (२९४७२)
द्रवतस्तांश्च संप्रेक्ष्य स वज्री दानवानिव ।
अथ भीमः समुत्पत्य द्रवतां पुरतोऽभवत् ॥ ३९ ॥ ४-२७-३९ (२९४७३)
ते तं दृष्ट्वा भयोद्विग्ना निश्चेष्टाः समवस्थिताः ॥ ४० ॥
४-२७-४० (२९४७४)
दृष्ट्वा ताञ्शतसङ्ख्यकान्स वज्री दानवानिव ।
एकेनैव प्रहारेण दश सप्त च विंशतिम् ।
अष्टादश च पञ्चाशञ्जघान स वृकोदरः ॥ ४१ ॥ ४-२७-४१ (२९४७५)
शतं पञ्चाधिकं भीमः प्राहिणोद्यमसादनम् ।
वृक्षेणैकेन राजेन्द्र प्रभञ्जनसुतो बली ।
वायुवेगसमः श्रीमान्सर्वान्सूतानशेषतः ॥ ४२ ॥ ४-२७-४२ (२९४७६)
तान्निहत्य महाबाहुर्भीमसेनो महाबलः ।
आश्वासयत्तदा कृष्णां प्रतिमुच्य च बन्धनात् ॥ ४३ ॥ ४-२७-४३ (२९४७७)
उवाच श्लक्ष्णया वाचा पाञ्चालीं भरतर्षभः ।
अश्रुपूर्णमुखीं भीतामुद्धरन्स वृकोदरः ॥ ४४ ॥ ४-२७-४५अश
मा खिदस्त्वं(क) याज्ञसेनि पातिव्रत्यव्रते स्थिता ।
पातिव्रत्ये स्थिता नारी व्रतं रक्षेत्सदाऽत्मनः ॥ ४५ ॥ ४-२७-४४ (२९४७८)
पुरा स्त्री देवरातस्य पतिप्रीता शिरोमणिः ।
कदाचिद्भर्तृरूपेण रक्षसाऽपहृता सती ॥ ४६ ॥ ४-२७-४६ (२९४७९)
कस्यचित्सरसस्तीरे तां निवेश्य स राक्षसः ।
तद्भर्तृरूपं संत्यज्य रक्षो भूत्वा सुदारुणम् ॥ ४७ ॥ ४-२७-४७ (२९४८०)
साम्ना दानेन भेदेन सा यदा नान्वमन्यत ।

तदा तां पातयित्वा स मैथुनायोपचक्रमे ॥ ४८ ॥ ४-२७-४८ (२९४८१)
ततः सा धैर्यमास्थाय विवरं त ददौ तदा ।
ततः स खड्गमुत्कृष्य भीषयामास तां सतीम् ॥ ४९ ॥ ४-२७-४९ (२९४८२)
साऽपि त्यक्तभया साध्वी प्राणत्यागे सुनिश्चिता ।
प्रतिज्ञामकरोत्कृष्णे पातिव्रत्यपरायणा ॥ ५० ॥ ४-२७-५० (२९४८३)
आराधितो यदि मया भर्ता मे दैवतं महत् ।
कर्मणा मनसा वाचा गुरवस्तोषिता मया ।
तेन सत्येन योनिर्मे भवत्वद्य शिला दृढा ॥ ५१ ॥ ४-२७-५१ (२९४८४)
एवं तया प्रतिज्ञाते तद्योनिः सा शिलाऽभवत् ।
अन्तरा नाभिजान्वोर्यत्तत्सर्वं च शिलाऽभवत् ॥ ५२ ॥ ४-२७-५२ (२९४८५)
ततः स खड्गमुद्धृत्य वेगेनास्याः शिरोऽहरत् ॥ ५३ ॥ ४-२७-५३ (२९४८६)
जया नाम सखी साऽभूत्पार्वत्या नखमांसवत् ।
तस्मात्पतिव्रतायाश्च दुःखमल्पं सुखं बहु ॥ ६ ॥ ५४ ॥ ४-२७-५४ (२९४८७)
एवं ते भीरु वध्यन्ते ये त्वां हिंसन्ति मानवाः ।
गच्छ त्वं नगरं कृष्णे न भयं विद्यते तव ॥ ५५ ॥ ४-२७-५५ (२९४८८)
अन्येन त्वं पथा शीघ्रं सुदेष्णाया निवेशनम् ।
अन्येनाहं गमिष्यामि विराटस्य महानसम् ।
यथा नौ नावबुध्येरन्नात्रावेवं व्यवस्थितौ ॥ ५६ ॥ ४-२७-५६ (२९४८९)
वैशम्पायन उवाच। ४-२७-५७क्ष् (३१०७)
साऽगच्छन्नगरं कृष्णा भीमेनाश्वासिता सती ॥ ५७ ॥
कृतकृत्या सुदेष्णाया भवनं शुभलक्षणा । ४-२७-५७ (२९४९०)
शचीव नहुषे शप्ते प्रविवेश त्रिविष्टपम् ॥ ५८ ॥
भीमोऽप्यमितवीर्यस्तु बलवानरिमर्दनः। ४-२७-५८ (२९४९१)
सर्वांस्तान्कीचकांस्तत्र हत्वा धर्मात्मजानुजः ॥ ५९ ॥
निःशेषं कीचकान्हत्वा रामो रात्रिचरानिव। ४-२७-५९ (२९४९२)
जितशत्रुरदीनात्मा प्रविवेश पुरं ततः ॥ ६० ॥
पञ्चाधिकं शतं तत्र निहतं तेन भारत। ४-२७-६० (२९४९३)
महावनमिव छिन्नं शिश्ये विगलितद्रुमम् ॥ ६१ ॥
एवं ते निहता राजञ्शतं पञ्चोपकीचकाः। ४-२७-६१ (२९४९४)
स च सेनापतिः सूत इत्येतत्सूतषट्शतम् ॥ ६२ ॥
न गन्धर्वभयाकिंचिद्वक्तुं कीचकबान्धवाः । ४-२७-६२ (२९४९५)
अशक्नुवन्तस्तां तत्र भयादप्यभिवीक्षितुम् ॥ ६३ ॥
विराटनगरे चापि सर्वे मात्स्याः समागताः । ४-२७-६३ (२९४९६)
काल्यं पञ्चशतं चैतानपश्यन्सारथीन्हतान् ॥ ६४ ॥
तद्दृष्ट्वा महदाश्चर्यं नरा नार्यश्च नागराः। ४-२७-६४ (२९४९७)
विस्मयं परमं गत्वा नोचुः किंचन भारत ॥ ६५ ॥ ॥ ४-२७-६५ (२९४९८)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
सप्तविंशोऽध्यायाः ॥ २७ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-२७-४५ क्इमे १० श्लोकाः घो पुस्तक एव दृश्यन्ते ॥
४-२७-६३ तां द्रौपदीमभिवीक्षितुमपि अशक्नुवन्तः कीचकबान्धवाः
तांप्रति किंचिद्वक्तुं नाशक्नुवन्नित्यध्याहारेण योजना ॥
६३ ॥

विराटपर्व - अध्याय ०२८
॥ श्रीः ॥
४.२८. अध्यायः २८

Mahabharata - Virata Parva - Chapter Topics
पौरैर्विराटंप्रति सानुजकीचकनिधननिवेदनपूर्वकं
नगराद्द्रौपदीनिष्कासनप्रार्थना ॥ १ ॥
सुदेष्णया विराटनियोगाद्द्रौपदीं प्रति स्वपुरान्निर्गमनचोदना ॥ २ ॥
तथा द्रौपद्या मासावधिस्ववासाभ्यनुज्ञानप्रार्थनायां तदङ्गीकरणम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-२८-० (२९४९९)
वैशम्पायन उवाच। ४-२८-०क्ष् (३१०८)
ते दृष्ट्वा निहतान्सूतान्भीमसेनेन भारत ।
पौराश्च सहिताः सर्वे राज्ञे गत्वा न्यवेदयन् ।
गन्धर्वेण हता राजन्सूतपुत्राः परश्शतम् ॥ १ ॥ ४-२८-१ (२९५००)
यथा वज्रेण दीर्णं वै पर्वतस्य महच्छिरः ।
विनिकार्णाः प्रदृश्यन्ते तथा सूता महीतले ॥ २ ॥ ४-२८-२ (२९५०१)
सैरन्ध्री चापि मुक्ता सा पुनरायाति ते गृहम् ।
सर्वं संशयितं राजन्नगरं ते भविष्यति ॥ ३ ॥ ४-२८-३ (२९५०२)
तथारूपा हि सैरन्ध्री गन्धर्वाश्च महाबलाः ।
पुंसामिष्टश्च विषयो मैथुनाय न संशयः ॥ ४ ॥ ४-२८-४ (२९५०३)
यथा सैरन्ध्रिदोषेण नेदं राजन्पुरं तव ।
विनाशमेति वै क्षिप्रं तथा साधु विधीयताम् ॥ ५ ॥ ४-२८-५ (२९५०४)
सर्वाङ्गसौष्ठवयुतां रूपलावण्यशालिनीम् ।
पश्यतामनिमेषेण चक्षुषा वनितां शुभाम् ।

मनसश्चक्षुषश्चैव प्रतिबन्धो न विद्यते ॥ ६ ॥ ४-२८-६ (२९५०५)
तस्मात्तां यः पुमान्दृष्ट्वा रूपेणाप्रतिमां भुवि ।
गच्छेत्कामवशं मूढो गन्धर्वैः स निहन्यते ॥ ७ ॥ ४-२८-७ (२९५०६)
निष्कासयैनां भवनात्पुराच्चैव विशेषतः ।
कालः प्रविश्य सैरन्ध्रीं पुरं नाशयते ध्रुवम् ॥ ८ ॥ ४-२८-८ (२९५०७)
वैशम्पायन उवाच। ४-२८-९क्ष् (३१०९)
तेषां तद्वचनं श्रुत्वा विराटो वाहिनीपतिः ।
अब्रवीत्क्रियतामेषां सूतानामपरक्रिया ॥ ९ ॥ ४-२८-९ (२९५०८)
एकस्मिन्नेव ते सर्वे सुसमिद्धे हुताशने ।
दह्यन्तां कीचकाः सर्वे सर्वगन्धैश्च सर्वशः ॥ १० ॥ ४-२८-१० (२९५०९)
इत्युक्त्वा परमोद्विग्नः प्रविश्यान्तःपुरं शुभम् ।
सुदेष्णां चाब्रवीद्राजा महिषीं जातसाध्वसः ॥ ११ ॥ ४-२८-११ (२९५१०)
सैरन्ध्रीमागतां ब्रूया ममैव वचनादिह ।
गच्छ सैरन्ध्रि भद्रं ते यथाकामं चराधुना ।
बिभेति राजा सैरन्धि गन्धर्वेभ्यः पराभवात् ॥ १२ ॥ ४-२८-१२ (२९५११)
न हि तामुत्सहे वक्तुं स्वयं गन्धर्वरक्षिताम् ।
स्त्रियास्त्वदोषस्तां वक्तुमतस्त्वां प्रब्रवीम्यहम् ॥ १३ ॥ ४-२८-१३ (२९५१२)
वैशम्पायन उवाच। ४-२८-१४क्ष् (३११०)
एकस्मिन्नेव ते सर्वे सुसमिद्धे हुताशने ।
अदहन्कीचकान्सर्वान्संस्कारैश्चैव सर्वशः ॥ १४ ॥ ४-२८-१४ (२९५१३)
अथ मुक्ता भयात्कृष्णा सूतपुत्रान्निरस्य च ।
मोक्षिता भीमसेनेन जगाम नगरं प्रति ॥ १५ ॥ ४-२८-१५ (२९५१४)
त्रासितेव मृगी बाला शार्दूलेन मनस्विनी ।
सा तु गात्राणि वासश्च प्रक्षाल्य प्रविवेश ह ॥ १६ ॥ ४-२८-१६ (२९५१५)
तां दृष्ट्वा पुरुषा राजन्प्राद्रवन्त दिशो दश ।
गन्धर्वाणां भयत्रस्ताः केचिद्दृष्टिं न्यमीलयन् ॥ १७ ॥ ४-२८-१७ (२९५१६)
प्रदुद्रुवुश्चाप्यपरे तथा जना हस्तैश्च चक्षूंषि पिधाय मोहिताः ।
मा पश्यत स्मेति च तां ब्रुवन्तस्तथा जनाश्चुक्रुशुरार्तरूपाः ॥ १८
॥ ४-२८-१८ (२९५१७)
तामद्य यः पश्यति रूपशालिनीं शयीत भग्नोऽत्र यथैव कीचकाः ।
इति ब्रुवन्तो भयविग्नचेतसो भयेन गन्धर्वगतेन मोहिताः ॥ १९
॥ ४-२८-१९ (२९५१८)
ततो महानसद्वारे भीमसेनमवस्थितम् ।
ददर्श राजन्पाञ्चाली यथा मत्तं महाद्विपम् ॥ २० ॥ ४-२८-२० (२९५१९)
सोपहासं तु शनकैः संज्ञाभिरिदमब्रवीत् ।
नमो गन्धर्वराजाय येनास्मि परिमोक्षिता ॥ २१ ॥ ४-२८-२१ (२९५२०)

कीचकेभ्यो विनिर्दोषामनाथां वसतीं गृहे ।
यो मां रक्षति सन्त्रस्तां गन्धर्वाय नमोस्तु ते ॥ २२ ॥ ४-२८-२२ (२९५२१)
भीम उवाच। ४-२८-२३क्ष् (३१११)
ये यस्या विचरन्तीह पुरुषा वशवर्तिनः ।
तेषां च वशगा नित्यं विचर त्वं यथेष्टतः ॥ २३ ॥ ४-२८-२३ (२९५२२)
ये पुरा विचरन्तीह पुरुषा वशवर्तिनः ।
तस्यास्ते वचनं श्रुत्वा ह्यनृणा विहरन्त्वितः ॥ २४ ॥ ४-२८-२४ (२९५२३)
वैशम्पायन उवाच। ४-२८-२५क्ष् (३११२)
तयोस्तद्वचनं श्रुत्वा जज्ञिरे नेतरे जनाः ।
ततः पाञ्चालराजस्य सुता चापि जगाम ह ॥ २५ ॥ ४-२८-२५ (२९५२४)
ततः सा नर्तनागारे धनंजयमपश्यत ।
राज्ञः कन्या विराटस्य नर्तयन्तं महाभुजम् ॥ २६ ॥ ४-२८-२६ (२९५२५)
ततस्ता नर्तनागाराद्विनिष्क्रम्य सहार्जुनाः ।
कन्या ददृशुरायान्तीं कृष्णां क्लिष्टामनागसम् ॥ २७ ॥ ४-२८-२७ (२९५२६)
कान्या ऊचुः। ४-२८-२८क्ष् (३११३)
दिष्ट्या सैरन्ध्रि मुक्ताऽसि दिष्ट्याऽसि पुनरागता ।
दिष्ट्या च निहताः सूता ये त्वां क्लिश्यन्त्यनागसम् ॥ २८ ॥ ४-२८-२८ (२९५२७)
बृहन्नलोवाच। ४-२८-२९क्ष् (३११४)
कथं सैरन्ध्रि मुक्ताऽसि कथं पापाश्च ते हताः ।
इच्छामि ते कथां श्रोतुं कथयस्व यथातथम् ॥ २९ ॥ ४-२८-२९ (२९५२८)
सैरन्ध्र्युवाच। ४-२८-३०क्ष् (३११५)
बृहन्नले किंनु तव सैरन्ध्र्या कार्यमद्य वै ।
या त्वं रंस्यसि कल्याणि सदा कन्यापुरे सुखं ॥ ३० ॥ ४-२८-३० (२९५२९)
न हि दुःख समाप्नोषि सैरन्ध्री यदुपाश्नुते ।
सुखेन वर्तसे येह न तद्दुःखमवाप्यते ।
तेन मां दुःखितामेवं पृच्छसि प्रहसन्त्यपि ॥ ३१ ॥ ४-२८-३१ (२९५३०)
बृहन्नलोवाच। ४-२८-३२क्ष् (३११६)
बृहन्नलाऽपि कल्याणि दुःखमाप्नोत्यनन्तकम् ।
तिर्यग्योनिगतेवेयं न चैनामवबुध्यसे ॥ ३२ ॥ ४-२८-३२ (२९५३१)
त्वया सहोषिता चास्मि त्वं च सर्वैः सहोषिता ।
त्वत्तः कृच्छ्रतरं वासं वसेयमहमङ्गने ।
क्लिश्यन्त्यां त्वयि सुश्रोणि कोनु दुःखं न चिन्तयेत्। ॥ ३३ ॥
४-२८-३३ (२९५३२)
न तु केनचिदन्यन्तं कस्यचिद्धृदयं क्वचित् ।
वेदितुं शक्यते नूनं तेन मां नावबुध्यसे ॥ ३४ ॥ ४-२८-३४ (२९५३३)
वैशम्पायन उवाच। ४-२८-३५क्ष् (३११७)

ततः सहैव कन्याभिर्द्रौपदी राजवेश्म तत् ।
प्रविवेश सुदेष्णायाः समीपमनसूयिनी ॥ ३५ ॥ ४-२८-३५ (२९५३४)
तामब्रवीद्राजपत्नी विराटवचनादिदम् ।
सैरन्ध्रि गम्यतां शीघ्रं यत्र कामयसे गतिम् ।
राजा बिभेति सैरन्ध्रि गन्धर्वेभ्यः पराभवात् ॥ ३६ ॥ ४-२८-३६ (२९५३५)
त्वं चापि तरुणी सुभ्रू रूपेणाप्रतिमा भुवि ।
चित्तानि च नृणां भद्रे रक्तानि स्पर्शजे सुखे ॥ ३७ ॥ ४-२८-३७ (२९५३६)
तस्मात्त्वत्तो भयं मह्यं राष्ट्रस्य नगरस्य च ।
गच्छाद्यैव यथेष्टं त्वं नगराद्यत्र रंस्यसे ॥ ३८ ॥ ४-२८-३८ (२९५३७)
त्वन्निमित्तं शुभे मह्यं सर्वो बन्धुजनो हतः ।
नृशंसा खलु ते बुद्धिर्भ्रातॄणां मे कृतो वधः ॥ ३९ ॥ ४-२८-३९
(२९५३८)
तस्माद्गन्धर्वराजेभ्यो भयमद्य प्रवर्तते ।
यथेष्टं गच्छ सैरन्ध्रि स्वस्ति चेह यथा भवेत् ॥ ४० ॥ ४-२८-४०
(२९५३९)
वैशम्पायन उवाच। ४-२८-४१क्ष् (३११८)
सुदेष्णाया वचः श्रुत्वा सैरन्ध्री चेदमब्रवीत् ।
त्रयोदशाहमात्रं तु राजा क्षाम्यतु भामिनि ॥ ४१ ॥ ४-२८-४१ (२९५४०)
कृतकृत्या अविष्यन्ति गन्धर्वास्ते न संशयः ।
ततो मामुपनेष्यन्ति करिष्यन्ति च ते प्रियम् ॥ ४२ ॥ ४-२८-४२ (२९५४१)
ध्रुवं च श्रेयसा राजा योक्ष्यते सह बान्धवैः ।
राज्ञः कृतोपकाराश्च कृतज्ञाश्च सदा शुभे ।
साधवश्च बलोत्सिक्ताः कृतप्रतिकृतेप्सवः ॥ ४३ ॥ ४-२८-४३ (२९५४२)
अर्थिनी मा ब्रवीत्येषा यद्वातद्वेति चिन्तय ।
भरस्व तदहर्मात्रं तत्ते श्रेयो भविष्यति ॥ ४४ ॥ ४-२८-४४ (२९५४३)
वैशम्पायन उवाच। ४-२८-४५क्ष् (३११९)
तस्यास्तद्वचनं श्रुत्वा कैकेयी दुःखमोहिता ।
उवाच द्रौपदीमार्ता भ्रातृव्यसनकर्शिता ॥ ४५ ॥ ४-२८-४५ (२९५४४)
वस भद्रे यथेष्टं त्वं त्वामहं शरणं गता ।
त्रायस्व मम भर्तारं पुत्रांश्चैव विशेषतः ॥ ४६ ॥ ४-२८-४६ (२९५४५)
इत्युक्तवा राजशार्दूल राज्ञे सर्वं न्यवेदयत् ।
त्रिंशद्रात्रिमिमां भीरुः कृतकृत्या निवासये ॥ ४७ ॥ ४-२८-४७ (२९५४६)

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-२८-१ गन्धर्वैर्निहता राजन्निति खो थो धो पाठो ॥
१ ॥
४-२८-५ तथा नीतिर्विधीयतामिति धो पाठः ॥
५ ॥

विराटपर्व - अध्याय ०२९
॥ श्रीः ॥
४.२९. अध्यायः २९

Mahabharata - Virata Parva - Chapter Topics
पाण्डवान्वेषणाय क्रमेण विराटपुरमागतैश्चारैर्हास्तिनपुरमेत्य
दुर्योधनंप्रति स्वेषां पाण्डवानवगतिनिवेदनपूर्वकं
कीचकवधनिवेदनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-२९-० (२९५४७)
वैशम्पायन उवाच। ४-२९-०क्ष् (३१२०)
कीचके तु हते राजा विराटः परवीरहा ।
शोकमाहारयत्तीव्रं सामात्यः सपुरोहितः ॥ १ ॥ ४-२९-१ (२९५४८)
कीचकस्य वधं घोरं सानुजस्य विशांपते ।
अत्याहितं चिन्तयित्वा व्यस्मयन्त पृथग्जनाः ॥ २ ॥ ४-२९-२ (२९५४९)
तस्मिन्पुरे जनपदे जजल्पुश्चापि सर्वशः ।
वीर्यवान्दयितो राज्ञो दर्पोत्सिक्तश्च कीचकः ॥ ३ ॥ ४-२९-३ (२९५५०)
सांपराये परिक्रुष्टो बलवान्दुर्जयो रणे ।
आसीत्प्रहर्ता शत्रूणां दारदर्शी च दुर्मतिः ।
स हतः किल गन्धर्वैः सैरन्ध्रीकारणान्निशि ॥ ४ ॥ ४-२९-४ (२९५५१)
इत्यजल्पन्महाराज कीचकस्य विनाशनम् ।
देशेदेशे मनुष्याश्च विस्मितः कीचके हते ॥ ५ ॥ ४-२९-५ (२९५५२)
अथ वैः धार्तराष्ट्रेण प्रयुक्ता ये बहिश्चराः ।
मृगयित्वा बहून्देशान्ग्रामांश्च नगराणि च ॥ ६ ॥ ४-२९-६ (२९५५३)
संविधाय यथाऽऽदिष्टं यथादेशं प्रदर्शकाः ।
कृतसंकेतनाः सर्वे न्यवर्तन्त पुरं ततः ॥ ७ ॥ ४-२९-७ (२९५५४)
आगम्य हास्तिनपुरं धार्तराष्ट्रमरिन्दमम् ।
तत्र दृष्ट्वा तु राजानं कौरव्यं धृतराष्ट्रजम् ॥ ८ ॥ ४-२९-८ (२९५५५)
द्रोणकर्णकृपैः सार्धं भीष्मेण च महात्मना ।

संगतं भ्रातृभिः सार्धं त्रिगर्तैश्च महारथैः ॥ ९ ॥ ४-२९-९
(२९५५६)
प्रणम्य शिरसा भूमौ वर्धयित्वा जयाशिषा ।
आसीनं सूर्यसंकाशे काञ्चने परमासने ॥ १० ॥ ४-२९-१० (२९५५७)
उपास्यमानं सचिवैर्मरुद्भिरिव वासवम् ।
विद्वद्भिर्गायकैः सार्धं कविभिः स्तुतिपाठकैः ॥ ११ ॥ ४-२९-११ (२९५५८)
अनेकैरपि राजन्यैः सेवितं सपरिच्छदैः ।
दुर्योधनं सभामध्ये आसीनमिदमब्रुवन् ॥ १२ ॥ ४-२९-१२ (२९५५९)
कृतोऽस्माभिः परो यत्नस्तेषामन्वेषणे सदा ।
पाण्डवानां मनुष्येन्द्र तस्मिन्महति कानने ॥ १३ ॥ ४-२९-१३ (२९५६०)
निर्जने व्यालसंकीर्णे नानाभ्रमरसंकुले ।
लताप्रतानगहने नानागुल्मसमावृते ॥ १४ ॥ ४-२९-१४ (२९५६१)
न च विद्मो गता येन पार्थाः सुदृढविक्रमाः ।
मार्गमाणाः पदन्यासमाश्रमेषु वनेषु च ॥ १५ ॥ ४-२९-१५ (२९५६२)
गिरिकूटेषु तुङ्गेषु नानाजनपदेषु च ।
जनाकीर्णेषु देशेषु चत्वरेषु पुरेषु च ॥ १६ ॥ ४-२९-१६ (२९५६३)
नरेन्द्र सहसा नष्टान्नैव विद्म च पाण्डवान् ।
अत्यन्तादर्शनान्नष्टा भद्रं तुभ्यं नरर्षभ ॥ १७ ॥ ४-२९-१७ (२९५६४)
गिरीणां कूटकुञ्जेषु कन्दरोदरसानुषु ।
नदीप्रस्रवणेष्वेव ह्रदेषु च सरस्सु च ॥ १८ ॥ ४-२९-१८ (२९५६५)
गह्वरेषु च दुर्गेषु ग्रामेषू पवनेषु च ।
दुर्विज्ञेया गतिस्तेषां मृग्यतेऽस्माभिरेव च ॥
गजव्याघ्रसमीपेषु सिंहान्ते शरभान्तरे ॥ १९ ॥ ४-२९-१९ (२९५६६)
वत्मन्यन्विच्छमानास्तु रथानां रथिसत्तम ।
कंचित्कालं मनुष्येन्द्र सूताननुगता वयम् ॥ २० ॥ ४-२९-२० (२९५६७)
मृगयित्वा यथान्यायं विदितार्थाश्च तत्वतः ।
प्राप्ता द्वारवतीं सूता विना पार्थैः परंतप ॥ २१ ॥ ४-२९-२१ (२९५६८)
न तत्र कृष्णा राजेन्द्र पाण्डवाश्च महाव्रताः ।
नरदेव यथोद्दिष्टं न च विद्मात्र पाण्डवान् ॥ २२ ॥ ४-२९-२२ (२९५६९)
निर्वृतो भव नष्टास्ते स्वस्थो भव परंतप ।
सर्वथैव प्रनष्टास्ते नमस्ते भरतर्षभ ॥ २३ ॥ ४-२९-२३ (२९५७०)
सर्वा च पृथिवी कृत्स्ना सशैलवनकानना ।
सराष्ट्रनगरग्रामा पत्तनैश्च समन्विता ।
अन्वेषिता च सर्वत्र न च पश्यामा पाण्डवान् ॥ २४ ॥ ४-२९-२४ (२९५७१)
पुनः शाधि मनुष्येन्द्र अत ऊर्ध्वं विशांपते ।
अन्वेषणे पाण्डवानां भूयः किं करवामहे ॥ २५ ॥ ४-२९-२५ (२९५७२)

इमां च नः प्रियां वीर वाचं भद्रवतीं शृणु ॥ २६ ॥ ४-२९-२६ (२९५७३)
येन त्रिगर्ता निहता बलेन बहुशो नृप ।
सूतेन राज्ञो मत्स्यस्य कीचकेन बलीयसा ।
स हतः पतितः शेते गन्धर्वैर्निशि भारत ॥ २७ ॥ ४-२९-२७ (२९५७४)
स्यालो राज्ञो विराटस्य सेनापतिरुदारधीः ।
सुदेष्णायानुजः क्रूरः शूरो वीरो गतव्यथः ॥ २८ ॥ ४-२९-२८ (२९५७५)
उत्साहवान्महावीर्यो नीतिमान्बलवानपि ।
युद्धज्ञो रिपुवीर्यघ्नःक सिंहतुल्यपराक्रमः ॥ २९ ॥ ४-२९-२९ (२९५७६)
प्रजारक्षणदक्षश्च शत्रुग्रहणशक्तिमान् ।
विजितारिर्महायुद्धे प्रचण्डो मानतत्परः ॥ ३० ॥ ४-२९-३० (२९५७७)
नरनारीमनोह्लादी धीरो वाग्मी रणप्रियः ।
पुण्यकर्माऽर्थकामानां भाजनं मनुजोत्तमः ॥ ३१ ॥ ४-२९-३१ (२९५७८)
स हतो निशि गन्धैर्वः स्त्रीनिमित्तं नराधिप ।
अमृष्यमाणो दुष्टात्मा निशीथे सह सोदरैः ।
सुहृदश्चास्य निहता योधाश्च प्रहरैर्हताः ॥ ३२ ॥ ४-२९-३२ (२९५७९)
गन्धर्वाणां च महिषी काचिदस्ति नितम्बिनी ।
सैरन्ध्री नाम तां दृप्तो दुष्टात्माऽकामयद्बली ॥ ३३ ॥ ४-२९-३३ (२९५८०)
इत्येवं श्रुतमस्माभिर्गन्धर्वैर्निहतो निशि ॥ ३४ ॥ ४-२९-३४ (२९५८१)
बान्धवैर्बहुभिः सार्धं कीचको निहतो यतः ।
अद्यप्रभृति राजेन्द्र पाण्डवान्वेषणं प्रति ।
चारांश्च सर्वतश्चर्तुं प्रेषयेति मतिर्हि नः ॥ ३५ ॥ ४-२९-३५ (२९५८२)
निहतो निशि गन्धर्वैर्दुष्टात्मा भ्रातृभिः सह ।
एतावच्छ्रुतमस्माभिर्भद्रं तेऽस्तु नराधिप ॥ ३६ ॥ ४-२९-३६ (२९५८३)
प्रियमेतदुपश्रुत्य शत्रूणां च पराभवम् ।
कृतकृत्यश्च कौरव्य विधत्स्व यदनन्तरम् ॥ ३७ ॥ ॥ ४-२९-३७ (२९५८४)

इति श्रीमन्महाभारते विराटपर्वणि ग्रोग्रहणपर्वणि
एकोऽनत्रिंशोऽध्यायः ॥ २९ ॥

विराटपर्व - अध्याय ०३०
॥ श्रीः ॥
४.३०. अध्यायः ३०

Mahabharata - Virata Parva - Chapter Topics
दुर्योधनादिभिः पाण्डवान्वेषणाय समालोचनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-३०-० (२९५८५)
वैशम्पायन उवाच। ४-३०-०क्ष् (३१२१)
ततो दुर्योधनो राजा श्रुत्वा तेषां वचस्तदा ।
चिरमन्तर्मना भूत्वा इदमाह सभासदः ॥ १ ॥ ४-३०-१ (२९५८६)
अशक्यं खलु कार्यस्य गतिं ज्ञातुं हि तत्वतः ।
तस्मात्सर्वे परीक्षध्वं क्वनु स्युः पाण्डवा गताः ॥ २ ॥ ४-३०-२ (२९५८७)
अल्पावशिष्टः कालस्तु गतो भूयिष्ठ एव च ।
तेषामज्ञातचर्यायामस्मिन्वर्षे त्रयोदशे ॥ ३ ॥ ४-३०-३ (२९५८८)
अपि वर्षस्य शेषं ते ह्यतीयुरिह पाण्डवाः ।
निवृत्तसमयास्ते हि सत्यव्रतपरायणाः ॥ ४ ॥ ४-३०-४ (२९५८९)
क्षरन्त इव नागेन्द्राः सर्वे ह्याशीविषोपमाः ।
दुःखाङ्भवेयुः संरब्धाः कौरवान्प्रति ते ध्रुवम् ॥ ५ ॥ ४-३०-५ (२९५९०)
विज्ञातव्या मनुष्येन्द्रास्तर्कया सुप्रणीतया ।
निपुणैश्चारपुरुषैः प्राज्ञैर्दक्षैः सुसंवृतैः ॥ ६ ॥ ४-३०-६ (२९५९१)
अज्ञातसमये ज्ञाताः कृच्छ्ररूपसमाश्रिताः ।
प्रविशेयुर्जितक्रोधास्तावदेव पुनर्वनम् ॥ ७ ॥ ४-३०-७ (२९५९२)
तस्मात्क्षिप्रं विचिन्वध्वं यथा चात्यन्तमव्ययम् ।
राज्यं निर्द्वन्द्वमव्यग्रं निःसपत्नं चिरं भवेत् ॥ ८ ॥ ४-३०-८ (२९५९३)
दुर्योधनेनैवमुक्ते वचनेऽतीव दुःखिना ।
ततः कर्णोऽब्रवीद्वाक्यं सत्यधर्मार्थसंयुतम् ॥ ९ ॥ ४-३०-९ (२९५९४)
एते पुनर्न गच्छन्तु अन्ये गच्छन्तु भारत ।
शीघ्रवृत्ता नरा योग्या निपुणाश्छन्नचारिणः ॥ १० ॥ ४-३०-१० (२९५९५)
चरन्तु देशान्विविधान्स्फीताञ्जनपदाकुलान् ।
तत्र गोष्ठीषु रम्यासु सिद्धा ब्राह्मणरूपिणः ॥ ११ ॥ ४-३०-११ (२९५९६)
परिवाहेषु तीर्थेषु विविधेष्वाकरेषु च ।
अन्वेष्टव्या मनुष्येन्द्र पाण्डवाश्छन्नचारिणः ॥ १२ ॥ ४-३०-१२ (२९५९७)
नदीकुञ्जेषु तीर्थेषु ग्रामेषु नगरेषु च ।
आश्रमेषु च रम्येषु पर्वतेषु गुहासु च ॥ १३ ॥ ४-३०-१३ (२९५९८)
विज्ञातव्या मनुष्येन्द्र तर्कया सुविनूतया ।
विविधैस्तत्परैः सम्यङ्विपुणैस्तज्ज्ञसंमतैः ॥ १४ ॥ ४-३०-१४ (२९५९९)
अथाग्रजानन्तरजो भ्रातुः प्रियहिते रतः ।
ज्येष्ठं दुःशासनस्तत्र भ्राता भ्रातरमब्रवीत् ॥ १५ ॥ ४-३०-१५ (२९६००)
येषु नः प्रत्ययो राजंश्चारेषु मनुजाधिप ।
ते यान्तु दत्तदेया वै भूयस्तान्परिमार्गितुम् ॥ १६ ॥ ४-३०-१६ (२९६०१)
यदाह कर्णो राजेन्द्र सर्वमेतदवेक्ष्यताम् ।

यथोद्दिष्टं चराः सर्वे मृगयन्तु यतस्ततः ॥ १७ ॥ ४-३०-१७ (२९६०२)
घ्राणैः पश्यन्ति पशवो वेदैरेव द्विजोत्तमाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ १८ ॥ ४-३०-१८ (२९६०३)
यथोक्ताश्चारपुरुषा मृगयन्तु पुनःपुनः ।
एते चान्ये च बहवो देशांश्च नगराणि च ॥ १९ ॥ ४-३०-१९ (२९६०४)
न हि तेषां गतिर्वासः प्रवृत्तिर्वोपलभ्यते ।
अत्यन्तं वा निगूढास्ते पारं वोर्मिमतो गताः ॥ २० ॥ ४-३०-२० (२९६०५)
व्यालैर्वाऽपि महारण्ये भक्षिताः शूरमानिनः ।
द्वीपं वा परमं प्राप्ता गिरिदुर्गवनेष्वपि ॥ २१ ॥ ४-३०-२१ (२९६०६)
हीनदर्पा निराशास्ते भक्षिता वाऽपि राक्षसैः ।
अथवा विषमं प्राप्य विनष्टाः शाश्वतीः समाः ॥ २२ ॥ ४-३०-२२ (२९६०७)
तस्मान्मानसमव्यग्रं कृत्वाऽऽत्मानं नियम्य च ।
कुरु कार्यं महोत्साहं मन्यसे यन्नराधिप ॥ २३ ॥ ॥ ४-३०-२३ (२९६०८)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

विराटपर्व - अध्याय ०३१
॥ श्रीः ॥
४.३१. अध्यायः ३१

Mahabharata - Virata Parva - Chapter Topics
द्रोणेन दुर्योधनंप्रति पाण्डवानां धार्मिकत्वादिगुणशालितया
विनाशाभावनिर्धारणेन तदन्वेषणविधानम् ॥ १ ॥
भीष्मेण पाण्डवावासदेशस्य लक्षणाभिधानपूर्वकं तेषां
दुर्ज्ञेयत्वस्यापि कथनेन तैः सह सन्धिविधानम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-३१-० (२९६०९)
वैशम्पायन उवाच। ४-३१-०क्ष् (३१२२)
अथाऽब्रवीत्सभामध्ये द्रोणः सूक्ष्मार्थदर्शिवान् ।
न तादृशा विनश्यन्ति नापि यान्ति पराभवम् ॥ १ ॥ ४-३१-१ (२९६१०)
शूराश्च कृतविद्याश्च बुद्धिमन्तो जितेन्द्रियाः ।
धर्मज्ञाः सत्यसन्धाश्च युधिष्ठिरमनुव्रताः ॥ २ ॥ ४-३१-२ (२९६११)
नीतिधर्मार्थतत्वज्ञं पितृवच्च समाहितम् ।
धर्मे स्थितं सत्यधृतिं ज्येष्ठं श्रेष्ठापचायिनम् ॥ ३

॥ ४-३१-३ (२९६१२)
अनुव्रता महात्मानो भ्रातरो भ्रातरं प्रियम् ।
अजातशत्रुं श्रीमन्तं सर्वभ्रातॄननुव्रतम् ॥ ४ ॥ ४-३१-४ (२९६१३)
तेषां तथाविधेयानां निभृतानां महात्मनाम् ।
किमर्थं नीतिमान्प्राज्ञः श्रेयो नैषां करिष्यति ॥ ५ ॥ ४-३१-५ (२९६१४)
तस्माद्यत्नात्परीक्षध्वं न तावत्समयो गतः ।
न ते विनाशमृच्छेयुरिति मे नैष्ठिकी मतिः ॥ ६ ॥ ४-३१-६ (२९६१५)
चिन्त्यतां चैव यत्कार्यं तच्च क्षिप्रमकालिकम् ।
क्रियतां साधु संचिन्त्य वासश्चैषां प्रचिन्त्यतां ॥ ७ ॥ ४-३१-७ (२९६१६)
यथा च पाण्डुपुत्राणां सर्वार्थेषु धृतात्मनाम् ।
प्रवृत्तिरुपलभ्येत तथा नीतिर्विधीयताम् ॥ ८ ॥ ४-३१-८ (२९६१७)
सर्वोपायैर्यतस्व त्वं यथा पश्यसि पाण्डवान् ।
दुर्ज्ञेयाः खलु शूरास्ते रक्ष्या नित्यं च दैवतैः ॥ ९ ॥ ४-३१-९ (२९६१८)
शुद्धात्मा मानवान्पार्थः सत्यवान्नीतिमाञ्शुचिः ।
तेजोराशिभिरापूर्णो दहेदपि च चक्षुषा ॥ १० ॥ ४-३१-१० (२९६१९)
तस्माद्यत्नश्च क्रियतां भूयश्च मृगयामहे ।
ब्राह्मणैश्चारकैः सिद्धैस्तापसैर्निपुणैरपि ॥ ११ ॥ ४-३१-११ (२९६२०)
विविधैस्तत्परैः सम्यङ्विर्भीकैस्तज्ज्ञसंमतैः ।
अन्वेष्टव्या मनुष्येन्द्र पाण्डवाश्छन्नचारिणः ॥ १२ ॥ ४-३१-१२ (२९६२१)
ततः शान्तनवो धीमान्भारतानां पितामहः ।
श्रुतवान्देशकालज्ञो नीतिमांश्च महामतिः ॥ १३ ॥ ४-३१-१३ (२९६२२)
तस्मिन्नुपरते वाक्ये आचार्यस्य महात्मनः ।
अनन्तरमुवाचेदं वाक्यं हेत्वर्थसंमितम् ॥ १४ ॥ ४-३१-१४ (२९६२३)
युधिष्ठिरे समायुक्तां धर्मज्ञे धर्मसंहिताम् ।
पाण्डवे नित्यमव्यग्रां गिरं भीष्मः समाददे ॥ १५ ॥ ४-३१-१५ (२९६२४)
असत्सु दुर्लभां नित्यं सतां चाभिमतां सद ।
भीष्मस्त्वभ्यवदत्तत्र गिरं साधुभिरर्चिताम् ॥ १६ ॥ ४-३१-१६ (२९६२५)
यथा नो ब्राह्मणोऽवादीदाचार्यः सर्वधर्मवित् ।
श्रुतवृत्तोपसंपन्ना नाशं नायान्ति पाण्डवाः ॥ १७ ॥ ४-३१-१७ (२९६२६)
सर्वलक्षणसंपन्नाः साधुवृत्तसमन्विताः ।
वृद्धानुशासने यत्ताः सत्यधर्मपरायणाः ॥ १८ ॥ ४-३१-१८ (२९६२७)
समयं समयज्ञास्ते पालयन्तः शुभव्रताः ।
न विषीदन्ति ते पार्था उद्वहन्तः सतां धुरम् ॥ १९ ॥ ४-३१-१९ (२९६२८)
तपसा चैव गुप्तास्ते स्ववीर्येण च पाण्डवाः ।
न नाशमभिगच्छेयुरिति मे नैष्ठिकी मतिः ॥ २० ॥ ४-३१-२० (२९६२९)
क्षत्रधर्मरता नित्यं केशवानुगताः सदा ।

प्रवीरपुरुषास्ते वै महात्मानो महाबलाः ॥ २१ ॥ ४-३१-२१ (२९६३०)
तत्र बुद्धिं प्रवक्ष्यामि पाण्डवान्वेषणे शृणु ।
न तु नीतिः सुनीतस्य शक्यते वेदितुं परैः ॥ २२ ॥ ४-३१-२२ (२९६३१)
यत्तु शक्यमिहास्माभिस्तान्वै संचिन्त्य पाण्डवान् ।
बुद्ध्या प्रणेतुं तत्तेऽहं प्रवक्ष्यामि निबोध तत् ॥ २३ ॥ ४-३१-२३ (२९६३२)
न त्वियं साधु वक्तव्या तस्य नीतिः कथंचन ।
वृद्धानुशासने तात तिष्ठतः सत्यशीलिनः ॥ २४ ॥ ४-३१-२४ (२९६३३)
अयुक्तं तु मया वक्तुं तुल्या मे कुरुपाण्डवाः ।
निवासं पाण्डुपुत्राणां संचिन्त्य च वदाम्यहम् ।
बहुना किं प्रलापेन यतो धर्मस्ततो जयः ॥ २५ ॥ ४-३१-२५ (२९६३४)
अवश्यं तु नियुक्तेन सभामध्ये विवक्षता ।
यथार्हमिह वक्तव्यं सर्वथा धर्मलिप्सया ॥ २६ ॥ ४-३१-२६ (२९६३५)
यत्र नाहं तथा मन्ये यथाऽन्ये मेनिरे जनाः ।
निवासं पाण्डुपुत्राणां शृणुष्वं मनुजाधिप ॥ २७ ॥ ४-३१-२७ (२९६३६)
श्भ्रातृभिः सहितो वीरैः कृष्णया च महायशाः ।
किमर्थं स महाराजो नात्मश्रेयो भविष्यति ॥ २८ ॥ ४-३१-२८ (२९६३७)
पाण्डवो निकृतः पूर्वं यथावद्विदितं तव ।
क्लेशितश्च पुरे नित्यं राज्यकामैश्च सांप्रतम् ।
छन्नश्चरति तस्मात्स प्रकृत्या नीतिमान्नृपः ॥ २९ ॥ ४-३१-२९ (२९६३८)
वर्षमेकं सुसंच्छन्नमुष्य वासमनुत्तमम् ।
आयाति चोदये काले क्षिप्रं दक्ष्यसि पाण्डवं ॥ ३० ॥ ४-३१-३० (२९६३९)
सोदरैः सहितं वीरं द्रौपद्या च परंतप ।
संविधत्स्व महाबाहो यथा नः स्यात्सुखोदयः ॥ ३१ ॥ ४-३१-३१ (२९६४०)
यस्मिन्स राजा वसति च्छन्नः सत्त्वभृतांवरः ।
भविष्यन्ति नरास्तत्र रागमोहविवर्जिताः ॥ ३२ ॥ ४-३१-३२ (२९६४१)
नाधयो हि महाराज न व्याधिः क्षत्रियर्षभघ ।
पुरे जनपदे वाऽपि यत्र राजा युधिष्ठिरः ॥ ३३ ॥ ४-३१-३३ (२९६४२)
दानशीलो वदान्यश्च निभृतो ह्रीनिषेवकः ।
प्रियवाक्सत्यवाक्शूरो धर्मशीलो जितेन्द्रियः ।
हृष्टः पुष्टः शुचिर्दक्षो यत्र राजा युधिष्ठिरः ॥ ३४ ॥
४-३१-३४ (२९६४३)
नासूयको न चापीर्ष्युर्नाभिमानी न मत्सरी ।
भविष्यति जनस्तत्र स्वयं धर्ममनुव्रतः ॥ ३५ ॥ ४-३१-३५ (२९६४४)
ब्रह्मघोषाश्च भूयांसः पुण्यशब्दास्तथैव च ।
क्रतवश्च भविष्यन्ति भूयांसो भूरिदक्षिणाः ॥ ३६ ॥ ४-३१-३६ (२९६४५)
सदा च तत्र पर्जन्यः सम्यग्वर्षी न संशयः ।

संपन्नसस्या च मही भविष्यति निरामया ॥ ३७ ॥ ४-३१-३७ (२९६४६)
रसवन्ति च धान्यानि गुणवन्ति फलानि च ।
गन्धवन्ति च माल्यानि शुभशब्दा च भारती ॥ ३८ ॥ ४-३१-३८ (२९६४७)
वायुश्च सुखसंस्पर्शो यत्र राजा युधिष्ठिरः ।
नीरोगास्तत्र विद्यन्ते वधबन्धा न सन्ति च ॥ ३९ ॥ ४-३१-३९ (२९६४८)
न चोरा न च दण्डाश्च न च बाधा भवन्त्युत ।
नाशक्ता न च दुष्टाश्च यत्र राजा युधिष्ठिरः ॥ ४० ॥ ४-३१-४० (२९६४९)
भयं च नाविशेत्तत्र निष्प्रतीपं च दर्शनम् ।
बहुक्षीरास्तथा गावः सुपुष्टाश्च सुदोहनाः ॥ ४१ ॥ ४-३१-४१ (२९६५०)
पयांसि दधिसर्पींषि रसवन्ति हितानि च ।
सलिलानि प्रसन्नानि सर्वे भावाश्च शोभनाः ॥ ४२ ॥ ४-३१-४२ (२९६५१)
गुणवन्ति च पानानि भोज्यानि विविधानि च ।
तत्र देशे भविष्यन्ति यत्र राजा युधिष्ठिरः ॥ ४३ ॥ ४-३१-४३ (२९६५२)
रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः ।
दृश्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ॥ ४४ ॥ ४-३१-४४ (२९६५३)
धर्माश्च तत्र सर्वैस्तु सेविताश्च द्विजातिभिः ।
स्वैःस्वैर्गुणैश्च संयुक्ता कस्मिन्वर्षे त्रयोदशे ।
देशे तस्मिन्भविष्यन्ति तत पाण्डवसंश्रिते ॥ ४५ ॥ ४-३१-४५ (२९६५४)
संप्रीतिमाञ्जनस्तत्र संतुष्टः शुचिरव्ययः ।
देवतातिथिभूयांस्तु सर्वभूतानुरागवान् ॥ ४६ ॥ ४-३१-४६ (२९६५५)
इष्टदानमहोत्साहा नित्यं धर्मपरायणाः ।
व्यक्तवाक्यास्ततस्तात शुभकल्याणमङ्गलाः ॥ ४७ ॥ ४-३१-४७ (२९६५६)
शुभत्विषः शुभेच्छाश्च नित्यतुष्टाः श्रियाऽन्विताः ।
भविष्यन्ति जनास्तत्र यत्र राजा युधिष्ठिरः ॥ ४८ ॥ ४-३१-४८ (२९६५७)
नित्योत्सवप्रमुदितो नित्यहृष्टः श्रिया वृतः ।
भविष्यति निवासोऽयं यत्र राजा युधिष्ठिरः ॥ ४९ ॥ ४-३१-४९ (२९६५८)
धर्मज्ञः स तु दुर्ज्ञेयः सर्वज्ञैश्च द्विजातिभिः ।
किंपुनः प्राकृतैस्तात पार्थो विज्ञायते क्वचित् ॥ ५० ॥ ४-३१-५० (२९६५९)
यस्मिन्सत्यं धृतिर्दानं परा शान्तिर्ध्रुवा क्षमा ।
ह्रीः श्रीः कीर्तिः परं तेज आनृशंस्यमथार्जवम् ॥ ५१ ॥ ४-३१-५१ (२९६६०)
तस्मान्निवासः पार्थानां चिन्त्यतां यद्ब्रवीमि वः ।
गतिर्वा परमा तत्र नोत्सहे वक्तुमन्यथा ॥ ५२ ॥ ४-३१-५२ (२९६६१)
एवमेतत्तु संचिन्त्य यत्कृत्यं साधु मन्यसे ।
तत्क्षिप्रं कुरु कौरव्य यद्येतच्छ्रद्दधासि मे ।
कुलस्य हि क्षमं तात यदहं प्रब्रवीमि ते ॥ ५३ ॥ ॥ ४-३१-५३ (२९६६२)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकत्रिंशोऽध्यायः
॥ ३१ ॥

विराटपर्व - अध्याय ०३२
॥ श्रीः ॥
४.३२. अध्यायः ३२

Mahabharata - Virata Parva - Chapter Topics
दुर्योधनेन कीचकवधस्य भीमसेनकृतत्वसंभावनया पाण्डवानां
तत्र स्थितिसंभावना ॥ १ ॥
तथा भीष्माद्यनुमत्या सुशर्मणो विराटनगरंप्रति प्रेषणम् ॥ २ ॥
सुशर्मणा विराटनगरमेत्य दक्षिणभागे गोग्रहम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-३२-० (२९६६३)
वैशम्पायन उवाच। ४-३२-०क्ष् (३१२३)
ततः शारद्वतो वाक्यमित्युवाच कृतस्तदा ।
युक्तं प्राप्तं च वृद्धेन पाण्डवान्प्रति भाषितम् ॥ १ ॥ ४-३२-१ (२९६६४)
धर्मार्थसहितं श्लक्ष्णं सर्वं सत्यं सहेतुकम् ।
तत्रानुरूपं भीष्मस्य ममापि वचनं शृणु ॥ २ ॥ ४-३२-२ (२९६६५)
तेषां चैव गतिस्तत्र र्निवासश्चानुचिन्त्यताम् ।
नीतिर्विधीयतां तत्र सांप्रतं या हिता भवेत् ॥ ३ ॥ ४-३२-३ (२९६६६)
नावज्ञेयो रिपुस्तात प्राकृतोऽपि बुभूषता ।
किं पुनः पाण्डवाः शूरा विद्वांसो बलिनस्तथा ॥ ४ ॥ ४-३२-४ (२९६६७)
तस्मात्सत्रं प्रविष्टेषु पाण्डवेषु महात्मसु ।
गूढभावेषु छन्नेषु काले चोदयमागते ॥ ५ ॥ ४-३२-५ (२९६६८)
स्वराष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः ।
उदयः पाण्डवानां च प्राप्तकालो न संशयः ॥ ६ ॥ ४-३२-६ (२९६६९)
निवृत्तसमयाः पार्था महात्मानो महाबलाः ।
महोत्साहा भविष्यन्ति पाण्डवा ह्यमितौजसः ॥ ७ ॥ ४-३२-७ (२९६७०)
तस्माद्बलं च कोशं च नातिश्चापि विधीयताम् ।
यथा कालोदये प्राप्ते सम्यक् तैः संदधामहे ॥ ८ ॥ ४-३२-८ (२९६७१)
यत्र यन्मन्यसे श्रेयो बुध्यस्व बलमात्मनः ।
नियतं सर्वमित्रेषु बलवत्स्वबलेषु च ॥ ९ ॥ ४-३२-९ (२९६७२)
सारं फल्गु बलं ज्ञात्वा मध्यस्थं चापि भारत ।
स्वराष्ट्रपरराष्ट्रेषु ज्ञातव्यं बलमात्मनः ॥ १० ॥ ४-३२-१० (२९६७३)

अप्रहृशष्टं प्राहृष्टं वा संदधाम तथा परैः ।
साम्ना दानेन भेदेन दण्डेन बलिकर्मणा ॥ ११ ॥ ४-३२-११ (२९६७४)
न्यायेनाक्रम्य च परान्बलाच्चानम्य दुर्बलान् ।
सान्त्वयित्वा च मित्राणि बलं चाभाष्यतां सुखम् ॥ १२ ॥ ४-३२-१२ (२९६७५)
स्वकोशबलसंवृद्धः सम्यक्सिद्धिमवाप्स्यसि ।
योत्स्यसे चापि बलिभिररिभिः प्रत्युपस्थितैः ।
अन्यैस्त्वं पाण्डवैर्वाऽपि हीनैः स्वबलवाहनैः ॥ १३ ॥ ४-३२-१३ (२९६७६)
एवं सर्वं विनिश्चित्य व्यवहर्तासि न्यायतः ।
यथाकालं मनुष्येन्द्र चिरं सुखमवाप्स्यसि ॥ १४ ॥ ४-३२-१४ (२९६७७)
भीष्माद्रोणकृपैरुक्ते कर्णदुःशासनादिभिः ।
ततो दुर्योधनो वाक्यं श्रुत्वा तेषां महात्मनाम् ।
मुहूर्तमनुसंचिन्त्य सचिवानिदमब्रवीत् ॥ १५ ॥ ४-३२-१५ (२९६७८)
श्रुतमेतन्मया पूर्वं कथासु जनसंसदि ।
धीराणां शास्त्रविदुषां प्राज्ञानां मतिनिश्चये ।
कृतिनां सारफल्गुत्वे जानामि नयचक्षुषा ॥ १६ ॥ ४-३२-१६ (२९६७९)
सत्वे बाहुबले धैर्ये प्राणे शारीरसंभवे ।
सांप्रतं मानुषे लोके सदैत्यनरराक्षसे ॥ १७ ॥ ४-३२-१७ (२९६८०)
चत्वारस्तु नरव्याघ्रा बले शक्रोपमा भुवि ।
उत्तमाः प्राणिनां तेषां नास्ति कश्चिद्बले ममः ॥ १८ ॥ ४-३२-१८ (२९६८१)
बलदेवश्च भीमश्च मद्रराजश्च वीर्यवान् ।
चतुर्थः कीचकस्तेषां पञ्चमं नानुशुश्रुमः ॥ १९ ॥ ४-३२-१९ (२९६८२)
अन्योन्यानन्तरबलाः परस्परजयैपिणः ।
बाहूयुद्धमभीप्सन्तो नित्यं संरब्धमानसाः ॥ २० ॥ ४-३२-२० (२९६८३)
तेनाहमवगच्छामि प्रत्ययेन वृकोदरम् ।
मनस्यभिनिविष्टं मे व्यक्तं जीवन्ति पाण्डवाः ॥ २१ ॥ ४-३२-२१ (२९६८४)
तत्राहं कीचकं मन्ये भीमसेनेन मारितम् ।
सैरन्ध्रीं द्रौपदीं मन्ये नात्र कार्या विचारणा ॥ २२ ॥ ४-३२-२२ (२९६८५)
शङ्के कृष्णानिमित्तं तु भीमसेनेन कीचकः ।
गन्धर्वव्यपदेशेन हतो निशि महाबलः ॥ २३ ॥ ४-३२-२३ (२९६८६)
को हि शक्तः परो भीमात्कीचकं हन्तुमोजसा ।
शस्त्रं विना बाहुबलात्तथा सर्वाङ्गचूर्णने ॥ २४ ॥ ४-३२-२४ (२९६८७)
मर्दितुं वा तथा तीव्रं चर्ममांसास्थिचूर्णनम् ।
रूपमन्यत्समास्थाय भीमस्यैतद्विचेष्टितम् ॥ २५ ॥ ४-३२-२५ (२९६८८)
ध्रुवं कृष्णानिमित्तं तु भीमसेनेन सूतजाः ।
गन्धर्वव्यपदेशेन हता निशि न संशयः ॥ २६ ॥ ४-३२-२६ (२९६८९)
पितामहेन ये चोक्ता देशस्य च जनस्य च ।

गुणास्ते मत्स्यराष्ट्रेषु बहुशोऽपि मया श्रुताः ॥ २७ ॥ ४-३२-२७ (२९६९०)
विराटनगरे मन्ये पाण्डवाश्छन्नचारिणः ।
निवसन्ति पुरे रम्ये तत्र यात्रा विधीयताम् ॥ २८ ॥ ४-३२-२८ (२९६९१)
मत्स्यराष्ट्रं गमिष्यामो ग्रहीष्यामश्च गोधनम् ।
गृहीते गोधने नूनं तेऽपि योत्स्यन्ति पाण्डवाः ॥ २९ ॥ ४-३२-२९ (२९६९२)
अपूर्णे समये चापि यदि पश्येम पाण्डवान् ।
द्वादशान्यानि वर्षाणि प्रवेक्ष्यन्ति पुनर्वनम् ॥ ३० ॥ ४-३२-३० (२९६९३)
तस्मादन्यतरेणापि लाभोऽस्माकं भविष्यति ।
कोशवृद्धिरिहास्माकं शत्रूणां निधनं भवेत् ॥ ३१ ॥ ४-३२-३१ (२९६९४)
कथं सुयोधनं गच्छेद्युधिष्ठिरभृतः पुरा ।
एतच्चापि वदत्येष मात्स्यः परिभवान्मयि ॥ ३२ ॥ ४-३२-३२ (२९६९५)
तस्मात्कर्तव्यमेतद्धि तत्र यात्रा विधीयताम् ।
एतत्सुनीतं मन्येऽहं सर्वेषां यदि रोचते ॥ ३३ ॥ ४-३२-३३ (२९६९६)
वैशम्पायन उवाच। ४-३२-३४क्ष् (३१२४)
ततो राजा त्रिगर्तानां सुशर्मा रथयूथपः ।
पूर्वमाभाष्य कर्णेन तथा दुःशासनेन च ।
प्राप्तकालमिदं वाक्यमुवाच त्वरितो बली ॥ ३४ ॥ ४-३२-३४ (२९६९७)
असकृन्निकृतः पूर्वं मात्स्यसाल्वेयकेकयैः ।
सूतेनैव च मात्स्यस्य कीचकेन पुनः पुनः ॥ ३५ ॥ ४-३२-३५ (२९६९८)
बाधितो बन्धुभिः सार्धं बलाद्बलवता विभो ।
स कर्णमभिवीक्ष्याथ दुर्योधनमभाषत ॥ ३६ ॥ ४-३२-३६ (२९६९९)
राष्ट्रं ममासकृद्राजन्राज्ञा मात्स्येन बाधितम् ॥ ३७ ॥ ४-३२-३७ (२९७००)
प्रणेता कीचकस्तस्य बलोत्सिक्तोऽभवन्पुरा ।
अमर्षी दुर्जयो जेता प्रख्यातबलपौरुषः ।
स हतस्तत्र गन्धर्वैः पापकर्मा नृशंसकृत् ॥ ३८ ॥ ४-३२-३८ (२९७०१)
तस्मिन्विनिहते राजन्हीनदर्पो निराश्रयः ।
भविष्यति निरुत्साहो विराट इति मे मतिः ॥ ३९ ॥ ४-३२-३९ (२९७०२)
तत्र यात्रा मम मता यदि ते रोचतेऽनघ ।
कौरवाणां च सर्वेषां कर्णस्य च महात्मनः ॥ ४० ॥ ४-३२-४० (२९७०३)
एतत्कार्यमहं मन्ये परमात्ययिकं महत् ।
राष्ट्रं तस्याभियास्यामो धनधान्यसमाकुलम् ॥ ४१ ॥ ४-३२-४१ (२९७०४)
आददामोऽस्य रत्नानि विविधानि वसूनि च ।
ग्रामान्राष्ट्राणि वा तस्य हरिष्यामो विभागशः ॥ ४२ ॥ ४-३२-४२ (२९७०५)
अथवा गोसहस्राणि बहूनि शुभदर्शन ।
विविधानि हरिष्यामः प्रतीपीड्य पुरं बलात् ॥ ४३ ॥ ४-३२-४३ (२९७०६)
कौरवैः सह संगमय त्रिगर्तैश्च विशांपते ।

गास्तस्यापहरिष्यामः सह सर्वैर्महारथैः ॥ ४४ ॥ ४-३२-४४ (२९७०७)
सन्धिं वा तेन कृत्वा तु निबध्नीमोऽस्य पौरुषम् ।
हत्वा चास्य चमूं कृत्स्नां वशमेवानयामहे ॥ ४५ ॥ ४-३२-४५ (२९७०८)
तं वशे न्यायतः कृत्वा सुखं वत्स्यामहे वयम् ।
भवतां बलवृद्धिश्च भविष्यति न संशयः ॥ ४६ ॥ ४-३२-४६ (२९७०९)
वैशम्पायन उवाच। ४-३२-४७क्ष् (३१२५)
तच्छ्रुत्वा वचनं तस्य कर्णो राजानमब्रवीत् ॥ ४७ ॥ ४-३२-४७ (२९७१०)
सूक्तं सुशर्मणा वाक्यं प्राप्तकालमिदं वचः ।
तस्मात्क्षिप्रं विनिर्यामो योजयित्वा वरूथिनीं ॥ ४८ ॥ ४-३२-४८ (२९७११)
यदेतत्तेऽभिरुचितं मम चैतद्धि रोचते ।
प्रविभज्य च सैन्यानि यथा वा मन्यते भवान् ॥ ४९ । ४-३२-४९ (२९७१२)
प्रज्ञावान्कुलवृद्धश्च सर्वेषां नः पितामहः ।
आचार्यश्च कृपो विद्वाञ्शकुनिश्चापि सौबलः ॥ ५० ॥ ४-३२-५० (२९७१३)
मन्यन्ते ते यथा सर्वे तथा यात्रा विधीयताम् ।
संमन्त्र्य चाशु गच्छामः साधनार्थं महीपते ॥ ५१ ॥ ४-३२-५१ (२९७१४)
किंनु नः पाण्डवैः कार्यं हीनार्थबलपौरुषैः ।
अत्यन्तं हि प्रनष्टास्ते प्राप्ता वाऽपि यमक्षयम् ॥ ५२ ॥ ४-३२-५२ (२९७१५)
तद्भवांश्चतुरङ्गेण बलेन महता वृतः ।
विराटनगरं यातु सर्वसैन्येन भारत ।
आदास्यामोऽथ गास्तस्य विविधानि वसूनि च ॥ ५३ ॥ ४-३२-५३ (२९७१६)
वैशम्पायन उवाच। ४-३२-५४क्ष् (३१२६)
ततो दुर्योधनो राजा वचः श्रुत्वा तु तस्य तत् ।
वैकर्तनस्य कर्णस्य क्षिप्रमाज्ञापयत्स्वयम् ।
शासने नित्ययुक्तं तु दुःशासनमनन्तरम् ॥ ५४ ॥ ४-३२-५४ (२९७१७)
दुर्योधन उवाच। ४-३२-५५क्ष् (३१२७)
सह वृद्धैस्तु संमन्त्र्य क्षिप्रं योजय वाहिनीम् ।
यथोद्देशं तु गच्छामः सहिताः सर्वकौरवैः ॥ ५५ ॥ ४-३२-५५ (२९७१८)
सुशर्मा तु यथोद्दिष्टं देशं यातु महारथः ।
त्रिगर्तैः सहितः सर्वैः प्रख्यातबलपौरुषैः ।
प्रागेव हि सुसंयत्तो विराटनगरं प्रति ॥ ५६ ॥ ४-३२-५६ (२९७१९)
जघन्यतो वयं तत्र यास्यामो दिवसान्तरे ।
विषयं मत्स्यराजस्य सुसमृद्धं सुसंहितम् ॥ ५७ ॥ ४-३२-५७ (२९७२०)
सुशर्मणा गृहीते तु मत्स्यराजस्य गोधने ।
विराटः सैन्यमादाय त्रिगर्तैः सह योत्स्यति ॥ ५८ ॥ ४-३२-५८ (२९७२१)
अपरं दिवसं गास्तु तत्र गृह्णन्तु कौरवाः ।
गवार्थे पाण्डवास्तत्र योत्स्यन्ति कुरुभिः सह ॥ ५९ ॥ ४-३२-५९ (२९७२२)

तथा गत्वा यथोद्देशं विराटनगरान्तिके ।
क्षिप्रं गोष्ठं समासाद्य गृह्णन्तु विपुलं धनम् ॥ ६० ॥ ४-३२-६० (२९७२३)
गवां शतसहस्राणि श्रीमन्ति गुणवन्ति च ।
वयमस्य निगृह्णीमो द्विधा कृत्वा च वाहिनीम् ॥ ६१ ॥ ४-३२-६१ (२९७२४)
वैशम्पायन उवाच। ४-३२-६२क्ष् (३१२८)
ते स्म गत्वा यथोद्दिष्टं देशं मत्स्यमहीपतेः ।
संनद्धा रथिनः सर्वे सपताका बलोत्कटाः ।
प्रतिवैरं चिकीर्षन्तो गोषु गृद्धा महाबलाः ॥ ६२ ॥ ४-३२-६२ (२९७२५)
आदत्त गाः सुशर्माऽथ कृष्णपक्षस्य चाष्टमीम् ॥ ६३ ॥ ४-३२-६३
(२९७२६)
अपरे दिवसे सर्वे राजन्संभूय कौरवाः ।
नवम्यां ते न्यगृह्णन्त गोकुलानि सहस्रशः ।
कौरवास्तु महावीर्या मत्स्यानां विषयान्तरे ॥ ६४ ॥ ॥ ४-३२-६४ (२९७२७)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्वात्रिंशोऽध्यायः
॥ ३२ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-३२-३१ तस्मादनन्तरेणापि लाभोऽस्माकमिति धो पाठः ।तस्मात्
गोग्रहणात अनन्तरेण युद्धायागतपाण्डवदर्शनेन ॥
३१ ॥
४-३२-३२ युधिष्ठिरभृतः युधिष्ठिरो भृतो येन विराटेनेति
बहुव्रीहिः ॥
३२ ॥
४-३२-६३ कृष्णपक्षस्य सप्तमीमिति अष्टम्यां तेऽन्यगृह्णन्तेति
चो थो पाठः ॥
६३ ॥
४-३२- ६४ विषयान्तरे उत्तरभागे ॥
६४ ॥

विराटपर्व - अध्याय ०३३
॥ श्रीः ॥
४.३३. अध्यायः ३३

Mahabharata - Virata Parva - Chapter Topics
गोपैर्दुतृतरमाद्वत्य विराटंप्रति सुशर्मणा गोगहणनिवेदनम् ॥ १ ॥
विराटादिभिर्युद्धाय निर्गमोद्यमः ॥ २ ॥

युधिष्ठिरेण विराटंप्रति स्वेषां युद्धकौशलनिवेदनेन भ्रातृभिः सह समराभियानम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-३३-० (२९७२८)
वैशम्पायन उवाच। ४-३३-०क्ष् (३१२९)
ततस्तेषां महाराज तत्रैवामिततेजसाम् ।
छद्मलिङ्गप्रविष्टानां पाण्डवानां महात्मनाम् ॥ १ ॥ ४-३३-१ (२९७२९)
व्यतीतः समयः सम्यग्विराटनगरे सताम् ।
कुर्वतां तस्य कर्माणि वीराटस्य महीपतेः ॥ २ ॥ ४-३३-२ (२९७३०)
कीचके तु हते राजा विराटः परवीरहा ।
परां संभावनां चक्रे कुन्तीपुत्रे युधिष्ठिरे ॥ ३ ॥ ४-३३-३ (२९७३१)
ततस्त्रयोदशस्वान्ते तस्य वर्षस्य भारत ।
शुशर्मणा गृहीतं तु गोधनं तरसा बहु ॥ ४ ॥ ४-३३-४ (२९७३२)
ततः शब्दो महानासीद्रेणुश्च दिवमस्पृशत् ।
शङ्खदुन्दुभिघोषश्च भेरीणां च महास्वनः ।
गवाश्वरथनागानां निश्वनश्च पदातिनाम् ॥ ५ ॥ ४-३३-५ (२९७३३)
एवं तैस्त्वभिनिर्याय मत्स्यराजस्य गोधने ।
त्रिगर्तैर्गृह्यमाणे तु गोपालाः प्रत्यषेधयन् ॥ ६ ॥ ४-३३-६ (२९७३४)
अथ त्रिगर्ता बहवः परिगृह्य धनं बहु ।
परिक्षिप्य हयैः शीघ्रै रथव्रातैश्च भारत ।
गोपालान्प्रत्ययुध्यन्त रणे कृत्वा जये धृतिम् ॥ ७ ॥ ४-३३-७ (२९७३५)
ते हन्यमाना बहुभिः प्रासतोमरपाणिभिः ।
गोपाला गोकुले भक्ता वारयामासुरोजसा ॥ ८ ॥ ४-३३-८ (२९७३६)
परश्वथैश्च मुसलैर्भिण्डिपालैश्च मुद्गरैः ।
गोपालाः कर्षणैश्चित्रैर्जघ्नुरश्वान्समन्ततः ॥ ९ ॥ ४-३३-९ (२९७३७)
ते हन्यमानाः संक्रुद्धास्त्रिगर्ता रथयोधिनः ।
विसृज्य शरवर्षाणि गोपानद्रावयन्बलात् ॥ १० ॥ ४-३३-१० (२९७३८)
हन्यमानेषु गोपेषु विमुखेषु विशांपते ।
ततो युवानः संभीताः श्वसन्तो रेणुगुण्ठिताः ॥ ११ ॥ ४-३३-११ (२९७३९)
जवेन महता चैव गोपालाः पुरमाव्रजन् ।
विराटनगरं प्राप्य नरा राजानमब्रुवन् ॥ १२ ॥ ४-३३-१२ (२९७४०)
सभायां राजशार्दूलमासीनं पाण्डवैः सह ।
शूरैः परिवृतं योधैः कुण्डलाङ्गदधारिभिः ॥ १३ ॥ ४-३३-१३ (२९७४१)
सद्भिश्च पण्डितैः सार्धं मन्त्रिभिश्चापि संवृतम् ।

दृष्ट्वा शीघ्रं तु गोपाला विराटमिदमब्रवन् ॥ १४ ॥ ४-३३-१४ (२९७४२)
अस्मान्युधि विनिर्जित्य परिभूय सबान्धवान् ।
षष्टिं गवां सहस्राणि त्रिगर्ताः कालयन्ति ।
ता निवर्तय राजेन्द्र मा नेशुः पशवस्तव ॥ १५ ॥ ४-३३-१५ (२९७४३)
वैशम्पायन उवाच। ४-३३-१६क्ष् (३१३०)
श्रुत्वा तु वचनं तेषां गोपालानामरिंदमः ।
स राजा महतीं सेनां मात्स्यानां समवाहयत् ।
रथनागाश्वकलिलां पत्तिध्वजसमाकुलाम् ॥ १६ ॥ ४-३३-१६ (२९७४४)
राजानो राजपुत्राश्च तनुत्राण्यथ भेजिरे ।
भानुमन्ति विवातानि सूपसेव्यानि भागशः ॥ १७ ॥ ४-३३-१७ (२९७४५)
पृथक्काञ्चनसन्नाहान्रथेष्वश्वानयोजयन् ।
उत्कृष्य पाशान्मौर्वीणां शूराश्चापेष्वयोजयन् ॥ १८ ॥ ४-३३-१८ (२९७४६)
दृढमायसगर्भं तु कवचं तप्तकाञ्चनम् ।
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहारयत् ॥ १९ ॥ ४-३३-१९ (२९७४७)
सर्वभारसहं वर्म कल्याणपटलं दृढम् ।
शतानीकादवरजो मदिराक्षोऽभ्यहारयत् ॥ २० ॥ ४-३३-२० (२९७४८)
उत्सेधे यस्य पद्मानि शतं सौगन्धिकानि च ।
मृष्टहाटकपर्यन्तं सूर्यदत्तोऽभ्यहारयत् ॥ २१ ॥ ४-३३-२१ (२९७४९)
दृढमायसगर्भं च श्वेतं रुक्मपरिष्कृतम् ।
विराटस्य सुतो ज्येष्ठो वीरः शङ्खोऽभ्यहारयत् ॥ २२ ॥ ४-३३-२२ (२९७५०)
शतसूर्यं शतावर्तं शतबिन्दु शताक्षिमत् ।
अभेद्यकल्पं मत्स्यानां राजा कवचमाहरत् ॥ २३ ॥ ४-३३-२३ (२९७५१)
ततो नानातनुत्राणि स्वानिस्वानि महाबलाः ।
युयुत्सवोऽभ्यनह्यन्त देवकल्पाः प्रहारिणः ॥ २४ ॥ ४-३३-२४ (२९७५२)
सोपस्करेषु शुभ्रेषु महत्सु च महारथाः ।
पृथक्काञ्चनसन्नाहान्रथेष्वश्वानयोजयन् ॥ २५ ॥ ४-३३-२५ (२९७५३)
सूर्यचन्द्रप्रतीकाशे मणिहेमविभूषिते ।
महाप्रमाणं मत्स्यस्य ध्वजमुच्छ्रियते रथे ॥ २६ ॥ ४-३३-२६ (२९७५४)
ध्वजान्बहुविधाकारान्सौवर्णान्हेममालिनः ।
यथास्वं क्षत्रियाः शूरा रथेषु समयोजयन् ॥ २७ ॥ ४-३३-२७ (२९७५५)
रथेषु युज्यमानेषु कङ्को राजानमब्रवीत् ।
मया ह्यस्त्रं चतुर्वर्गमवाप्तमृषिसत्तमात् ॥ २८ ॥ ४-३३-२८ (२९७५६)
दंशितो रथमास्थाय पदं निर्याम्यहं गवाम् ।
अयं च बलवाञ्छूरो वल्लवो दृश्यतेऽनघ ॥ २९ ॥ ४-३३-२९ (२९७५७)
गोसङ्ख्यमश्वबन्धं च संयोजय रथेषु वैः ।
नैतेन जातु युध्येयुर्गवार्थमिति मे मतिः ॥ ३० ॥ ४-३३-३० (२९७५८)

वैशम्पायन उवाच। ४-३३-३१क्ष् (३१३१)
अथ मात्स्योऽब्रवीद्राजा शतानीकं जघन्यजम् ।
कङ्कश्च वललः सूदो दामग्रन्थिश्च वीर्यवान् ॥ ३१ ॥ ४-३३-३१ (२९७५९)
तन्त्रिपालश्च गोसङ्ख्यो यथा ते पुरुषर्षभाः ।
शूराः सुवीराः पुरुषा नागराजवरोपमाः ।
युद्ध्येयुरिति मे बुद्धिर्वर्तते नात्र संशयः ॥ ३२ ॥ ४-३३-३२ (२९७६०)
एतेपामपि दीयन्तां रथा ध्वजपताकिनः ।
कवचानि विचित्राणि दृढानि च लघूनि च ॥ ३३ ॥ ४-३३-३३ (२९७६१)
प्रतिमुञ्चन्तु गात्रेषु दीयन्तामायुधानि च ।
नेमे जातु न युद्ध्येयुरिति मे धीयते मतिः ॥ ३४ ॥ ४-३३-३४ (२९७६२)
वैशम्पायन उवाच। ४-३३-३५क्ष् (३१३२)
तच्छ्रुत्वा नृपतेर्वाक्यं शीघ्रं त्वरितमानसः ।
शतानीकः स पार्थभ्यो रथान्राजन्समादिशत् ॥ ३५ ॥ ४-३३-३५ (२९७६३)
सहदेवाय राज्ञे च भीमाय नकुलाय च ।
तान्दृष्ट्वा सहसा सूता राजभक्तिपुरस्कृताः ॥ ३६ ॥ ४-३३-३६ (२९७६४)
निर्दिष्टा नरदेवेन रथाञ्छीघ्रमयोजयन् ।
कवचानि विचित्राणि नवानि च दृढानि च ॥ ३७ ॥ ४-३३-३७ (२९७६५)
विराटः प्रददौ यानि तेषामक्लिष्टकर्मणाम् ।
तान्यामुच्य शरीरेषु दंशितास्ते महारथाः ॥ ३८ ॥ ४-३३-३८ (२९७६६)
तरस्विनश्छन्नरूपाः सर्वशस्त्रविशारदाः ।
रथान्हेमपरिष्कारान्समास्थाय महारथाः ।
पाण्डवा निर्ययुर्हृष्टा दंशिता राजसत्तम ॥ ३९ ॥ ४-३३-३९ (२९७६७)
विराटमन्वयुः पश्चात्सहिताः कुरुपुङ्गवाः ।
चत्वारो भ्रातरः शूराः पाण्डवाः सत्यविक्रमाः ॥ ४० ॥ ४-३३-४० (२९७६८)
दीर्घानां च दृढानां च धनुषां ते यथाबलम् ।
उत्कृष्य पाशान्मौर्वीणां वीराश्चापेष्वयोजयन् ॥ ४१ ॥ ४-३३-४१ (२९७६९)
ततः सुवाससः सर्वे वीराश्चन्दनरूषिताः ।
चोदिता नरदेवेन क्षिप्रमश्वानचोदयन् ॥ ४२ ॥ ४-३३-४२ (२९७७०)
ते हया हेमसंच्छन्ना बृहन्तः साधुवाहिनः ।
चोदिताः प्रत्यदृश्यन्त पत्रिणामिव पङ्क्तयः ॥ ४३ ॥ ४-३३-४३ (२९७७१)
भीमरूपाश्च मातङ्गाः प्रभिन्नकरटामुखाः ।
स्वारूढा युद्धकुशलैर्महामात्राधिरोहिताः ॥ ४४ ॥ ४-३३-४४ (२९७७२)
क्षरन्त इव जीमूताः सुदन्ताः षाष्टिहायनाः ।
राजानमन्वयुः पश्चात्क्रामन्त इव पर्वताः ॥ ४५ ॥ ४-३३-४५ (२९७७३)
दृढायुधजनाकीर्णं रथाश्वगजसंकुलम् ।
तद्बलाग्रं विराटस्य शक्रस्येव तदा बभौ ॥ ४६ ॥ ४-३३-४६ (२९७७४)

तं प्रयान्तं महाराज निनीषन्तं गवां पदम् ।
विशारदानां वैश्यानां प्रकृष्टानां तदा नृप ॥ ४७ ॥ ४-३३-४७ (२९७७५)
विंशतिस्तु सहस्राणि नराणामनुयायिनाम् ।
अष्टौ रथसहस्राणि दश नागशतानि च ।
विंशच्चाश्वसहस्राणि मात्स्यानां त्वरितं ययुः ॥ ४८ ॥ ४-३३-४८ (२९७७६)
तदनीकं विराटस्य शुशुभेऽतीव भारत ।
वसन्ते बहुपुष्पाढ्यं काननं चित्रितं यथा ॥ ४९ ॥ ॥ ४-३३-४९ (२९७७७)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहाणपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

विराटपर्व - अध्याय ०३४
॥ श्रीः ॥
४.३४. अध्यायः ३४

Mahabharata - Virata Parva - Chapter Topics
विराटसुशर्मसैन्ययौर्युद्धम् ॥ १ ॥
युधिष्ठिरादिनिहतानां परिसह्ख्यानम् ॥ २ ॥
विराटसुशर्मणोर्युद्धम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-३४-० (२९७७८)
वैशम्पायन उवाच। ४-३४-०क्ष् (३१३३)
निर्याय नगराच्छूरा व्यूढानीकाः प्रहारिणः ।
त्रिगर्तानस्पृशन्मात्स्याः सूर्येऽस्तंगमिते सति ॥ १ ॥ ४-३४-१ (२९७७९)
ते त्रिगर्ताश्च मात्स्याश्च व्यूढानीकाः प्रहारिणः ।
अन्योन्यमभिवर्तन्ते गोषु गृद्धा महाबलाः ॥ २ ॥ ४-३४-२ (२९७८०)
भीमाश्च मत्तमातङ्गास्तोमराङ्कुशचोदिताः ।
ग्रामणीयैः समारूढाः कुशलैर्हस्तिसादिभिः ॥ ३ ॥ ४-३४-३ (२९७८१)
तेषां समागमो घोरस्तुमुलो रोमहर्षणः ।
घ्नतां परस्परं राजन्यमराष्ट्रविवर्धनः ॥ ४ ॥ ४-३४-४ (२९७८२)
देवासुरसमो राजन्नासीत्सूर्येऽवलम्बति ।
पदातिरथनागेन्द्रहयारोहबलौघवान् ॥ ५ ॥ ४-३४-५ (२९७८३)
अन्योन्यमभ्यापततां निघ्नतां चेतरेतरम् ।
उदतिष्ठद्रजो भौमं न प्राज्ञायत किंचन ॥ ६ ॥ ४-३४-६ (२९७८४)
पक्षिणश्चापतन्भूमौ सैन्येन रजसा वृताः ।

इषुभिर्व्यतिसर्पद्भिरादित्योऽन्तरधीयत ॥ ७ ॥ ४-३४-७ (२९७८५)
खद्योतैरिव संयुक्तमन्तरिक्षमजायत ॥ ८ ॥ ४-३४-८ (२९७८६)
रुक्मपृष्ठानि चापानि विचेरुर्विद्युतो यथा ।
नर्दतां लोकवीराणां सव्यं दक्षिणमस्यताम् ॥ ९ ॥ ४-३४-९ (२९७८७)
रथा रथैः समाजग्मुः पत्तयश्च पदातिभिः ।
सादिनः सादिभिर्जग्मुर्गजैश्चापि महागजाः ॥ १० ॥ ४-३४-१० (२९७८८)
असिभिः पट्टसैश्चापि शक्तिभिस्तोमरैरपि ।
संरब्धाः समरे योधा निजघ्नुरितरेतरम् ॥ ११ ॥ ४-३४-११ (२९७८९)
निघ्नन्तः समरेऽन्योन्यं हृष्टाः परिघपाणयः ।
न शेकुरतिसंक्रुद्धाः शूराः कर्तुं पराङ्मुखम् ॥ १२ ॥ ४-३४-१२ (२९७९०)
रक्ताधरोष्ठं सुनसं क्लृप्तश्मश्रु स्वलंकृतम् ।
अदृश्यत शिरश्छिन्नं रजोविध्वस्तकुण्डलम् ॥ १३ ॥ ४-३४-१३ (२९७९१)
दृश्यन्ते तत्र गात्राणि वीरैश्छिन्नानि सर्वशः ।
सालस्कन्धनिकाशानि क्षत्रियाणा महामृधे ॥ १४ ॥ ४-३४-१४ (२९७९२)
नागभोगनिकाशैश्च बाहुभिश्चन्दनोक्षितैः ।
आकीर्णा वसुधा तत्र शिरोभिश्च सकुण्डलैः ॥ १५ ॥ ४-३४-१५ (२९७९३)
यथा वा वाससी श्लक्ष्णे महारजतरञ्जिते ।
बिभ्रती युवती श्यामा तद्वद्भाति वसुन्धरा ॥ १६ ॥ ४-३४-१६ (२९७९४)
उपाशाम्यद्रजो भौमं रुधिरेण प्रवर्षता ।
कश्मलं प्राविशद्घोरं निर्मर्यादमवर्तत ॥ १७ ॥ ४-३४-१७ (२९७९५)
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः सहितस्तदा ।
व्यूहं कृत्वा विराटस्य अन्वयुध्यत पाण्डवः ॥ १८ ॥ ४-३४-१८ (२९७९६)
आत्मानं श्येनवत्कृत्वा तुण्डमासीद्युधिष्ठिरः ।
पक्षौ यमौ च भवतः पुच्छमासीद्वृकोदरः ॥ १९ ॥ ४-३४-१९ (२९७९७)
सहस्रं न्यहनत्तत्र कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनस्तु संक्रुद्धः सर्वशस्त्रभृतांवरः ।
द्विसहस्रं रथान्वीरः परलोकं प्रवेशयत् ॥ २० ॥ ४-३४-२० (२९७९८)
नकुलस्त्रिशतं जघ्ने सहदेवश्चतुःशतम् ।
शतानीकः शतं जघ्ने मदिराश्वश्चतुःशतम् ॥ २१ ॥ ४-३४-२१ (२९७९९)
प्रहृष्टां महतीं सेनां त्रिगर्तानां महाबलौ ।
आर्च्छतां बहुसंरब्धौ केशाकेशि रथारथि ॥ २२ ॥ ४-३४-२२ (२९८००)
लक्षयित्वा त्रिगर्तानां तौ प्रविष्टौ महाचमूम् ।
जग्मतुः सूर्यदत्तश्च वललश्चापि पृष्ठतः ॥ २३ ॥ ४-३४-२३ (२९८०१)
शङ्खो विराटपुत्रश्च महेष्वासो महाबलः ।
विनिघ्नन्समरे शूरान्प्रविवेश महाचमूम् ॥ २४ ॥ ४-३४-२४ (२९८०२)
विराटस्तत्र संग्रामे हत्वा पञ्चशतं रथान् ।

कुञ्जराणां शतं चैव सहस्रं वाजिनां तथा ॥ २५ ॥ ४-३४-२५ (२९८०३)
चरन्स विविधान्मार्गान्रथेन रथिनांवरः ।
त्रिगर्तानां सुशर्माणमार्च्छद्रुक्मरथं रणे ॥ २६ ॥ ४-३४-२६ (२९८०४)
तौ तु प्राहरतां तत्र महेष्वासौ महाबलौ ।
अन्योन्यमभिनिघ्नन्तौ गोषु गोवृषभाविव ॥ २७ ॥ ४-३४-२७ (२९८०५)
राजसिंहौ सुसंरब्धौ विरेजतुरमर्षणौ ।
कृतास्त्रौ निशितैर्बाणैरसिशक्तिपरश्वथैः ॥ २८ ॥ ४-३४-२८ (२९८०६)
ततो रथाभ्यां रथिनौ व्यतीयातां समन्ततः ।
शरान्ससृजतुः शीघ्रं तोयधारा घनाविव ॥ २९ ॥ ४-३४-२९ (२९८०७)
अन्योन्यमभिसंरब्धौ दन्ताभ्यामिव कुञ्जरौ ।
कृतास्त्रौ निशितैर्बाणैर्दारयामासतू रणे ॥ ३० ॥ ४-३४-३० (२९८०८)
मात्स्यो राजा सुशर्माणं विव्याध निशितैः शरैः ।
पञ्चभिः पञ्चभिर्बाणैर्विव्याध चतुरो हयान् ॥ ३१ ॥ ४-३४-३१ (२९८०९)
द्वाभ्यां सूतं च विव्याध केतुं च त्रिभिराशुगैः ।
तथैव मात्स्यराजं तु सुशर्मा युद्धदुर्मदः ।
पञ्चाशद्भिः शितैर्बाणैर्विव्याध परमास्त्रवित् ॥ ३२ ॥ ४-३४-३२ (२९८१०)
तयोर्बलानि राजेन्द्र समस्तानि महारणे ।
नाजानन्त तदाऽन्योन्यं प्रदोषे रजसा वृते ॥ ३३ ॥ ॥ ४-३४-३३ (२९८११)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

विराटपर्व - अध्याय ०३५
॥ श्रीः ॥
४.३५. अध्यायः ३५

Mahabharata - Virata Parva - Chapter Topics
सुशर्मणा युद्धे विराटस्य ग्रहणम् ॥ १ ॥
भीमेन युधिष्ठिरचोदनया विराटस्य मोचनपूर्वकं सुशर्मणो
बन्धनम् ॥ २ ॥
युधिष्ठिरेण करुणया सुशर्मणो विमोक्षणम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-३५-० (२९८१२)
वैशम्पायन उवाच। ४-३५-०क्ष् (३१३४)
तमसाऽभिप्लुते लोके रजसा चैव भारत ।

व्यतिष्ठन्त मुहूर्तं ते व्यूढानीकाः प्रहारिणम् ॥ १ ॥ ४-३५-१ (२९८१३)
ततोऽन्धकारं प्रणुदन्नुदतिष्ठन्निशाकरः ।
कुर्वाणो विमलां रात्रिं दर्शयन्क्षत्रियान्रणे ॥ २ ॥ ४-३५-२ (२९८१४)
ततः प्रकाशमासाद्य पुनर्युद्धमवर्तत ।
घोररूपं तदा तेषामवेक्ष्य तु परस्परम् ॥ ३ ॥ ४-३५-३ (२९८१५)
तथैव तेषां तुमुलानि तानि क्रुद्धानि चान्योन्यमभिद्रवन्ति ।
गदासिपट्टैश्च परश्वथैश्च प्रासैश्च तीक्ष्णाग्रसुधौतधारैः
॥ ४ ॥ ४-३५-४ (२९८१६)
बलं तु मात्स्यस्य बलेन राजा सर्वं त्रिगर्ताधिपतिः सुशर्मा ।
प्रमथ्य जित्वा च निपीड्य मत्स्यान्विराटमोजस्विनमभ्यधावत् ॥ ५
॥ ४-३५-५ (२९८१७)
मत्ताविव वृषौ तौ तु गजाविव मदोद्धतौ ।
सिंहाविव गजग्राहौ शक्रवृत्राविवोद्धतौ ॥ ६ ॥ ४-३५-६ (२९८१८)
उभौ तुल्यबलोत्साहावुभौ तुल्यपराक्रमौ ।
उभौ तुल्यास्त्रविक्षेपावुभौ युद्धविशारदौ ॥ ७ ॥ ४-३५-७ (२९८१९)
तौ निहत्य पृथग्धुर्यानुभयोः पार्ष्णिसारथी ।
आस्तां तुल्यधनुर्ग्राहौ कृष्णकंसाविवोद्धतौ ॥ ८ ॥ ४-३५-८ (२९८२०)
ततः सुशर्मा त्रैगर्तः सह भ्रात्रा सुवर्मणा ।
अभ्यद्रवन्मत्स्यराजं रथव्रातेन सर्वशः ॥ ९ ॥ ४-३५-९ (२९८२१)
ततो रथाभ्यां प्रस्कन्द्य भ्रातरौ क्षत्रियर्षभौ ।
गदापाणी सुसंरब्धौ समभ्यद्रवतां जवात् ॥ १० ॥ ४-३५-१० (२९८२२)
सुशर्मा परवीरघ्नो बलवान्वीर्यवान्गदी ।
विरथं मत्स्यराजानं जीवग्राहमथाग्रहीत् ॥ ११ ॥ ४-३५-११ (२९८२३)
तमुन्मथ्य सुशर्मा तु युवतीमिव कामुकः ।
स्यन्दनं स्वं समारोप्य प्रययौ भीमविक्रमः ॥ १२ ॥ ४-३५-१२ (२९८२४)
तस्मिन्गृहीते विरथे विराटे बलवत्तरे ।
बलं सर्वं विभग्नं तन्निरुत्साहं निराशकम् ॥ १३ ॥ ४-३५-१३ (२९८२५)
प्राद्रवन्त भयान्मात्स्यास्त्रिगर्तैरर्दिता रणे ।
विदिक्षुः दिक्षु सर्वासु पलायन्ति च यान्ति च ॥ १४ ॥ ४-३५-१४ (२९८२६)
तेषु विद्रांव्यमाणेषु कुन्तीपुत्रो युधिष्ठिरः ।
अभ्यभाषत धर्मात्मा भिमसेनमरिन्दमम् ॥ १५ ॥ ४-३५-१५ (२९८२७)
मात्स्यराजस्त्रिगर्तेन परामृष्टः सुशर्मणा ।
तं मोक्षय महाबाहो मा गमद्द्विषतां वशम् ॥ १६ ॥ ४-३५-१६ (२९८२८)
भीमसेनः महाबाहो गृहीतं तु सुशर्मणा ।
त्रायस्व मोचय क्षिप्रमस्मत्प्रीतिकरं नृपम् ॥ १७ ॥ ४-३५-१७ (२९८२९)
उषिताः स्म सुखं सर्वे सर्वकामैः सुपूजिताः ।

भीमसेन त्वया कार्या तस्य वातस्य निष्कृतिः ॥ १८ ॥ ४-३५-१८ (२९८३०)
वैशम्पायन उवाच। ४-३५-१९क्ष् (३१३५)
तं तथावादिनं तत्र भीमसेनो महाबलः ।
अभ्यभाषत दुर्धर्षो रणमध्ये युधिष्ठिरम् ॥ १९ ॥ ४-३५-१९ (२९८३१)
अहमेनं परित्रास्ये शासनात्तव पार्थिव ।
पश्येदं सुमहत्कर्म युध्यतो मम शत्रुभिः ॥ २० ॥ ४-३५-२० (२९८३२)
स्वबाहुबलमाश्रित्य परेषामसमं रणे ।
एकान्तमाश्रितो राजंस्तिष्ठ त्वं भ्रातृभिः सह ॥ २१ ॥ ४-३५-२१ (२९८३३)
अयं वृक्षो महाशाखो गिरिमात्रो वनस्पतिः ।
अहमेनं समारुज्य पोथयिष्यामि शात्रवान् ॥ २२ ॥ ४-३५-२२ (२९८३४)
वैशम्पायन उवाच। ४-३५-२३क्ष् (३१३६)
तं मत्तमिव मातङ्गं वीक्षमाणं वनस्पतिम् ।
अब्रवीद्भ्रातरं वीरं धर्मराजो युधिष्ठिरः ॥ २३ ॥ ४-३५-२३ (२९८३५)
भीम मा साहसं कार्षीस्तिष्ठत्वेष वनस्पतिः ॥ २४ ॥ ४-३५-२४ (२९८३६)
मा त्वां वृक्षेण कर्माणि कुर्वन्तमतिमानुषम् ।
जनाः समवबुध्येरन्भीमोऽयमिति भारत ॥ २५ ॥ ४-३५-२५ (२९८३७)
मा ग्रहीस्त्वमिमं वृक्षं सिंहनादं च मा नद ।
कर्मणा सिंहनादेन विज्ञास्यन्ति जना ध्रुवम् ॥ २६ ॥ ४-३५-२६ (२९८३८)
इमं वृक्षं गृहीत्वा त्वं नेमां सेनामभिद्रव ।
वृक्षं च त्वां रुजन्तं वै विज्ञास्यति जनो ध्रुवं ॥ २७
॥ ४-३५-२७ (२९८३९)
अन्यदेवायुधं गृह्य प्रतिपद्यस्व मानुषम् ।
चापं वा यदि वा शक्तिं निस्त्रिंशं वा परश्वथम् ॥ २८ ॥ ४-३५-२८ (२९८४०)
यदेव मानुषं भीम भवेदन्यैरलक्षितम् ।
तदेवायुधमादाय मोचयाशु महीतिम् ॥ २९ ॥ ४-३५-२९ (२९८४१)
यमौ च चक्ररक्षौ ते भवितारौ महाबलौ ।
व्यायच्छतस्ते समरे मत्स्यराजं परीप्सतः ॥ ३० ॥ ४-३५-३० (२९८४२)
वैशम्पायन उवाच। ४-३५-३१क्ष् (३१३७)
भ्रातुर्वचनमादाय भीमो वृक्षं विसृज्य च ।
चापमादाय संप्राप्तो रथमास्थाय पाण्डवः ॥ ३१ ॥ ४-३५-३१ (२९८४३)
व्यमुञ्चच्छरवर्षाणि सतोय इव तोयदः ।
तं भीमो भीमकर्माणं शुशर्माणमथाऽऽद्रवत् ॥ ३२ ॥ ४-३५-३२ (२९८४४)
विराटमभिवीक्ष्यैनं तिष्ठतिष्ठेति चावदत् ॥ ३३ ॥ ४-३५-३३ (२९८४५)
सुशर्मा चिन्तयामास कालान्तकयमोपमम् ।
तिष्ठतिष्ठेति भाषन्तं पृष्ठतो रथपुङ्गवः ॥ ३४ ॥ ४-३५-३४
(२९८४६)

पश्यतां सुमहत्कर्म महद्युद्धमुपस्थितम् ।
परावृत्तो धनुर्गृह्य सुशर्मा भ्रातृभिः सह ॥ ३५ ॥ ४-३५-३५ (२९८४७)
निमेषान्तरमात्रेण भीमसेनेन ते रथाः ।
रथानां च गजानां च वाजिनां च ससादिनां ॥ ३६ ॥ ४-३५-३६ (२९८४८)
सहस्रशतसंघाताः शूराणामुग्रधन्विनाम् ।
पातिता भीमसेनेन विराटस्य समीपतः ॥ ३७ ॥ ४-३५-३७ (२९८४९)
पत्तयो निहतास्तेषां गदां गृह्य महात्मना ॥ ३८ ॥ ४-३५-३८ (२९८५०)
तद्दृष्ट्वा तादृशं युद्धं सुशर्मा युद्धदुर्मदः ।
चिन्तयामास मनसा किं शेषं हि बलस्य मे ॥ ३९ ॥ ४-३५-३९ (२९८५१)
अपरो दृश्यते सैन्ये पुरा मग्नो महाबले ।
आकर्णपूर्णेन तदा धनुषा प्रत्यदृश्यत ॥ ४० ॥ ४-३५-४० (२९८५२)
सुशर्मा सायकांस्तीक्ष्णान्क्षिपते च पुनःपुनः ॥ ४१ ॥ ४-३५-४१ (२९८५३)
ततः समस्तास्ते सर्वे तुरगानभ्यचोदयन् ।
दिव्यमस्त्रं विकुर्वाणास्त्रिगर्तान्प्रत्यमर्षणाः ॥ ४२ ॥ ४-३५-४२ (२९८५४)
तान्निवृत्तरथान्दृष्ट्वा पाण्डवास्तां महाचमूम् ।
वैराटिः परमक्रुद्धो युयुधे परमाद्भुतम् ॥ ४३ ॥ ४-३५-४३ (२९८५५)
त्रिगर्ताः समभिक्रम्य अयुध्यन्त जयैषिणः ।
तान्भीमसेनः संक्रुद्धः सर्वशस्त्रभृतांवरः ।
वैराटिः परमक्रुद्धो युयुधे परमाद्भुतम् ॥ ४४ ॥ ४-३५-४४ (२९८५६)
सहस्रं प्राहिणीद्राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलश्चापि सप्तैव शतानि प्राहिणोच्छरैः ॥ ४५ ॥ ४-३५-४५ (२९८५७)
शतानि त्रीणि शूराणां सहदेवः प्रतापवान् ।
युधिष्ठिरसमादिष्टो निजघ्ने पुरुषर्षभः ॥ ४६ ॥ ४-३५-४६ (२९८५८)
प्रविश्य महतीं सेनां त्रिगर्तानां महाबलः ।
क्षोभयन्सर्वभूतानि सिंहः क्षुद्रमृगानिव ॥ ४७ ॥ ४-३५-४७ (२९८५९)
ततो युधिष्ठिरो राजा त्वरमाणो महाबलः ।
अभिद्रुत्य सुशर्माणं शरैरभ्यहनद्भृशम् ॥ ४८ ॥ ४-३५-४८ (२९८६०)
सुशर्माऽपि सुसंक्रुद्धस्त्वराणो युधिष्ठिरम् ।
अविध्यद्दशभिर्बाणैश्चतुर्भिश्चतुरो हयान् ॥ ४९ ॥ ४-३५-४९ (२९८६१)
ततो राजन्क्षिप्रकारी कुन्तीऽपुत्रो वृकोदरः ।
समासाद्य सुशर्माणमश्वांस्तस्य न्यपातयत् ॥ ५० ॥ ४-३५-५० (२९८६२)
पृष्ठगोपौ च तस्याथ हत्वा परमसायकैः ।
अथास्य सारथिं क्रुद्धो रथोपस्थादपतयत् ॥ ५१ ॥ ४-३५-५१ (२९८६३)
चक्ररक्षस्तु शूरश्च शोणाश्वो नाम नामतः ।
स भयाद्विरथं दृष्ट्वा त्रैगर्तं व्याजहात्तदा ॥ ५२ ॥ ४-३५-५२ (२९८६४)
ततो विराटः प्रस्कन्द्य रथादथ सुशर्मणः ।

गदामस्य परामृश्य तमेवाभ्यहनद्बली ॥ ५३ ॥ ४-३५-५३ (२९८६५)
स चचार गदापाणिर्वृद्धोऽपि तरुणो यथा ॥ ५४ ॥ ४-३५-५४ (२९८६६)
भीमस्तु भीमसंकाशो रथात्प्रस्कन्द्य वीर्यवान् ।
उत्प्लुत्य गत्वा वेगेन तद्रथे विनिपत्य च ।
सुशर्मणः शिरोऽगृह्णात्पुनराश्वास्य युध्यतः ॥ ५५ ॥ ४-३५-५५ (२९८६७)
अग्राङ्घ्रिरेर्विनिक्षिप्य सिंहः क्षुद्रमृगं यथा ।
ऊर्ध्वमुत्प्लुत्य मार्जार आखोर्यद्वच्छिरो रुषा ॥ ५६ ॥ ४-३५-५६ (२९८६८)
समुद्यम्य तु रोषात्तं निष्पिपेष महीतले ।
यदा मूर्ध्नि महाबाहुः प्राहरद्विलपिष्यतः ॥ ५७ ॥ ४-३५-५७ (२९८६९)
तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना ।
स मोहमगमद्राजा प्रहारवरपीडितः ॥ ५८ ॥ ४-३५-५८ (२९८७०)
तस्मिन्वीरे गृहीते तु त्रिगर्तानां महारथे ।
अभज्यत बलं सर्वं त्रिगर्तानां भयातुरम् ॥ ५९ ॥ ४-३५-५९ (२९८७१)
निवृत्य गास्ततः सर्वाः पाण्डुपुत्रा महारथाः ।
अवजित्य सुशर्माणं धनं चादाय सर्वशः ॥ ६० ॥ ४-३५-६० (२९८७२)
स्वबाहुबलसंपन्ना ह्रीनिषेवा यतव्रताः ।
विराटस्य महात्मानः परिक्लेशविनाशनाः ।
स्थिताः समक्षं ते सर्वे त्वथ भीमोऽभ्यभाषत ॥ ६१ ॥ ४-३५-६१
(२९८७३)
नायं पापसमाचारो मत्तो जीवितुमर्हति ।
किंनु शक्यं मया कर्तुं यद्राजा सततं घृणी ।
गले गृहीत्वा राजानमानीय विवशं वशम् ॥ ६२ ॥ ४-३५-६२ (२९८७४)
तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः ।
रथमारोपयामास विसंज्ञं पांसुगुण्ठितम् ॥ ६३ ॥ ४-३५-६३ (२९८७५)
अभ्येत्य रणमध्यस्थमभ्यगच्छद्युधिष्ठिरम् ।
दर्शयामास भीमस्तु सुशर्माणं नराधिपम् ॥ ६४ ॥ ४-३५-६४ (२९८७६)
प्रोवाच पुरुषव्याघ्रो भीममाहवशोभिनम् ।
तं राजा प्राहसद्दृष्ट्वा मुच्यतां वै नराधमः ॥ ६५ ॥ ४-३५-६५ (२९८७७)
एवमुक्तोऽब्रवीद्भीमः सुशर्माणं महाबलम् ।
जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ॥ ६६ ॥ ४-३५-६६ (२९८७८)
दासोस्मीति त्वया वाच्यं संसत्सु च सभासु च ।
एवं ते जीवितं दद्यामेष युद्धजितो विधिः ॥ ६७ ॥ ४-३५-६७ (२९८७९)
तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः ।
मुञ्चमुञ्चाधमाचारं प्रमाणं यदि ते वयम् ॥ ६८ ॥ ४-३५-६८ (२९८८०)
दासभावं गतो ह्येष विराटस्य महीपतेः ।
अदासो गच्छ मुक्तोसि मैवं कार्षीः कदाचन ॥ ६९ ॥ ४-३५-६९ (२९८८१)

एवमुक्ते तु सव्रीडः सुशर्माऽसीदधोमुखः ।
स मुक्तोऽभ्येत्य राजानमभिवाद्य प्रतस्थिवान् ॥ ७० ॥ ४-३५-७० (२९८८२)
विसृज्य तु सुशर्माणं पाण्डवास्ते हतद्विषः ।
स्वबाहुबलसंपन्ना ह्रीनिषेवा यतव्रताः ।
संग्रामशिरसो मध्ये तां रात्रिं सुखिनोऽवसन् ॥ ७१ ॥ ४-३५-७१ (२९८८३)
॥ श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-३५-२ नन्दयन्क्षत्रियानिति थो पाठः ॥
२ ॥

विराटपर्व - अध्याय ०३६
॥ श्रीः ॥
४.३६. अध्यायः ३६

Mahabharata - Virata Parva - Chapter Topics
युधिष्ठिरचोदनया विराटप्रेषितैर्दूतैर्नगरमेत्य जयोद्धोषणम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-३६-० (२९८८४)
वैशम्पायन उवाच। ४-३६-०क्ष् (३१३८)
ततो विराटः कौन्तेयानतिमानुषविक्रमान् ।
अर्चयामास वित्तेन मानेन च महारथान् ।
वचसा चैव सान्त्वेन स्नेहेन च मुदाऽन्वितः ॥ १ ॥ ४-३६-१ (२९८८५)
विराट उवाच। ४-३६-२क्ष् (३१३९)
यथैव मम रत्नानि युष्माकं तानि वै तथा ।
कार्यं कुरुत तैः सर्वैर्यथाकामं यथासुखम् ॥ २ ॥ ४-३६-२ (२९८८६)
ददाम्यलंकृताः कन्या वसूनि विविधानि च ।
मनसा चाप्यभिप्रेतं यद्वः शत्रुनिबर्हणाः ॥ ३ ॥ ४-३६-३ (२९८८७)
युष्माकं विक्रमादद्य मुक्तोऽहं स्वस्तिमानिह ।
तस्माद्भवन्तो मत्स्यानामीश्वराः सर्व एव हि ॥ ४ ॥ ४-३६-४ (२९८८८)
वैशम्पायन उवाच। ४-३६-५क्ष् (३१४०)
तं तथावादिनं तत्र कौरवेयाः पृथक्पृथक् ।
ऊचुः प्रहृष्टमनसो युधिष्ठिरपुरोगमाः ॥ ५ ॥ ४-३६-५ (२९८८९)
प्रतिनन्दामहे वाचं सर्वथैव विशांपते ।

एतावताऽद्य प्रीताःस्मो यत्त्वं मुक्तोसि शत्रुभिः ॥ ६ ॥ ४-३६-६ (२९८९०)
यत्त्वं मुक्तोसि शत्रुभ्यो ह्येतत्कार्यं हितं हि नः ।
न किंचित्कार्यमस्माकं न धनं मृगयामहे ॥ ७ ॥ ४-३६-७ (२९८९१)
अथाब्रवीत्प्रीतमना मात्स्यराजो युधिष्ठिरम् ।
निर्भरः प्रीतिपूरेण हर्षगद्गदया गिरा ॥ ८ ॥ ४-३६-८ (२९८९२)
पुनरेव महाबाहुर्विराटो राजसत्तमः ।
एहि त्वामभिषेक्ष्यामि मत्स्यराजस्तु नो भवान् ॥ ९ ॥ ४-३६-९ (२९८९३)
मनसा चाप्यभिप्रेतं यत्ते शत्रुनिबर्हण ।
तत्तेऽहं संप्रदास्यामि सर्वमर्हति नो भवान् ॥ १० ॥ ४-३६-१० (२९८९४)
रत्नानि गाः सुवर्णं च मणिमुक्तमथापि वा ।
वैयाघ्रपद्य विप्रेन्द्र सर्वथैव नमोस्तु ते ॥ ११ ॥ ४-३६-११ (२९८९५)
त्वत्कृते ह्यद्य पश्यामि राज्यमात्मानमेव च ।
यतश्च जातः संरम्भः स च शत्रुर्वशं गतः ॥ १२ ॥ ४-३६-१२ (२९८९६)
ततो युधिष्ठिरो मात्स्यं पुनरेवाब्रवीद्वचः ।
प्रतिनन्दामि ते वाचं मनोज्ञां मात्स्य भाषितां ॥ १३ ॥ ४-३६-१३ (२९८९७)
आनृशंस्यपरो नित्यं सुमुखः सततं भवान् ।
पुनरेव विराटश्च राजा कङ्कमभाषत ॥ १४ ॥ ४-३६-१४ (२९८९८)
अहो शूद्रस्य कर्माणि वललस्य द्विजोत्तम ।
सोहं शूद्रेण संग्रामे वललेनाभिरक्षितः ॥ १५ ॥ ४-३६-१५ (२९८९९)
त्वत्कृते सर्वमेवैतदुपपन्नं ममानघ ।
वरं वृष्णीष्व भद्रं ते ब्रूहि किं करवाणि ते ॥ १६ ॥ ४-३६-१६ (२९९००)
ददामि ते महाप्रीत्या रत्नान्युच्चावचान्यहम् ।
शयनासनयानानि कन्याश्च समलंकुताः ॥ १७ ॥ ४-३६-१७ (२९९०१)
हस्त्यश्वरथसङ्घाश्च राष्ट्राणि विविधानि च ।
एतानि च मम प्रीत्या प्रतिगृह्ण ममान्तिके ॥ १८ ॥ ४-३६-१८ (२९९०२)
वैशम्पायन उवाच। ४-३६-१९क्ष् (३१४१)
तं तथावादिनं तत्र कौरव्यः प्रत्यभाषत ।
एषैव तु मम प्रीतिर्यत्त्वं मुक्तोसि शत्रुभिः ॥ १९ ॥ ४-३६-१९ (२९९०३)
प्रतीतश्चेत्पुरं तुष्टः प्रविशाद्य परंतप ।
दारैः पुत्रैश्च संश्लिष्य सा हि प्रीतिर्ममातुला ॥ २० ॥ ४-३६-२० (२९९०४)
सुशर्माणं तु राजेन्द्र सभृत्यबलवाहनम् ।
विसर्जय नरश्रेष्ठं वरमेतदहं वृणे ॥ २१ ॥ ४-३६-२१ (२९९०५)
वैशम्पायन उवाच। ४-३६-२२क्ष् (३१४२)
एवमुक्ते तु कङ्केन विराटो राजसत्तमः ।
प्रत्युवाच ततः कङ्कं सुशर्मा यातु चेष्टतः ॥ २२ ॥ ४-३६-२२ (२९९०६)
कङ्क उवाच। ४-३६-२३क्ष् (३१४३)

गच्छन्तु दूतास्त्वरिता नगरं तव पार्थिव ।
सुहृदां प्रियमाख्यातुं घोषयन्तु च ते जयम् ॥ २३ ॥ ४-३६-२३ (२९९०७)
ततस्तद्वचनान्मात्स्यो दूतान्राजा समादिशत् ।
आचक्षध्वं पुरं सत्वा संग्रामे विजयं मम ॥ २४ ॥ ४-३६-२४ (२९९०८)
कुमार्यः समलंकृत्य प्रयागच्छन्तु मे पुरात् ।
वादित्राणि च सर्वाणि गणिकाश्च स्वलंकृताः ।
प्रत्यायान्तु च मे शीघ्रं नागराः सर्व एव ते ॥ २५ ॥ ४-३६-२५ (२९९०९)
एवमुक्तास्तथा दूता रात्रौ यात्वा तु केवलम् ।
ततोऽन्तरे चानुषिता दूताः शीघ्रानुयायिनः ॥ २६ ॥ ४-३६-२६ (२९९१०)
नगरं प्राविशंस्ते वै सूर्ये सम्यगथोदिते ।
विराटनगरं प्राप्य शीघ्रं नान्दीमघोषयन् ।
पताकोच्छ्रयमाल्याढ्यं पुरमप्रतिमं यथा ॥ २७ ॥ ॥ ४-३६-२७ (२९९११)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि षट्त्रिंशोऽध्यायः
॥ ३६ ॥

विराटपर्व - अध्याय ०३७
॥ श्रीः ॥
४.३७. अध्यायः ३७

Mahabharata - Virata Parva - Chapter Topics
दुर्योधनेन भीष्मद्रोणादिभिः सह विराटनगरमेत्य उत्तरभागे गवां
ग्रहणम् ॥ १ ॥
गोपालेन केनचित्पुरमेत्योत्तरंप्रति कुरुभिर्गोग्रहणस्य निवेदनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-३७-० (२९९१२)
वैशम्पायन उवाच। ४-३७-०क्ष् (३१४४)
याते त्रिगर्तान्मात्स्ये तु पशूंस्तान्वै परीप्सति ।
दुर्योधनः सहामात्यैर्विराट पुरमभ्यगात् ॥१.। ४-३७-१ (२९९१३)
भीष्मद्रोणौ च कर्णश्च कृपश्च परमास्त्रवित् ।
द्रौणिश्च सौबलश्चैव तथा दुःशासनः शलः ॥ २ ॥ ४-३७-२ (२९९१४)
विविंशतिर्विकर्णश्च चित्रसेनश्च वीर्यवान् ।
दुःसहो दुर्मुखश्चैव एते चान्ये महारथाः ॥ ३ ॥ ४-३७-३ (२९९१५)
सर्वे मत्स्यानुपागम्य विराटस्य महीपतेः ।
गोपान्विद्राव्य तरसा गोधनं जह्रुरोजसा ॥ ४ ॥ ४-३७-४ (२९९१६)

गवां शतसहस्राणि कुरवः कालयन्ति च ।
महता रथवंशेन परिगृह्य समन्ततः ॥ ५ ॥ ४-३७-५ (२९११७)
गोपालानां तु घोषेषु हन्यतां तैर्महारथैः ।
आरावः सुमहानासीत्संप्रहारे भयंकरे ॥ ६ ॥ ४-३७-६ (२९११८)
गवाध्यक्षस्तु संत्रस्तो रथमास्थाय सत्वरः ।
जगाम नगरायैव परिक्रोशंस्तदाऽऽर्तवत् ॥ ७ ॥ ४-३७-७ (२९११९)
स प्रविश्य पुरं राज्ञो नृपवेश्माभ्ययात्ततः ।
अवतीर्य रथात्तूर्णमाख्यातुं प्रविवेश ह ॥ ८ ॥ ४-३७-८ (२९१२०)
दृष्ट्वा भूमिंजयं नाम पुत्रं मात्स्यस्य मानिनम् ।
तस्मै च सर्वमाचष्ट राष्ट्रस्य पशुकर्षणम् ॥ ९ ॥ ४-३७-९ (२९१२१)
गवां शतसहस्राणि कुरबः कालयन्ति ते ।
प्रतिजेतुं समुत्तिष्ठ गोधनं राष्ट्रवर्धन ॥ १० ॥ ४-३७-१० (२९१२२)
राजपुत्र हितप्रेप्सुः क्षिप्रं निर्याहि वै स्वयम् ।
त्वां हि मत्स्यो महीपालः शून्यपालमिहाकरोत् ॥ ११ ॥ ४-३७-११ (२९१२३)
त्वां वै परिषदो मध्ये श्लाघते स नराधिपः ।
पुत्रो ममानुरूपश्च शूरश्चेति कुलोद्वहः ॥ १२ ॥ ४-३७-१२ (२९१२४)
इष्वस्त्रनिपुणो योधः सदा वीरश्च मे सुतः ।
समर्थः समरे योद्धुं कौरवैः सह तादृशै ॥ १३ ॥ ४-३७-१३ (२९१२५)
तस्य तत्सत्यमेवास्तु मनुष्येन्द्रस्य भाषितम् ।
जयश्च नियतो युद्धे कौरवाश्च ध्रुवं हताः ॥ १४ ॥ ४-३७-१४ (२९१२६)
आवर्तय कुरूञ्जित्वा पशून्पशुपतिर्यथा ।
निर्दहैषामनीकानि भीमेन शरतेजसा ॥ १५ ॥ ४-३७-१५ (२९१२७)
धनुश्च्युतै रुक्मपुङ्खैश्चित्रैः संनतपर्वभिः ।
द्विषतां भिन्ध्यनीकानि गजानामिव यूथपः ॥ १६ ॥ ४-३७-१६ (२९१२८)
पाशोपधानां ज्यातन्त्रीं चापदण्डां महास्वनाम् ।
शरवर्णां धनुर्वीणां शत्रुमध्ये प्रवादय ॥ १७ ॥ ४-३७-१७ (२९१२९)
निर्याहि नगराच्छीघ्रं राजपुत्र किमास्यते ।
श्वेताः काञ्चनसंनाहा रथे युज्यन्तु ते हयाः ।
ध्वजं च सिहं सौवर्णमुच्छ्रयस्व तथा विभो ॥ १८ ॥ ४-३७-१८ (२९१३०)
रुक्मपुङ्खाः प्रसन्नाग्रा मुक्ता हस्तवता त्वया ।
छादयन्तु शराः सूर्यं राज्ञामायुर्निरोधकाः ॥ १९ ॥ ४-३७-१९ (२९१३१)
रणे जित्वा कुरून्सर्वान्वज्रपाणिरिवासुरान् ।
यशो महदवाप्य त्वं प्रविरोदं पुरं पुनः ॥ २० ॥ ४-३७-२० (२९१३२)
त्वं हि राष्ट्रस्य परमा गतिर्मात्स्यपतेः सुतः ।
गतिमन्तो भवन्त्वद्य सर्वे विषयवासिनः ॥ २१ ॥ ४-३७-२१ (२९१३३)
यथा हि पाण्डुपुत्राणामर्जुनो जयतांवरः ।

एवमेव गतिर्नूनं भवान्विपयवासिनाम् ॥ २२ ॥ ॥ ४-३७-२२ (२९९३४)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-३७-१७ पाशोपधानां पाशौ मौर्वीप्रान्तद्वयगतौ तावेव उपाधाने
वीणायां तन्त्रीसंधानार्थं कीलविशेषौ यस्यां सा ताम् । शरवर्णा
शरास्ततो निःसरन्तस्त एव वर्णाः शब्दवत्त्वसामान्यात्स्वरस्पर्शादयो
यस्याम् ॥
१७ ॥

विराटपर्व - अध्याय ०३८
॥ श्रीः ॥
४.३८. अध्यायः ३८

Mahabharata - Virata Parva - Chapter Topics
उत्तरे समुचितसारथेरभावेन खिद्यमाने अर्जुनेन द्रौपदींप्रति
उत्तराय बृहन्नलायाः सारथ्यकौशलनिवेदनचोदना ॥ १ ॥
भ्रातृचोदितया उत्तरया बृहन्नलांप्रति
उत्तररथसारथ्यकरणप्रार्थना ॥ २ ॥
उत्तरेण सारथीभूतेनार्जुनेन सह कुरून्प्रति रणायाभियानम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-३८-० (२९९३५)
वैशम्पायन उवाच। ४-३८-०क्ष् (३१४५)
महाजनसमक्षं तु स्त्रीणां मध्ये विशेषतः ।
गवाध्यक्षेण संप्रोक्तो विराटतनयस्तदा ॥ १ ॥ ४-३८-१ (२९९३६)
स्त्रीमध्य उक्तस्तेनासौ वाक्यं तेजःप्रवर्धनम् ।
अन्तःपुरे श्लाघमान इदं वचनमब्रवीत् ॥ २ ॥ ४-३८-२ (२९९३७)
उत्तर उवाच। ४-३८-३क्ष् (३१४६)
अद्याहमनुगच्छेयं दृढधन्वा गवां पदम् ।
यदि मे सारथिः कश्चिद्भवेदश्वेषु कोविदः ॥ ३ ॥ ४-३८-३ (२९९३८)
तमेव नाधिगच्छामि यो मे यन्ता समो भवेत् ।
पश्यध्वं सारथिं शीघ्रं मम युक्तं प्रयास्यतः ॥ ४ ॥ ४-३८-४ (२९९३९)
अष्टाविंशतिरात्रं वा मासं वा नूनमन्ततः ।

यत्तदासीन्महायुद्धं तत्र मे सारथिर्हतः ॥ ५ ॥ ४-३८-५ (२९९४०)
यद्यहं त्वधिगच्छेयं यो मे यन्ता भवेद्युधि ।
त्वरावानद्य यास्यामि समुच्छ्रितमहाध्वजः ॥ ६ ॥ ४-३८-६ (२९९४१)
विगाह्य तत्परानीकं गजवाजिरथाकुलम् ।
शस्त्रप्रतापान्निर्वीर्यान्कुरूञ्जित्वाऽऽनये पशून् ॥ ७ ॥ ४-३८-७ (२९९४२)
दुर्योधनं विकर्णं च कर्णं वैकर्तनं कृपम् ।
द्रोणं च सह पुत्रेण महेष्वासान्समागतान् ॥ ८ ॥ ४-३८-८ (२९९४३)
विद्रावयित्वा संग्रामे दानवान्मघवानिव ।
अनेनैव मुहूर्तेन पुनः प्रत्यानये पशून् ॥ ९ ॥ ४-३८-९ (२९९४४)
शून्यमाज्ञाय कुरवः प्रयान्त्यादाय गोधनम् ।
किं न शक्यं च तैः कर्तुं यदहं तत्र नाभवम् ॥ १० ॥ ४-३८-१० (२९९४५)
पश्ययुरद्य मे वीर्यं कुरवस्ते समागताः ।
किंनु पार्थोऽर्जुनः साक्षादिति मंस्यन्ति मां परे ॥ ११ ॥ ४-३८-११ (२९९४६)
वैशंपयान उवाच। ४-३८-१२क्ष् (३१४७)
तस्य तद्वचनं श्रुत्वा स्त्रीषु चात्मप्रशंसनम् ।
नामर्षयत पाञ्चाली बीभत्सोः परिकीर्तनम् ॥ १२ ॥ ४-३८-१२ (२९९४७)
श्रुत्वा तदर्जुनो वाक्यमुत्तरेण प्रभाषितम् ।
अतीतसमये काले प्रियां भार्यामभाषत ॥ १३ ॥ ४-३८-१३ (२९९४८)
द्रुपदस्य सुतां राज्ञः पाञ्चालीं रूपसंमताम् ।
सत्यार्जवगुणोपेतां भर्तुः प्रियहितैषिणीम् ।
उवाच रहसि प्रीतः कृष्णां सर्वार्थकोविदः ॥ १४ ॥ ४-३८-१४ (२९९४९)
उत्तरां ब्रूहि पाञ्चालि गत्वा क्षिप्रं शुचिस्मिते ॥ १५ ॥ ४-३८-१५ (२९९५०)
इयं किल पुरा युद्धे खाण्डवे सव्यसाचिनः ।
सारथिः पाण्डुपुत्रस्य पार्थस्य तु बृहन्नला ।
महाञ्जयो भवेद्युद्धे सा चेद्यन्ता बृहन्नला ॥ १६ ॥ ४-३८-१६ (२९९५१)
वैशम्पायन उवाच। ४-३८-१७क्ष् (३१४८)
सा चोदिता तदा ह्येन ह्यर्जुनेन शुचिस्मिता ।
पाञ्चाली च तदाऽऽगम्य उत्तराया निवेशनम् ॥ १७ ॥ ४-३८-१७ (२९९५२)
ज्ञात्वा तु समयान्मुक्तं चन्द्रं राहुमुखादिव ।
युधिष्ठिरं धर्मपरं सत्यार्जवपथे स्थितम् ॥ १८ ॥ ४-३८-१८ (२९९५३)
अमर्षयन्ती तद्दुःखं कृष्णा कमललोचना ।
उत्तरामाह वचनं सखीमध्ये विलासिनीम् ॥ १९ ॥ ४-३८-१९ (२९९५४)
योऽयं युवा वारणयूथपोपमो बृहन्नलाऽस्मीति जनोऽभ्यभाषत ।
पुराऽपि पार्थस्य स सारथिस्तदा धनुर्धराणां प्रवरस्य मन्ये ॥ २०
॥ ४-३८-२० (२९९५५)
एतेन वा सारथिना तदाऽर्जुनः सदेवगन्धर्वमहासुरोरगान् ।

सर्वाणि भूतान्यजयस्तस वीर्यवानतर्पयच्चापि हिरण्यरेतसम् ॥ २१
॥ ४-३८-२१ (२९९५६)
यदस्य संस्थामपि तस्य संयुगे जानामि वीर्यं परवीरमध्यगम् ।
संगृह्य रश्मीनपि चास्य वीर्यवानादाय चापं प्रययौ रथे स्थितः
॥ २२ ॥ ४-३८-२२ (२९९५७)
न सर्वभूतानि न देवदानवा न चापि सर्वे कुरवः समागताः ।
धनं हरेयुस्तव जातु धन्विनो बृहन्नला तूत्तरसारथिर्यदि ॥ २३
॥ ४-३८-२३ (२९९५८)
धनुष्यनवमश्चासीत्तस्य शिष्यो महात्मनः ।
सुदृष्टपूर्वो हि मया चरन्त्या पाण्डवालये ॥ २४ ॥ ४-३८-२४ (२९९५९)
स चानेन सहायेन खाण्डवं चादहत्पुरा ।
अर्जुनस्य तदाऽनेन संगृहीता हयोत्तमाः ॥ २५ ॥ ४-३८-२५ (२९९६०)
तेन सारथिना पार्थः सर्वभूतानि सर्वशः ।
अजयत्खाण्डवप्रस्थे न हि यन्ताऽस्ति तादृशः ॥ २६ ॥ ४-३८-२६ (२९९६१)
वैशम्पायन उवाच। ४-२८-२७क्ष् (३१४९)
ततः सैरन्ध्रिसहिता उत्तरा भ्रातुरब्रवीत् ।
अभ्यर्थयैनां सारथ्ये वीर शीघ्रं बृहन्नलाम् ॥ २७ ॥ ४-३८-२७ (२९९६२)
शिक्षितैषा हि सारथ्ये नर्तने गीतवादिते ।
सैरन्ध्र्याह महाप्राज्ञा स्तुवन्ती वै बृहन्नलाम् ॥ २८ ॥ ४-३८-२८ (२९९६३)
उत्तर उवाच। ४-३८-२९क्ष् (३१५०)
सैरन्ध्रि जानासि मम व्रतं हि क्लीबेन पुंसा न हि संवदाम्यहम् ।
सोहं न शक्ष्यामि बृहन्नलां शुभे वक्तुं स्वयं यच्छ हयान्ममेति
॥ २९ ॥ ४-३८-२९ (२९९६४)
सैरन्ध्र्युवाच। ४-३८-३०क्ष् (३१५१)
भयकाले तु संप्राप्ते न व्रतं नाव्रतं पुनः ।
यथा दुःखं प्रतरति कर्तुं युक्तं चरेद्बुधः ।
इति धर्मविदः प्राहुस्तस्माद्वाच्या बृहन्नला ॥ ३० ॥ ४-३८-३० (२९९६५)
येयं कुमारी सुश्रोणी भगिनी ते यवीयसी ।
अस्यास्तु वचनं वीर करिष्यति न संशयः ॥ ३१ ॥ ४-३८-३१ (२९९६६)
यदि ते सारथिः सा स्यात्कुरून्सर्वान्न संशयः ।
जित्वा गाश्च समादाय ध्रुवमागमनं भवेत् ॥ ३२ ॥ ४-३८-३२ (२९९६७)
वैशम्पायन उवाच। ४-३८-३३क्ष् (३१५२)
एवमुक्तः स सैरन्ध्र्या भगिनीं प्रत्यभाषत ।
गच्छ त्वमनवद्याङ्गि तामानय बृहन्नलाम् ॥ ३३ ॥ ४-३८-३३ (२९९६८)
सा प्राद्रवत्काञ्चनमाल्यधारिणी ज्येष्ठेन भ्रात्रा प्रहिता यशस्विनी ।
भ्रातुर्नियोगं तु निशम्य सुभ्रुः शुभानना हाटकवज्रभूषिता ॥ ३४

॥ ४-३८-३४ (२९९६९)
सा वज्रमुक्तामणिहेमकुण्डला मृदुक्रमा भ्रातृनियोगचोदिता ।
प्रदक्षिणावर्ततनुः शिखण्डिनी पद्मानना पद्मदलायताक्षी ॥ ३५
॥ ४-३८-३५ (२९९७०)
तन्वी समाङ्गी मृदुमन्द्रलोचना मात्स्यस्य राज्ञो दुहिता विलासिनी ।
सा नर्तनागारमरालपक्ष्मा शतह्रदा मेघमिवान्वपद्यत ॥ ३६
॥ ४-३८-३६ (२९९७१)
सा नागनासोपमसंहितोरूरनिन्दिता वेदिविलग्नमध्या ।
आसाद्य तस्थौ वरमाल्यधारिणी पार्थं शुभा नागवधूरिव द्विपम्
॥ ३७ ॥ ४-३८-३७ (२९९७२)
तामागतामायतताम्रलोचनामवेक्ष्य पार्थः समयेऽभ्यभाषत ॥ ३८ ॥
४-३८-३८ (२९९७३)
किमागता काञ्चनमाल्यधारिणी सुगात्रि किंचित्त्वरिताऽसि सुभ्रु ।
किं ते मुखं सुन्दरि न प्रसन्नमाचक्ष्व शीघ्रं मम चारुहासिनि
॥ ३९ ॥ ४-३८-३९ (२९९७४)
वैशम्पायन उवाच। ४-३८-४०क्ष् (३१५३)
सा वज्रवैडूर्यविकारकुण्डला विनिद्रपद्मोत्पलपन्नगन्धिनी ।
प्रसन्नताराधिपसंनिभानना पार्थे कुमारी वचनं बभाषे ॥ ४०
॥ ४-३८-४० (२९९७५)
उत्तरोवाच। ४-३८-४१क्ष् (३१५४)
हरन्ति वित्तं कुरवाः पितुर्मे शतं सहस्राणि गवां बृहन्नले ।
सा भ्रातुरश्वान्मम संयमस्व पुरा परे दूरतरं हरन्ति गाः ॥ ४१
॥ ४-३८-४१ (२९९७६)
सैरन्ध्रिराख्याति बृहन्नले त्वां सुशिक्षिता संग्रहणे रथाश्वयोः ।
अहं मरिष्यामि न मेऽत्र संशयो मया वृता तत्र न चेद्गमिष्यसि
॥ ४२ ॥ ४-३८-४२ (२९९७७)
वैशम्पायन उवाच। ४-३८-४३क्ष् (३१५५)
तथा नियुक्तो नरदेवकन्यया नरोत्तमः प्रीतमना धनञ्जयः ।
उवाच पार्थः शुभमन्द्रया गिरा शुभाननां शुक्लदतीं शुचिस्मिताम्
॥ ४३ ॥ ४-३८-४३ (२९९७८)
गच्छामि यत्रेच्छसि चारुहासिनि हुताशनं प्रज्वलितं विशामि वा ।
इच्छामि तेऽहं वरगात्रि जीवितं करोमि किं ते प्रियमद्य सुन्दरि ।
न मत्कृते द्रक्ष्यसि तत्पुरं प्रिये वैवस्वतं प्रेतपतेर्महाभयम्
॥ ४४ ॥ ४-३८-४४ (२९९७९)
वैशम्पायन उवाच । ४-३८-४५क्ष् (३१५६)
एतावदुक्त्वा कुरुवीरपुङ्गवो विलासिनीं शुक्लदतीं शुचिस्मिताम् ।

बृहन्नलारूपविभूषिताननो विराटपुत्रस्य समीपमाव्रजत् ॥ ४५
॥ ४-३८-४५ (२९९८०)
तथा व्रजन्तं वरभूषणैर्वृतं महाप्रभं वारणयूथपोपमम् ।
गजेन्द्रबाहुं कमलायतेक्षणं कवाटवक्षस्थलमुन्नतांसम् ॥ ४६
॥ ४-३८-४६ (२९९८१)
तमागतं पार्थममित्रकर्शनं महाबलं नागमिव प्रमाथिनम् ।
वैराटिरामन्त्र्य ततो बृहन्नलां गवां निनीषन्पदमुत्तरोऽब्रवीत्
॥ ४७ ॥ ४-३८-४७ (२९९८२)
तमाव्रजन्तं त्वरितं प्रभिन्नमिव कुञ्जरम् ।
अन्वगच्छद्विशालाक्षी गजं गजवधूरिव ॥ ४८ ॥ ४-३८-४८ (२९९८३)
दूरादेव तु संप्रेक्ष्य राजपुत्रोऽभ्यभाषत ।
त्वया सारथिना पार्थः खाण्डवेऽग्निमतर्पयत् ॥ ४९ ॥ ४-३८-४९ (२९९८४)
पृथिवीं चाजयत्कृत्स्नां कुन्तीपुत्रो धनञ्जयः ।
सैरन्ध्री त्वां ममाचष्ट सा हि जानाति पाण्डवान् ॥ ५० ॥ ४-३८-५० (२९९८५)
देवेन्द्रसारथिर्वीरो मातलिः ख्यातविक्रमः ।
सुमहो जामदग्नेश्च विष्णोर्यन्ता च दारुकः ॥ ५१ ॥ ४-३८-५१ (२९९८६)
सुमन्त्रो वा दाशरथेः सूर्ययन्ता तथाऽरुणः ।
सर्वे सारथयः ख्याता न बृहन्नलया समाः ॥ ५२ ॥ ४-३८-५२ (२९९८७)
इत्युक्तोऽहं च सैरन्ध्र्या तेन त्वामाह्वयामि वै ।
आहुता त्वं मया सार्धं योद्धुं याहि बृहन्नले ॥ ५३ ॥ ४-३८-५३ (२९९८८)
दूराद्दूरतरं गावो भवन्ति कुरुभिर्हृताः ।
तथोक्ता प्रत्युवाचेदं राजपुत्रं बृहन्नला ॥ ५४ ॥ ४-३८-५४ (२९९८९)
का शक्तिर्मम सारथ्यं कर्तुं संग्राममूर्धनि ।
नृत्तं वा यदि वा गीतं वादित्रं वा पृथग्विधम् ।
तत्करिष्यामि भद्रं ते सारथ्यं तु कुतो मम ॥ ५५ ॥ ४-३८-५५ (२९९९०)
उत्तर उवाच। ४-३८-५६क्ष् (३१५७)
त्वं नर्तको वा यदि वाऽपि गायकः क्षिप्रं तनुत्रं परिधत्स्व भानुमत् ।
अभीक्ष्णमाहुस्तव कर्म पौरुषं स्त्रियः प्रशंसन्ति ममाद्य चान्तिके
॥ ५६ ॥ ४-३८-५६ (२९९९१)
वैशम्पायन उवाच। ४-३८-५७क्ष् (३१५८)
इत्येवमुक्त्वा नृपसूनुसत्तमस्तदा स्मयित्वाऽर्जुनमभ्यनन्दयत् ।
अथोत्तरः पारशवं शताक्षिमत्सुवर्णचित्रं परिगृह्य भानुमत्
॥ ५७ ॥ ४-३८-५७ (२९९९२)
बृहन्नलायै प्रददौ स्वयं तदा विराटपुत्रः परवीरघातिने ।
तदाज्ञया मात्स्यसुतस्य वीर्यवानकर्तुकामेव समाददे तदा ॥ ५८
॥ ४-३८-५८ (२९९९३)

बृहन्नलोवाच। ४-३८-५९क्ष् (३१५९)
यद्यस्ति च रणे शौर्यं शक्यः स्यादिद्विषतां वधः ।
अहं त्वामभिगच्छामि यत्र त्वं यासि तत्र भो ॥ ५९ ॥ ४-३८-५९ (२९९९४)
वैशम्पायन उवाच। ४-३८-६०क्ष् (३१६०)
ततः स नर्मसंयुक्तमकरोत्पाण्डवो बहु ।
उत्तरायाः प्रमुखतः सर्वं जानन्नरिन्दमः ॥ ६० ॥ ४-३८-६० (२९९९५)
तमाददानं प्रमदा जहासिरे ह्यधोमुखं वीरवरोऽभ्यधारयत् ।
ततस्तिरश्चीनकृतं सपत्नहा ह्यधोमुखं कवचमथाभ्यकर्षत
॥ ६१ ॥ ४-३८-६१ (२९९९६)
सम्यक्प्रजानन्नपि सत्यविक्रमो ह्यज्ञातवत्सर्वकुरुप्रवीरः ।
ऊर्ध्वं क्षिपन्वीरतरोऽभ्यधारयत्पुनश्च यन्ता कवचं धनञ्जयः
॥ ६२ ॥ ४-३८-६२ (२९९९७)
एवंप्रकाराणि बहूनि कुर्वति तस्मिन्कुमार्यः प्रमदा जहासिरे ।
तथापि कुर्वन्तममित्रकर्शनं नैवोत्तरः पर्यभवद्धनञ्जयम्
॥ ६३ ॥ ४-३८-६३ (२९९९८)
तं राजपुत्रः समनाहयत्स्वयं जाम्बूनदान्तेन शुभेन वर्मणा ।
कृशानुतप्तप्रतिमेन भास्वता जाज्वल्यमानेन सहस्ररश्मिना ॥ ६४
॥ ४-३८-६४ (२९९९९)
अथास्य शीघ्रं प्रसमीक्ष्य भोजयद्रथे हयान्काञ्चनजालसंवृतान् ।
सुवर्णजालान्तरयोक्तभूषणं सिंहं च सौवर्णमुपाश्रयद्रथे ॥ ६५
॥ ४-३८-६५ (३००००)
धनूंषि च विचित्राणि बाणांश्च रुचिरान्बहून् ।
आयुधानि च वै तत्र रथोपस्थे च स न्यसत् ॥ ६६ ॥ ४-३८-६६ (३०००१)
आरुह्य प्रययौ वीरः सबृहन्नलसारथिः ।
अथोत्तरा च कन्याश्च स ख्यश्चैवाब्रुवंस्तदा ॥ ६७ ॥ ४-३८-६७ (३०००२)
बृहन्नले आनयेथा वासांसि रुचिराणि नः ।
पाञ्चालिकार्थं सूक्ष्माणि रत्नानि विविधानि च ।
विजित्य संग्रामगतान्भीष्मद्रोणमुखान्कुरून् ॥ ६८ ॥ ४-३८-६८ (३०००३)
अथ ता ब्रुवतीः कन्याः सहिताः कुरुनन्दनः ।
प्रत्युवाच हसन्पार्थो मेघदुन्दुभिनिस्वनः ॥ ६९ ॥ ४-३८-६९ (३०००४)
यद्युत्तरोऽयं संग्रामे विजेष्यति महारथान् ।
अथाहरिष्ये वासांसि सूक्ष्माण्याभरणानि च ॥ ७० ॥ ४-३८-७० (३०००५)
वैशम्पायन उवाच। ४-३८-७१क्ष् (३१६१)
अथोत्तरो वर्म महाप्रभावं सुवर्णवैडूर्यपरिष्कृतं शुभम् ।
आमुच्य वीरः प्रययौ रथोत्तमं धनञ्जयं सारथिनं प्रगृह्य
॥ ७१ ॥ ४-३८-७१ (३०००६)

तमुत्तरं प्रेक्ष्य रथोत्तमे स्थितं बृहन्नलां चैव महाजनस्तदा ।
स्त्रियश्च कन्याश्च द्विजाश्च सुव्रताः प्रदक्षिणं
मङ्गलिनोऽभ्यपूजयन् ॥ ७२ ॥ ४-३८-७२ (३०००७)
यदर्जुनस्यर्षभतुल्यगामिनः पुराऽभवत्खाण्डवदाहमङ्गलम् ।
कुरून्समासाद्य रणे बृहन्नले सहोत्तरेणास्तु तवाद्य मङ्गलम् ॥ ७३
॥ ॥ ४-३८-७३ (३०००८)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-३८-३५ शिखण्डिनी मयूरपिच्छालंकारवती ॥
३५ ॥

विराटपर्व - अध्याय ०३९
॥ श्रीः ॥
४.३९. अध्यायः ३९

Mahabharata - Virata Parva - Chapter Topics
उत्तरेण कुरुसेनावलोकनमात्रेण रथादवस्कन्द्य भयात्पलायनम् ॥ १ ॥
तमनुधाविनाऽर्जुनेन तस्य केशपाशे ग्रहणेन परिसान्त्वनपूर्वकं
पुना रथारोपणम् ॥ २ ॥
तथा तेन सह गाण्डीवाद्यानयनाय शमींप्रति गमनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-३९-० (३०००९)
वैशम्पायन उवाच। ४-३९-०क्ष् (३१६२)
स राजधान्य निर्याय वैराटिरकुतोभयः ।
प्रयाहीत्यब्रवीत्सूतं यत्र ते कुरवो गताः ॥ १ ॥ ४-३९-१ (३००१०)
समवेतान्कुरून्सर्वाञ्जिगीषूनवजित्य वै ।
गाश्चैताः क्षिप्रमादाय पुनरेष्याम्यहं पुरम् ॥ २ ॥ ४-३९-२ (३००११)
ततस्तांश्चोदयामास सदश्वान्पाण्डुनन्दनः ॥ ३ ॥ ४-३९-३ (३००१२)
ते हया नरसिंहेन चोदिता वातरंहसः ।
आलिखन्त इवाकाशमूहुः काञ्चनमालिनः ॥ ४ ॥ ४-३९-४ (३००१३)
नातिदूरमथो गत्वा मात्स्यपुत्रधनञ्जयौ ।
अवैक्षेतामवित्रस्तौ कुरूणां बलिनां बलम् ॥ ५ ॥ ४-३९-५ (३००१४)

श्मशानमभितो गत्वा शूरौ ददृशतुःकुरून् ॥ ६ ॥
तदनीकं महत्तेषां विस्तृतं सागरोपमम् । ४-३९-६ (३००१५)
सर्पमाणमिवाकाशे वनं बहुलपादपम् ॥ ७ ॥
ददृशे पार्थिवो रेणुर्जनितस्तेन सर्पता। ४-३९-७ (३००१६)
दृष्टिप्रणाशो भूतानां दिवस्पृक्कुरुसत्तम ॥ ८ ॥
तदनीकमथो वीक्ष्य गजाश्वरथसंकुलम् । ४-३९-८ (३००१७)
कर्णदुर्योधनकृपैर्गुप्तं शान्तनवेन च ।
द्रोणेन सह पुत्रेण महेष्वासेन धीमता ॥ ९ ॥ ४-३९-९ (३००१८)
हृष्टरोमा भयोद्विग्नो निमील्य स्वदृशौ तदा ।
कम्पमानशरीरश्च पार्थं वैराटिरब्रवीत् ॥ १० ॥ ४-३९-१० (३००१९)
नोत्सहे कुरुभिर्योद्धुं रोमहर्षं हि पश्य मे ।
बहुप्रवीरमत्युग्रं देवैरपि दुरासदम् ।
प्रतियोद्धुं न शक्नोमि कुरुसैन्यं भयानकम् ॥ ११ ॥ ४-३९-११ (३००२०)
नाशंसे भारतीं सेनां प्रवेष्टुं भीमकार्मुकाम् ।
देवैरपि सहेन्द्रेण न शक्यं किंपुनर्नरैः ॥ १२ ॥ ४-३९-१२ (३००२१)
रथनागाश्वकलिलं पत्तिध्वजसमाकुलम् ।
दृष्ट्वैव हि परानीकं मनः प्रव्यथतीव मे ॥ १३ ॥ ४-३९-१३ (३००२२)
यत्र द्रोणश्च भीष्मश्च कृपः कर्णो विविंशतिः ।
अश्वत्थामा विकर्णश्च सोमदत्तश्च बाह्लिकः ।
दुर्योधनस्तथा राजा वीरो दुर्मर्षणः परः ॥ १४ ॥ ४-३९-१४ (३००२३)
नीतिमन्तो महेष्वासाः सर्वे युद्धविशारदाः ।
मत्ता इव महानागा युक्तध्वजपताकिनः ॥ १५ ॥ ४-३९-१५ (३००२४)
नीतिमन्तो महेष्वासाः सर्वार्थकृतनिश्चयाः ।
ताञ्जेतुं समरे शूरान्दुर्बुद्धिरहमागतः ॥ १६ ॥ ४-३९-१६ (३००२५)
दृष्ट्वैव हि कुरून्सर्वान्व्यूढानीकान्प्रहारिणः ।
हृषितानि च रोमाणि कश्मलेनाहतं मनः ॥ १७ ॥ ४-३९-१७ (३००२६)
वैशम्पायन उवाच। ४-३९-१७क्ष् (३१६३)
दृष्ट्वा तु महतीं सेनां कुरूणां दृढधन्विनाम् ।
परिदेवयते मन्दः सकाशे सव्यसाचिनः ॥ १८ ॥ ४-३९-१८ (३००२७)
त्रिगर्तान्मे पिता यातः शून्ये वै प्रणिधाय माम् ।
सर्वां सेनामुपादाय न मे सन्तीह सैनिकाः ॥ १९ ॥ ४-३९-१९ (३००२८)
अहमेको बहून्बालः कृतास्त्रानकृतश्रमः ।
प्रतियोद्धुं न शक्नोति निवर्तय बृहन्नले ॥ २० ॥ ४-३९-२० (३००२९)
वैशम्पायन उवाच। ४-३९-२१क्ष् (३१६४)
तं तथा वादिनं तत्र बीभत्सुः प्रत्यभाषत ।
संप्रहस्य पुनस्तं वै सर्वलोकमहारथः ॥ २१ ॥ ४-३९-२१ (३००३०)

भयेन दीनरूपोऽसि द्विषतां हर्षवर्धनः ।
न च तावत्कृतं किंचित्परैः कर्म रणाजिरे ॥ २२ ॥ ४-३९-२२ (३००३१)
स्वयमेव च मामात्थ नय मां कौरवान्प्रति ।
सोहं त्वां तत्र नेष्यामि यत्रैते बहुला ध्वजाः ॥ २३ ॥ ४-३९-२३ (३००३२)
मध्यमामिषगृध्नूनां कुरूणामाततायिनाम् ।
नेष्यामि त्वां महाबाहो मा त्वं हि विमना भव ।
समुद्रमिव गम्भीरं कुरुसैन्यमरिन्दम ॥ २४ ॥ ४-३९-२४ (३००३३)
स्त्रीसकाशे प्रतिज्ञाय पुरुषाणां हि शृण्वताम् ।
विकत्थमानो निर्यात्वा ब्रूषि किं नात्र युद्ध्यसे ॥ २५ ॥ ४-३९-२५ (३००३४)
तथा स्त्रीषु प्रतिश्रुत्य पौरुषं पुरुषेषु च ।
रथमारुह्य निर्यात्वा किमर्थं नावबुध्यसे ॥ २६ ॥ ४-३९-२६ (३००३५)
न चेद्विजित्य गास्त्वं हि नगरं प्रतियास्यसि ।
प्रहसिष्यन्ति वीरास्त्वां नरा नार्यश्च संगताः ॥ २७ ॥ ४-३९-२७ (३००३६)
अहमप्यस्मि सैरन्ध्र्या स्तुतः सारथ्यकर्मणि ।
नाहं शक्नोम्यनिर्जित्य गाः प्रयातुं पुरं प्रति ॥ २८ ॥ ४-३९-२८ (३००३७)
स्तोत्रेण चैव सैरन्ध्र्यास्तव वाक्येन चोदितः ।
कथं न युद्ध्येयमहं कुरूनेतान्स्थिरो भव ॥ २९ ॥ ४-३९-२९ (३००३८)
उत्तर उवाच। ४-३९-३०क्ष् (३१६५)
कामं हरन्तु मात्स्यानां भूयांसः कुरवो धनम् ।
प्रहसन्तु च मां नार्यो नरा वाऽपि बृहन्नले ॥ ३० ॥ ४-३९-३० (३००३९)
संग्रामेण न मे कार्यं गावो गच्छन्तु चापि मे ।
नगरं च प्रवेक्ष्यामि पश्यतस्ते बृहन्नले ॥ ३१ ॥ ४-३९-३१ (३००४०)
वैशम्पायन उवाच। ४-३९-३२क्ष् (३१६६)
इत्युक्त्वा प्राद्रवद्भीतो रथात्प्रस्कन्द्य कुण्डली ।
त्यक्त्वा मानं सुसंत्रस्तो विसृज्य सशरं धनुः ॥ ३२ ॥ ४-३९-३२ (३००४१)
अर्जुन उवाच। ४-३९-३३क्ष् (३१६७)
नैष शूरैः स्मृतो धर्मः क्षत्रियस्य पलायनम् ।
श्रेयो हि मरणं युद्धे न भीतस्य पलायनम् ॥ ३३ ॥ ४-३९-३३ (३००४२)
वैशम्पायन उवाच। ४-३९-३४क्ष् (३१६८)
एवमुक्त्वा तु कौरव्यः सोऽवप्लुत्य रथोत्तमात् ।
तमन्वधावद्धावन्तं राजपुत्रं धनञ्जयः ।
दीर्घां वेणीं विधून्वानः साधु रक्ते च वाससी ॥ ३४ ॥ ४-३९-३४ (३००४३)
विक्रमन्तं पदन्यासैर्नमयन्तं च भूतलम् ।
विधूय वेणीं धावन्तमजानन्तोऽर्जुनं तदा ।
सैनिकाः प्राहसन्केचिद्योषिद्रूपमवेक्ष्य तम् ॥ ३५ ॥ ४-३९-३५ (३००४४)
तं च शीघ्रं प्रधावन्तं संप्रेक्ष्य कुरवोऽब्रुवन् ।

कोऽयं धावत्यसङ्गेन पूर्वं मुक्त्वा रथोत्तमम् ॥ ३६ ॥ ४-३९-३६ (३००४५)
क एष वेषसंच्छन्नो भस्मनेव हुताशनः ।
किंचिदस्य यथा पुंसः किंचिदस्य यथा स्त्रियः ॥ ३७ ॥ ४-३९-३७ (३००४६)
इत्येवं सैनिकाः प्राहुर्द्रोणस्तानिदमब्रवीत् ।
आचार्यः कुरुपाण्डूनां मतौ शुक्राङ्गिरोपमः ॥ ३८ ॥ ४-३९-३८ (३००४७)
किं विचारेण वः कार्यमेतेनानुसृतेन वा ।
धावन्तमनुधावंश्च निर्भयो भयविप्लुतम् ।
वेणीकलापं निर्धूय प्रविभाति नरर्षभः ॥ ३९ ॥ ४-३९-३९ (३००४८)
आकारमर्जुनस्येव क्लीबरूपं बिभर्ति च ।
रूपेण पार्थसदृशः स्त्रीवेषसमलंकृतः ॥ ४० ॥ ४-३९-४० (३००४९)
तदेवैतच्छिरोग्रीवं तौ बाहू परिघोपमौ ।
तत्तदेवास्य विक्रान्तं नायमन्यो धनञ्जयात् ॥ ४१ ॥ ४-३९-४१ (३००५०)
अमरेष्विव देवेन्द्रो मनुष्येषु धनञ्जयः ।
एकः कोस्मानुपायायादन्यो लोके धनञ्जयात् ॥ ४२ ॥ ४-३९-४२ (३००५१)
द्रोणेन चैवमुक्तस्तु कर्णः प्रोवाच बुद्धिमान् ।
एकः पुत्रो विराटस्य शून्ये संनिहितः पुरे ॥ ४३ ॥ ४-३९-४३ (३००५२)
स एष किल निर्यातो बालभावान्न पौरुषात् ।
क्लीबं वै सारथिं कृत्वा निर्यातो नगराद्बहिः ॥ ४४ ॥ ४-३९-४४ (३००५३)
छन्नं सत्रेण वै नूनं जानीध्वं यान्तमर्जुनम् ।
ते हि नः प्रतिसंयातुं संग्रामे न हि शक्नुयुः ।
कथमेकतरस्तेषां समस्तान्योधयेत्कुरून् ॥ ४५ ॥ ४-३९-४५ (३००५४)
उत्तरः सारथिं कृत्वा निर्यातो नगराद्बहिः ।
स नो मन्ये ध्वजं दृष्ट्वा भीत एष पलायति ॥ ४६ ॥ ४-३९-४६ (३००५५)
कृप उवाच। ४-३९-४७क्ष् (३१६९)
नूनं तमेव धावन्तं जिघृक्षति धनञ्जयः ।
सारथिं ह्युत्तरं कृत्वा स्वयं योद्धुमिहेच्छति ॥ ४७ ॥ ४-३९-४७ (३००५६)
वैशम्पायन उवाच। ४-३९-४८क्ष् (३१७०)
इति स्म कुरवः सर्वे विमृशन्तः पृथक्पृथक् ।
न च व्यवसितुं वीरा अर्जुनं शक्नुवन्ति ते ॥ ४८ ॥ ४-३९-४८ (३००५७)
दुर्योधन उवाचेदं सैनिकान्रथसत्तमान् ।
अर्जुनो वासुदेवो वा रामः प्रद्युम्न एव वा ।
ते हि नः प्रतिसंयातुं संग्रामे न हि शक्नुयुः ॥ ४९ ॥ ४-३९-४९ (३००५८)
अन्यो वै क्लीबरूपेण यद्यागच्छेद्गवां पदम् ।
शस्त्रैस्तीक्ष्णैरर्पयित्वा पातयिष्यामि भूतले ।
कथमेकतरस्तेषां समस्तान्योधयेत्कुरून् ॥ ५० ॥ ४-३९-५० (३००५९)
वैशम्पायन उवाच। ४-३९-५१क्ष् (३१७१)

छन्नं तथा तं वेषेण पाण्डवं प्रेक्ष्य सैनिकाः ।
अर्जुनेति च नेत्येव न व्यवस्यन्ति ते पुनः ।
इति स्म कुरवः सर्वे विमृशन्तः पुनः पुनः ॥ ५१ ॥ ४-३९-५१ (३००६०)
दृढेवधी महासत्त्वः शक्रतुल्यपराक्रमः ।
अद्यागच्छति चेद्योद्धुं सर्वं संशयितं बलम् ॥ ५२ ॥ ४-३९-५२ (३००६१)
न चाप्यन्यतरं तत्र व्यवस्यन्ति धनञ्जयात् ॥ ५३ ॥ ४-३९-५३ (३००६२)
उत्तरं तु प्रधावन्तमनुद्रुत्य धनञ्जयः ।
गत्वा शतपदं तूर्णं केशपक्षे परामृशत् ॥ ५४ ॥ ४-३९-५४ (३००६३)
मा मा गृहाण भद्रं ते दासोऽहं ते बृहन्नले ।
इति वादिनमेवाशु धावन्तं तरसाऽग्रहीत् ।
विराटपुत्रं बीभत्सुर्बलवानरिमर्दनः ॥ ५५ ॥ ४-३९-५५ (३००६४)
सोऽर्जुनेन परामृष्टः पर्यदेवयदार्तवत् ।
बहुलं कृपणं चैव वित्तं प्रावेदयद्बहु ॥ ५६ ॥ ४-३९-५६ (३००६५)
सुवर्णमणिमुक्तानां यद्यदिच्छसि दद्मि ते ।
हस्तिनोश्वान्रथान्गावः स्त्रियश्च समलङ्कृताः ॥ ५७ ॥ ४-३९-५७ (३००६६)
शातकुम्भस्य शुद्धस्य श्रेष्ठस्य रजतस्य च ।
ददामि शतनिष्कं ते मुञ्च मां त्वं बृहन्नले ॥ ५८ ॥ ४-३९-५८ (३००६७)
षष्टिं स्वलंकृताः कन्या ग्राममेकं ददामि ते ।
मुञ्च मां त्वं भृशं दीनं विह्वलं भयकम्पितम् ॥ ५९ ॥ ४-३९-५९
(३००६८)
मणीनष्टौ च वैडूर्यान्हेमबद्धान्महाप्रभान् ।
हेमदण्डप्रतिच्छन्नं रथं युक्तं तु वाजिभिः ॥ ६० ॥ ४-३९-६० (३००६९)
मत्तांश्च दश मातङ्गान्मुञ्च मां त्वं बृहन्नले ।
गमिष्यामि पुरं षण्ड द्रष्टुं मातरमद्य ताम् ॥ ६१ ॥ ४-३९-६१ (३००७०)
एकोऽहमेव मे मातुः कुमारः किं ब्रुवे ततः ।
विधिरेवंविधे काले त्वद्वशं कुरुते हि माम् ॥ ६२ ॥ ४-३९-६२ (३००७१)
मात्स्यस्य पुत्रो बालोऽहं तेन चास्मि सुपोषितः ।
मातृपार्श्वशयानोऽहमस्पृष्टातपवायुमान् ॥ ६३ ॥ ४-३९-६३ (३००७२)
अदृष्टबालयुद्धोऽहं कुतस्ते कुरवः कुतः ।
मातृपार्श्वं गमिष्यामि मुञ्च मां त्वं बृहन्नले ॥ ६४ ॥ ४-३९-६४
(३००७३)
प्रलयार्णवसंकाशं दृश्यते कौरवं बलम् ॥ ६५ ॥ ४-३९-६५ (३००७४)
स्त्रीणां मध्येऽहमज्ञानाद्वीर्यशौर्याङ्कितां गिरम् ।
उक्तो यौवनगर्वेण को जेतुं शक्नुयात्कुरून् ।
अमुक्त्वा मां यदि नयेर्मरिष्यामि तवाग्रतः ॥ ६६ ॥ ४-३९-६६ (३००७५)
वैशम्पायन उवाच। ४-३९-६७क्ष् (३१७२)

एवमादीनि वाक्यानि विलपन्तमचेतसम् ।
प्रसभं पुरुषव्याघ्रो रथस्यान्तिकमानयत् ॥ ६७ ॥ ४-३९-६७ (३००७६)
अथैनमब्रवीत्पार्थो भयार्तं नष्टचेतसम् ॥ ६८ ॥ ४-३९-६८ (३००७७)
अहं योत्स्यामि कौरव्यैर्हयान्संयच्छ मेति माम् ।
आददानः किमर्थं त्वं पलायनपरोऽभवः ॥ ६९ ॥ ४-३९-६९ (३००७८)
युध्यस्व कौरवैः सार्धं विजयस्ते भविष्यति ।
यस्य यन्तास्म्यहं युद्धे संयच्छामि हयोत्तमान् ।
राज्ञो वा राजपुत्रस्य तस्य युद्धे जयो ध्रुवम् ॥ ७० ॥ ४-३९-७० (३००७९)
सर्वथोत्तर युध्यस्व यन्त्रा सह मया कुरून् ।
जित्वा महीं यशः प्राप्य भोक्ष्यसे सकलामिमाम् ॥ ७१ ॥ ४-३९-७१ (३००८०)
हतो वा प्राप्ससे स्वर्गं न श्रेयस्ते पलायनम् ॥ ७२ ॥ ४-३९-७२ (३००८१)
अद्य सर्वान्कुरूञ्जित्वा यथा जयमवाप्स्यसि ।
तथाऽहं प्रयतिष्येऽत्र सहायोऽत्र मतो ह्यहम् ॥ ७३ ॥ ४-३९-७३ (३००८२)
यदि नोत्सहसे योद्धुं शत्रुभिः शत्रुकर्शन ।
एहि मे त्वं हयान्यच्छ युध्यमानस्य शत्रुभिः ॥ ७४ ॥ ४-३९-७४ (३००८३)
प्रयाह्येतद्रथानीकं मद्बाहुपरिरक्षितः ।
अप्रधृष्यतमं घोरं गुप्तं घोरैर्महारथैः ।
मा भैस्त्वं राजपुत्राग्र्य क्षत्रियोसि परंतप ॥ ७५ ॥ ४-३९-७५ (३००८४)
अहं तैः कुरुभिर्योत्स्ये प्रत्यानेष्यामि ते पशून् ।
प्रविशैतद्रथानीकमप्रधृष्यं दुरासदम् ॥ ७६ ॥ ४-३९-७६ (३००८५)
यन्ता भव नरश्रेष्ठ योत्स्येऽहं कुरुभिः सह ।
शूरान्समरचण्डांश्च नयिष्ये यमसादनम् ॥ ७७ ॥ ४-३९-७७ (३००८६)
वैशम्पायन उवाच। ४-३९-७८क्ष् (३१७३)
एवं ब्रुवाणो वैराटिं बीभत्सुरपराजितः ।
समाश्वास्य भयार्तं तमुत्तरं भरतर्षभः ॥ ७८ ॥ ४-३९-७८ (३००८७)
इतस्ततो विवेष्टन्तमकामं भयपीडितम् ।
रथमारोपमायास पार्थः परपुरंजयः ॥ ७९ ॥ ४-३९-७९ (३००८८)
तमारोप्य रथोपस्थे विलपन्तं धनञ्जयः ।
गाण्डीवं धनुरादातुमुपायात्तां शमीं प्रति। ४-३९-८० (३००८९)
उत्तरं तं समाश्वास्य कृत्वा यन्तारमर्जुनः ॥ ८० ॥ ॥ ४-३९-८१ (३००९०)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

विराटपर्व - अध्याय ०४०
॥ श्रीः ॥
४.४०. अध्यायः ४०

Mahabharata - Virata Parva - Chapter Topics
उत्तरेणार्जनचोदनया शमीमारुह्य धनुरादानम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-४०-० (३००९१)
वैशम्पायन उवाच। ४-४०-०क्ष् (३१७४)
तं दृष्ट्वा क्लीबरूपेण रथस्थं रथिपुङ्गवम् ।
शमीमभिमुखं यान्तं रथमारोप्य चोत्तरम् ॥ ४-४०-१ (३००९२)
द्रोणभीष्मादयः शूराः कुरूणां रथिसत्तमाः ।
वित्रस्तमनसश्चासन्धनञ्जयकृताद्भयात् ॥ ४-४०-२ (३००९३)
तानवेक्ष्य हतोत्साहानुत्पातानपि चाद्भुतान् ।
गुरुः शस्त्रभृतांश्रेष्ठो भारद्वाजोऽभ्यभाषत ॥ ४-४०-३ (३००९४)
स्वराश्च वाताः संयान्ति रूक्षाः परुषनिस्वनाः ।
भस्मवर्षप्रकाशेन तमसा संवृतं नभः ॥ ४-४०-४ (३००९५)
रूक्षवर्णाश्च जलदा दृश्यन्तेऽद्भुतदर्शनाः ।
निःसरन्ति च कोशेभ्यः शस्त्राणि विविधानि च ॥ ४-४०-५ (३००९६)
शिवाश्च विनदन्त्येता दीप्तायां दिशि दारुणाः ।
हयाश्चाश्रूणि मुञ्चन्ति ध्वजाः कम्पन्त्यकम्पिताः ॥ ४-४०-६ (३००९७)
यादृशान्यत्र दृश्यन्ते रूपाणि विविधानि च ।
यत्ता भवन्तस्तिष्ठन्तु युद्धं स्यात्समुपस्थितम् ॥ ४-४०-७ (३००९८)
रक्षध्वमपि राजानं व्यूहध्वं वाहिनीमपि ।
वैशसं च प्रतीक्षध्वं रक्षध्वं चापि गोधनम् ॥ ४-४०-८ (३००९९)
एष वीरो महेष्वासः सर्वशस्त्रभृतांवरः ।
आगतः क्लीबवेषेण पार्थो नास्त्यत्र संशयः ॥ ४-४०-९ (३०१००)
एतावदुक्त्वा वचनं भीष्ममालोक्य चाब्रवीत् ॥ ४-४०-१० (३०१०१)
नदीज लङ्केशवनारिकेतुर्नगाह्वयो नाम नगारिसूनुः ।
गत्या सुरेशः क्वचिदङ्गनेव गुरुर्बभाषे वचनं तदानीम्
॥ ४-४०-११ (३०१०२)
वैशम्पायन उवाच। ४-४०-१२क्ष् (३१७५)
इत्युक्त्वा संज्ञया द्रोणस्तूष्णीमासीद्विशांपते ।
भारद्वाजवचः श्रुत्वा गाङ्गेयः संज्ञयाऽब्रवीत् ॥ ४-४०-१२ (३०१०३)
अतीतं चक्रमस्माकं विषयान्तरमागताः ।
अतीतः समयश्चोक्त अस्माभिर्यः सभातले ।
न भयं शत्रुतः कार्यं शङ्कां त्यज नरर्षभ ॥ ४-४०-१३ (३०१०४)

देवव्रतेनैवमुक्ते वचने हितकारिणा ।
दुर्योधनमथालोक्य संज्ञया द्रोण अब्रवीत् ॥ ४-४०-१४ (३०१०५)
एष वीरो महेष्वासः सर्वशस्त्रभृतांवरः ।
आगतः क्लीबरूपेण पार्थो नास्त्यत्र संशयः ॥ ४-४०-१५ (३०१०६)
एष पार्थो हि विक्रान्तः सव्यसाची परन्तपः ।
ये जेतारो महीपानाममुना कुरवो हताः ॥ ४-४०-१६ (३०१०७)
यस्मिञ्जाते मही कृत्स्ना निर्भरोच्छ्वासिताऽभवत् ।
येन मे दक्षिणा दत्ता बद्ध्वा द्रुपदमोजसा ॥ ४-४०-१७ (३०१०८)
विद्ध्वा वियद्गतं लक्ष्यं विनिर्जित्य च पार्थिवान् ।
निर्जिता येन पाञ्चाली पुरा येन स्वयंवरे ॥ ४-४०-१८ (३०१०९)
खाण्डवे येन संतृप्तो वह्निर्जित्वा सुरासुरान् ।
परिणीता सुभद्रा च येन निर्जित्य यादवान् ॥ ४-४०-१९ (३०११०)
निर्जितो येन युद्धेन त्रिपुरारिः स्मरार्दनः ॥ ४-४०-२० (३०१११)
गत्वा त्रिविष्टपं येन जितेन्द्रा दानवा युधि ।
निवातकवचा राजन्दानवानां त्रिकोटयः ।
निर्जिताः कालकेयाश्च हिरण्यपुरवासिनः ॥ ४-४०-२१ (३०११२)
येन त्वं मोचितो बद्धश्चित्रसेनेन तद्वने ॥ ४-४०-२२ (३०११३)
येन गत्वोत्तरं मेरोरानिनाय महद्धनम् ।
याजितो धर्मसूनुश्च नृपान्सर्वान्विजित्य च ॥ ४-४०-२३ (३०११४)
यस्मिञ्शौर्यं च वीर्यं च तेजो धैर्यं पराक्रमः ।
औदार्यं चैव गाम्भीर्यं श्रीर्ह्रीर्धर्मो दयाऽऽर्जवम् ।
एवमादिगुणोपेतः सोयं पार्थो न संशयः ॥ ४-४०-२४ (३०११५)
नाजित्वा विनिवर्तेत सर्वानपि मरुद्गणान् ॥ ४-४०-२५ (३०११६)
क्लेशितश्च वने शूरो वासवेन च शिक्षितः ।
अमर्षवशमापन्नो योत्स्यते नात्र संशयः ।
न ह्यस्य प्रतियोद्धारमन्यं पश्यामि कौरव ॥ ४-४०-२६ (३०११७)
महादेवोपि पार्थेन श्रूयते युद्धतोषितः ।
किरातवेषप्रच्छन्नो गिरौ हिमवति प्रभुः ॥ ४-४०-२७ (३०११८)
इत्येवंवादिनं द्रोणं कर्णः क्रुद्धोऽभ्यभाषत ॥ ४-४०-२८ (३०११९)
सदा भवान्फल्गुनस्य गुणानस्मासु कत्थसे ।
न चार्जुनः कलापूर्णो मम दुर्योधनस्य वा ॥ ४-४०-२९ (३०१२०)
दुर्योधन उवाच। ४-४०-३०क्ष् (३१७६)
यद्येष पार्थो राधेय कृतं कार्यं भवेन्मम ।
ज्ञाताः पुनश्चरिष्यन्ति द्वादशान्यांश्च वत्सरान् ॥ ४-४०-३० (३०१२१)
अथवा कश्चिदेवान्यः क्लीबरूपेण देवराट् ।
शरैरेनं सुनिशितैः पातयिष्यामि भूतले ॥ ४-४०-३१ (३०१२२)

वैशम्पायन उवाच। ४-४०-३२क्ष् (३१७७)
तस्मिन्वदति तां वाचं धार्तराष्ट्रे परन्तपे ।
भीष्मो द्रोणः कृपो द्रौणिः पौरुषं तदपूजयन् ॥ ४-४०-३२ (३०१२३)
तां शमीमभिसंगम्य पार्थो वैराटिमब्रवीत् ।
सुखसंवर्धितं पित्रा समराणामकोविदम् ॥ ४-४०-३३ (३०१२४)
एहि भूमिंजयारुह्य वैराटे महतीं शमीम् ।
समादिष्टो मया क्षिप्रं धनुर्गाण्डीवमानय ॥ ४-४०-३४ (३०१२५)
नेमानीष्वासनानीह सोढुं शक्ष्यन्ति मे बलम् ।
नालं भारं गुरुं भेत्तुं कुञ्जरं वा प्रमर्दितुम् ॥ ४-४०-३५ (३०१२६)
मम वा बाहुविक्षेपं शत्रूनिह विजेष्यतः ।
नेच्छामि तैरहं कर्तुं कर्म वैजयिकं त्विह ॥ ४-४०-३६ (३०१२७)
अतिसूक्ष्माणि ह्रस्वानि सर्वाणि च मृदूनि च ।
आयुधानि महाबाहो तवैतानि महाबल ॥ ४-४०-३७ (३०१२८)
तस्माद्भूमिंजयारुह्य शमीमेतां पलाशिनीम् ।
अस्यां हि पाण्डुपुत्राणां धनूंषि निहितात्युत ॥ ४-४०-३८ (३०१२९)
युधिष्ठिरस्य भीमस्य बीभत्सोर्यमयोस्तथा ।
ध्वजा शराश्च शूराणां दिव्यानि कवचानि च ॥ ४-४०-३९ (३०१३०)
अत्रैव तु महावीर्यं धनुः पार्थस्य गाण्डिवम् ।
एकं शतसहस्रेण संमितं राष्ट्रवर्धनम् ॥ ४-४०-४० (३०१३१)
व्यायामसहमत्यर्थं तृणराजसमं महत् ।
सर्वायुधमहामात्रं सर्वारिक्षयकारकम् ॥ ४-४०-४१ (३०१३२)
सुवर्णविकृतं दिव्यं श्लक्ष्णमायतमव्रणम् ।
अलं भारं गुरुं सोढुं वारुणं च सुदर्शनम् ॥ ४-४०-४२ (३०१३३)
तादृशान्येव सर्वाणि बलवन्ति दृढानि च ।
युधिष्ठिरस्य भीमस्य बीभत्सोर्यमयोस्तथा ।
प्रथितानि विशिष्टानि दुर्दशानि भवन्त्युत ॥ ४-४०-४३ (३०१३४)
उत्तर उवाच। ४-४०-४४क्ष् (३१७८)
शरीरमिह चासक्तं शम्यां शुष्कं पुरा किल ।
तदहं राजपुत्रः सन्स्पृशेयं पाणिना कथम् ॥ ४-४०-४४ (३०१३५)
न मामेवंविधं कर्म कारयस्व बृहन्नले ।
कथं वा शक्यते कर्तुं बुद्ध्या त्वं मन्यसे कथं ॥ ४-४०-४५ (३०१३६)
नैवंविधं मया युक्तमालब्धुं क्षत्रयोनिना ।
महता राजपुत्रेण मन्त्रयज्ञविदा सता ॥ ४-४०-४६ (३०१३७)
स्पृष्टवन्तं शरीरं मां शववाहमिवाशुचिम् ।
कथं वा व्यवहार्यं वै कुर्वीथास्त्वं बृहन्नले ॥ ४-४०-४७ (३०१३८)
वैशम्पायन उवाच। ४-४०-४८क्ष् (३१७९)

तमुवाच ततः शूरः पार्थं परपुंरजयः ।
दायादं सर्वमत्स्यानां कुले जातं विशारदम् ॥ ४-४०-४८ (३०१३९)
जानामि त्वां महाप्राज्ञ शुभं जात्या कुलेन च ।
कथं नु पापकं कर्म ब्रूयां त्वाऽहं परन्तप ॥ ४-४०-४९ (३०१४०)
व्यवहार्यश्च राजेन्द्र शुद्धश्चैव भविष्यसि ।
धनूंष्येतानि मा भैस्त्वं शरीरं नात्र विद्यते ॥ ४-४०-५० (३०१४१)
दायादं मत्स्यराजस्य कुले जातं मनस्विनम् ।
कथं वा नन्दितं कर्म कारये त्वां नृपात्मज ॥ ४-४०-५१ (३०१४२)
वैशम्पायन उवाच। ४-४०-५२क्ष् (३१८०)
एवमुक्तः स पार्थेन रथात्प्रस्कन्द्य कुण्डली ।
आरुरोह शमीवृक्षं वैराटिरवशस्तदा ॥ ४-४०-५२ (३०१४३)
तमन्वशासच्छत्रुघ्नो रथे तिष्ठन्धनञ्जयः ।
अवरोपय वृक्षाग्राद्धनूंष्येतानि माचिरम् ॥ ४-४०-५३ (३०१४४)
सोपहृत्य महार्हाणि धनूंषि पृथुवक्षसाम् ।
परिवेष्टनपत्राणि विमुच्य समुपानयत् ॥ ४-४०-५४ (३०१४५)
परिवेष्टनमेतेषां सर्वं मुञ्चस्व माचिरम् ।
तेषां संनहनीयानि परिमुच्य परन्तपः ।
अपश्यत्तत्र गाण्डीवं चतुर्भिरपरैः सह ॥ ४-४०-५५ (३०१४६)
तेषां विमुच्यमानानां धनुषामर्कवर्चसाम् ।
विनिश्चेरुः प्रभा दिव्या ग्रहाणामुदयेष्विव ॥ ४-४०-५६ (३०१४७)
स तेषां रूपमालेक्य भोगिनामिव दृम्भताम् ।
हृष्टरोमा भयोद्विग्नः प्रवेपिततनुस्तदा ॥ ४-४०-५७ (३०१४८)
अर्जुनेन समाश्वस्तः किंचिद्धृष्टो नृपात्मजः ।
तेषां संदर्शनाभ्यासं स्पर्शाभ्यासं पुनः पुनः ॥ ५८ ॥ ४-४०-५८ (३०१४९)
आमील्य पुनरुन्मील्य स्पृष्ट्वास्पृष्ट्वा चकार सः ।
सम्यग्घुण्टस्तदाऽऽश्वस्तः क्षणेन समपद्यत ॥ ५९ ॥ ४-४०-५९ (३०१५०)
संस्पृश्य तानि चापानि भानुमन्ति बृहन्ति च ।
वैराटिरर्जुनं राजन्निदं वचनमब्रवीत् ॥ ६० ॥ ॥ ४-४०-६० (३०१५१)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-४०-११ नगारिसूनुः । एषोऽङ्गनावेषधरः किरीटी जित्वाऽव
यं नेष्यति चाद्य गा व इति झो पाठः। हे नदीज गाङ्गेय भीष्म,
लङ्केशस्य रावणस्य वनं तस्यारिर्नाशको हनूमान् स केतुर्ध्वजो यस्य

सः लङ्केशवनारिकेतुः । नगो ग्वृक्षस्तदाह्लयः वृक्षनामा। अर्जुन इत्यर्थः। शैलवृक्षौ नगावगावित्यमरः। नगारिरिन्द्रस्तस्य सूनुः । किरीटी तन्नामा यं जित्वा वः युष्माकं गाः धेनूः नेष्यति तं दुर्योधनं अव पालय ॥

११ ॥

४-४०-४६ आलब्धुं स्प्रष्टुम् ॥

४६ ॥

॥

चत्वारिंशोऽध्यायः ॥

विराटपर्व - अध्याय ०४१

॥ श्रीः ॥

४.४१. अध्यायः ४१

Mahabharata - Virata Parva - Chapter Topics

पाण्डवकार्मुकाद्यवलोकनविस्मितेनोत्तरकुमारेणार्जुनंप्रति तत्तदायुधवर्णनपूर्वकं तत्तत्स्वामिनां प्रश्नः ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-४१-० (३०१५२)

उत्तर उवाच। ४-४१-०क्ष् (३१८१)

सारथे किमिदं दिव्यं नागो वा यदि वा धनुः ।

सौवर्णान्यत्र पद्मानि शतपत्राणि भागशः ।

कुशाग्निप्रतितप्तानि भानुमन्ति बृहन्ति च ॥ ४-४१-१ (३०१५३)

बिन्दवश्चात्र सौवर्णा मणिप्रोताः समन्ततः ।

शशिसूर्यप्रभाः पृष्ठे भान्ति रुक्मपरिष्कृताः ॥ ४-४१-२ (३०१५४)

पुष्पाण्यत्र सुवर्णानि शतपत्राणि भागशः ।

विस्मापनीयरूपं च भीमं भीमप्रदर्शनम् ॥ ४-४१-३ (३०१५५)

नीलोत्पलनिभं कस्य शातकुम्भपरिष्कृतम् ।

ऋषभा यस्य सौवर्णाः पृष्ठे तिष्ठन्ति शृङ्गिणः ॥ ४-४१-४ (३०१५६)

तालप्रमाणं कस्येदं मणिरुक्मविभूषितम्

हाटकस्य सुवर्णस्य यस्मिञ्शाखामृगा दश ॥ ४-४१-५ (३०१५७)

दुरानमं महादीर्घं सुरूपं दुष्प्रधर्षणम् ।

कस्येदमीदृशं चित्रं धनुः सर्वे च दंशिताः ॥ ४-४१-६ (३०१५८)

चन्द्रार्कविमलाभासः सुरूपाः सुप्रदर्शनाः ।

हंसाः पृष्ठं श्रिता यस्य कुशाग्निप्रतिमार्चिषः ।

शार्ङ्गगाण्डीवसदृशं कस्येदं सारथे धनुः ॥ ४-४१-७ (३०१५९)
चतुर्थं काञ्चनवपुर्भाति विद्युद्गणोपमम् ।
नीलोपलिप्तमच्छिद्रं जातरूपमयं धनुः ।
मत्स्यश्चास्य हिरण्यस्य पृष्ठे तिष्ठन्ति दंशिताः ॥ ४-४१-८ (३०१६०)
शक्रचापोपमं दिव्यं कस्येदं सारथे धनुः ।
उच्छ्रितं फणिवद्दिव्यं सारवत्त्वाद्गुरानमम् ॥ ४-४१-९ (३०१६१)
सहस्रगोधाः सौवर्णा द्वीपिनश्च चतुर्दश ।
बर्हिणश्चात्र सौवर्णाः शतचन्द्रार्कभूषिताः ।
जाम्बूनदविचित्राङ्गं कस्येदं पञ्चमं धनुः ॥ ४-४१-१० (३०१६२)
कस्येमे क्षुरनाराचाः सहस्रं लोमवापिनः ।
प्रक्षिप्तास्तीक्ष्णतुण्डाग्रा उपासङ्गे हिरण्मये ॥ ४-४१-११ (३०१६३)
हारिद्रवर्णाः कस्येमे शिता पञ्चशतं शराः ।
आशीविषसमस्पर्शाः शिताश्चाजिंहगा दृढाः ॥ ४-४१-१२ (३०१६४)
विपाठाः पृथवः कस्य गृध्रपत्रार्धवाजिताः ।
वराहकर्णास्तीक्ष्णाग्राः कस्येमे रुचिराः शराः ॥ ४-४१-१३ (३०१६५)
वज्राशनिसमस्पर्शा वैश्वानरशिखार्चिषः ।
सुवर्णपुङ्खास्तीक्ष्णाग्राः कस्य सप्तशतं शराः ॥ ४-४१-१४ (३०१६६)
कस्यायं सायको दीर्घो गव्ये कोशे च दंशितः ।
कस्य दण्डो दृढः श्लक्ष्णो रुचिरोऽयं प्रकाशते ॥ ४-४१-१५ (३०१६७)
वैयाघ्रकोशः कस्यायं दिव्यः शङ्खो महाप्रभः ।
कस्यार्थमसयश्चैते पञ्च शार्दूललक्षणाः ॥ ४-४१-१६ (३०१६८)
कस्यायं निर्मलः खड्गो द्वीपिचर्मनिवासितः ।
नीलोत्पलसवर्णोऽयं कस्य खड्गः पृथुर्महान् ॥ ४-४१-१७ (३०१६९)
मृगेन्द्रचर्मावसितस्तीक्ष्णधारः सुनिर्मलः ।
ऋषभाजिनकोशस्तु कस्य खड्गो महानयम् ॥ ४-४१-१८ (३०१७०)
यस्यापिधाने दृश्यन्ते सूर्याः पञ्च परिष्कृताः ।
कस्यायं विपुलः खड्गः शृङ्गत्सरुमनोहरः ॥ ४-४१-१९ (३०१७१)
निहितः पार्षते कोशे तैलधौतः समाहितः ।
प्रमाणवर्णयुक्तश्च कस्य खड्गो महानयम् ।
एतेन प्रतिविद्धः सञ्जीवेत्कश्चिन्न कुञ्जरः ॥ ४-४१-२० (३०१७२)
निर्दिशस्व यथामार्गं मया पृष्टा बृहन्नले ।
विस्मयो मे परो जातो दृष्ट्वा सर्वमिदं महत् ॥ ॥ ४-४१-२१ (३०१७३)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

विराटपर्व - अध्याय ०४२

॥ श्रीः ॥
४.४२. अध्यायः ४२

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेनोत्तरंप्रति युधिष्ठिराद्यायुधानां पृथक्पृथङ्निर्देशेन तत्तत्स्वामिकत्वकथनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-४२-० (३०१७४)
वैशम्पायन उवाच। ४-४२-०क्ष् (३१८२)
अत्तरेणैवमुक्तस्तु पार्थो वैराटिमब्रवीत् ।
मृद्धा प्रत्याययन्वाचा भीतं शङ्कावशं गतम् ॥ ४-४२-१ (३०१७५)
अर्जुन उवाच। ४-४२-२क्ष् (३१८३)
अत्त्वया प्रथमं पृष्टं शत्रुसेनाङ्गमर्दनम् ।
पार्थस्येदं धनुर्दिव्यं गाण्डीवमिति विश्रुतम् ॥ ४-४२-२ (३०१७६)
अभेद्यमभयं श्रीमद्दिव्यमच्छेद्यमव्रणम् ।
सर्वायुधमहामात्रं शातकुम्भमयं धनुः ॥ ४-४२-३ (३०१७७)
एतच्छतसहस्रेण संमितं राष्ट्रवर्धनम् ।
देवदानवगन्धर्वैः पूजितं शाश्वतीः समाः ॥ ४-४२-४ (३०१७८)
येन देवासुरान्पार्थः सर्वान्विषहते रणे ।
एतद्वर्षसहस्रं तु ब्रह्मा पूर्वमधारयत् ॥ ४-४२-५ (३०१७९)
उमापतिश्चतुःषष्टिं शक्रोऽशीतिं च पञ्च च ।
सोमः पञ्चसहस्राणि तथा च वरुणः शतम् ॥ ४-४२-६ (३०१८०)
तस्माच्च वरुणादग्निः प्रेम्णा प्राहृत्य तच्छुभम् ।
अग्निना प्रातिभाव्येन दत्तं पार्थाय गाण्डिवम् ।
पञ्चषष्टिं च वर्षाणि कौन्तेयो धारयिष्यति ॥ ४-४२-७ (३०१८१)
एवंवीर्यं महावेतेतच्च धनुरुत्तमम् ।
नीलोत्पलसमं राज्ञः कौरव्यस्य महात्मनः ॥ ४-४२-८ (३०१८२)
बिन्दवश्चात्र सौवर्णाः पृष्ठे साधुनियोजिताः ।
विश्रुतं भीमसेनस्य जातरूपग्रहं दृढम् ॥ ४-४२-९ (३०१८३)
सहस्रगोधाः सौवर्णा द्वीपिनश्च चतुर्दश ।
ऋषभा यत्र सौवर्णाः पृष्ठे तिष्ठन्ति शृङ्गिणः ॥ ४-४२-१० (३०१८४)
येन भीमोऽजयत्कृत्स्नां दिशं प्राचीं परंतपः ।
पृष्ठे विभक्ताः शोभन्ते कुशाग्निप्रतिदीपिताः ॥ ४-४२-११ (३०१८५)
पूजितं सुरमर्त्येषु प्रथितं धनुरुत्तमम् ।

तालप्रमाणं भीमस्य रत्नरुक्मविभूषितम् ॥ ४-४२-१२ (३०१८६)
दुरानमं महद्दीर्घं सुरूपं दुष्प्रधर्षणम् ।
बर्हिणश्चात्र सौवर्णाः शतचन्द्रकभूषणाः ॥ ४-४२-१३ (३०१८७)
नकुलस्य धनुस्त्वेतन्माद्रीपुत्रस्य धीमतः ।
एतेन सदृशं चित्रं धनुरेतद्यवीयसः ।
हारिद्रवर्णं राज्ञस्तु कौरव्यस्य महात्मनः ॥ ४-४२-१४ (३०१८८)
विपाठा भीमसेनस्य गिरीणामपि दारणाः ।
सुप्रभाः सुमहाकायास्तीक्ष्णाग्राः सुतरां दृढाः ।
भीमेन प्रहिता ह्येते वारणानां निवारणाः ॥ ४-४२-१५ (३०१८९)
सुवर्णदण्डरुचिराः कालदण्डोपमाः शुभाः ।
नकुलस्य शरा ह्येते वज्राशनिसमप्रभाः ॥ ४-४२-१६ (३०१९०)
यांश्च त्वं पृच्छसे दीप्तान्समधारान्समाहितान् ।
वराहकर्णास्तीक्ष्णाग्राः सहदेवस्य ते शराः ॥ ४-४२-१७ (३०१९१)
यस्त्वयं सायको दीर्घो गव्ये कोशे च दंशितः ।
पार्थस्यायं महाघोरः सर्वभारसहो महान् ॥ ४-४२-१८ (३०१९२)
यस्त्वयं निर्मलः खड्गो द्वीपिचर्मणि दंशितः ।
राज्ञो युधिष्ठिरस्यायं कुन्तीपुत्रस्य धीमतः । ४-४२-१९ (३०१९३)
वैयाघकोशो भीमस्य पञ्चशार्दूललक्षणः ।
वारणानां सुदृप्तानां शिक्षितः स्कन्धशातने ॥ ४-४२-२० (३०१९४)
नीलोत्पलसवर्णाभः खड्गः पार्थस्य धीमतः ।
मृगेन्द्रचर्मपिहितस्तीक्ष्णधारः सुनिर्मलः ॥ ४-४२-२१ (३०१९५)
दर्शनीयः सुतीक्ष्णाग्रः कुन्तीपुत्रस्य धीमतः ।
अर्जुनस्यैष निस्त्रिंशः परसैन्याग्रदूषणः ॥ ४-४२-२२ (३०१९६)
यस्त्वयं पार्षते कोशे निक्षिप्तो रुचिरत्सरुः ॥
नकुलस्यैष निस्त्रिंशो वैश्वानरसमप्रभः ॥ ४-४२-२३ (३०१९७)
यस्त्वयं पिङ्गलः खड्गश्चित्रो मणिमयत्सरुः ।
सहदेवस्य खड्गोऽयं भारसाहोऽतिदंशितःक ।
भीमस्यायं महादण्डः सर्वामित्रविनाशनः ॥ ४-४२-२४ (३०१९८)
वैशम्पायन उवाच। ४-४२-२४क्ष् (३१८४)
भेदतो ह्यर्जुनस्तूर्णं कथयामास तत्त्वतः ।
आयुधानि कलापांश्च निस्त्रिंशांश्चातुलप्रभान् ॥ ॥ ४-४२-२५ (३०१९९)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

विराटपर्व - अध्याय ०४३
॥ श्रीः ॥

४.४३. अध्यायः ४३

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेनोत्तरंप्रति स्वस्यार्जुनत्वकथनपूर्वकं कङ्कादीनां युधिष्ठिरादित्वकथनम् ॥ १ ॥
तत्प्रत्ययार्थं स्वनामदशककथनपूर्वकं तन्निर्वचनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-४३-० (३०२००)
वैशम्पायन उवाच। ४-४३-०क्ष् (३१८५)
एतस्मिन्नन्तरे पार्थं न मूढात्मा व्यजानत ।
विराटपुत्रः प्रभुखे पप्रच्छ पुनरेव तम् ॥ ४-४३-१ (३०२०१)
सुवर्णरुचिराण्येषामायुधानि महात्मनाम् ।
रुचिराणि प्रकाशन्ते पार्थानामाशुकारिणाम् ॥ ४-४३-२ (३०२०२)
क्वनु ते पाण्डवाः शूराः संग्रामेष्वपराजिताः ।
येषामिमानि दीप्तानि श्रिया दीप्यन्ति भान्ति च। ४-४३-३ (३०२०३)
कस्मिन्वसन्ति देशे च धर्मज्ञा बन्धुवत्सलाः ।
क्व धर्मराजः कौन्तेयो धर्मपुत्रो युधिष्ठिरः ॥ ४-४३-४ (३०२०४)
धर्मशीलश्च धर्मात्मा धर्मवान्धर्मवित्सुधीः ।
धर्माध्यक्षो धर्मपुत्रो धर्मज्ञो धर्ममूर्तिमान् ॥ ४-४३-५ (३०२०५)
धर्मनिष्ठो धर्मकर्ता धर्मगोप्ता सुधर्मकृत् ।
सत्यार्जवक्षमाधारो घृणी धर्मपरायणः ॥ ४-४३-६ (३०२०६)
भीमसेनार्जुनौ चापि सर्वे ते मातुला मम ।
नकुलः सहदेवो वा सर्वास्त्रकुशलौ रणे ॥ ४-४३-७ (३०२०७)
सर्व एव महात्मानः सर्वामित्रविनाशनाः ।
राज्यमक्षैः पराजित्य नः श्रूयन्ते वनं गताः ॥ ४-४३-८ (३०२०८)
द्रौपदी चापि पाञ्चाली स्त्रीरत्नमिति मे श्रुता ।
जिता चाक्षैस्तदा कृष्णा तानेवान्वगमद्वने ॥ ४-४३-९ (३०२०९)
उत्सृज्य राज्यं धर्म्यं ते नः श्रूयन्ते वनं गताः ॥ ४-४३-१० (३०२१०)
पाण्डवान्यदि जानीषे क्वनु ते धर्मचारिणः ।
क्वनु वा निवसन्तीति सत्यं ब्रूहि बृहन्नले ॥ ४-४३-११ (३०२११)
किमर्थमागतान्यत्र शस्त्रास्त्राणि महात्मनाम् ।
कथं ज्ञातानि भवता तथा मे ब्रूहि शोभने ॥ ४-४३-१२ (३०२१२)
वैशम्पायन उवाच। ४-४३-१३क्ष् (३१८६)
ततः प्रहस्य बीभत्सुः कौन्तेयः श्वेतवाहनः ।

उवाच राजपुत्रं तमुत्तरं शृणु मे वचः ॥ ४-४३-१३ (३०२१३)
मा भैस्त्वं राजशार्दूल सर्वं ते वर्णयाम्यहम् ।
नात्र भेतव्यमद्यापि राजपुत्र यथातथा ॥ ४-४३-१४ (३०२१४)
वयं ते पाण्डवा नाम वनवासस्य पारगाः ।
अतीते द्वादशे वर्षे च्छन्नवासमिहोषिताः ।
तस्मादशङ्कितमनाः शृणुष्वावहितोत्तर ॥ ४-४३-१५ (३०२१५)
अहमस्म्यर्जुनो नाम कङ्को नाम युधिष्ठिरः ।
भीमसेनस्तु वललः पितुस्ते रसपाचकः ।
अश्वबन्धस्तु नकुलः सहदेवस्तु गोपतिः ॥ ४-४३-१६ (३०२१६)
सैरन्ध्रीं द्रौपदीं विद्धि यदर्थे कीचको हतः ।
भीमसेनेन दुर्वृत्तः सहभ्रातृभिराहवे ॥ ४-४३-१७ (३०२१७)
श्रुत्वैतद्वचनं जिष्णोर्विस्मयस्फारितेक्षणः ।
पश्यन्ननिमिषः पार्थं शनैर्वाचमुवाच ह ॥ ४-४३-१८ (३०२१८)
उत्तर उवाच। ४-४३-१९क्ष् (३१८७)
दश पार्थस्य नामानि श्रूयन्ते मे कथासु च ।
प्रब्रूयास्तानि यदि मे श्रद्दध्यां सर्वमेव ते ॥ ४-४३-१९ (३०२१९)
अर्जुन उवाच। ४-४३-२०क्ष् (३१८८)
अहं तर्हि तवाचक्षे दश नामानि तानि मे ।
वैराटे शृणु तानि त्वं यानि पूर्वं श्रुतानि ते ।
ईशानो विदधे देवस्त्रिदिवस्येश्वरो दिवि ॥ ४-४३-२० (३०२२०)
अर्जुनः फल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः पार्थः सव्यसाची धनञ्जयः ।
एतानि मम नामानि स्थापितानि सुरोत्तमैः ॥ ४-४३-२१ (३०२२१)
उत्तर उवाच। ४-४३-२२क्ष् (३१८९)
गुणतो दश नामानि समवेतानि पाण्डवे ।
चरन्ति लोके ख्यातानि विदितानि ममावघ ॥ ४-४३-२२ (३०२२२)
केनासि विजयो नाम केनासि श्वेतवाहनः ।
सव्यसाची च केनासि जिष्णुर्बीभत्सुरेव च ॥ ४-४३-२३ (३०२२३)
अर्जुनः फल्गुनः पार्थः किरीटी केन सारथे ।
धनञ्जयश्च केनासि शीघ्रं वद बृहन्नले ॥ ४-४३-२४ (३०२२४)
श्रुता मे तस्य वीरस्य केवला नामहेतवः ।
इतस्ततश्चलत्येतन्मनो मे चञ्चलं त्वयि ।
अर्जुनो वा भवान्नेति वद शीघ्रं बृहन्नले ॥ ४-४३-२५ (३०२२५)
अर्जुन उवाच। ४-४३-२६क्ष् (३१९०)
सर्वाञ्जित्वा जनपदान्धनं चाच्छिद्य सर्वशः ।
मध्ये धनस्य तिष्ठन्तं तन्मामाहुर्धनञ्जयम् ॥ ४-४३-२६ (३०२२६)

अभिप्रयामि संग्रामे यदाऽहं युद्धदुर्मदान् ।
अजित्वा न निविर्तेयं तेन वै विजयं विदुः ॥ ४-४३-२७ (३०२२७)
श्वेताः काञ्चनसन्नाहा रथे युज्यन्ति मे हयाः ।
शत्रुभिर्युध्यमानस्य तेनाहं श्वेतवाहनः ॥ ४-४३-२८ (३०२२८)
किरीटं सूर्यसंकाशं भ्राजते मे शिरोगतम् ।
रणमध्ये रथस्थस्य सूर्यपावकसन्निभम् ॥ ४-४३-२९ (३०२२९)
अच्छेद्यं रुचिरं चित्रं जाम्बूनदपरिष्कृतम् ।
इन्द्रदत्तमनाहार्यं तेनाहुर्मां किरीटिनम् ॥ ४-४३-३० (३०२३०)
न कुर्यां कर्म बीभत्सं युध्यमानः कदाचन ।
तेन देवमनुष्येषु बीभत्सुरिति मां विदुः ॥ ४-४३-३१ (३०२३१)
उभौ मे तुल्यकर्माणौ गाण्डीवस्य विकर्षणे ।
भुजौ मे भवतः सङ्ख्ये परसैन्यविनाशिनौ ।
तयोः सव्योऽधिकस्तस्मात्सव्यसाचीति मां विदुः ॥ ४-४३-३२ (३०२३२)
पृथिव्यां सागरान्तायां वर्णो मे दुर्लभः समः ।
शुद्धत्वाद्रूपवत्त्वाच्च तेन मामार्जुनं विदुः ॥ ४-४३-३३ (३०२३३)
उत्तराभ्यां तु पूर्वाभ्यां फल्गुनीभ्यामहं दिवा ।
जातो हिमवतः पृष्ठे तेन मां फल्गुनं विदुः ॥ ४-४३-३४ (३०२३४)
यो ममाङ्गे व्रणं कुर्याद्भ्रातुर्ज्येष्ठस्य पश्यतः ।
युधिष्ठिरस्य रुधिरं दर्शयेद्वा कदाचन ।
पराभवमहं तस्य कुले कुर्यां न संशयः ॥ ४-४३-३५ (३०२३५)
योत्स्यामि तैरहं सर्वैर्न मे तेभ्यः पराभवः ।
तेन देवमनुष्येषु जिष्णुर्नामास्मि विश्रुतः ॥ ४-४३-३६ (३०२३६)
माता मम पृथा नाम तेन मां पार्थमब्रुवन् ॥ ४-४३-३७ (३०२३७)
देवदानवगन्धर्वपिशाचोरगराक्षसान् ।
अहं पुरा रणे जित्वा खाण्डवेऽग्निमतर्पयम् ॥ ४-४३-३८ (३०२३८)
हुताशनं तर्पयित्वा सहितः शार्ङ्गधन्वना ।
श त्रिविष्टपगतौक्र दृष्ट्वा पितामहमहेश्वरौ ॥ ४-४३-३९ (३०२३९)
मूर्च्छया पतितं भूमावागतौ देवसत्तमौ ।
दृष्ट्वा तौ वरदौ देवौ संज्ञां लब्ध्वोत्थितः पुनः ॥ ४-४३-४० (३०२४०)
मूर्ध्ना हि प्रणतं भूमौ तौ देवौ वरदौ वरौ ।
कृष्णेत्येकादशं नाम प्रीत्या मे चक्रतुस्तदा ।
तुष्टौ च मम वीर्येण कर्मणा चाभिराधितौ ॥ ४-४३-४१ (३०२४१)
सर्वदेवैः परिवृतौ भूयो मां स्वयमूचतुः ।
वरं तात वृणीष्वेति यं प्रार्थयसि पाण्डव ॥ ४-४३-४२ (३०२४२)
ततोऽहमस्त्राण्यलभं दिव्यानि च दृढानि च ।
ब्राह्मं पाशुपतं चैव स्थूणाकर्णं च दुर्जयम् ।

ऐन्द्रं वारुणमाग्नेयं वायव्यमथ वैष्णवम् ॥ ४-४३-४३ (३०२४३)
ततोऽहमजयं भूयो रथेनैन्द्रेण दुर्जयान् ।
मातलिं सारथिं कृत्वा निवातकवचान्रणे ।
अवध्यकवचांन्देवैर्वरदृप्तान्महासुरान् ॥ ४-४३-४४ (३०२४४)
तिस्रः कोटीर्दानवानां संयुगेष्वनिवर्तिनाम् ।
एको निर्जित्य संग्रामे भूयो देवानतोषयम् ॥ ४-४३-४५ (३०२४५)
ततो मे भगवानिन्द्रः किरीटमददात्स्वयम् ।
देवाश्च शङ्खमददुः शत्रुसैन्यनिवारणम् ॥ ४-४३-४६ (३०२४६)
अहं पारे समुद्रस्य हिरण्यपुरवासिनाम् ।
हत्वा षष्टिं सहस्राणि जयं संप्राप्तवान्रणे ॥ ४-४३-४७ (३०२४७)
असंभ्रान्तो रथे तिष्ठन्सहस्रेषु शतेषु च ।
शत्रुमध्ये दुराधर्षो न मुह्यन्ति च मे दिशः ॥ ४-४३-४८ (३०२४८)
अहं गन्धर्वराजेन ह्रियमाणं सुयोधनम् ।
भ्रातृभिः सहितं तात गन्धर्वैः समरे जितम् ।
चतुर्दश सहस्राणि हत्वा चैनममोचयम् ॥ ४-४३-४९ (३०२४९)
एतानि मम नामानि योऽहन्यहनि कीर्तयेत् ।
तं न पश्यन्ति सत्त्वानि न तं निघ्नन्ति शत्रवः ॥ ४-४३-५० (३०२५०)
अद्य पश्य महाबाहो मम वीर्यं सुदुःसहम् ।
मा भैर्विगतसंत्रासः कुरूनेतान्समागतान् ॥ ४-४३-५१ (३०२५१)
सुयोधनस्य मिषतः कर्णस्य च कृपस्य च ।
पितामहस्य भीष्मस्य द्रौणेर्द्रोणस्य च स्वयम् ।
सर्वानेव कुरूञ्जित्वा प्रत्यानेष्यामि ते पशून्ष ॥ ॥ ४-४३-५२ (३०२५२)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-४३-३१ बीभत्सुरिति भदि कल्याणे सुखे चेत्यस्य सनि रूपम् ॥
४-४३-३२ सव्येन वामेनापि हस्तेन सचितुं ज्याकर्षणादिक्रियायां संबद्धुं शीलमस्येति सव्यसाची ॥
४-४३-३३ अर्जुन इति ऋज गतिस्थानार्जनोपार्जनेष्वित्यत उनन्प्रत्यये भवति । दीप्तिमत्त्वात्समत्वात् शुद्धकर्मकरत्वाच्चार्जुन इत्यर्थः ॥
४-४३-३४ उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यामिति झो पाठः । नक्षत्रान्यां ताराभ्यां तत्र स्थिते चन्द्र इत्यर्थः ॥
॥
त्रिचत्वारिंशोऽध्यायः ॥

४३ ॥

विराटपर्व - अध्याय ०४४
॥ श्रीः ॥
४.४४. अध्यायः ४४

Mahabharata - Virata Parva - Chapter Topics
उत्तरेण बृहन्नलाया अर्जुनत्वविज्ञानेन
तंप्रत्यज्ञानमूलकभूतपूर्वस्वापराधक्षमापनम् ॥ १ ॥
अर्जुनेनोत्तरंप्रति स्वस्य क्लैब्यप्राप्तिहेतुकथनम् ॥ २ ॥
तथोत्तरस्य सारथीकरणापूर्वकं रथारोहणेन रणायाभियानम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-४४-० (३०२५३)
वैशम्पायन उवाच। ४-४४-०क्ष् (३१९१)
ततः पार्थं स वैराटिः प्राञ्जलिस्त्वभ्यवादयत् ।
अहं भूमिंजयो नाम प्रणतोस्मि धनंजय ॥ ४-४४-१ (३०२५४)
दिष्ट्या त्वां पार्थ पश्यामि स्वागतं ते धनंजय ।
लोहिताक्ष महाबाहो नागराजवरोपम ॥ ४-४४-२ (३०२५५)
यदज्ञानादवोचं त्वां प्रमादेन नरोत्तम ।
अकृत्वा हृदये सर्वं क्षन्तुमर्हसि तन्मम ॥ ४-४४-३ (३०२५६)
यतस्त्वया कृतं पूर्वं चित्रं कर्म सुदुष्करम् ।
अतो भयं व्यपेतं मे प्रीतिश्च परमा त्वयि ॥ ४-४४-४ (३०२५७)
दासोऽहं ते भविष्यामि पश्य मामनुकम्पया ॥ ४-४४-५ (३०२५८)
या प्रतिज्ञा कृता पूर्वं तव सारथ्यकारणात् ।
सेयं प्रतिज्ञा पूर्णा मे हर्षश्चार्जुन जायते ॥ ४-४४-६ (३०२५९)
देवेन्द्रतनयस्येह सारथिः स्यां महामृधे ।
इति पूर्वं कृताऽस्माभिः प्रतिज्ञा युद्धदुर्मद ॥ ४-४४-७ (३०२६०)
प्रतिज्ञा मम संपूर्णा तव सारथ्यकारणात् ।
मनस्स्वास्थ्यं च मे जातं जातं भाग्यं च मे महत् ॥ ४-४४-८ (३०२६१)
आस्थाय विपुलं वीर रथं सारथिना मया ।
दुर्योधनं च जित्वाऽऽजौ निवर्तय पशून्मम ॥ ४-४४-९ (३०२६२)
अर्जुन उवाच। ४-४४-१०क्ष् (३१९२)
प्रीतोस्मि राजपुत्राद्य न भयं विद्यते तव ।
सर्वान्नुदामि ते शत्रून्रणे रणविशारद ॥ ४-४४-१० (३०२६३)

स्वस्थो भव महान्युद्धे पश्य मां शत्रुभिः सह ।
युध्यमानं विमर्देऽस्मिन्कुर्वाणं भैरवं रवम् ॥ ४-४४-११ (३०२६४)
गाण्डीवं देवदत्तं च शरान्कनकभूषणान् ।
एतान्सर्वानुपासङ्गान्क्षिप्रं बध्नीहि मे रथे ।
एकं चाहर निस्त्रिंशं जातरूपपरिष्कृतम् ॥ ४-४४-१२ (३०२६५)
अहं वै कुरुभिर्योत्स्ये मोक्षयिष्यामि ते पशून् ।
तोषयिष्यामि राजानं प्रवेक्ष्यामि पुरं पुनः ॥ ४-४४-१३ (३०२६६)
संकल्पागाधपरिधं बाहुप्राकारतोरणम् ।
त्रिदण्डतूणसंबाधं नैकध्वजसमाकुलम् ॥ ४-४४-१४ (३०२६७)
ज्याक्षेपनिनदारावं नेमीनिनददुन्दुभिः ।
शरजालवितानाढ्यमाक्ष्वेडितमहास्वनम् ।
नगरं ते मया गुप्तं रथोपस्थं भविष्यति ॥ ४-४४-१५ (३०२६८)
अधिष्ठितो मया सङ्ख्ये रथो गाण्डीवधन्विना ।
अजय्यः शत्रुसैन्यानां वैराटे व्येतु ते भयम् ॥ ४-४४-१६ (३०२६९)
उत्तर उवाच। ४-४४-१७क्ष् (३१९३)
बहुना किं प्रलापेन शृणु मे परमं वचः ।
नाहं बिभेमि कौन्तेय साक्षादपि शतक्रतोः ॥ ४-४४-१७ (३०२७०)
यमवायुकुबेरेभ्यो द्रोणभीष्मशतादपि ।
बिभेमि नाहमेतेभ्यो जानामि त्वां स्थिरं युधि ।
केशवेनापि संग्रामे साक्षादिन्द्रेण वा समम् ॥ ४-४४-१८ (३०२७१)
इदं तु चिन्तयन्नेव परिमुह्यामि केवलम् ।
निश्चयं नाधिगच्छामि नावगच्छामि किंचन ॥ ४-४४-१९ (३०२७२)
एवं वराङ्गरूपस्य लक्षणैः सूचितस्य च ।
केन कर्मविपाकेन क्लीबत्वं त्वामुपागतम् ॥ ४-४४-२० (३०२७३)
मन्ये त्वां क्लीबरूपेण चरन्तं शूलपाणिनम् ।
गन्धर्वराजप्रतिमं देवं वाऽपि शतक्रतुम् ॥ ४-४४-२१ (३०२७४)
अर्जुन उवाच। ४-४४-२२क्ष् (३१९४)
भ्रातुर्नियोगाज्ज्येष्ठस्य संवत्सरमिदं व्रतम् ।
चरामि ब्रह्मचर्यं वै सत्यमेतद्ब्रवीमि ते ॥ ४-४४-२२ (३०२७५)
नास्मि क्लीबो महाबाहो परवान्धर्मसंयुतः ।
उर्वशीशापसंभूतं क्लैब्यं समुपसंस्थितम् ॥ ४-४४-२३ (३०२७६)
पुराऽहमाज्ञया भ्रातुर्ज्येष्ठस्यास्मि सुरालयम् ।
प्राप्तवानुर्वशी दृष्टा सुधर्मायां मया तदा ॥ ४-४४-२४ (३०२७७)
नृत्यन्तीं परमं रूपं बिभ्रतीं वज्रिसन्निधौ ।
अपश्यं तामनिमिषं कूटस्थामन्वयस्य मे ॥ ४-४४-२५ (३०२७८)
रात्रौ समागता मह्यं शयनं रन्तुमिच्छया ।

अहं तामभिवाद्यैव मातृसत्कारमाचरम् ॥ ४-४४-२६ (३०२७९)
सा च मामशपत्क्रुद्धा शिखण्डी त्वं भवेति वै ।
श्रुत्वा तमिन्द्रो मामाह मा भैस्त्वं पार्थ षण्डता ॥ ४-४४-२७ (३०२८०)
उपकारो भवेत्तुभ्यमज्ञातवसतौ पुरा ।
इतीन्द्रो मामनुग्राह्य ततः प्रेषितवान्वृषा ॥ ४-४४-२८ (३०२८१)
तदिदं समनुप्राप्तं व्रतं चीर्णं मयाऽनघ ।
समाप्तव्रतमुत्तीर्णं विद्धि मां त्वं नृपात्मज ॥ ४-४४-२९ (३०२८२)
उत्तर उवाच। ४-४४-३०क्ष् (३१९५)
परमोऽनुग्रहो मेऽद्य यत्प्रतर्को न मे वृथा ।
न हीदृशाः क्लीबरूपा भवन्ति तु नरोत्तमाः ॥ ४-४४-३० (३०२८३)
सहायवानस्मि रणे युद्धयेयममरैरपि ।
साध्वसं तत्प्रनष्टं मे किं करोमि ब्रवीहि मे ॥ ४-४४-३१ (३०२८४)
अहं ते संग्रहीष्यामि हयाञ्शत्रुनिर्बहण ।
शिक्षितो ह्यस्मि सारथ्ये निष्ठितः पुरुषर्षभ ॥ ४-४४-३२ (३०२८५)
दारुको वासुदेवस्य यथा शक्रस्य मातलिः ।
तथा मां विद्धि सारथ्ये शिक्षितं नरपुङ्गव ॥ ४-४४-३३ (३०२८६)
अश्वा ह्येते महाबाहो तवैवाहवदुर्जयाः ।
योग्या रथवरे युक्ताः प्राणवन्तो जितश्रमाः ॥ ४-४४-३४ (३०२८७)
यस्य यातेन पश्यन्ति भूमौ क्षिप्तं पदंपदम् ।
दक्षिणां यो धुरं वोढा सुग्रीवोण समो हयः ॥ ४-४४-३५ (३०२८८)
योऽयं हयो धुर्यवरो वामां वहति शोभनः ।
तं मन्ये मेघपुष्पस्य जवेन सदृशं हयम् ॥ ४-४४-३६ (३०२८९)
योऽयं वहति वै पार्ष्णिं दक्षिणामञ्चितोद्यतः ।
वलाहकादभिमतस्तेजसा वीर्यवत्तरः ॥ ४-४४-३७ (३०२९०)
योऽयं काञ्चनसन्नाहो वामं वहति शोभनः ।
धुर्यं शैब्यस्य तं मन्ये जवेन बलवत्तरम् ॥ ४-४४-३८ (३०२९१)
त्वामेवायं रथो वोढुं संग्रामेऽर्हति धन्विनम् ।
त्वं चे ॥ रथमास्थाय योद्धुमर्हो मतो मम ।
शर्वशत्रुभिरायातो देवराज इवासुरैः ॥ ४-४४-३९ (३०२९२)
वैशम्पायन उवाच। ४-४४-४०क्ष् (३१९६)
ततो रथादवस्कन्द्य वीर्यवानरिमर्दनः ।
प्रणम्य देवान्गाण्डीवमादाय रुरुचे श्रिया ॥ ४-४४-४० (३०२९३)
ततो विमुच्य बाहुभ्यां सङ्खचूडानि पाण्डवः ।
तौ च दुन्दुभिसन्नादौ प्रतिबद्धय तलावुभौ ॥ ४-४४-४१ (३०२९४)
इन्द्रदत्ते च ते दिव्ये उद्धृत्यामुच्य कुण्डले ।
श्लक्ष्णान्केशान्मृदून्स्निग्धाञ्श्वेतेनोद्ग्रथ्य वाससा ॥ ४-४४-४२ (३०२९५)

अथासौ प्राङ्मुखो भूत्वा शुचिः प्रयतमानसः ।
अभिदध्यौ महाबाहुः सर्वास्त्राणि रथोत्तमे ॥ ४-४४-४३ (३०२९६)
ऊचुश्च पार्थं सर्वाणि प्राञ्जलीनि नृपात्मजम् ।
इमानि स्मो महोदार किङ्कराणीन्द्रनन्दन ॥ ४-४४-४४ (३०२९७)
प्रणिपत्य ततः पार्थः समालभ्य च पाणिना ।
सर्वाणि मानसानीह भवतेत्यभ्यभाषत ॥ ४-४४-४५ (३०२९८)
प्रतिगृह्य ततोऽस्त्राणि प्रहृष्टवदनोऽभवत् ।
अधिज्यं तरसा कृत्वा गाण्डीवं व्याक्षिपद्धनुः ॥ ४-४४-४६ (३०२९९)
तस्य विक्षिप्यमाणस्य धनुषोऽभून्महास्वनः ।
यथा शैलस्य महतः शैलानाक्षिप्य जघ्नुषः ॥ ४-४४-४७ (३०३००)
सनिर्घाताऽभवद्भूमिर्दिक्षु वायुर्ववौ भृशम् ।
भ्रान्तद्विजं खमभवत्प्राकम्पन्त महाद्रुमाः ॥ ४-४४-४८ (३०३०१)
तं शब्दं कुरवो राजन्विस्फोटमशनेरिव ।
तार्क्ष्यं शब्दमिव श्रुत्वा वित्रेसुर्दीनमानसाः ॥ ४-४४-४९ (३०३०२)
यथेन्द्रो व्याक्षिपद्भीमं विस्फोटमशनेर्भुवि ।
तथाऽर्जुनो धनुःश्रेष्ठं बाहुभ्यामाक्षिपद्बली ॥ ४-४४-५० (३०३०३)
महाशनिमहाशब्दसदृशो ज्यास्वनो महान् ।
शत्रून्वीरांश्च संतर्ज्य निग्रहस्थो रथे स्थितः ॥ ४-४४-५१ (३०३०४)
उत्तर उवाच। ४-४४-५२क्ष् (३१९७)
एकस्त्वं पाण्डवश्रेष्ठ बहूनोतान्महारथान् ।
कथं जेष्यसि संग्रामे सर्वशस्त्रास्त्रपारगान् ॥ ४-४४-५२ (३०३०५)
असहायो सि कोन्तेय ससहायाश्च कौरवाः ।
अत एव महाबाहो भीतस्तिष्ठामि तेऽग्रतः ॥ ४-४४-५३ (३०३०६)
वैशम्पायन उवाच। ४-४४-५४क्ष् (३१९८)
उवाच पार्थो मा भैषीः प्रहस्य स्वनवत्तदा ॥ ४-४४-५४ (३०३०७)
युध्यमानस्य मे वीर गन्धर्वैः सुमहाबलैः ।
सहायो घोषयात्रायां कस्तदासीत्सखा मम ॥ ४-४४-५५ (३०३०८)
तथा प्रतिभये तस्मिन्देवदानवसंकुले ।
खाण्डवे युध्यमानस्य कस्तदासीत्सखा मम ॥ ४-४४-५६ (३०३०९)
निवातकवचैः सार्धं पौलोमैश्च महाबलैः ।
युध्यतो देवराजार्थे कः सहायस्तदाऽभवत् ॥ ४-४४-५७ (३०३१०)
स्वयंवरे तु पाञ्चाल्या राजभिः सह संयुगे ।
युध्यतो बहुभिस्तात कः सहायस्तदाऽभवत् ॥ ४-४४-५८ (३०३११)
उपजीव्य गुरुं द्रोणं शुक्रं वैश्रवणं यमम् ।
वरुणं पावकं चैव कृपं कृष्णं च माधवम् ।
पिनाकपाणिनं चैव कथमेतान्न योधये ॥ ४-४४-५९ (३०३१२)

रथं वाहय मे शीघ्रं व्येतु ते मानसो ज्वरः ॥ ॥ ४-४४-६० (३०३१३)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
चतुश्चत्वारिंशोऽध्ययः ॥ ४४ ॥

विराटपर्व - अध्याय ०४५
॥ श्रीः ॥
४.४५. अध्यायः ४५

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन युद्धप्रस्थानसमये उत्तररथात्सिंहध्वजस्यावरोपणपूर्वकं
स्वध्यानसंनिहितस्य हनुमद्ध्वजस्य रथे स्थापनम् ॥ १ ॥
तथा स्वशङ्खादिशब्दश्रवणवित्रस्तस्योत्तरस्य समाश्वासनपूर्वकं
रणायाभियानम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-४५-० (३०३१४)
वैशम्पायन उवाच। ४-४५-०क्ष् (३१९९)
उत्तरं सांरथिं कृत्वा शमीं कृत्वा प्रदक्षिणम् ।
आयुधं सर्वमादाय ततः प्रायाद्धनञ्जयः ॥ ४-४५-१ (३०३१५)
ध्वजं च सिंहं मात्स्यस्य भ्रातॄणामायुधानि च ।
प्रणिधाय शमीमध्ये प्रयातुमुपचक्रमे ॥ ४-४५-२ (३०३१६)
ततः काञ्चनलाङ्गूलं ध्वजं वानरलक्षणम् ।
दिव्यं मायामयं युक्तं विहितं विश्वकर्मणा ।
मनसा चिन्तयामास प्रसादं पावकस्य च ॥ ४-४५-३ (३०३१७)
स च तच्चिन्तितं ज्ञात्वा ध्वजे भूतान्ययोजयत् ।
रथे वानरमुच्छ्रित्य गाण्डीवं व्याक्षिपद्धनुः ॥ ४-४५-४ (३०३१८)
सपताकं विचित्राङ्गं सोपासङ्गं महाबलम् ।
खात्पपात रथे तूर्णं दिव्यरूपं मनोरमम् ॥ ४-४५-५ (३०३१९)
रथमास्थाय बीभत्सुः कौन्तेयः श्वेतवाहनः ।
बद्धासिः सतलत्राणः प्रगृहीतशरासनः ।
ततः प्रायादुदीचीं स कपिप्रवरकेतनः ॥ ४-४५-६ (३०३२०)
सैन्याभ्याशं स संप्राप्य गृहीत्वा शङ्खमुत्तमम् ।
स्वनवन्तं महाशब्दं देवदत्तं धनञ्जयः ।
शशाङ्करूपं बीभत्सुः प्राध्मापयदरिंदमः ॥ ४-४५-७ (३०३२१)
श शशाङ्ककुन्दधवलं मुखे निक्षिप्य वासविः ।

उच्छ्वसद्गण्डयुगलं सिराल्याचितफालकम् ॥ ४-४५-८ (३०३२२)
आरक्तनिम्ननयनं ह्रस्वस्थूलशिरोधरम् ।
अतिश्लिष्टोदरोरस्कं तिर्यगाननशोभितम् ॥ ४-४५-९ (३०३२३)
यावत्स्वशक्तिसामग्र्यं त्रैलोक्यं क्षोभयन्निव ।
मरुद्भिर्दशभिश्चैव प्राध्मापयदरिंदमः ८ ॥ ४-४५-१० (३०३२४)
शङ्खशब्दोस्य सोत्यर्थं श्रूयते कालमेघवत् ॥ ४-४५-११ (३०३२५)
तस्य शङ्खस्य शब्देन धनुपो निस्वनेन च ।
वानरस्य निनादेन रथनेमिस्वनेन च ।
जङ्गमस्य भयं घोरमकरोत्पाकशासनिः ॥ ४-४५-१२ (३०३२६)
शङ्खशब्देन पार्थस्य मुखेनाश्वाः पतन्क्षितौ ।
उत्तरश्चापि संत्रस्थो रथोपस्थ उपाविशत् ॥ ४-४५-१३ (३०३२७)
अथाश्वान्रश्मिभिः पार्थः समुद्यम्य परंतपः ।
अभ्राजत रथोपस्थे भानुर्मेराविवोत्तरे ॥ ४-४५-१४ (३०३२८)
शङ्खघोषेण वित्रस्तं ज्याघातेन च मूर्छितम् ।
उत्तरं संपरिष्वज्य समाश्वासयदर्जुनः ॥ ४-४५-१५ (३०३२९)
मा भैस्त्वं राजपुत्राग्र्य क्षत्रियोसि परन्तप ।
कथं पुरुषशार्दूल शत्रुमध्ये विषीदसि ॥ ४-४५-१६ (३०३३०)
श्रुतास्ते शङ्खशब्दाश्च भेरीशब्दाश्च सर्वशः ।
कुञ्जराणां च निनदा व्यूढानीकेषु नित्यशः ॥ ४-४५-१७ (३०३३१)
स त्वं कथमिवानेन शङ्खशब्देन भीषितः ।
विपण्णरूपो वित्रस्तः पुरुषः प्राकृतो यथा ॥ ४-४५-१८ (३०३३२)
उत्तर उवाच। ४-४५-१९क्ष् (३२००)
श्रुता मे शङ्खशब्दाश्च भेरीशब्दाश्च नित्यशः ।
कुञ्जराणां च निनदा व्यूढानीकेषु तिष्ठतः ॥ ४-४५-१९ (३०३३३)
नैवंविधाः शङ्खशब्दाः पुरा जातु मया श्रुताः ।
ध्वजस्य चापि रूपं मे दृष्टपूर्वं नहीदृशम् ।
धनुषश्चापि घोषश्च श्रुतपूर्वो न मे क्वचित् ॥ ४-४५-२० (३०३३४)
अस्य शङ्खस्य शब्देन धनुषो निस्वनेन च ।
अमानुषाणां शब्देन भूतानां निस्वसेन च ।
रथनेमिप्रणादेन मनो कमे मुह्यते भृशम् ॥ ४-४५-२१ (३०३३५)
व्याकुलाश्च दिशः सर्वा हृदयं व्यथतीव च ।
ध्वजेन पिहिताः सर्वा दिशो न प्रतिभान्ति मे ।
गाण्डीवस्य च शब्देन कर्णौ मे बधिरीकृतौ ॥ ४-४५-२२ (३०३३६)
वैशम्पायन उवाच। ४-४५-२३क्ष् (३२०१)
पुनर्ध्वजं पुनः शङ्खं धनुश्चैव पुनः पुनः ।
स मूढचेता वैराटिरर्जुनं समुदैक्षत ॥ ४-४५-२३ (३०३३७)

स मुहूर्तं प्रयातं तु पार्थो वैराटिमब्रवीत् ॥ ४-४५-२४ (३०३३८)
स्थिरो भव महाबाहो संज्ञां चात्मानमानय ।
एकान्ते रथमास्थाय पद्भ्यां त्वमवपीड्य च ।
दृढं च रश्मीन्संयच्छ शङ्खं ध्मास्याम्यहं पुनः ॥
४-४५-२५ (३०३३९)
एवमुक्त्वा महाबाहुः सव्यसाची परन्तपः ।
ततः शङ्खमुपाध्मासीद्दारयन्निव पर्वतान् ।
गुहा गिरीणां च तदा दिशः शैलांस्तथैव च ॥ ४-४५-२६ (३०३४०)
ज्याघोषं तलघोषं च कृत्वा भूतान्यमोहयत् ।
उत्तरश्चापि संलीनो रथोपस्थ उपाविशत् ।
तं समाश्वासयामास पुनरेव धनञ्जयः । ४-४५-२७ (३०३४१)
तस्य शङ्खस्य शब्देन रथनेमिस्वनेन च ।
गाण्डीवस्य च शब्देन पृथिवी समकम्पत ॥ ॥ ४-४५-२८ (३०३४२)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

विराटपर्व - अध्याय ०४६
॥ श्रीः ॥
४.४६. अध्यायः ४६

Mahabharata - Virata Parva - Chapter Topics
द्रोणेनार्जुनशङ्खनादादिना तस्यार्जुनत्वनिर्धारणेन दुर्योधनंप्रति
तन्निवेदनपूर्वकं दुर्निमित्तप्रदर्शनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-४६-० (३०३४३)
वैशम्पायन उवाच। ४-४६-०क्ष् (३२०२)
भारद्वाजस्ततो द्रोणः सर्वशस्त्रभृतांवरः ।
राजानं चाह संप्रेक्ष्य दुर्योधनमरिंदमः ॥ ४-४६-१ (३०३४४)
यथा रथस्य निर्घोषो यथा शङ्ख उदीर्यते ।
कम्पते च यथा भूमिर्नैषोन्यः सव्यसाचिनः ॥ ४-४६-२ (३०३४५)
औत्पातिकमिदं राजन्निमित्तं भवतीह नः ।
न हि पश्यामि विजयं सैन्येऽस्माकं परन्तप ॥ ४-४६-३ (३०३४६)
शस्त्राणि न प्रकाशन्ते न प्रहृष्यन्ति वाहनाः ।
अग्नयश्च न भासन्ते सुसमिद्धा न शोभनाः ॥ ४-४६-४ (३०३४७)

प्रत्यादित्यं च नः सर्वे मृगा घोरा नदन्ति च ।
शकुनाश्चापसव्याश्च वेदयन्ति महाभयम् ॥ ४-४६-५ (३०३४८)
गोमायुरेष सैन्यानां रुदन्मध्येन धावति ।
चाषा नदन्ति चाकाशे वेदयन्तो महद्भयम् ॥ ४-४६-६ (३०३४९)
भवतां चैव रोमाणि प्रहृष्टानीव लक्षये ॥ ४-४६-७ (३०३५०)
अनुष्णाङ्गाश्च संस्विन्ना जृम्भन्ते चाप्यभीक्ष्णशः ।
विष्कम्भन्ति च मातङ्गा मुञ्चन्त्यश्रूणि वाजिनः ।
सदा मूत्रं पुरीषं च उत्सृजन्ति पुनः पुनः ॥ ४-४६-८ (३०३५१)
लोहितार्द्रा च पृथिवी दिशः सर्वाः प्रधूमिताः ।
न च सूर्यः प्रतपति महद्वेदयते भयम् ॥ ४-४६-९ (३०३५२)
हस्तिनश्चापि वित्रस्ता योधाश्चापि वितत्रसुः ।
पराभूता च वः सेना न कश्चिद्योद्धुमिच्छति ॥ ४-४६-१० (३०३५३)
विषण्णमुखभूयिष्ठाः सर्वे योधा विचेतसः ।
दिशं ते दक्षिणां सर्वे विप्रेक्षन्ते पुनः पुनः ॥ ४-४६-११ (३०३५४)
मृगाश्च पक्षिणश्चैव सव्यमेव पतन्ति नः ।
वादित्रोद्घुष्टघोषाश्च न च गाढं स्वनन्ति च ।
ध्वजाग्रेषु निलीयन्ते वायसास्तन्न शोभनम् ॥ ४-४६-१२ (३०३५५)
यथा मेघस्य निनदो गम्भीरस्तूर्णमायतः ।
श्रूयते रथनिर्घोषो नायमन्यो धनञ्जयात् ॥ ४-४६-१३ (३०३५६)
अश्वानां स्वनतां शब्दो वहतां पाकशासनिम् ।
वानरस्य रथे दिव्यो निस्वनः श्रूयते महान् ॥ ४-४६-१४ (३०३५७)
शङ्खशब्देन पार्थस्य कर्णौ मे बधिरीकृतौ ।
सर्वसैन्यं च वित्रस्तं नायमन्यो धनञ्जयात् ॥ ४-४६-१५ (३०३५८)
राजानमग्रतः कृत्वा दुर्योधनमरिन्दमम् ।
गाः प्रस्थाप्य च तिष्ठामो व्यूढानीकाः प्रहारिणः ।
प्रविभज्य त्रिधा सेनां समुच्छ्रित्य ध्वजानपि ॥ ४-४६-१६ (३०३५९)
शितैर्बाणैः प्रताप्येमां चमूमेष धनञ्जयः ।
मूर्ध्नि सर्वनरेन्द्राणां वामपादं करिष्यति ॥ ४-४६-१७ (३०३६०)
न ह्येष शक्यो बीभत्सुर्जेतुं देवासुरैरपि ।
दिक्षु गुल्मा निवेश्यन्तां यत्ता योत्स्यामहेऽर्जुन ॥ ॥ ४-४६-१८ (३०३६१)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

विराटपर्व - अध्याय ०४७
॥ श्रीः ॥

४.४७. अध्यायः ४७

Mahabharata - Virata Parva - Chapter Topics
द्रोणवचनादर्जुनस्यार्जुनत्वावधारणेन विषादात्तूर्ष्णींभूतेषु स्वीयेषु दुर्योधनेन द्रोणानादरपूर्वकं तान्प्रति समरप्रोत्साहनम् ॥ १.।
Mahabharata - Virata Parva - Chapter Text

४-४७-० (३०३६२)
वैशम्पायन उवाच। ४-४७-०क्ष् (३२०३)
ततो दुर्योधनो राजा समरे भीष्ममब्रवीत् ।
द्रोणं च रथिशार्दूलं कृपं च सुमहाबलम् ॥ ४-४७-१ (३०३६३)
उक्तोऽयमर्थ आचार्य मया कर्णेन चासकृत् ।
पुनरेव च वक्ष्यामि न हि तृप्यामि तद्ब्रुवन् ॥ ४-४७-२ (३०३६४)
पराजितैर्विवस्तव्यं तैश्च द्वादशवत्सरान् ।
वने जनपदेऽज्ञातैरेष एव पणो हि नः ॥ ४-४७-३ (३०३६५)
तेषां न तावन्निर्वृत्तो वत्सरः स त्रयोदशः ।
अज्ञातवासे बीभत्सुरथास्माभिः परिश्रुतः ॥ ४-४७-४ (३०३६६)
अनिर्वृत्ते तु निर्वासे यदि बीभत्सुरागतः ।
पुनर्द्वादशवर्षाणि वने वत्स्यन्ति पाण्डवाः ॥ ४-४७-५ (३०३६७)
लोभाद्वा ते न जानीयुरस्मान्वा मोह आविशत् ।
हीनातिरिक्तमेतेषां भीष्मो वेदितुमर्हति ॥ ४-४७-६ (३०३६८)
अर्थानां हि पुनर्द्वैधे नित्यं भवति संशयः ।
अन्यथा चिन्तितो ह्यर्थः पुनर्भवति चान्यथा ॥ ४-४७-७ (३०३६९)
उत्तरं मार्गमाणानां मात्स्यसेनां युयुत्सताम् ।
यदि बीभत्सुरायातः किंतु कृत्यमतः परम् ॥ ४-४७-८ (३०३७०)
त्रिगर्तानां कृतं कार्यं पाण्डवानां च मार्गणम् ।
विप्रकारैर्हि मात्स्येन सुशर्मा बाधित पुरा ॥ ४-४७-९ (३०३७१)
तेषां भयाभिपन्नानां वस्तानां त्राणभिच्छताम् ।
अभयं याचमानानां तदाऽस्माभिः परिश्रुतम् ॥ ४-४७-१० (३०३७२)
प्रथमं वैर्ग्रहीतव्यं मात्स्यानां गोधनं महत् ।
अष्टम्याश्चापराह्णे तु इति नस्तैः समाहितम् ॥ ४-४७-११ (३०३७३)
नवम्यां पुनरस्माभिः सूर्यस्योदयनं प्रति ।
इमा गावो ग्रहीतव्या याते मत्स्ये गवांपदम् ॥ ४-४७-१२ (३०३७४)
इत्येवं निश्चयोऽस्माकं मन्त्रोऽभून्नागसाह्वये ।
पाण्डवानां परिज्ञाने सर्वेषां नः परस्परम् ॥ ४-४७-१३ (३०३७५)
ते वा गाश्च नयिष्यन्ति यदि वा स्युः पराजिताः ।

अस्मान्वाऽप्यतिसन्धाय कुर्युर्मात्स्येन संगतिम् ॥ ४-४७-१४ (३०३७६)
अथवा तानुपादाय मात्स्यो जानपदैः सह ।
सर्वथा सेनया सार्धमस्मानेष युयुत्सति ॥ ४-४७-१५ (३०३७७)
तेषामेको महावीर्यः कश्चिदेव पुनःसरः ।
अस्माञ्जेतुमिहायातो मात्स्यो वाऽपि स्वयं भवेत् ॥ ४-४७-१६ (३०३७८)
यद्येष राजा मात्स्यानां यदि बीभत्सुरागतः ।
सर्वैर्योद्धव्यमस्माभिरिति नः समयः कृतः ॥ ४-४७-१७ (३०३७९)
अथ कस्मात्स्थिता ह्येते रथेषु रथिसत्तमाः ।
भीष्मद्रोणकृपाः कर्णो विकर्णो द्रौणिरेव च ।
संभ्रान्तमनसः सर्वे प्राप्ते ह्यस्मिन्धनञ्जये ॥ ४-४७-१८ (३०३८०)
नान्यत्र युद्धाच्छ्रेयोस्ति तथाऽऽत्मा प्रणिधीयताम् ।
सर्वलोकेन वा युद्धं देवैर्वाऽस्तु सवासवैः ॥ ४-४७-१९ (३०३८१)
अनाच्छिन्ने धनेऽस्माकमथ शक्रेण वज्रिणा ।
यमेन वाऽपि संग्रामे को हास्तिनपुरं व्रजेत् ॥ ४-४७-२० (३०३८२)
शरैरभिप्रणुन्नानां भग्नानां गहने वने ।
को हि जीवेत्पदातीनां भवेदश्वेषु संशयः ॥ ४-४७-२१ (३०३८३)
आचार्यं पृष्ठतः कृत्वा तथा नीतिर्विधीयताम् ।
जानामि च मतं तेषामतस्त्रासयतीव नः ॥ ४-४७-२२ (३०३८४)
अर्जुने चापि संप्रीतिमधिकामुपलक्षये ।
तथा दृष्ट्वा हि बीभत्सुमुपायान्तं प्रशंसति ।
यथा सेना न भज्येत तथा नीतिर्विधीयताम् ॥ ४-४७-२३ (३०३८५)
अदेशिका ह्यरण्येऽस्मिन्कृच्छ्रे शत्रुवशं गता ।
यथा न विभ्रमेत्सेना तथा नीतिर्विधीयताम् ॥ ४-४७-२४ (३०३८६)
अश्वानां हेषितं श्रुत्वा का प्रशंसा भवेत्परे ।
स्थाने वाऽपि व्रजन्तो वा सदा हेषन्ति वाजिनः ॥ ४-४७-२५ (३०३८७)
सदा च वायवो वान्ति नित्यं वर्षति वासवः ।
स्तनयित्नोश्च निर्घोषः श्रूयते बहुशस्तथा ॥ ४-४७-२६ (३०३८८)
भीषयन्पाण्डवेयेभ्यो भवान्सर्वानिमाञ्जनान् ।
प्रमुखे सर्वसैन्यानामबद्धं बहु भाषते ॥ ४-४७-२७ (३०३८९)
यथैवाश्वान्मार्गमाणास्तानेवाभिपरीप्सवः ।
हेषितानीव शृण्वन्ति तदिदं भवतस्तथा ॥ ४-४७-२८ (३०३९०)
किमत्र कार्यं पार्थस्य कथं वा स प्रशस्यते ।
अन्यत्र कामाद्द्वेषाद्वा रोषाद्वाऽस्मासु केवलम् ॥ ४-४७-२९ (३०३९१)
आचार्या वै कारुणिकाः प्राज्ञाश्चापायदर्शिनः ।
नैते महाहवे घोरे संप्रष्टव्याः कथंचन ॥ ४-४७-३० (३०३९२)
प्रासादेषु विचित्रेषु गोष्ठीपानाशनेषु च ।

कथा विचित्राः कुर्वाणाः पण्डितास्तत्र सोभनः ॥ ४-४७-३१ (३०३९३)
बहून्याश्चर्यरूपाणि कुर्वते जनसंसदि ।
इष्वस्त्रे चापसंधाने पण्डितास्तत्र शोभनाः ॥ ४-४७-३२ (३०३९४)
परेषां विवरज्ञाने मनुष्याचरितेषु च ।
अन्नसंस्कारदोषेषु पण्डितास्तत्र शोभनाः ॥ ४-४७-३३ (३०३९५)
पण्डितान्पृष्ठतः कृत्वा परेषां गुणवादिनः ।
विधीयतां तथा नीतिर्यथा वध्येत वै परः ॥ ४-४७-३४ (३०३९६)
गावश्चैताः प्रतिष्ठन्तां सेनां व्यूहन्तु माचिरम् ।
आरक्षाश्च विधीयन्तां यत्र योत्स्यामहे परैः ॥ ॥ ४-४७-३५ (३०३९७)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-४७-११ सप्तम्याश्चापराह्णे त्विति नवम्यां पुनरस्माभिरिति च थो पाठः ॥
॥
सप्तचत्वारिंशोऽध्यायः ॥
४७ ॥

विराटपर्व - अध्याय ०४८
॥ श्रीः ॥
४.४८. अध्यायः ४८

Mahabharata - Virata Parva - Chapter Topics
कर्णेनात्मश्लाघनपूर्वकमर्जुनपराभवनमिथ्याप्रतिज्ञानम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-४८-० (३०३९८)
कर्ण उवाच। ४-४८-०क्ष् (३२०४)
सर्वानायुष्मतो भीतान्संत्रस्तानिव लक्षये ।
अयुद्धमनसश्चैव सर्वांश्चैवानवस्थितान् ॥ ४-४८-१ (३०३९९)
यद्येष जामदग्न्यो वा यदि वेन्द्रः पुरंदरः ।
वासुदेवेन सहितो यदि बीभत्सुरागतः ।
अहमेनं निरोत्स्यामि वेलेव वरुणालयम् ॥ ४-४८-२ (३०४००)
रुक्मपुङ्खाः प्रसन्नाग्रा मुक्ता हस्तवता मया ।
छादयन्तु शारः सूर्यं पार्थस्यायुर्निरोधकाः ॥ ४-४८-३ (३०४०१)

मम चापप्रमुक्तानां शराणां नतपर्वणाम् ।
निवृत्तिर्गच्छतां नास्ति सर्पाणां श्वसतामिव ॥ ४-४८-४ (३०४०२)
शराणां पुङ्खसक्तानां मौर्व्याऽभिहतयोर्भृशम् ।
श्रूयते तलयोः शब्दो भेर्योराहतयोरिव ॥ ४-४८-५ (३०४०३)
एकैकं चतुरः पञ्च क्वचित्पष्टिं क्वचिच्छतम् ।
हतान्पश्यत मात्स्यानामिषुभिर्निहतान्रथान् ॥ ४-४८-६ (३०४०४)
मद्बाहुमुक्तैरिषुभिस्तैलधौतैः पतत्रिभिः ।
खद्योतैरिव संपृक्तमन्तरिक्षं विराजताम् ॥ ४-४८-७ (३०४०५)
ध्वजाग्राद्वानरस्तस्य भल्लेनाभिहतो मया ।
अद्यैव पततां भूमौ विनदन्भैरवान्रवान् ॥ ४-४८-८ (३०४०६)
शत्रोर्मयाभिपन्नानां भूतानां ध्वजवासिनाम् ।
दिशः प्रतिष्ठमानानामस्तु शब्दो दिवं गतः ॥ ४-४८-९ (३०४०७)
क्रुद्धेनास्त्रं मया मुक्तं निर्दहेत्पृथिवीमिमाम् ।
स्थितं संग्रामशिरसि पार्थमेकाकिनं किमु ॥ ४-४८-१० (३०४०८)
समाहितश्च बीभत्सुर्वर्षाण्यष्टौ च पञ्च च ।
जातस्नेहश्च युद्धस्य मयि संदर्शयिष्यति ॥ ४-४८-११ (३०४०९)
पात्रीभूतस्तु कौन्तेयो ब्राह्मणो गुणवानिव ।
शरमालां स गृह्णातु मत्प्रसृष्टां स्वधामिव ॥ ४-४८-१२ (३०४१०)
एष चापि महेष्वासस्त्रिषु लोकेषु विश्रुतः ।
अहं चापि नरश्रेष्ठादर्जुनान्नावमः क्वचित् ॥ ४-४८-१३ (३०४११)
मम हस्तप्रमुक्तानां शराणां नतपर्वणाम् ।
निवृत्तिर्गच्छतां नास्ति वैश्वानरशिखार्चिषाम् ॥ ४-४८-१४ (३०४१२)
इतश्चेतश्च मुक्तानां शराणां नतपर्वणाम् ।
तुगुलः श्रूयतां नादः षट्पदां गायतामिव ॥ ४-४८-१५ (३०४१३)
अन्तरा संपतद्भिस्तु गृध्रपत्रैः शिलाशितैः ।
शलभानामिवाकाशे छाया संप्रति दृश्यताम् ॥ ४-४८-१६ (३०४१४)
अद्य मत्कार्मुकोत्सृष्टाः शिताः पार्थस्य मर्मगाः ।
शरीरमुपसर्पन्तु वल्मीकमिव पन्नगाः ॥ ४-४८-१७ (३०४१५)
बर्हिबर्हिणराजानां बर्हिणां बर्हिणामिव ।
पततां पततां घोषः पततां पततामिव ॥ ४-४८-१८ (३०४१६)
अद्य त्वहमृणान्मोक्ष्ये यन्मया तत्प्रतिश्रुतम् ।
धार्तराष्ट्रस्य तत्काले निहत्य समरेऽर्जुनम् ॥ ४-४८-१९ (३०४१७)
इन्द्राशनिसमस्पर्शं महेन्द्रसमविक्रमम् ।
अर्दयिष्याम्यहं पार्थमुल्काभिरिव कुञ्जरम् ॥ ४-४८-२० (३०४१८)
शरजालमहाज्वालमसिशक्तिगदेन्धनम् ।
निर्दहन्तमनीकानि शमयिष्येऽर्जुनानलम् ॥ ४-४८-२१ (३०४१९)

रथादतिरथं लोके सर्वशस्त्रभृतांवरम् ।
विवशं पार्थमादास्ये गरुत्मानिव पन्नगम् ॥ ४-४८-२२ (३०४२०)
क्षुद्रकैर्विविधैर्भल्लैर्निपतद्भिश्च मामकैः ।
संमूढचेताः कौन्तेयः कर्तव्यं नाभिपद्यताम् ॥ ४-४८-२३ (३०४२१)
अद्य दुर्योधनस्याहं शोकं हृदि चिरं स्थितम् ।
समूलमपनेष्यामि हरन्पार्थशिरः शरैः ॥ ४-४८-२४ (३०४२२)
अद्य मत्कार्मुकोत्सृष्टैर्भल्लैश्च नतपर्वभिः ।
हताश्वं विरथं पार्थं पौरुषे पर्यवस्थितम् ।
निश्वसन्तं यथा नागमद्य पश्यन्तु कौरवाः ॥ ४-४८-२५ (३०४२३)
जामदग्न्यान्मया लब्धं दिव्यास्त्रमृषिसत्तमात् ।
तदुपाश्रित्य वीर्यं च युध्येयमपि वासवम् ॥ ४-४८-२६ (३०४२४)
ध्वजाग्रे वानरस्तिष्ठन्भल्लेन निहतो मया ।
अद्यैव पततां भूमौ विनदन्भैरवान्रवान् ॥ ४-४८-२७ (३०४२५)
कामं गच्छन्तु कुरवो गाः प्रगृह्य परंतपाः ।
रथेषु वाऽपि तिष्ठन्तो युद्धं पश्यन्तु मामकम् ॥ ॥ ४-४८-२८ (३०४२६)

इति श्रीमन्माहाभारते विराटपर्वणि गोग्रहणपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-४८-१८ बर्हिणां बहिणामिव एकैकस्य पृष्ठेपृष्ठे गच्छतां
मयूराणां मयूराणामिव बर्हिबर्हिणराजानां बर्हिणो मयूरस्य बर्हिणैः
शरमूले पत्ररूपेण स्थितमयूरपत्रैः राजानां राजमानानां
। राजृदीप्ताविति धातोः कर्त्रर्थे पचाद्यचि कृते रूपनिष्पत्तिः
। पततां पततां एकैकस्य शरस्य पृष्ठे पृष्ठे निपततां
शराणां घोषः पततां मालारूपेण निपतमानानां पततां पक्षिणां
घोष इव अखिलैः श्रूयतामिति योग्यक्रियाध्याहारेण संबन्धः । यद्वा
बर्हिणां बर्हवतां उत्पन्नबर्हाणामित्यर्थः । बर्हिणं मयूराणामिव
पततां पततां पुंखानुपुंखतया क्षणेक्षणे पततां पततां शराणां
घोषः पततां पक्षिणां घोष इव पततां दिशिदिशि पततामिति
लोडन्तक्रिया। सर्वैः श्रूयतामिति भावः । बर्हिबर्हिणवाजानामिति टो
थो धो पाठः ॥
१८ ॥
॥
अष्टचत्वारिंशोऽध्यायः ॥
४८ ॥

विराटपर्व - अध्याय ०४९
॥ श्रीः ॥
४.४९. अध्यायः ४९

Mahabharata - Virata Parva - Chapter Topics
कृपेणार्जुनचरित्रप्रशंसनपूर्वकं कर्णगर्हणम् ॥ १ ॥
तथा स्वेषु एकैकेनार्जुनस्य दुर्जयत्वकथनपूर्वकं
संभूयाभियाननिर्धारणम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-४९-० (३०४२७)
वैशम्पायन उवाच। ४-४९-०क्ष् (३२०५)
तस्य तद्वचनं श्रुत्वा नीतिशास्त्रविशारदः ।
आचार्यः कुरुवीराणां कृपः शारद्वतोऽब्रवीत् ॥ ४-४९-१ (३०४२८)
सदैव तव राधेय युद्धे क्रूरतरा मतिः ।
नार्थानां प्रकृतिं वेत्सि नानुबन्धमवेक्षसे ॥ ४-४९-२ (३०४२९)
नया हि बहवः सन्ति शास्त्राण्याश्रित्य चिन्तिताः ।
तेषां युद्धं सुपापिष्ठं वेदयन्ति पुराविदः ॥ ४-४९-३ (३०४३०)
देशकालेन संयुक्तं युद्धं विजयदं भवेत् ।
हीनकालं तदेवेह अनर्थायोपकल्पते ॥ ४-४९-४ (३०४३१)
देशे काले च विक्रान्तं कल्याणाय विधीयते ।
आनुकूल्येन कार्याणामुत्तरं तु विधीयते ॥ ४-४९-५ (३०४३२)
भारं हि रथकारस्य न व्यवस्यन्ति पण्डिताः ।
परिचिन्त्य तु पार्थेन संनिपातो न नः क्षमः ॥ ४-४९-६ (३०४३३)
एको हि शत्रून्समरे समर्थः प्रतिबाधितुम् ।
एकः कुरूनभ्यरक्षदेकश्चाग्निमतर्पयत् ॥ ४-४९-७ (३०४३४)
एकश्च पञ्च वर्षाणि ब्रह्मचर्यमधारयत् ।
एकः सुभद्रामारोप्य द्वैरथे कृष्णमाह्वयम् ॥ ४-४९-८ (३०४३५)
सैन्धवं वनवासे तु जित्वा कृष्णामथानयत् ।
एकश्च पञ्च वर्षाणि शक्रादस्त्राण्यशिक्षत ॥ ४-४९-९ (३०४३६)
एकः सपत्नाञ्जित्वा तु कुरूणामकरोद्यशः ।
एको गन्धर्वराजानं चित्रसेनमरिन्दमः ।
विजिग्ये तरसा सङ्ख्ये सेनां चास्य सुदुर्जयाम् ॥ ४-४९-१० (३०४३७)
पाञ्चाली श्रीमती प्राप्ता क्षत्रं जित्वा स्वयंवरे ।
आदाय गतवान्पार्थो भवान्क्वनु गतस्तदा ॥ ४-४९-११ (३०४३८)

तथा निवातकवचाः कालकेयाश्च दानवाः ।
दैवतैरप्यवध्यास्ते एकेन युधि पातिताः ॥ ४-४९-१२ (३०४३९)
एकेन हि त्वया कर्ण किं नामेह कृतं पुरा ।
एकैकेन यथा तेषां भूमिपाला वशे कृताः ॥ ४-४९-१३ (३०४४०)
इन्द्रोपि हि न पार्थेन संयुगे योद्धुमर्हति ।
यस्तेनाशंसते योद्धुं कर्तव्यं तस्य भेषजम् ॥ ४-४९-१४ (३०४४१)
आशीविषस्य क्रुद्धस्य पाणिमुद्यम्य दक्षिणम् ।
अवमुच्य प्रदेशिन्या दंष्ट्रामादातुमिच्छसि ॥ ४-४९-१५ (३०४४२)
अथवा कुञ्जरं मत्तमेकमेकचरं वने ।
निरङ्कुशं समारुह्य नगरं यातुमिच्छसि ॥ ४-४९-१६ (३०४४३)
समिद्धं पावकं चापि घृतमेदोवसाहुतम् ।
घृताक्तश्चीरवासास्त्वं मध्येनोत्सर्तुमिच्छसि ॥ ४-४९-१७ (३०४४४)
आत्मानं यः समाबध्य कण्ठे बद्धवा तथा शिलाम् ।
समुद्रं प्रतरेद्दोर्भ्यां तत्र किं कर्ण पौरुषम् ॥ ४-४९-१८ (३०४४५)
अकृतास्त्रः कृतास्त्रं वै बलवन्तं सुदुर्बलः ।
तादृशं कर्ण यः पार्थं योद्धुमिच्छेत्स दुर्मतिः ॥ ४-४९-१९ (३०४४६)
अस्माभिरेव निकृतो वर्षाणीह त्रयोदश ।
सिंहः पाशविनिर्मुक्तो न नः शेषं करिष्यति ॥ ४-४९-२० (३०४४७)
एकान्ते पार्थमासीनं कूपेऽग्निमिव संवृतम् ।
अज्ञानादभ्यवस्कन्द्य प्राप्ताः स्मो भयमुत्तमम् ॥ ४-४९-२१ (३०४४८)
उत्सृष्टं तूलराशौ तु एकोऽग्निं शमयेत्कथम् ।
सह युद्ध्यामहे पार्थमागतं युद्धदुर्मदम् ॥ ४-४९-२२ (३०४४९)
यत्ता वयं पराक्रान्ता व्यूढानीकाः प्रहारिणः ।
युद्धायावस्थितं पार्थमागतं पाकशासनिम् ॥ ४-४९-२३ (३०४५०)
यत्ताः सर्वे रथश्रेष्ठं परिवार्य समन्ततः ।
षड्रथाः परिकीर्यन्तां वज्रपाणिमिवासुराः ॥ ४-४९-२४ (३०४५१)
द्रोणो दुर्योधनो भीष्मो भवान्द्रौणिस्तथा वयम् ।
सर्वे युद्ध्यामहे पार्थं कर्ण मा साहसं कृथाः ॥ ४-४९-२५ (३०४५२)
न ह्यसंगत्य समरे पार्थं जेष्यामहे वयम् ।
संगत्य समरे पार्थं सर्वे जेष्यमाहे वयम् ॥ २६ ॥ ॥ ४-४९-२६ (३०४५३)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-४९-६ भारं हीति । यथा रथकारेण दिव्योऽयं मया निर्मितो

रथः सुदृढाङ्गः अनेन त्वं देवानपि सर्वथा जेष्यसीत्युक्ते
तद्वचसि भारं दत्त्वा देशकालानुकूल्यमनपेक्ष्यैव न
व्यवस्यन्ति। योद्धुमेति शेषः। एवं त्वद्वचसि भारं दत्त्वा
देशाद्यानुकूल्यमनवेक्ष्य कथमस्माभिर्योद्धव्यम्। तवतु वचनं
रथकारवचनवदर्शशून्यमिति भावः ॥
६ ॥
४-४९-१० एकः संयमिनीं जित्वा इति धो पाठः ॥
१० ॥
॥
एकोनपञ्चाशोऽध्यायः ॥
४९ ॥

विराटपर्व - अध्याय ०५०
॥ श्रीः ॥
४.५०. अध्यायः ५०

Mahabharata - Virata Parva - Chapter Topics
कृपेण स्वगर्हणममृष्यता कर्णेन तदुपालम्भः ॥ १ ॥
तदसहिष्णुनाऽश्वत्थाम्ना सममर्मोद्घाटनं कर्णदुर्योधनोपालम्भः ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-५०-० (३०४५४)
वैशम्पायन उवाच। ४-५०-०क्ष् (३२०६)
कृपस्य वचनं श्रुत्वा कर्णो राजन्युधांपतिः ।
पुनः प्रोवाच संरब्धो गर्हयन्ब्राह्मणं कृपम् ॥ ४-५०-१ (३०४५५)
कर्ण उवाच। ४-५०-२क्ष् (३२०७)
लक्षयाम्यहमाचार्यं भयाद्भक्तिं गतं रिपौ ।
भीतेन हि न योद्धव्यमहं योत्स्ये धनञ्जयम् ॥ २ ॥ ४-५०-२ (३०४५६)
ननु वारुणमाग्नेयं याम्यं वायव्यमेव च ।
अस्त्रं ब्रह्मशिरश्चैव सत्वहीनस्य ते वृथा ॥ ४-५०-३ (३०४५७)
मित्रकार्यं कृतमिदं पितापुत्रैर्महारथैः ।
भर्तृपिण्डश्च निर्विष्टो यथेष्टं गन्तुमर्हथ ॥ ४-५०-४ (३०४५८)
भिक्षां हरस्व नित्यं त्वं यज्ञाननुचरस्व च ।
आमन्त्रणानि भुङ्क्षाद्य माऽस्मान्युद्धेन भीषय ॥ ४-५०-५ (३०४५९)
भार्गवास्त्रं मया मुक्तं निर्दहेत्पृथिवीमिमाम् ।
किं पुनः पाण्डुपुत्राणामेकमर्जुनमाहवे ॥ ४-५०-६ (३०४६०)

आगमिष्यन्ति पदवीं मात्स्याः पाण्डवमाश्रिताः ।
कीचकानां तु बलिनां शत्रुसेनावमर्दिनाम् ॥ ४-५०-७ (३०४६१)
तानहं निहनिष्यामि भवता गम्यतां गृहम् ।
किं वेदवादिनां कार्यं परस्नेहानुभाषिणाम् ॥ ४-५०-८ (३०४६२)
तस्य तद्वचनं श्रुत्वा अश्वत्थामा प्रतापवान् ।
उवाच वदतांश्रेष्ठो दुर्योधनमवेक्ष्य च ॥ ४-५०-९ (३०४६३)
न च तावञ्जिता गावो न च सीमान्तरं गताः ।
न हास्तिनपुरं प्राप्तास्त्वं च कर्ण विकत्थसे ॥ ४-५०-१० (३०४६४)
बहूनि धर्मशास्त्राणि पठन्ति द्विजसत्तमाः ।
तेषु किंस्विदिदं दृष्टं द्यूते जीयेत यन्नृपः ॥ ४-५०-११ (३०४६५)
संग्रामान्विपुलाञ्जित्वा लब्धा च विपुलं धनम् ।
विजित्य च महीं कृत्स्नां नेह कत्थन्ति पण्डिताः ॥ ४-५०-१२ (३०४६६)
पचत्यग्निरवाक्यस्तु तूर्ष्णीं भाति दिवाकरः ।
तूर्ष्णीं धारयते लोकान्वसुधा सचराचरान् ॥ ४-५०-१३ (३०४६७)
चातुर्वर्ण्यस्य कर्माणि विहितानि महर्षिभिः ।
धनं यैरधिगन्तव्यं यच्च कुर्वन्न दुष्यति ॥ ४-५०-१४ (३०४६८)
अधीत्य ब्राह्मणो वेदान्याजयेत यजेत वा ।
क्षत्रियो धनमाहृत्य यजेतैव न याजयेत् ॥ ४-५०-१५ (३०४६९)
वैश्योऽधिगम्य वित्तानि वार्ताकर्माणि कारयेत् ॥ ४-५०-१६ (३०४७०)
शूद्रः शुश्रूषणं कुर्यात्रिषु वर्णेषु नित्यशः ।
वन्दनायोगविधिभिर्वैतसीं वृत्तिमाश्रितः ॥ ४-५०-१७ (३०४७१)
वर्तमाना यथाशास्त्रं प्राप्य चापि महीमिमाम् ।
प्रकुर्वन्ति महाभागा यज्ञान्सुविपुलानपि ॥ ४-५०-१८ (३०४७२)
का जातिस्तेषु सूतेयं केऽपि मन्त्राः क्रियाश्च काः ।
केयं वर्णेषु या राज्ञो वक्तृभोक्तृनियन्तृषु ॥ ४-५०-१९ (३०४७३)
वैशम्पायन उवाच। ४-५०-२०क्ष् (३२०८)
दुर्योधनमभिप्रेक्ष्य कर्णं च कुरुसंसाद ।
अश्वत्थामा भृशं क्रुद्धो दुर्योधनमतर्जयत् ॥ ४-५०-२० (३०४७४)
प्राप्य द्यूतेन को राज्यं क्षत्रियः स्तोष्टुमर्हति ।
तथा नृशंसरूपोयं धार्तराष्ट्रश्च निर्घृणः ॥ ४-५०-२१ (३०४७५)
तथाऽधिगम्य वित्तानि को विकत्थेद्विचक्षणः ।
निकृत्या वञ्चनायोगैश्चरन्वैतंसिको यथा ॥ ४-५०-२२ (३०४७६)
कतमद्द्वैरथं युद्धं यत्राजैषीर्धनञ्जयम् ।
नकुलं सहदेवं वा धनं येषां त्वया हृतम् ॥ ४-५०-२३ (३०४७७)
युधिष्ठिरो जितः कस्मिन्भीमश्च बलिनांवरः ।
इन्द्रप्रस्थं त्वया कस्मिन्संग्रामे निर्जितं पुरा ॥ ४-५०-२४ (३०४७८)

तथैव कतमद्युद्धं यस्मिन्कृष्णा जिता त्वया ।
एकवस्त्रा सभां नीता क्षुद्रकर्मन्रजस्वला ॥ ४-५०-२५ (३०४७९)
मूलमेषां महत्कृत्तं सारार्थी चन्दनं यथा ।
क्षुद्रं कर्म समास्थाय तत्र किं विदुरोऽब्रवीत् ॥ ४-५०-२६ (३०४८०)
यथाशक्ति मनुष्याणाममर्षं लक्षयामहे ।
अन्येषामपि सत्वानामपि कीटपिपीलिकैः ॥ ४-५०-२७ (३०४८१)
द्रौपद्याः संपरिक्लेशं न क्षन्तुं पाण्डवोऽर्हति ।
क्षयाय धार्तराष्ट्राणां प्रादुर्भूतो धनञ्जयः ॥ ४-५०-२८ (३०४८२)
त्वं पुनः पण्डितो भूत्वा ह्याचार्यं क्षेप्तुमिच्छसि ।
वैरान्तकरणो जिष्णुर्न नः शेषं करिष्यति ॥ ४-५०-२९ (३०४८३)
नैव देवा न गन्धर्वा नासुरा न च राक्षसाः ।
भयादिह न युद्ध्येरन्पाण्डुपुत्रेण धीमता ॥ ४-५०-३० (३०४८४)
यं यमेकोपि संक्रुद्धः संग्रामे निपतिष्यति ।
वृक्षं गरुडवद्वेगाद्विनिहत्यान्तमेष्यति ॥ ४-५०-३१ (३०४८५)
त्वत्तो विशिष्टं वीर्येण धनुष्यमरराट्समम् ।
वासुदेवसमं युद्धे तं पार्थं को न पूजयेत् ॥ ४-५०-३२ (३०४८६)
देवं दैवेन युद्ध्येत मानुपेण च मानुपम् ।
अस्त्रं ह्यस्त्रेण यो हन्यात्कोऽर्जुनेन समः पुमान् ॥ ४-५०-३३ (३०४८७)
पुत्रादनवमः शिष्य इति धर्मविदो विदुः ।
एतेनापि निमित्तेन प्रियो द्रोणस्य पाण्डवः ॥ ४-५०-३४ (३०४८८)
यथा त्वमकरोर्द्यूतमिन्द्रप्रस्थं यथाऽहरः ।
यथाऽनैषीः सभां कृष्णां तथा युध्यस्व पाण्डवं ॥ ४-५०-३५ (३०४८९)
अयं ते मातुलः प्राज्ञः क्षत्रधर्मस्य कोविदः ।
दुर्द्यूतदेवी गान्धारः शकुनिर्युद्ध्यतामिह ॥ ४-५०-३६ (३०४९०)
नाक्षान्क्षिपति गाण्डीवं न कृतं द्वापरं न च ।
ज्वलतो निशितान्बाणांस्तांस्तान्क्षिपति गाण्डिवं ॥ ४-५०-३७ (३०४९१)
न हि गाण्डीवनिर्मुक्ता गृध्रपक्षाः सुतेजनाः ।
नान्तरेष्ववतिष्ठन्ते गिरीणामपि दारणाः ॥ ४-५०-३८ (३०४९२)
अन्तकः पवनो मृत्युस्तथाऽग्निर्बडवामुखः ।
कुर्युरेते क्वचिच्छेषं न तु क्रुद्धो धनञ्जयः ॥ ४-५०-३९ (३०४९३)
यथा सभायां द्यूतं त्वं मातुलेन महाकरोः ।
तथा युद्धस्व संग्रामे सौबलेन सुरक्षितः ॥ ४-५०-४० (३०४९४)
युद्ध्यतां काममाचार्यो नाहं योत्स्ये धनञ्जयम् ।
मत्स्यो ह्यस्माभिरायोध्यो यद्यागच्छेद्गवांपदम् ॥ ॥ ४-५०-४१ (३०४९५)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि पञ्चाशोऽध्यायः

॥ ५० ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-५०-१४ यदुक्तं ब्राह्मणानां भोजनादावेव कौशलं न युद्ध इति तत्र तवापि वैश्यत्वान्न युद्धे सामर्थ्यमस्तीति दर्शयिष्यन्वर्णानां कर्माणि विभजते चातुर्वर्ण्यस्येत्यादिना ॥
१४ ॥
४-५०-२२ वैतंसिको व्याधः ॥
२२ ॥
४-५०-२६ अनृतं द्यूतं कुर्वता धार्तराष्ट्रेण धर्मस्य मूलं कृत्तं छिन्नं । तत्र तदा विदुरः किमब्रवीत् क्षयमूलं द्यूतमिति तत्स्मरेति शेषः ॥
२६ ॥
४-५०-३७ चकारात् त्रेतानि समुच्चीयते । कृतादयो द्यूतशास्त्रप्रसिद्धाः पाशकाः ॥
३७ ॥
॥
पञ्चाशोऽध्यायः ॥
५० ॥

विराटपर्व - अध्याय ०५१
॥ श्रीः ॥
४.५१. अध्यायः ५१

Mahabharata - Virata Parva - Chapter Topics

कर्णकृतद्रोणकृपाधिक्षेपसंक्रुद्धमश्वत्थामानं प्रति भीष्मेण द्रोणादिप्रशंसनपूर्वकं परिसान्त्वनम् ॥ १ ॥
दुर्योधनेन भीष्मकर्णाभ्यां सह कृपद्रोणक्षमापनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-५१-० (३०४९६)
वैशम्पायन उवाच। ४-५१-०क्ष् (३२०९)
ततः शान्तनवस्तत्र धर्मार्थकुशलं हितम् ।
दुर्योधनमिदं वाक्यमब्रवीत्कुरुसंसदि ॥ ४-५१-१ (३०४९७)
साधु पश्यति वै द्रोणः कृपः साध्वनुपश्यति ।
आचार्यपुत्रः सहजं निश्चितं साधु भाषते ॥ ४-५१-२ (३०४९८)

कर्णस्तु क्षत्रधर्मेण केवलं योद्धुमिच्छति ।
आचार्यो नावमन्तव्यः पुरुषेण विजानता ।
देशकालौ तु संप्रेक्ष्य योद्धव्यमिति मे मतिः ॥ ४-५१-३ (३०४९९)
यस्य सूर्यसमाः पञ्च सपत्नाः स्युः प्रहारिणः ।
कथमभ्युदये तेषां न प्रमुह्येत पण्डितः ॥ ४-५१-४ (३०५००)
स्वार्थे सर्वे विमुह्यन्ति येऽपि धर्मविदो जनाः ।
तस्मात्तत्वं न जानाति यत्तु कार्यं नराधिपः ॥ ४-५१-५ (३०५०१)
धार्तराष्ट्रोपि दुर्बुद्धिः पश्यन्नपि धनञ्जयम् ।
नैव पश्यति नाघ्राति मन्दः क्रोधवशं गतः ॥ ४-५१-६ (३०५०२)
वैशम्पायन उवाच। ४-५१-७क्ष् (३२१०)
एवमुक्त्वा तु राजानं पुनर्द्रौणिमुवाच ह ।
प्राञ्जलिर्भरतश्रेष्ठः साम्ना बुद्धिमतांवरः ॥ ४-५१-७ (३०५०३)
कर्णो हि यदवोचत्त्वां तेजस्संजननाय तत् ।
आचार्यपुत्रः क्षमतां महत्कार्यमुपस्थितम् ॥ ४-५१-८ (३०५०४)
नायं कालो विरोधस्य कौन्तेये समुपस्थिते ।
क्षन्तव्यं भवता सर्वमाचार्येण कृपेण च ॥ ४-५१-९ (३०५०५)
भवतां हि कृतास्त्रत्वं यथाऽऽदित्ये प्रभा तथा ।
यथा चन्द्रमसो लक्ष्मीः सर्वथा नापकृष्यते ।
एवं भवत्सु ब्राह्मण्यं ब्रह्मास्त्रं च प्रतिष्ठितम् ॥ ४-५१-१० (३०५०६)
चत्वार एकतो वेदाः क्षात्रमेकत्र दृश्यते ।
नैतत्समस्तमुभयं कस्मिंश्चिदनुशुश्रुम ।
अन्यत्र भारताचार्यात्सुपुत्रादिति मे मतिः ॥ ४-५१-११ (३०५०७)
वेदान्ताश्च पुराणानि इतिहासं पुरातनम् ।
जामदग्न्यमृते राजन्को द्रोणादधिको भवेत् ॥ ४-५१-१२ (३०५०८)
ब्रह्मास्त्रं चैव वेदाश्च नैतदन्यत्र दृश्यते ॥ ४-५१-१३ (३०५०९)
आचार्यपुत्रः क्षमतां नायं कालो विभेदने ।
सर्वे संहत्य युद्ध्यामः पाकशासनिमागतम् ॥ ४-५१-१४ (३०५१०)
बलस्य व्यसनानीह यान्युक्तानि मनीषिभिः ।
मुख्यो भेदोहि तेषां तु पापिष्ठो विदुषां मतः ॥ ४-५१-१५ (३०५११)
अश्वत्थामोवाच। ४-५१-१६क्ष् (३२११)
नैवं न्याय्यमिदं वाच्यमस्माकं पुरुषर्षभ ।
किंतु रोषपरीतेन गुरुणा भाषिता गुणाः ॥ ४-५१-१६ (३०५१२)
शत्रोरपि गुणा ग्राह्या दोषा वाच्या गुरोरपि ।
सर्वथा सर्वयत्नेन पुत्रे शिष्ये हितं वदेत् ॥ ४-५१-१७ (३०५१३)
आचार्य एष क्षमतां शान्तिरत्र विधीयताम् ।
अभिद्यमाने तु गुरौ निवृत्तं रोषकारितम् ॥ ४-५१-१८ (३०५१४)

वैशम्पायन उवाच। ४-५१-१९क्ष् (३२१२)
ततो दुर्योधनो द्रोणं क्षमयामास भारत ।
सह कर्णेन भीष्मेण कृपं चैव महाबलम् ॥ ४-५१-१९ (३०५१५)
द्रोण उवाच। ४-५१-२०क्ष् (३२१३)
यदेतत्प्रथमं वाक्यं भीष्मः शान्तनवोऽब्रवीत् ।
तेनैवाहं प्रसन्नो वै परमत्र विधीयताम् ॥ ४-५१-२० (३०५१६)
यथा दुर्योधनं पार्थो नोपसर्पति संगरे ।
साहसाद्यदि वा मोहात्तथा नीतिर्विधीयताम् ॥ ४-५१-२१ (३०५१७)
वनवासे ह्यनिर्वृत्ते दर्शयेन्न धनञ्जयः ।
धनं चालभमानोऽत्र नाद्य तत्क्षन्तुमर्हति ॥ ४-५१-२२ (३०५१८)
यथा नायं समायुञ्ज्याद्धार्तराष्ट्रं कथंचन ।
न च सेनां पराजय्यात्तथा नीतिर्विधीयताम् ॥ ४-५१-२३ (३०५१९)
उक्तं दुर्योधनेनापि पुरस्ताद्वाक्यमीदृशम् ।
तदनुस्मृत्य गाङ्गेय यथावद्वक्तुमर्हसि ॥ ॥ ४-५१-२४ (३०५२०)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
एकपञ्चाशोऽध्यायः ॥ ५१ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-५१-२१ यथा दुर्योधनो राजा न गच्छेत्कांचिदापदमिति टो थो पाठः
। यथा नायशसा युक्तो धार्तराष्ट्रः कथंचनेति धो पाठः ॥
२१ ॥
॥
एकपञ्चाशोऽध्यायः ॥
५१ ॥

विराटपर्व - अध्याय ०५२
॥ श्रीः ॥
४.५२. अध्यायः ५२

Mahabharata - Virata Parva - Chapter Topics
भीष्मेण दुर्योधनंप्रति हेतूपन्यासपूर्वकं युधिष्ठिरंप्रति
श्रुतवनवासादिकालस्य परिसमाप्तिकथनम् ॥ १ ॥
भीष्मेणार्जुनपराक्रमप्रशंसनपूर्वकं पाण्डवैः सह संधिविधानेपि
दुर्योधनेन तत्प्रतिषेधनम् ॥ २ ॥
भीष्मेण द्रोणवचनाद्गोभिः सह दुर्योधनस्य प्रस्थापनपूर्वकं
सेनाया व्यूहीकरणेन समराभियानम् ॥ ३ ॥

४-५२-० (३०५२१)
भीष्म उवाच। ४-५२-०क्ष् (३२१४)
कलाः काष्ठाश्च युज्यन्ते मुहूर्ताश्च दिनानि च ।
अर्धमासाश्च मासाश्च नक्षत्राणि ग्रहास्तथा ॥ ४-५२-१ (३०५२२)
ऋतवश्चापि युज्यन्ते तथा संवत्सरा अपि ।
एवं कालविभागेन कालचक्रं प्रवर्तते ॥ ४-५२-२ (३०५२३)
तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात् ।
पञ्चमे पञ्चमे वर्षे द्वौ मासावधिमासकौ ॥ ४-५२-३ (३०५२४)
एषामभ्यधिका मासाः पञ्च च द्वादश क्षपाः ।
त्रयोदशानां वर्षाणामिति मे वर्तते मतिः ॥ ४-५२-४ (३०५२५)
पूर्वेद्युरेव निर्वृत्तस्ततो बीभत्सुरागतः ॥ ४-५२-५ (३०५२६)
सर्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ।
एवमेतद्ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ॥ ४-५२-६ (३०५२७)
सर्वे पञ्च महात्मानः सर्वे धर्मार्थकोविदाः ।
येषां युधिष्ठिरो राजा कस्माद्धर्मेऽपराध्नुयुः ॥ ४-५२-७ (३०५२८)
कामात्क्रोधाच्च लोभाच्च कामक्रोधभयादपि ।
स्नेहाद्वा यदि वा मोहाद्धर्मं नात्येति धर्मजः ॥ ४-५२-८ (३०५२९)
अलुब्धाश्चैव कौन्तेयाः कृतवन्तश्च दुष्करम् ।
न चापि केवलं राज्यमिच्छेयुस्ते ह्यधर्मतः ॥ ४-५२-९ (३०५३०)
तदैव ते हि विक्रान्तुमीषुः कौरवनन्दनाः ।
धर्मपाशनिबद्धास्तु न चेलुः क्षत्रियव्रतात् ॥ ४-५२-१० (३०५३१)
यश्चानृत इति ख्यातः स च गच्छेत्पराभवम् ।
वृणुयुर्मरणं पार्था नानृतत्वं कथंचन ॥ ४-५२-११ (३०५३२)
प्राप्ते तु काले स्वानर्थान्नोत्सृजेयुर्नरर्षभाः ।
अपि वज्रभृता गुप्तांस्तथावीर्या हि पाण्डवाः ॥ ४-५२-१२ (३०५३३)
प्रतियुद्ध्येम समरे सर्वशस्त्रभृतांवरम् ॥ ४-५२-१३ (३०५३४)
तस्माद्यदत्र कल्याणं लोके सद्भिरनुष्ठितम् ।
तत्संविधीयतां शीघ्रं मा वो ह्यर्थोऽभ्यगात्परम् ॥ ४-५२-१४ (३०५३५)
न हि पश्यामि संग्रामे कदाचिदपि कौरव ।
एकान्तसिद्धिं राजेन्द्र संप्राप्तश्च धनञ्जयः ॥ ४-५२-१५ (३०५३६)
संप्रवृत्ते तु संग्रामे भावाभावौ जयाजयौ ।
अवश्यमेकं स्पृशतो दृष्टमेतदसंशयम् ॥ ४-५२-१६ (३०५३७)
तस्माद्युद्धोपचरितं कर्म वा धर्मसंहितम् ।

क्रियतामाशु राजेन्द्र संप्राप्तश्च धनञ्जयः ॥ ४-५२-१७ (३०५३८)
एको हि समरे पार्थः पृथिवीं निर्दहेच्छरैः ।
भ्रातृभिः सहितो भूत्वा किं पुनः कौरवान्रणे ।
तस्मात्सन्धिं कुरुश्रेष्ठ कुरुष्व यदि मन्यसे ॥ ४-५२-१८ (३०५३९)
दुर्योधन उवाच। ४-५२-१९क्ष् (३२१५)
नाहं राज्यं प्रदास्यामि पाण्डवेभ्यः पितामह ।
ग्रामं सेनां च दासांश्च स्वल्पं द्रव्यमपि प्रभो ।
युद्धोपचारिकं यत्तु तत्सर्वं संविधीयताम् ॥ ४-५२-१९ (३०५४०)
वैशम्पायन उवाच। ४-५२-२०क्ष् (३२१६)
भीष्मस्योपरते वाक्ये तथा दुर्योधनस्य च ।
प्राप्तमर्थ्यं च यद्वाक्यं द्रोणश्चाह द्विजोत्तमः ॥ ४-५२-२० (३०५४१)
यत्तु युद्धोपचरितं भवेद्वा धर्मसंहितम् ।
कस्त्वया सदृशो लोके भूयस्त्वं वक्तुमर्हसि ॥ ४-५२-२१ (३०५४२)
अत्र या मामिका बुद्धिः श्रूयतां यदि रोचते ।
सर्वथा हि मया श्रेयो वक्तव्यं कुरुनन्दन ॥ ४-५२-२२ (३०५४३)
राजा बलचतुर्भागं क्षिप्रमादाय गच्छतु ।
ततोऽपरश्चतुर्भागो गाः समादाय गच्छतु ।
वयं चार्धेन सैन्यस्य प्रतियोत्स्याम पाण्डवम् ॥ ४-५२-२३ (३०५४४)
अहं भीष्मश्च कर्णश्च अश्वत्थामा कृपस्तथा ।
प्रतियोत्स्याम बीभत्सुमागतं कृतनिश्चयम् ॥ ४-५२-२४ (३०५४५)
एवं राजा सुगुप्तः स्यान्न क्लैब्यं गन्तुमर्हति ।
मत्स्यं वा पुनरायातमथवापि शतक्रतुम् ।
अहमावारयिष्यामि वेलेव मकरालयम् ॥ ४-५२-२५ (३०५४६)
वैशम्पायन उवाच। ४-५२-२६क्ष् (३२१७)
तद्वाक्यं रुरुचे तेषां द्रोणेनोक्तं महात्मना ।
तथाहि कृतवान्राजा कौरवाणामनन्तरम् ॥ ४-५२-२६ (३०५४७)
भीष्मः प्रस्थाप्य राजानं गोधनं तदनन्तरम् ।
सेनामुख्यान्व्यवस्थाप्य व्यूहितुं संप्रचक्रमे ॥ ४-५२-२७ (३०५४८)
द्रोणस्योपरते वाक्ये भीष्मः प्रोवाच बुद्धिमान् ।
आचार्य मध्ये तिष्ठ त्वमश्वत्थामा तु सव्यतः ।
कृपः शारद्वतो धीमान्पार्श्वं रक्षतु दक्षिणम् ॥ ४-५२-२८ (३०५४९)
विकर्णश्च महावीर्यो दुर्मुखश्च परन्तपः ।
शकुनिः सौबलश्चैव दुःसहश्च महाबलः ।
द्रोणस्य पार्श्वमजिताः पालयन्तु महाबलाः ॥ ४-५२-२९ (३०५५०)
अग्रतः सूतपुत्रस्तु कर्णस्तिष्ठतु दंशितः ।
अहं सर्वस्य सैन्यस्य पश्चात्स्थास्यामि पालयन् ॥ ४-५२-३० (३०५५१)

सर्वे महारथाः शूरा महेष्वासा महाबलाः ।
युद्ध्यन्तु पाण्डवश्रेष्ठमागतं यत्नतो युधि ॥ ४-५२-३१ (३०५५२)
वैशम्पायन उवाच। ४-५२-३२क्ष् (३२१८)
अभेद्यं परसैन्यानां व्यूहं व्यूह्य कुरूत्तमः ।
वज्रगर्भं व्रीहिमुखं पद्मचन्द्रार्धमण्डलम् ॥ ४-५२-३२ (३०५५३)
तस्य व्यूहस्य पश्चार्धे भीष्मश्चाथोद्यतायुधः ।
सौवर्णं तालमुच्छ्रित्य रथे तिष्ठन्नशोभत ॥ ॥ ४-५२-३३ (३०५५४)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-५२-१८ तस्माद्यद्धोचितं कर्मेति धो पाठः ॥
१८ ॥
४-५२-३२ पद्मगर्भमिति थो पाठः ॥
३२ ॥
॥
द्विपञ्चाशोऽध्यायः ॥
५२ ॥

विराटपर्व - अध्याय ०५३
॥ श्रीः ॥
४.५३. अध्यायः ५३

Mahabharata - Virata Parva - Chapter Topics
इन्द्रेण सुदर्शननामनि कामगामिनि प्रासादे
देवगणसमारोपणपूर्वकमर्जुनकुरुरणावलोकनाय गगनाङ्कणावतरणम्
॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-५३-० (३०५५५)
वैशम्पायन उवाच। ४-५३-०क्ष् (३२१९)
ततः सुदर्शनं नाम प्रासादं हरिवाहनः ।
सर्वान्देवान्समारोष्य प्रययो यत्र पाण्डवः ॥ ४-५३-१ (३०५५६)
स्थूणाराजिसहस्रं तु यत्र मध्ये प्रतिष्ठितम् ।
तत्र सूर्यपथेऽतिष्ठद्विमला महती सभा ॥ ४-५३-२ (३०५५७)

आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ।
तत्र श्वेतानि चक्राणि काञ्चनस्फाटिकानि च ॥ ४-५३-३ (३०५५८)
तथा चित्राणि छत्राणि दिव्यरूपाणि भारत ।
मणिरत्नविचित्राणि नानारूपाणि भागशः ।
आकाशे सह दृश्यन्ते भानुमन्ति शुभानि च ॥ ४-५३-४ (३०५५९)
अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च ।
तथा धातुर्विधातुश्च मित्रस्य धनदस्य च ।
रुद्रस्य विष्णो सवितुस्त्रिदशानां तथैव च ॥ ४-५३-५ (३०५६०)
काञ्चनानि च दामानि विविधाश्चोत्तमस्रजः ।
दिव्यपुष्पाभिसवीतास्तत्र चित्राणि भेजिरे ॥ ४-५३-६ (३०५६१)
तस्मिंस्तु राजन्प्रासादे दिव्यरत्नविभूषिते ।
दिव्यगन्धसमायुक्ताः स्रजो दिव्याश्चकाशिरे ॥ ४-५३-७ (३०५६२)
दिव्यश्च वायुः प्रववौ गन्धमादाय सर्वशः ।
ऋतवः पुष्पमादाय समतिष्ठन्त भारत ॥ ४-५३-८ (३०५६३)
प्रजानां पतयः सप्त सप्त चैव महर्षभः ।
तत्र देवर्षयश्चैव देवराजं दिवौकसः ।
इन्द्रेण सहिताः सर्वे त्रिदशाश्च व्यवस्थिताः ॥ ४-५३-९ (३०५६४)
न पङ्को न रजस्तत्र प्रविवेश कथंचन ।
आदित्यश्च विरूक्षोत्र नातिवेलमिवातपत् ॥ ४-५३-१० (३०५६५)
दिव्यगन्धं समादाय वायुस्तत्राभिगच्छति ।
आकाशं च दिशः सर्वा दर्शनीयमदृश्यत ॥ ४-५३-११ (३०५६६)
तत्र देवाः समारुह्य तं दिव्यं सर्वतःप्रभम् ।
अम्बरे विमलेऽतिष्ठन्प्रासादं कामगामिनम् ॥ ४-५३-१२ (३०५६७)
तत्र राजर्षयश्चैव समारुह्य दिवौकसः ।
श्वेतो राजा वसुमनास्तथा भद्रः प्रदर्शनः ॥ ४-५३-१३ (३०५६८)
नृगो ययातिर्नहुपो मान्धात भरतः कुरुः ।
अष्टकश्च शिबिश्चोभौ स च राजा पुरूरवाः ॥ ४-५३-१४ (३०५६९)
डम्भोद्भवः कार्तवीर्यो ह्यर्जुनः सगरस्तथा ।
दिलीपः केरलः पूरुः शर्यातिः सोमकस्तदा ॥ ४-५३-१५ (३०५७०)
हरिश्चन्द्रश्च तेजस्वी रघुर्दशरथस्तथा ।
भगीरथश्च राजर्षिः सर्वे च जनमेजय ॥ ४-५३-१६ (३०५७१)
पाण्डुश्चैव महाराजश्चामरव्यजनोज्ज्वलः ।
छत्रेण ध्रियमाणेन राजसूयश्रिया वृतः ॥ ४-५३-१७ (३०५७२)
एते चान्ये च बहवः पुण्यशीलाः शुचिव्रताः ।
कीर्तिमन्तो महावीर्यास्तत्रैवासन्दिवि स्थिताः ॥ ४-५३-१८ (३०५७३)
गणाश्चाप्सरसां सर्वे गन्धर्वाश्चापि सर्वशः ।

दैत्यराक्षसयक्षाश्च सुपर्णाः पन्नगास्तथा ॥ ४-५३-१९ (३०५७४)
वासवप्रमुखाः सर्वे देवाश्च सगणेश्वराः ।
आसंस्तत्र समारूढाः संग्रामं तं दिदृक्षवः ॥ ४-५३-२० (३०५७५)
४-५३-२१ (३०५७६)
इत्यम्बरे व्यवस्थाय प्रासादस्था दिवौकसः ।
एकस्य च बहूनां च युद्धं द्रष्टुं व्यवस्थिताः ॥

विराटपर्व - अध्याय ०५४
॥ श्रीः ॥
४.५४. अध्यायः ५४

Mahabharata - Virata Parva - Chapter Topics
सेनामध्ये दुर्योधनमनवलोकयताऽर्जुनेनोत्तरंप्रति तत्पदवीमनु
रथयापनचोदना ॥ १ ॥
तथा बाणाभ्यां द्रोणाद्यभिवादनपूर्वकं ताभ्यामेव कर्णमूले
कुशलप्रश्नः ॥ २ ॥
द्रोणेन तत्कौशलश्लाघनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-५४-० (३०५७७)
वैशम्पायन उवाच। ४-५४-०क्ष् (३२२०)
तथा व्यूढेष्वनीकेषु कौरवेयैर्महारथैः ।
उपायादर्जुनस्तूर्णं रथघोषेण नादयन् ॥ ४-५४-१ (३०५७८)
ददृशुस्ते ध्वजाग्रं वै शुश्रुवुश्च रथस्वनम् ।
दोधूयमानस्य भृशं गाण्डीवस्य च निस्वनम् ॥ ४-५४-२ (३०५७९)
त्रिकोशमात्रं गत्वा तु पाण्डवः श्वेतवाहनः ।
संनामुखमभिप्रेक्ष्य पार्थो वैराटिमब्रवीत् ॥ ४-५४-३ (३०५८०)
राजानं नात्र पश्यामि रथानीके व्यवस्थितम् ।
दक्षिणं पक्षमादाय कुरुवो यान्त्युदङ्भुंखाः ॥ ४-५४-४ (३०५८१)
उत्सृज्यैतद्रथानीकं महेष्वासाभिरक्षितम् ।
गवाग्रमभितो याहि यावत्पश्यामि मे रिपुम् ॥ ४-५४-५ (३०५८२)
गवाग्रमभितो गत्वा गाश्चैवाशु निवर्तय ।
यावदेते निवर्तन्ते कुरवो जवमास्थिताः ।
तावदेव पशून्सर्वान्निवर्तिष्ये तवाभिभो ॥ ४-५४-६ (३०५८३)
वैशम्पायन उवाच। ४-५४-७क्ष् (३२२१)

इत्युक्त्वा समरे पार्थो वैराटिमपराजितः ।
सव्यं पक्षमनुप्राप्य जवेनाश्वानचोदयत् ॥ ४-५४-७ (३०५८४)
ततोऽभ्यवादयत्पार्थो भीष्मं शान्तनवं कृपम् ।
द्वाभ्यांद्वाभ्यां तथाऽऽचार्यं द्रोणं प्रथमतः क्रमात् ॥ ४-५४-८ (३०५८५)
द्रोणं कृपं च भीष्मं च पृषत्कैरभ्यवादयत् ।
ततस्तत्सर्वमालोक्य द्रोणो वचनमब्रवीत् ॥ ४-५४-९ (३०५८६)
महारथमनुप्राप्तं दृष्ट्वा गाण्डीवधन्विनम् ।
न कश्चिद्योद्धिमिच्छेत न च गुप्तं स्वजीवितम् ।
अयं वीरश्च शूरश्च दुर्धर्षश्चैव संयुगे ॥ ४-५४-१० (३०५८७)
एतद्ध्वजाग्रं पार्थस्य दूरतः प्रतिदृश्यते ।
मेघःक सविद्युत्स्तनितो रोरवीति च वानरः ॥ ४-५४-११ (३०५८८)
आस्थाय च रथं याति गाण्डीवं विक्षिपन्धनुः ॥ ४-५४-१२ (३०५८९)
अश्वानां स्तनतां शब्दो वहतां पाकशासनिम् ।
रथस्याम्बुधरस्येव श्रूयते भृशदारुणः ॥ ४-५४-१३ (३०५९०)
दारयन्निव तेजस्वी वसुधां वासवात्मजः ।
एष दृष्ट्वा रथानीकमस्माकमरिमर्दनः। ४-५४-१४ (३०५९१)
श्रीमान्वदान्यो धृतिमान्तत्करोति च पाण्डवः ॥
इमौ बाणावनुप्राप्तौ पादयोः प्रत्युपस्थितौ । ४-५४-१५ (३०५९२)
रथस्याग्रे निखातौ मे चित्रपुङ्खावजिह्मगौ ॥
इमौ चाप्यपरौ बाणावभितः कर्णमूलयोः । ४-५४-१६ (३०५९३)
संस्पृशन्तावतिक्रान्तौ पृष्ट्वेवानामयं भृशम् ॥
चिरदृष्टोऽयमस्माभिर्धर्मज्ञो बान्धवप्रियः । ४-५४-१७ (३०५९४)
अतीव ज्वलते लक्ष्म्या पाण्डुपुत्रः प्रतापवान् ॥
निरुष्य च वने वामं कृत्वा कर्म सुदुष्करम् । ४-५४-१८ (३०५९५)
अभिवादयते पार्थः पूजयन्मामरिंदमः ॥
अमर्षेण हि संपूर्णो दुःखेन प्रतिबोधितः। ४-५४-१९ (३०५९६)
अद्येमां भारतीं सेनामेको नाशयते ध्रुवम् ॥
द्व्यधिकं दशमुष्य वत्सराणां स्वजनेनाविदितस्त्रयोदशं च ।
४-५४-२० (३०५९७)
ज्वलते रथमास्थितः किरीटी तम इव रात्रिजमभ्युदस्य सूर्यः ॥
रथी शरी चारुमाली निषङ्गी शङ्खी पताकी कवची किरीटी।
४-५४-२१ (३०५९८)
खड्गी च धन्वी च विराजतेऽयं शिखीव यज्ञेषु घृतेन सिक्तः
॥ ॥ ४-५४-२२ (३०५९९)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि

विराटपर्व - अध्याय ०५५
॥ श्रीः ॥
४.५५. अध्यायः ५५

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन सेनामध्ये सुयोधनानवलोकनेन तस्य गवामादानेन गमनसंभावनया रथेन गवाग्रं प्रत्यभियानम् ॥ १ ॥
भीष्मेण पार्थभावविज्ञानात्सेनया सह तमनुधावनम् ॥ २ ॥
गवान्तिकमुपगतवताऽर्जुनेन तद्रक्षिणां बाणगणैरभिहननेन गवां विनिवर्तनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-५५-० (३०६००)
वैशम्पायन उवाच। ४-५५-०क्ष् (३२२२)
तमदूरमुपायान्तं दृष्ट्वा पाण्डवमर्जुनम् ।
नारयः प्रेक्षितुं शेकुस्तपन्तं हि यथा रविम् ॥ ४-५५-१ (३०६०१)
स तं दृष्ट्वा रथानीकं पार्थः सारथिमब्रवीत् ।
इषुपातमात्रे सेनायाः स्थापयाश्वानरिंदम ।
यावत्समीक्षे व्यूहेऽस्मिन्मम शत्रुं सुयोधनम् ॥ ४-५५-२ (३०६०२)
रक्तवैडूर्यविकृतं मणिप्रवरभूषितम् ।
परं जानाम्यहं तस्य ध्वजं दूरात्समुच्छ्रितम् ॥ ४-५५-३ (३०६०३)
यद्येनमिह पश्यामि दुर्बुद्धिमतिमानिनम् ।
यमाय प्रेषयिष्यामि सहायः स्याद्यदीश्वरः ॥ ४-५५-४ (३०६०४)
सर्वानन्याननादृत्य दृष्ट्वा तमतिमानिनम् ।
सिंहः क्षुद्रमृगस्येव पतिष्ये तस्य मूर्धनि ॥ ४-५५-५ (३०६०५)
हनिष्यामि तमेवाद्य शरैर्गाण्डीवनिःसृतैः ।
तस्मिन्हते भविष्यन्ति सर्वे एव पराजिताः ॥ ४-५५-६ (३०६०६)
शरैश्च शमयिष्येऽहं धार्तराष्ट्रं ससौबलम् ।
असभ्यानां च वक्तारं कुरूणां किल किल्बिषम् ॥ ४-५५-७ (३०६०७)
राजानं नेह पश्यामि निरापिषमिदं बलम् ।
अभिद्रेव ह राजानं व्यक्तमित्यत्र निर्भयः ॥ ४-५५-८ (३०६०८)
आस्थितो मध्यमाचार्योप्यश्वत्थामाऽप्यनन्तरम् ।
कृपकर्णौ पुरस्तात्तु महेष्वासौ व्यवस्थितौ ॥ ४-५५-९ (३०६०९)
भूरिश्रवाः सोमदत्तो बाह्लीकश्च जयद्रथः ।

दक्षिणं पक्षमाश्रित्य स्थिता युद्धविशारदाः ॥ ४-५५-१० (३०६१०)
साल्वराजो द्युमत्सेनो वृषसेनश्च सौबलः ।
दशार्णश्चैव कालिङ्गो वामं पक्षं समाश्रितः ॥ ४-५५-११ (३०६११)
पृष्ठतः कुरुमुख्यश्च भीष्मस्तिष्ठति दंशितः ।
सोऽर्धसैन्येन बलवान्सर्वेषां नः पितामहः ॥ ४-५५-१२ (३०६१२)
दुर्योधनं न पश्यामि क्व नु राजा स तिष्ठति ।
उत्सृंज्यैतद्रथानीकं याहि यत्र सुयोधनः ॥ ४-५५-१३ (३०६१३)
तं हत्वा संनिवर्तिष्ये गाः स आदाय गच्छति ।
गवाग्रमभितो याहि यत्र राजा भविष्यति ॥ ४-५५-१४ (३०६१४)
वैशम्पायन उवाच। ४-५५-१५क्ष् (३२२३)
इत्युक्त्वा समरे पार्थो वैराटिमपराजितः ।
संस्पृशानो धनुर्दिव्यं त्वरमाणोऽगमत्तदा ॥ ४-५५-१५ (३०६१५)
ततो भीष्मोऽब्रवीद्वाक्यं कुरुमध्ये परंतपः ।
चिरदृष्टोऽयमस्माभिर्धर्मज्ञो बान्धवप्रियः । ४-५५-१६ (३०६१६)
अतीव ज्वलते लक्ष्म्या पाकशासनिरागतः ।
एष दुर्योधनं पार्थो मार्गते निकृतिं स्मरन् ॥ ४-५५-१७ (३०६१७)
सेनामत्यर्थमालोक्य त्वरते ग्रहणेऽस्य च ।
मृगं सिंह इवादातुमीक्षते पाकशासनिः ॥ ४-५५-१८ (३०६१८)
नैषोऽन्तरेण राजानं बीभत्सुः स्थातुमर्हति ।
तस्य पार्ष्णिं ग्रहीष्यामो जवेनाभिप्रधावतः ॥ ४-५५-१९ (३०६१९)
न ह्येनमभिसंक्रुद्धमेको युद्ध्येत संयुगे ।
अन्यो देवान्महादेवात्कृष्णाद्वा देवकीसुतात् ।
आचार्याच्च सपुत्राद्वा भारद्वाजान्महारथात् ॥ ४-५५-२० (३०६२०)
किं नो गावः करिष्यन्ति द्रव्यं वा विपुलं तथा ।
दुर्योधनः पार्थगतः पुरा प्राणान्विमुञ्चति ॥ ४-५५-२१ (३०६२१)
वैशम्पायन उवाच। ४-५५-२२क्ष् (३२२४)
इत्युक्त्वा समरे भीष्मः सेनया सह कौरवः ।
अन्वधावत्तदा पार्थं धार्तराष्ट्रस्य रक्षणे ॥ ४-५५-२२ (३०६२२)
विक्रोशमात्रं यात्वा तु पार्थो वैराटिमब्रवीत् ।
इषुपातमात्रे सेनायाः स्थापयाश्वानरिंदम ॥ ४-५५-२३ (३०६२३)
एतदग्रं गवां दृष्टं मन्दं वाहय सारथे ।
याह्युत्तरेण सेनाया गाश्चैव प्रविभज्य च ॥ ४-५५-२४ (३०६२४)
परिक्षिप्य गवां यूथमत्र योत्स्ये सुयोधनम् ।
गच्छन्ति सत्वरा गावः सगोपाः परिमोचय ॥ ४-५५-२५ (३०६२५)
तत्र गत्वा पशून्वीर सगोपान्परिमोचय ।
अन्तरेण च सेनायाः प्राङ्मुखो गच्छ चोत्तर ॥ ४-५५-२६ (३०६२६)

इमे त्वतिरथाः सर्वे मम वीर्यपराक्रमम् ।
पश्यन्तु कुरवो युद्धे महेन्द्रस्येव दानवाः ॥ ४-५५-२७ (३०६२७)
वैशम्पायन उवाच। ४-५५-२८क्ष् (३२२५)
ततः स रथिनां श्रेष्ठो नाम विश्राव्य चात्मनः ।
निशिताग्राञ्शरांस्तीक्ष्णान्मुमोचांतकसन्निभान् ॥ ४-५५-२८ (३०६२८)
शलभैरिव चाकाशं धाराभिरिव पर्वतम् ।
निरावकाशमभवच्छरैः क्षिप्तैः किरीटिना ॥ ४-५५-२९ (३०६२९)
विकीर्यमाणास्तु शरैस्ते योधा धार्तराष्ट्रिकाः ।
गाश्चैव न च पश्यन्ति पार्थमुक्तैरजिह्मगैः ॥ ४-५५-३० (३०६३०)
सा चापि बहुला सेना पार्थबाणाभिपीडिता ।
नापश्यद्विवृतां भूमिं नान्तरिक्षं दिशोपि वा ॥ ४-५५-३१ (३०६३१)
अर्जुनस्तु तदा हृष्टो दर्शयन्वीर्यमात्मनः ।
पीडयामास सैन्यानि गाण्डीवप्रसृतैः शरैः ॥ ४-५५-३२ (३०६३२)
तेषां नैवापयाने च नाभियाने भवन्मतिः ।
शीघ्रतामेव पार्थस्य पूजयन्तस्तु विस्मिताः ॥ ४-५५-३३ (३०६३३)
चन्द्रावदातं सामुद्रं कुरुसैन्यभयंकरम् ।
ततः शङ्खमुपाध्मासीद्द्विषतां रोमहर्षणम् ।
ज्याघोषं तलघोषं च कृत्वा भूतान्यमोहयत् ॥ ४-५५-३४ (३०६३४)
तस्य शङ्खस्य शब्देन धनुषो निस्वनेन च ।
शब्देनामानुषाणां च भूतानां ध्वजवासिनाम् ।
वियद्गतानां देवानां मानुषाणां रवेण च ॥ ४-५५-३५ (३०६३५)
ऊर्ध्वं पुच्छं विधून्वाना हेममाणाः समन्ततः ।
गावः सवत्साः संत्रस्ता निवृत्ता दक्षिणां दिशं ॥ ४-५५-३६ (३०६३६)
ततः स समरे शूरो बीभत्सुः शत्रुपूगहा ।
गोपालांश्चोदयामास गावश्चोदयतेति च ॥ ४-५५-३७ (३०६३७)
उत्तरं चाह बीभत्सुर्हर्षयन्पाण्डुनन्दनः ।
गवामग्रं समीक्षस्व गश्चैवाशु निवर्तय ॥ ४-५५-३८ (३०६३८)
यावदेते निवर्तन्ते कुरवो जवमास्थिताः ।
याह्युत्तरेण गाश्चैताः सैन्यानां च नृपात्मज ॥ ४-५५-३९ (३०६३९)
पश्यन्तु कुरवः सर्वे मम वीर्यपराक्रमम् ॥ ४-५५-४० (३०६४०)
वैशम्पायन उवाच ।
ते लाभमिव मन्वानाः कुरवोऽर्जुनमाहव। ४-५५-४१क्ष् (३२२६)
दृष्टवा यान्तमदूरस्थं क्षिप्रमभ्यपतन्रथैः ॥
हस्त्यश्वपरिवारेण महताऽभिविराजता। ४-५५-४१ (३०६४१)
योधैः प्रासासिहस्तैश्च चापबाणोद्यतायुधैः ॥
तान्यनीकान्यशोभन्त कुरूणामातततायिनाम्। ४-५५-४२ (३०६४२)

संसर्पन्त इवाकाशे विद्युत्वन्तो वलाहकाः ॥
तानि दृष्ट्वाऽप्यनीकानि निवर्तितरथानि च। ४-५५-४३ (३०६४३)
पार्थोऽपि वायुवद्धोरं सैन्याग्रं व्यधुनोच्छरैः ॥
तां शत्रुसेनां तरसा प्रणुद्य गाश्चापि जित्वा धनुषा परेण।
४-५५-४४ (३०६४४)
दुर्योधनायाभिमुखं प्रयान्तं कुरुप्रवीराः सहसाऽभ्यगच्छन् ॥
गोषु प्रयातासु जवेन मात्स्यान्किरीटिनं प्रीतियुतं च दृष्ट्वा।
४-५५-४५ (३०६४५)
पशून्समादाय ततो निवृत्ता गोपाः समस्ताः प्रययुश्च राष्ट्रम् ॥ ॥
४-५५-४६ (३०६४६)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
पञ्चपञ्चासोऽध्यायः ॥ ५५ ॥

विराटपर्व - अध्याय ०५६
॥ श्रीः ॥
४.५६. अध्यायः ५६

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेनोत्तरंप्रति
द्रोणकर्णादिरथानामसाधारणध्वजचिह्नप्रदर्शनपूर्वकं
तत्तन्नामनिर्देशेन तत्तत्पराक्रमवर्णनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-५६-० (३०६४७)
वैशम्पायन उवाच। ४-५६-०क्ष् (३२२७)
ततस्त्रीणि सहस्राणि रथानां च धनुष्मताम् ।
घोराणि कुरुवीराणां पर्यकीर्यन्त भारत ॥ ४-५६-१ (३०६४८)
कर्णो रथसहस्रेण प्रत्यगृह्णाद्धनञ्जयम् ।
भीष्मः शान्तनवो धीमान्सहस्रेण पुरस्कृतः ॥ ४-५६-२ (३०६४९)
तथा रथसहस्रेण भ्रातृभिः परिवारितः ।
पश्चाद्दुर्योधनोऽतिष्ठद्यशसा च श्रिया ज्वलन् ॥ ४-५६-३ (३०६५०)
अतिष्ठन्निवकाशेषु पादाताः सह वाजिभिः ।
भीमरूपाश्च मातङ्गास्तोमराङ्कुशचोदिताः ॥ ४-५६-४ (३०६५१)
तानि दृष्ट्वा ह्यनीकानि विततानि महात्मनाम् ।
वैराटिमुत्तरं तं तु प्रत्यभाषत पाण्डवः ॥ ४-५६-५ (३०६५२)

जाम्बूनदमयी वेदी ध्वजाग्रे यस्य दृश्यते ।
शोणाश्वाश्वा रथे युक्ता द्रोण एष प्रकाशते ॥ ४-५६-६ (३०६५३)
आचार्यो निपुणो धीमान्ब्रह्मविच्छूरसत्तमः ।
आहवे चाप्रतिद्वन्द्वो दूरपाती महारथः ॥ ४-५६-७ (३०६५४)
सुप्रसन्नो महावीरः कुरुष्वैनं प्रदक्षिणम् ।
अत्रैव चाविरोधेन एष धर्मः सनातनः ॥ ४-५६-८ (३०६५५)
यदि मे प्रहरेद्द्रोणः शरीरे मे प्रहृष्यतः ।
ततोऽस्मिन्प्रहरिष्यामि नान्यथा बुद्धिरस्ति मे ॥ ४-५६-९ (३०६५६)
भारताचार्यमुख्येन ब्राह्मणेन महात्मना ।
तेन मे युध्यमानस्य मन्दं वाहय सारथे ॥ ४-५६-१० (३०६५७)
ध्वजाग्रे सिंहलाङ्गूलो दिक्षु सर्वासु शोभते ।
भारताचार्यपुत्रस्तु सोऽश्वत्थामा विराजते ॥ ४-५६-११ (३०६५८)
ध्वजाग्रं दृश्यते यत्र बालसूर्यसमप्रभम् ।
दुर्जयः सर्वसैन्यानां देवैरपि सवासवैः ।
तेन मे युध्यमानस्य मन्दं वाहय सारथे ॥ ४-५६-१२ (३०६५९)
ध्वजाग्रे गोवृषो यस्य काञ्चनोऽभिविराजते ।
आचार्यवरमुख्यस्तु कृप एष महारथः ॥ ४-५६-१३ (३०६६०)
द्रोणेन च समो वीर्ये पितुर्मे परमः सखा ।
तेन मे युध्यमानस्य मन्दं वाहय सारथे ॥ ४-५६-१४ (३०६६१)
यस्य काञ्चनकम्बूभिर्हस्तिकक्ष्यापरिष्कृतः ।
ध्वजः प्रकाशते दूराद्रथे विद्युद्गणोपमः ॥ ४-५६-१५ (३०६६२)
एष वैकर्तनः कर्णः प्रतिमानं धनुष्मताम् ।
दृढवैरी सदाऽस्माकं नित्यं कटुकभाषणः ॥ ४-५६-१६ (३०६६३)
यस्याश्रयबलादेव धार्तराष्ट्रः ससौबलः ।
अस्मान्निरस्य राज्याच्च पुनरद्यापि योत्स्यति ॥ ४-५६-१७ (३०६६४)
एष वै स्पर्धते नित्यं मया सह सुदुर्जयः ।
जामदग्न्यस्य रामस्य शिष्यो ह्येष महारथः ॥ ४-५६-१८ (३०६६५)
सर्वास्त्रकुशलः कर्णः सर्वशस्त्रभृतांवरः ।
युद्धेऽप्रतिमवीर्यश्च दृढवेधी पराक्रमी ॥ ४-५६-१९ (३०६६६)
अद्याहं युद्धमेतेन करिष्ये सूतबन्धुना ।
द्रष्टा त्वमावयोर्युद्धं बलिवासवयोरिव ॥ ४-५६-२० (३०६६७)
महारथेन शूरेण सूतपुत्रेण धन्विना ।
तेन मे युध्यमानस्य शीघ्रं वाहय सारथे ॥ ४-५६-२१ (३०६६८)
यस्य चैव रथोपस्थे नागो मणिमयो ध्वजः ।
एष दुर्योधनस्तत्र कौरवो यशसा वृतः ॥ ४-५६-२२ (३०६६९)
लब्धलक्षो दृढं वेधी लघुहस्तः प्रतापवान् ।

तेन मे युध्यमानस्य शीघ्रं वाहय सारथे ॥ ४-५६-२३ (३०६७०)
यस्तु श्वेतावदातेन पञ्चतालेन केतुना ।
वैडूर्यमयदण्डेन तालवृक्षेण राजते ॥ ४-५६-२४ (३०६७१)
हस्तावापी बृहद्धन्वा सेनां तिष्ठति हर्षयन् ।
रामेण जामदग्न्येन द्वैरथेनाजितः पुरा ॥ ४-५६-२५ (३०६७२)
शीघ्रश्च लगुवेधी च लघुहस्तः प्रतापवान् ।
एष शान्तनवो भीष्मः सर्वेषां नः पितामहः ॥ ४-५६-२६ (३०६७३)
ककुदः सर्वसैन्यानां सर्वशस्त्रभृतांवरः ।
जयश्रियाऽवबद्धस्तु सुयोधनवशानुगः ।
पश्चादेष प्रयातव्यो न मे विघ्नकरो भवेत् ॥ ४-५६-२७ (३०६७४)
इत्येतांस्त्वरितः पार्थः कथयित्वा तु चोत्तरे ।
रूपतश्चिह्नतश्चैव युद्धाय त्वरते पुनः ॥ ॥ ४-५६-२८ (३०६७५)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-५६-९ शरीरे प्रहरिष्यतः इति नान्यया युद्धमस्ति मे इति चो धो पाठः ॥
९ ॥

विराटपर्व - अध्याय ०५७
॥ श्रीः ॥
४.५७. अध्यायः ५७

Mahabharata - Virata Parva - Chapter Topics
अर्जुनस्य भीष्मद्रोणादिभिः सह युद्धम् ॥ १ ॥
अर्जुनेन कर्णस्य पराभवः ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-५७-० (३०६७६)
वैशम्पायन उवाच। ४-५७-०क्ष् (३२२८)
अश्वत्थामा ततस्तत्र कर्णं संप्रेक्ष्य वीर्यवान् ।
उवाच स्मयमानोऽसौ सूतपुत्रमरिन्दमम् ॥ ४-५७-१ (३०६७७)
कर्ण यस्त्वं सभामध्ये बह्वबद्धं विकत्थसे ।
न मे युधि समोऽस्तीति तदिदं प्रत्युपस्थितम् ॥ ४-५७-२ (३०६७८)
एषोऽन्तक इव क्रुद्धः सर्वभूतावमर्दनः ।

संग्रामशिरसो मध्ये दृम्भते केसरी यथा ॥ ४-५७-३ (३०६७९)
शूरोसि यदि संग्रामे दर्शयस्व सभां विना ॥ ४-५७-४ (३०६८०)
यद्यशक्तोसि संग्रामे पार्थेनाद्भुतकर्मणा ।
पुनरेव सभां गत्वा धार्तराष्ट्रेण धीमता ।
मातुलं परिगृह्याशु मन्त्रयस्व यथासुखम् ॥ ४-५७-५ (३०६८१)
वैशम्पायन उवाच। ४-५७-६क्ष् (३२२९)
एवमुक्तस्तथा कर्णः क्रोधादुद्धृत्य लोचने ।
द्रोणपुत्रमिदं वाक्यमुवाच कुरुसन्निधौ ॥ ४-५७-६ (३०६८२)
नाहं बिभेमि बीभत्सोर्न कृष्णाद्देवकीसुतात् ।
पाण्डवेभ्योपि सर्वेभ्यः क्षत्रधर्ममनुव्रतः ॥ ४-५७-७ (३०६८३)
सत्वाधिकानां पुंसां तु धनुर्वेदोपजीविनाम् ।
गर्जतां जायते दर्पः स्वरश्च न विषीदति ॥ ४-५७-८ (३०६८४)
पश्यत्वाचार्यपुत्रो मामर्जुनेनातिरंहसा ।
युध्यमानं सुसंयुक्तं जयो वै मय्यवस्थितः ॥ ४-५७-९ (३०६८५)
वैशम्पायन उवाच। ४-५७-१०क्ष् (३२३०)
ततः प्रहस्य बीभत्सुः कौन्तेयः श्वेतवाहनः ।
दिव्यमस्त्रं विकुर्वाणः प्रत्ययाद्रथिसत्तमः ॥ ४-५७-१० (३०६८६)
महात्मानं मन्दबुद्धिर्निश्वसन्धृतराष्ट्रजः ।
उवाच स महाराज राजा दुर्योधनस्तदा ॥ ४-५७-११ (३०६८७)
न विद्मो ह्यर्जुनं तत्र वसन्तं मत्स्यवेश्मनि ।
तेनेदं कर्ण मत्स्यानामग्रहीष्म धनं बहु ॥ ४-५७-१२ (३०६८८)
एवं चेत्तर्हि गच्छामो विसृजन्तो धनं बहु ।
अयशो नातिवर्तेत लोकयोरुभयोरपि ॥ ४-५७-१३ (३०६८९)
किं च युद्धात्परं नास्ति क्षत्रियाणां सुखावहम् ।
तस्मात्पार्थेन संग्रामं कुर्महे न पलायनम् ॥ ४-५७-१४ (३०६९०)
एतावदुक्त्वा राजा वै ह्यभियानमियेष सः ।
तथा दशसहस्राणि वीराणां हि धनुष्मताम् ।
अभ्यद्रवंस्तदा पार्थं शलभा इव पावकम् ॥ ४-५७-१५ (३०६९१)
वर्मिता वाजिनस्तत्र संभृताश्च पदातिभिः ।
भीमरूपाश्च मातङ्गास्तोमराङ्कुशपाणिभिः । ४-५७-१६ (३०६९२)
अधिष्ठिताः सुसंयत्तैर्हस्तिशिक्षाविशारदैः ।
अभ्यद्रवन्सुसंक्रुद्धाश्चापहस्तोद्यतायुधाः ॥ ४-५७-१७ (३०६९३)
पञ्च चैनं रथोदग्रास्त्वरिताः पर्यवारयन् ।
द्रोणो भीष्मश्च कर्णश्च कुरुराजश्च वीर्यवान् ॥ ४-५७-१८ (३०६९४)
अश्वत्थामा महाबाहुर्धनुर्वेदपरायणः ।
इषूंश्च सम्यगस्यन्तो जीमूता इव वार्षिकाः ॥ ४-५७-१९ (३०६९५)

ते लाभमिव मन्वानाः प्रत्यगृह्णन्धनंजयम् ।
शरौघानभिवर्षन्तो नादयन्तो दिशो दश ॥ ४-५७-२० (३०६९६)
ततः प्रहस्य बीभत्सुः कौन्तेयः श्वेतवाहनः ।
दिव्यमस्त्रं प्रकुर्वाणः प्रत्ययाद्रथिसत्तमान् ॥ ४-५७-२१ (३०६९७)
यथा रश्मिभिरादित्यः प्रच्छादयति मेदिनीम् ।
तथा गाण्डीवनिर्मुक्तैः शरैराच्छादयद्दिशः ॥ ४-५७-२२ (३०६९८)
न रथानां न चाश्वानां न ध्वजानां न वर्मिणाम् ।
अतिविद्धैः शितैर्बाणैरासीदद्व्यङ्गुलिरन्तरम् ॥ ४-५७-२३ (३०६९९)
दैवयोगाद्धि पार्थस्य हयानामुत्तरस्य च ।
शिक्षाबलोपपन्नत्वादस्त्राणां वै परिक्रमात् ।
ध्वजगाण्डीवयोश्चापि दैव्या शक्त्या च मायया ॥ ४-५७-२४ (३०७००)
इतस्ततश्च संयाने दूरे वाऽप्यथवाऽन्तिके ।
दुर्गे विषमजाते वा स्थले निम्ने तथा क्षितौ ।
न च रुध्येद्गतिस्तस्य रथस्य मनसो यथा ॥ ४-५७-२५ (३०७०१)
समरेषु तु विद्वांसस्तस्य तांस्तान्परिक्रमान् ।
वीर्यमत्यद्भुतं दृष्ट्वा तथा पार्थस्य तद्बलम् ।
त्रेसुरेवं परे भीताः पराङ्मुखरथा अपि। ४-५७-२६ (३०७०२)
कालाग्निमिव बीभत्सुं निर्दहन्तमिव प्रजाः ।
नारयः प्रेक्षितुं शेकुर्ज्वलन्तमिव पावकम् ॥ ४-५७-२७ (३०७०३)
तानि भिन्नान्यनीकानि रेजुरर्जुनमार्गणैः ।
तिग्मांशोश्च घनाभ्राणि व्याप्तानीव गभस्तिभिः ॥ ४-५७-२८ (३०७०४)
अशोकाना वनानीव सञ्चितैः कुसुमैः शुभैः ।
पार्थः संरञ्जयामास रुधिरेणाकुलं बलम् ॥ ४-५७-२९ (३०७०५)
सहस्रशोऽर्जुनशरैश्छिन्नान्युच्चावचानि च ।
छत्राणि च पताकाश्च खेऽभ्युवाह सदागतिः ॥ ४-५७-३० (३०७०६)
ये ह्यर्जुनबलत्रस्ताः परिपेतुर्दिशो दश ।
रथात्तं देशमुत्सृज्य पार्थच्छिन्नयुगा हयाः ॥ ४-५७-३१ (३०७०७)
निकृत्तपूर्वचरणास्ते निपेतुः शितैः शरैः ।
शिरोभिः प्रथमं जग्मुर्मेदिनीं जघनैर्हयाः ॥ ४-५७-३२ (३०७०८)
चक्षुर्नासाविषाणेषु दन्तवेष्टेषु च द्विपान् ।
मर्मस्वन्येषु चाहत्य तथा निघ्नन्गजोत्तमाः ॥ ४-५७-३३ (३०७०९)
कौरवाणां गजानां च शरीरैर्गतचेतसाम् ।
क्षणेन संवृता भूमिर्मेघैरिव नभस्थलम् ॥ ४-५७-३४ (३०७१०)
अस्त्रैर्दिव्यैर्महाबाहुरर्जुनः प्रहसन्निव ।
बडबामुखसंभूतः कालाग्निरिव संवृतः ॥ ४-५७-३५ (३०७११)
यथा युगान्तसमये सर्वं स्थावरजङ्गमम् ।

कालपक्वमशेषेण धक्ष्येदुग्रशिखः शिखी ॥ ४-५७-३६ (३०७१२)
तद्वत्पार्थोऽस्त्रतेजोभिर्धनुषो निस्वनेन च ।
दैवाद्वीर्याच्च बीभत्सुस्तस्मिन्दौर्योधने बले ॥ ४-५७-३७ (३०७१३)
रणे शक्तिममित्राणां प्रणीयोपनिनाय सः ।
चेष्टां प्रायेण भूतानां रात्रिः प्राणभृतामिव ॥ ४-५७-३८ (३०७१४)
सोऽतीयात्सहसा शत्रून्सहसा तेऽभिपेदिरे ।
शीघ्रादूरं दृढामोघमस्त्रमस्यातिमानुषम् ।
दृष्ट्वा ते कौरवा भीता अतिमानुषविक्रमम् ॥ ४-५७-३९ (३०७१५)
खगपत्राभिसंवीतैः खाविष्टैः खगमैरिव ।
अर्जुनस्य खमावव्रे लोहितप्राणपैः खगैः ॥ ४-५७-४० (३०७१६)
अर्जुनेन विनिर्मुक्ताः शरा गाण्डीवधन्वना ।
तार्क्ष्यवेगा इवाकाशे ससञ्जुः परमर्मसु ॥ ४-५७-४१ (३०७१७)
वर्माणि सारथिंश्चैव हेमजालानि वाजिनाम् ।
किरीटं सूर्यसंकाशं वैयाघ्रमथ चर्म च ॥ ४-५७-४२ (३०७१८)
ततः सर्वाणि गात्राणि रथस्य द्विषतां शरैः ।
नीहारेणेव भूतानि छन्नानीह चकाशिरे ॥ ४-५७-४३ (३०७१९)
सकृदेव न तं शेकुः कथमभ्यसितुं परे ।
अनभ्यस्तः पुनस्तैर्हि रथः सोभिपपात तान् ॥ ४-५७-४४ (३०७२०)
तच्छरा द्विट्शरीरेषु यथा च न ससञ्जिरे ।
द्विधाऽनीकेषु बीभत्सोर्न ससञ्ज रथस्तथा ॥ ४-५७-४५ (३०७२१)
स तद्धि क्षोभयामास विगाह्यारिबलं रथी ।
अनन्तवेगो भुजगः क्रीडन्निव महार्णवे ॥ ४-५७-४६ (३०७२२)
अस्यतो नित्यमत्यर्थं सर्वघोषाधिकस्तथा ।
संनादः श्रूयते भूतैर्धनुषश्च किरीटिनः ॥ ४-५७-४७ (३०७२३)
संच्छिन्नास्तत्र मातङ्गा बाणैरल्पान्तरान्तरैः ।
संस्यूतास्तत्र दृश्यन्ते मेघा इव गभस्तिभिः ॥ ४-५७-४८ (३०७२४)
दिशोऽनुभ्रमतः सर्वा सव्यदक्षिणमस्यतः ।
सततं दृश्यते युद्धे सायकासनमण्डलम् ॥ ४-५७-४९ (३०७२५)
पतन्त्यरूपेषु यथा चक्षूंषि न कदाचन ।
नालक्ष्येषु शराः पेतुस्तस्य गाण्डीवधन्वनः ॥ ४-५७-५० (३०७२६)
महागजसहस्रस्य युगपन्मृद्नतो वनम् ।
कौन्तेयरथमार्गस्तु रणे घोरतरोऽभवत् ॥ ४-५७-५१ (३०७२७)
नूनं पार्थजयैषित्वाच्छक्रः सर्वामरैः सह ।
हन्त्यस्मानिति मन्यन्ते पार्थेनैवार्दिताः परे ॥ ४-५७-५२ (३०७२८)
घ्नन्तमत्यर्थमहितान्सव्यसाचिनमाहवे ।
कालमर्जुनरूपेण ग्रसन्तमिव च प्रजाः ॥ ४-५७-५३ (३०७२९)

कुरुसेनाशरीराणि पार्थेनानाहतान्यपि ।
पेतुः पार्थहतानीव पार्थकर्मानुदर्शनात् ॥ ४-५७-५४ (३०७३०)
ओषधीनां शिरांसीव कालपक्तिसमन्वयात् ।
अवनेमुः कुरूणां हि शिरांस्यर्जुनजाङ्गयात् ॥ ४-५७-५५ (३०७३१)
चकार चार्जुनः क्रोधाद्विमुखान्नृषितानपि ॥ ४-५७-५६ (३०७३२)
अर्जुनेनापि भिन्नानि बलाग्नाणि पुनः क्वचित् ।
चक्रुर्लोहितधाराभिर्धरणीं लोहितोत्तराम् ॥ ४-५७-५७ (३०७३३)
लोहितेनापि संपृक्तैः पांसुभिः पवनोद्धतैः ।
तेनैव च समुद्धूतैः सूक्ष्मैर्लोहितबिन्दुभिः ॥ ४-५७-५८ (३०७३४)
लोहितार्द्रैः प्रहरणैः प्रभग्ना लोहितोक्षिताः ।
लोहितेषु निमग्नास्ते निहताश्च किरीटिना ॥ ४-५७-५९ (३०७३५)
बभूवुर्लोहितास्तत्र भृशमादित्यरश्मयः ।
आकाशं तत्क्षणेनासीत्सन्ध्याभ्रमिव लोहितं ॥ ४-५७-६० (३०७३६)
अप्यस्तं प्राप्य चादित्यो निवर्तेत न पाण्डवः ।
निवर्तन्ते न जित्वारिं नित्यजल्पविचक्षणाः ॥ ४-५७-६१ (३०७३७)
तान्सर्वान्समरे शूरान्पौरुषे पर्यवस्थितान् ।
दिव्यैरस्त्रैरमोघात्मा सर्वानाच्छ्र्छद्धनुर्धरान् ॥ ४-५७-६२ (३०७३८)
स तु द्रोणं त्रिसप्तत्या नाराचानां समार्पयत् ।
अशीत्या शकुनिं चैव द्रौणिमप्याशु सप्तभिः ॥ ४-५७-६३ (३०७३९)
दुःसहं दशभिर्बाणैरर्जुनः समविध्यत ।
दुश्यासनं द्वादशभिः कृपं शारद्वतं त्रिभिः ।
भीष्मं शान्तनवं षष्ट्या प्रत्यविध्यत्स्तनान्तरे ॥ ४-५७-६४ (३०७४०)
स कर्णं कर्णिनाऽविध्यत्पीतेन निशितेन च ।
वासविर्द्विषतां मध्ये विव्याध परमेषुणा ॥ ४-५७-६५ (३०७४१)
स कर्णं सतनुत्राणं निर्भिद्य निशितः शरः ।
अगच्छद्दानयन्भूमिं चोदितो दृढधन्वना ॥ ४-५७-६६ (३०७४२)
ततोऽस्य वाहान्व्यहनच्चतुर्भिश्चतुरः क्षुरैः ।
सारथेश्च शिरः कायादपाहरदरिन्दमः ।
अर्धचन्द्रेण चिच्छेद चापं तस्य करे स्थितम् ॥ ४-५७-६७ (३०७४३)
तस्मिन्विद्धे महाभागे कर्णे सर्वास्त्रपारगे ।
हताश्वसूते विरथे ततोऽनीकमभज्यत ॥ ॥ ४-५७-६८ (३०७४४)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

विराटपर्व - अध्याय ०५८
॥ श्रीः ॥

४.५८. अध्यायः ५८

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन रणे विकर्णादिपराभवनपूर्वकं कर्णानुजहननम् ॥१ ॥
अर्जुनपराजितेन कर्णेन रणाङ्गणादपयानम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-५८-० (३०७४५)
वैशम्पायन उवाच। ४-५८-०क्ष् (३२३१)
तत्प्रभग्नं बलं सर्वं विपुलौघस्वनं तथा ।
भीष्ममासाद्य संतस्थौ वेलामिव महोदधिः ॥ ४-५८-१ (३०७४६)
तानि सर्वाणि गाङ्गेयः समाश्वास्य परंतपः ।
ततो व्यूह्य महाबाहुः समरेष्वपराजितः ॥ ४-५८-२ (३०७४७)
रथनागाश्वकलिकं युयुजे युद्धकोविदः ।
अभेद्यं परसैन्यानां शूरैरपि समीक्षितम् ॥ ४-५८-३ (३०७४८)
आचार्यदुर्योधनसूतपुत्रैः कृपेण भीष्मेण च पालितानि ।
अवध्यकल्पानि दुरासदानि रथाश्वमातङ्गसमाकुलानि च ॥ ४-५८-४ (३०७४९)
तेषामनीकानि किरीटमाली व्यूढानि दृष्ट्वा विपुलध्वजानि ।
गाण्डीवधन्वा द्विषतां निहन्ता वैराटिमामन्त्र्य ततोऽभ्युवाच
॥ ४-५८-५ (३०७५०)
सुसंगृहीतैरथ रश्मिभिस्त्वं हयान्नियम्य प्रसमीक्ष्य यत्तः ।
संप्रेषयाशु प्रतिवीरमेनं वैकर्तनं योधयितुं वृणोमि ॥ ४-५८-६
(३०७५१)
यां हस्तिकक्ष्यां बहुधा विचित्रां स्तम्भे रथे पश्यसि दर्शनीयाम् ।
विवर्तमानां ज्वलनप्रकाशां वैकर्तनस्यैतदनीकमग्र्यम् ॥ ४-५८-७ (३०७५२)
एतेन शीघ्रं प्रतिपादयेमान् श्वेतान्हयान्काञ्चनजालकक्ष्यान् ।
सर्वं जवं तत्र विदर्शयिष्ये ह्यासादयैतद्रथवीरवृन्दम्
॥ ४-५८-८ (३०७५३)
गजो गजनेव हि योद्धुकामो मया सदा काङ्क्षति सूतपुत्रः ।
तमेव मां प्रापय सूतपुत्रं दुर्योधनोपाश्रयजातदर्पम् ।
तं पातयिष्यामि रथस्य मध्ये सहस्रनेत्रोऽशनिनेव वृत्रम् ॥
४-५८-९ (३०७५४)
वैशम्पायन उवाच। ४-५८-१०क्ष् (३२३२)
स तैर्हयैर्जातजवैर्बृहद्भिः पुत्रो विराटस्य हिरण्यकक्ष्यैः ।
विध्वंसयंस्तद्रथिनामनीकं ततोऽवहत्पाण्डवमाजिमध्ये ॥ ४-५८-१० (३०७५५)

तमापतन्तं परमेण तेजसा समीक्ष्य वैकर्तनमभ्यरक्षन् ।
अभ्यद्रवंस्ते रथवीरवृन्दा व्याघ्रेण चाक्रान्तमिवर्षभं रणे
॥ ४-५८-११ (३०७५६)
चित्राङ्गदश्चित्ररथश्च वीरः संग्रामजिद्दुःसहचित्रसेनौ ।
विविंशतिर्दुर्मुखदुर्जयौ च विकर्णदुःशासनसौबलाश्च ।
शोणो निषेधश्च तमन्वयुस्ते वैकर्तनं शीघ्रतरं युवानः ॥
४-५८-१२ (३०७५७)
पुत्रा ययुस्ते सहसोदराश्च वैकर्तनं पार्थगतं समीक्ष्य ।
प्रगृह्य चापानि महाबला रणे धनंजयं पर्यकिरञ्शरार्चिभिः
॥ ४-५८-१३ (३०७५८)
तेषां धनुर्ज्याकृतनैकतन्त्रीं प्रासोपवीणां शरसङ्घकोणाम् ।
कराग्रयन्त्रां स्थिरचापदण्डां वीणामुपावादयदाशु पार्थः ॥ ४-५८-१४
(३०७५९)
तस्मिंस्तु युद्धे तुमुले प्रवृत्ते पार्थं विकर्णोऽतिरथं रथेन ।
विपाठवर्षेण कुरुप्रवीरो भीमेन भीमानुजमाससाद ॥ ४-५८-१५ (३०७६०)
ततो विकर्णस्य धनुर्विकृत्य जाम्बुनदेनोपहितं दृढज्यम् ।
न्यपातयत्तद्ध्वजमस्य विद्ध्वा छिन्नध्वजः सोऽप्यपयाञ्जवेन
॥ ४-५८-१६ (३०७६१)
तं शात्रवाणां गणवाधितारं कर्माणि कुर्वाणममानुपाणि ।
शत्रुंतपो वैरममृष्यमाणः समार्पयत्कूर्मनखेन पार्थम्
॥ ४-५८-१७ (३०७६२)
स तेन राज्ञाऽतिरथेन विद्धो विगाहमानो ध्वजिनीं पेरपाम् ।
शत्रुंतपं पञ्चभिराशु विद्ध्वा ततोऽस्य सूतं दशभिर्जघान
॥ ४-५८-१८ (३०७६३)
ततः स विद्धो भरतर्षभेण बाणेन कायावरणातिगेन ।
गतासुराजौ निपपात राजन्नगो नगाग्रादिव वातरुग्णः ॥ ४-५८-१९ (३०७६४)
रथर्षभास्ते तु रथर्षभेण वीरा रणे वीरतरेण भग्नाः ।
चकम्पिरे वातवशेन काले प्रकम्पितानीव महावनानि ॥ ४-५८-२० (३०७६५)
हताश्च पार्थेन नरप्रवीरा भूमौ युवानः सुष्रुपुः सुवेषाः ।
वसुप्रदा वासवतुल्यवीर्याः पराजिता वासवजेन सङ्ख्ये ।
सुवर्णकार्ष्णायसवर्भनद्धा नागा यथा हैमवते प्रवृद्धाः ॥
४-५८-२१ (३०७६६)
तथा स शत्रून्समरे विनिघ्नन् गाण्डीवधन्वा पुरुषप्रवीरः ।
चचार सङ्ख्ये विदिशो दिशश्च दहन्निवाग्निर्वनमातपान्ते
॥ ४-५८-२२ (३०७६७)
सुजीर्णपर्णानि यथा वसन्ते विशातयित्वा तु रजो नुदन्खे ।

तथा सपत्नान्विकिरन्किरीटी चचार सङ्ख्येऽतिरथो रथेन
॥ ४-५८-२३ (३०७६८)
शोणाश्ववाहस्य हयान्निहत्य वैकर्तनभ्रातुरदीनसत्वः ।
एकेन संग्रामजितः शरेण शिरो जहाराथ किरीटमाली ॥ ४-५८-२४ (३०७६९)
तस्मिन्हते भ्रातरि सूतपुत्रो वैकर्तनो वीर्यमदप्रतापी ।
प्रगृह्य दन्ताविव नागराजो महाबलः सिंहमिवाजगाम ॥ ४-५८-२५ (३०७७०)
स पाण्डवं द्वादशभिः पृषत्कैर्वैकर्तनः पार्थमुपाजघान् ।
विव्याध गात्रेषु हयांश्च सर्वान्विराटपुत्रं च शरैर्विजघ्ने
॥ ४-५८-२६ (३०७७१)
तमापतन्तं समरे किरीटी वैकर्तनं सर्वसमृद्धतेजाः ।
प्रच्छादयामास महाधनुष्मान्न्यषेधयच्छत्रुगणांश्च वीरः
॥ ४-५८-२७ (३०७७२)
निहत्य कर्णस्य ततः किरीटी पुरश्चरांश्चापि च पृष्ठगोपान् ।
समीपमभ्यागमदप्रमेयो वितत्य पक्षौ गरुडो यथोरगम् ॥ ४-५८-२८ (३०७७३)
तावुत्तमौ सर्वधनुर्धराणां महाबलौ सर्वसपत्नसाहौ ।
कर्णं च पार्थं च निशम्य युद्धे दिदृक्षमाणाः कुरवोऽवतस्थुः
॥ ४-५८-२९ (३०७७४)
तं पाण्डवः स्पष्टमुदीर्णकोपं कृतागसं कर्णमुदीक्ष्य कोपात् ।
क्षणेन साश्वं सरथं ससूतमन्तर्दधे मेघ इवातिवृष्ट्या
॥ ४-५८-३० (३०७७५)
ततः सयुग्याः सरथाः सनागा योधा विनेदुर्भरतर्षभाणाम् ।
अन्तर्हितं भीष्ममुखाः समीक्ष्य किरीटिना कर्णरथं पृषत्कैः
॥ ४-५८-३१ (३०७७६)
स चापि तानर्जुनबाहुमुक्ताञ्शराञ्शरौघैः प्रतिहत्य तूर्णम् ।
बभौ महात्मा सधनुः सबाणः सविष्फुलिङ्गोऽग्निरिवाथ कर्णः
॥ ४-५८-३२ (३०७७७)
ततस्तु जज्ञे करतालघोषः सशङ्खभेरीपणवाकुलस्तु ।
प्रक्ष्वेलितास्फोटितसिंहनादैर्वैकर्तनं पूजयतां कुरूणाम् ॥ ४-५८-३३
(३०७७८)
आधूतलाङ्गूलमहापताकं रथोत्तमं श्रेष्ठतमं कुरूणाम् ।
ततः सगाण्डीवकृतप्रणादं किरीटिनं प्रेक्ष्य ननाद कर्णः
॥ ४-५८-३४ (३०७७९)
पार्थोऽपि वैकर्तनमर्दयित्वा साश्वं सकेतुं सरथं ससूतम् ।
ननाद हर्षात्सहसा किरीटी पितामहं द्रोणकृपौ च दृष्ट्वा
॥ ४-५८-३५ (३०७८०)
सिषेच पार्थं बहुभिः शरौघैर्वैकर्तनः संयति तीक्ष्णवेगैः ।

वैकर्तनश्चापि किरीटमाली प्रच्छादयामास शितैः शरौघैः
॥ ४-५८-३६ (३०७८१)
तयोरमोघन्सृजतोः शरौघानस्त्रज्ञयोरास महान्विमर्दः ।
राहुप्रमुक्ताविव चन्द्रसूर्यौ क्षणान्तरेणानुददर्श लोकः ॥ ४-५८-३७
(३०७८२)
हतास्तु पार्थेन रथप्रवीरा भूमौ युवानः सुषुपुः सुकेशाः ।
सुवर्णलोहायसवर्मगात्रा वृक्षा यथा हैमवते निकृत्ताः ॥ ४-५८-३८
(३०७८३)
तथा स शत्रून्समरे विनिघ्नन्गाण्डीवधन्वा व्यधमत्सपत्नान् ।
चचार सङ्ख्ये विदिशो दिशश्च दहन्निवाग्निर्वनमातपान्ते
॥ ४-५८-३९ (३०७८४)
सुशीर्णपर्णानि यथा वसन्ते विधूनयन्वायुरिवाल्पसारान् ।
तथा सपत्नान्विधमन्किरीटी चचार सङ्ख्येऽतिरथो रथेन
॥ ४-५८-४० (३०७८५)
शत्रूनिवेन्द्रः समरे किरीटी विद्रावयंस्तद्रथवीरबृन्दम् ।
प्राच्छादयच्चरुकिरीटमाली वरेषुभिः शत्रुगणाननेकान् ॥ ४-५८-४१ (३०७८६)
कर्णं तदोवाच किरीटमाली शूरः कुरूणां प्रवरोऽभिगर्जन् ॥
४-५८-४२ (३०७८७)
कर्ण यस्त्वं सभामध्ये बह्वबद्धं प्रभाषसे ।
न मे युधि समोस्तीति तदिदं प्रत्युपस्थितम् ॥ ४-५८-४३ (३०७८८)
सभायां पौरुषं प्रोच्य धर्ममुत्सृज्य केवलम् ।
कर्तुमिच्छसि यत्कर्म तन्मन्ये दुष्करं त्वया। ४-५८-४४ (३०७८९)
यत्त्वया कथितं पूर्वं नास्ति मत्सम इत्यपि ।
तत्सत्यं कुरु राधेय कुरुमध्ये मया सह ॥ ४-५८-४५ (३०७९०)
सभायां यस्तु पाञ्चालीं क्लिश्यमानां तदा त्वया ।
दृष्टवानस्मि तस्याद्य फलमश्नुहि केवलम् ॥ ४-५८-४६ (३०७९१)
धर्मपाशनिबद्धेन यन्मया मर्षितं तव ।
तस्य पापस्य राधेय फलं प्राप्नुहि दुर्मते ॥ ४-५८-४७ (३०७९२)
एहि कर्ण मया सार्धमिहाद्य कुरु वैशसम् ।
प्रेक्षका कुरवः सन्तु सर्वे ते सहसैनिकाः ॥ ४-५८-४८ (३०७९३)
इदानीमेव तावत्त्वमपयातो रणान्मम ।
कस्माज्जीवसि राधेय निहतस्त्वनुजस्तव ॥ ४-५८-४९ (३०७९४)
यो भ्रातरं पातयित्वा कस्त्यक्त्वा च रणाजिरम् ।
त्वदन्यः पुरुषः सत्सु ब्रूयादेवं व्यवस्थितः ॥ ४-५८-५० (३०७९५)
कर्ण उवाच। ४-५८-५१क्ष् (३२३३)
ब्रवीषि वाचा यत्पार्थ कर्मणा तत्समाचर ।

विशेषितो हि त्वं वाचा कर्मणाप्रतिमं भुवि ॥ ४-५८-५१ (३०७९६)
यत्त्वया मर्षितं पूर्वं तदशक्तेन मर्षितम् ।
इति गृह्णीम ते पार्थ तमदृष्ट्वा पराक्रमम् ॥ ४-५८-५२ (३०७९७)
धर्मपाशनिबद्धेन यत्त्वया मर्षितं पुरा ।
तथैव बद्धमात्मानमबद्ध इति मन्यसे ॥ ४-५८-५३ (३०७९८)
न हि तावद्वने वासो यथोक्तं चरितस्त्वया ।
क्लिष्टस्त्वमर्थलोभात्तु समयं छेत्तुमिच्छसि ॥ ४-५८-५४ (३०७९९)
यदि चेन्द्रः स्वयं पार्थ तव युद्ध्येत कारणात् ।
तथाऽपिन व्यथा काचिन्मम स्याद्विक्रमिष्यतः ॥ ४-५८-५५ (३०८००)
अयं कौन्तेयकामस्ते नचिरात्समुपस्थितः ।
योत्स्यसे हि मया सार्धमत्र पश्यामि ते बलम् ॥ ४-५८-५६ (३०८०१)
वैशम्पायन उवाच। ४-५८-५७क्ष् (३२३४)
इति कर्णो ब्रुवन्नेव बीभत्सुमपराजितम् ।
अभ्ययाद्विसृजन्बाणान्कायावरणभेदिनः ॥ ४-५८-५७ (३०८०२)
प्रतिजग्राह तान्पार्थः प्रीयमाणो महारथः ॥ ४-५८-५८ (३०८०३)
शरवर्षेण महता पर्जन्य इव वृष्टिमान् ।
अभीयाय हि बीभत्सुर्गाण्डीवं विक्षिपन्धनुः ॥ ४-५८-५९ (३०८०४)
जिघांसुः समरे कर्णं विससर्ज शरान्बहून् ।
तान्कर्णः प्रतिजग्राह वायुवेगमिवाचलः ॥ ४-५८-६० (३०८०५)
तयोर्दैवासुरसमः सन्निपातोऽभवन्महान् ।
किरतोः शरजालानि कृत्स्नं व्योम निरन्तरं ॥ ४-५८-६१ (३०८०६)
उत्पेतुर्मेघजालानि घोररूपाणि सर्वशः ।
ववर्ष च रजो भौमं कर्णपार्थसमागमे ॥ ४-५८-६२ (३०८०७)
न स्म सूर्यः प्रतपति न च वाति समीरणः ।
शरप्रच्छादितं व्योम छायाभूतमिवाभवत् ॥ ४-५८-६३ (३०८०८)
गाण्डीवस्य च निर्घोषः कर्णस्य धनुषस्तथा ।
दह्यतामिव वेणूनामासीत्परमदारुणः ॥ ४-५८-६४ (३०८०९)
अर्जुनस्तु हयान्नागान्रथांश्च विनिपातयन् ।
क्षोभयामास तत्सैन्यं कर्णं विव्याध चासकृत् ॥ ४-५८-६५ (३०८१०)
ततः पार्थो महाबाहुः कर्णस्य धनुरच्छिनत् ।
छिन्नधन्वा ततः कर्णः शक्तिं चिक्षेप वेगवान्
तां शक्तिं समरे पार्थश्चिच्छेद निशितैः शरैः ॥ ४-५८-६६ (३०८११)
ततो निपेतुर्बहुशो राधेयस्य पदानुगाः ।
तांश्च गाण्डीवनिर्मुक्तैः प्राहिणोद्यमसादनम् ॥ ४-५८-६७ (३०८१२)
अशेरतावृत्य महीं समग्रां पार्थेषुमार्गे निहता द्विपेन्द्राः ।
हिरण्यकक्ष्यां शरजालचित्रा यथा नगाः पावकजालनद्धाः ॥ ४-५८-६८

(३०८१३)
तं शत्रुसेनाङ्गनिबर्हणानि कर्माणि कुर्वाणममानुषाणि ।
वैकर्तनः पूर्वममृष्यमाणः समार्पयल्लक्ष्यमिवाशु पार्थम्
॥ ४-५८-६९ (३०८१४)
ततश्चतुर्भिस्तुरगान्विकृष्य विव्याध कर्णोऽथ धनंजयस्य ।
षड्भिश्च सूतं दशभिर्हयांश्च षष्ट्या च पार्थं त्रिभिरस्य
केतुम् ॥ ४-५८-७० (३०८१५)
सविष्फुलिङ्गोज्ज्वलभीमघोषः कोपेन्धनः केतुशिखः शरार्चिः ।
कर्णाग्निरस्त्रानिलभीमवातो बभौ दिधक्षन्निव पार्थकक्षम्
॥ ४-५८-७१ (३०८१६)
स्वनेमिशङ्खस्वनभीमघोषश्चलत्पताकोज्ज्वलभीमविद्युत् ।
पार्थाम्बुदः शस्त्रशराम्बुधारः कर्णानलं संशमयांचकार
॥ ४-५८-७२ (३०८१७)
तेनातिविद्धः समरे किरीटी प्रबोधितः सिंह इव प्रसुप्तः ।
गाण्डीवधन्वा प्रवरः कुरूणां प्रतत्वरे कर्णवधाय जिष्णुः
॥ ४-५८-७३ (३०८१८)
स ब्राह्ममस्त्रं समरे किरीटी प्रादुश्चकाराद्भुतवीर्यकर्मा ।
सन्तापयन्कर्णरथं शरौघैर्लोकानिमान्त्सूर्य इवांशुमाली ॥ ४-५८-७४
(३०८१९)
स हस्तिनेवाभिहतो गजेन्द्रः प्रगृह्य भल्लान्निशितान्निषङ्गात् ।
आकर्णपूर्णं तु धनुर्विकृष्य विव्याध बाणैरथ सूतपुत्रम्
॥ ४-५८-७५ (३०८२०)
अथास्य बाहू सशिरो ललाटं ग्रीवामुरः स्कन्धभुजान्तरं च ।
कर्णस्य पार्थो युधि निर्बिभेद वज्रैरिवाद्रिं भगवान्महेन्द्रः
॥ ४-५८-७६ (३०८२१)
स पार्थमुक्तानविषह्य बाणान् गजो गजेनेव जितस्तरस्वी ।
विहाय संग्रामशिरोपयातो वैकर्तनः पार्थशराभितप्तः ॥ ७७
॥ ॥ ४-५८-७७ (३०८२२)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-५८-२३ वायुर्यथा खे आकाशे रजो नुदन् चरति तथेत्यध्याहारेण योजना ॥
२३ ॥
४-५८-३० कर्णमुदीक्ष्य हर्षादिति धो पाठः ॥

३० ॥

विराटपर्व - अध्याय ०५९
॥ श्रीः ॥
४.५९. अध्यायः ५९

Mahabharata - Virata Parva - Chapter Topics
द्रोणार्जुनयोर्युद्धवर्णनम् ॥ १ ॥
अर्जुनबाणाहतिविषपणे द्रोणे अश्वत्थाम्ना
तद्रक्षणायार्जुनप्रत्यभियानम् ॥ २ ॥
अत्रान्तरेऽर्जुनदत्तावकाशेन द्रोणेन रणादपयानम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-५९-० (३०८२३)
वैशम्पायन उवाच। ४-५९-०क्ष् (३२३५)
जितं वैकर्तनं दृष्ट्वा पार्थो वैराटिमब्रवीत् ।
स्थिरो भव त्वं संग्रामे जयोऽस्माकं नृपात्मजः ॥ ४-५९-१ (३०८२४)
यावच्छङ्खमुपाध्यास्ये द्विषतां रोमहर्षणम् ।
अविक्लबमसंभ्रान्तमव्यक्तहृदयेक्षणम्। ४-५९-२ (३०८२५)
याहि शीघ्रं यतो द्रोणो ममाचार्यो रणे स्थितः ॥
तथा संक्रीडमानस्य अर्जुनस्य रणाजिरे। ४-५९-३ (३०८२६)
बलं सत्वं च तेजश्च लाघवं च व्यवर्धत ॥
तच्चाद्भुतमभिप्रेक्ष्य भयमुत्तरमाविशत् ॥ ४-५९-४ (३०८२७)
उत्तर उवाच। ४-५९-५क्ष् (३२३६)
अस्त्राणां तव दिव्यानां शरौघान्क्षिपतः शितान् ।
मनो मे मुह्यतेऽत्यर्थं तव दृष्ट्वा पराक्रमम् ॥ ४-५९-५ (३०८२८)
द्वैधीभूतं मनो मह्यं भयाद्भरतसत्तम ।
अदृष्टपूर्वं पश्यामि तव गाण्डीवनिस्वनम् ॥ ४-५९-६ (३०८२९)
तव बाहुबलं चैव धनुः कर्षयतो बहु ।
तव तेजो दुराधर्षं यथा विष्णोस्त्रिविक्रमे ॥ ४-५९-७ (३०८३०)
वैशम्पायन उवाच। ४-५९-८क्ष् (३२३७)
तमुत्तरश्चित्रमवेक्ष्य गाण्डिवं शरांश्च मुक्तान्सहसा किरीटिना ।
भीतोऽब्रवीदर्जुनमाजिमध्ये नाहं तवाश्वान्विषहे नियन्तुम् ॥ ४-५९-८ (३०८३१)
तमब्रवीत्किंचिदिव प्रहस्य गाण्डीवधन्वा द्विषतां निहन्ता ।
मया सहायेन कुतोऽस्ति ते भयं प्रेह्युत्तराश्वाननुमन्त्र्य वाहय

॥ ४-५९-९ (३०८३२)
वैशम्पायन उवाच। ४-५९-१०क्ष् (३२३८)
आश्वासितस्तेन धनंजयेन वैराटिरश्वान्प्रतुतोदय शीघ्रम् ।
धनंजयश्चापि विकृष्य चापं विष्फारयामास महेन्द्रकल्पः
॥ ४-५९-१० (३०८३३)
उत्तरं चैव बीभत्सुरब्रवीत्पुनरर्जुनः ।
न भेतव्यं मया सार्धं तात संग्राममूर्धनि ॥ ४-५९-११ (३०८३४)
राजपुत्रोऽसि ते भद्रं कुले महति मात्स्यके ।
जातस्त्वं क्षत्रियकुले न विषीदितुमर्हसि ॥ ४-५९-१२ (३०८३५)
धृतिं कृत्वा सुविपुलां राजपुत्र रथं मम ।
युध्यमानस्य संग्रामे राजभिः सह वाहय ॥ ४-५९-१३ (३०८३६)
उक्त्वा तमेवं बीभत्सुरर्जुनः पुनरब्रवीत् ।
पाण्डवो रथिनां श्रेष्ठो भारद्वाजं समीक्ष्य तु ॥ ४-५९-१४ (३०८३७)
यत्रैषा काञ्चनी वेदिर्दृश्यतेऽग्निशिखोपमा ।
उच्छ्रिता काञ्चने दण्डे पताकाभिरलंकृता ॥ ४-५९-१५ (३०८३८)
तत्र मां वह भद्रं ते द्रोणं योत्स्यामि सत्तमम् ।
भारद्वाजेन योत्स्येऽहमाचार्येण महात्मना ॥ ४-५९-१६ (३०८३९)
अमी शोणाः प्रकाशन्ते तुरगाः साधुवाहिनः ।
मुक्ता रथवरे तस्य सर्वशिक्षाविशारदाः ॥ ४-५९-१७ (३०८४०)
यतो रथवरे शूरः सर्वशस्त्रभृतांवरः ।
स्निग्धवैडूर्यसंकाशस्ताम्राक्षः प्रियदर्शनः ॥ ४-५९-१८ (३०८४१)
आदित्य इव तेजस्वी बलवीर्यसमन्वितः ।
सर्वलोकधनुःश्रेष्ठः सर्वलोकेषु पूजितः ।
अङ्गिरोशनसोस्तुल्यो नये बुद्धिमतांवरः ॥ ४-५९-१९ (३०८४२)
चत्वारो निखिला वेदाः साङ्गोपाङ्गाः सलक्षणाः ।
धनुर्वेदश्च कार्त्स्न्येन ब्राह्मं चास्त्रं प्रतिष्ठितम् ॥ ४-५९-२० (३०८४३)
पुराणमितिहासश्च अर्थविद्या च मानवम् ।
भारद्वाजे समस्तानि सर्वाण्येतानि सांप्रतम् ॥ ४-५९-२१ (३०८४४)
क्षमा दमश्च सत्यं च तेजो मार्दवमार्जवम् ।
प्रतिष्ठिता गुणा यस्मिन्बहवो द्विजसत्तमे ॥ ४-५९-२२ (३०८४५)
यस्याहमिष्टः सततं मम चेष्टः सदा च सः ।
क्षत्रधर्मं पुरस्कृत्य तेन योत्स्ये हि सांप्रतम् ॥ ४-५९-२३ (३०८४६)
आचार्यं प्रापयेदानीं ममोत्तर महारथम् ।
अपरं पश्य संग्राममद्भुतं मम तस्य च ॥ ४-५९-२४ (३०८४७)
उत्तरस्त्वेवमुक्तोऽश्वांश्चोदयामास तं प्रति ।
आजगामार्जुनरथो भारद्वाजरथं प्रति ॥ ४-५९-२५ (३०८४८)

तमापतन्तं वेगेन पाण्डवं सरथं रणे ।
द्रोणोप्यभ्यद्रवत्पार्थं मतो मत्तमिव द्विपम् ॥ ४-५९-२६ (३०८४९)
स तु रुक्मरथं दृष्ट्वा कौन्तेयः समभिद्रुतम् ।
आचार्यं तं महाबाहुः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ४-५९-२७ (३०८५०)
उषिताः स्मो वने वासं प्रतिकर्मचिकीर्षवः ।
कोपं नार्हसि नः कर्तुं सदा समरदुर्जय ॥ ४-५९-२८ (३०८५१)
अहं तु ताडितः पूर्वं प्रहरेयं तवानघ ।
इति मे वर्तते बुद्धिस्तद्भवान्क्षन्तुमर्हति ॥ ४-५९-२९ (३०८५२)
ततः प्राध्मापयच्छङ्खं भेरीपटहवादितम् ।
व्यक्षोभत बलं सर्वमुद्धूतमिव सागरम् ॥ ४-५९-३० (३०८५३)
वैशम्पायन उवाच। ४-५९-३१क्ष् (३२३९)
ततस्तु प्राहिणोद्द्रोणः शरानथ स विंशतिम् ।
अप्राप्तानेव तान्पार्थश्चिच्छेद कृतहस्तवान् ॥ ४-५९-३१ (३०८५४)
ततः शरसहस्रेण रथं पार्थस्य वीर्यवान् ।
अवाकिरत्ततो द्रोणः शीघ्रहस्तं प्रदर्शयन् ॥ ४-५९-३२ (३०८५५)
एवं प्रववृते युद्धं भारद्वाजकिरीटिनोः ॥ ४-५९-३३ (३०८५६)
अश्वाञ्शोणान्महावेगान्हंसवर्णैस्तु वाजिभिः ।
मिश्रितान्समरे दृष्ट्वा व्यस्मयन्त पृथग्जनाः ॥ ४-५९-३४ (३०८५७)
रथं रथेन पार्थस्य समाहत्य परंतपः ।
हर्षयुक्तस्तदाऽऽचार्यः प्रत्यगृह्णात्स पाण्डवम् ॥ ४-५९-३५ (३०८५८)
समाश्लिष्टाविवान्योन्यं द्रोणपाण्डवयोर्ध्वजौ ।
दृष्ट्वा प्राकम्पत मुहुर्भारतानां महाचमूः ॥ ४-५९-३६ (३०८५९)
तत्तु युद्धं प्रववृते ह्याचार्यस्यार्जुनस्य च ।
विमुञ्चतोः शरानुग्रान्विशिखान्दीप्ततेजसः ॥ ४-५९-३७ (३०८६०)
तौ वीरौ वीर्यसंपन्नौ दृष्ट्वा समरमूर्धनि ।
आचार्यशिष्यौ रथिनौ कृतवीर्यौ तरस्विनौ ॥ ४-५९-३८ (३०८६१)
उभौ विश्रुतकर्माणावुभौ श्रमगतौ जये ।
उभावतिरथौ लोके ह्युभौ परपुंरजयौ ।
क्षिपन्तौ शरजालानि क्षत्रियान्मोह आविशत् ॥ ४-५९-३९ (३०८६२)
व्यस्मयन्त नराः सर्वे द्रोणार्जुनसमागमे ।
नराणां ब्रुवतां वाक्यं श्रूयते स महास्वनः ॥ ४-५९-४० (३०८६३)
द्रोणं हि समरे कोऽन्यो योद्धुमर्हत्यथार्जुनात् ।
रौद्रः क्षत्रियधर्मोऽयं गुरं वै यदयोधयत् ॥ ४-५९-४१ (३०८६४)
इत्यब्रुवञ्जनास्तत्र संग्रामशिरसि स्थिताः ।
तौ समीक्ष्य तु संरब्धौ सन्निकृष्टौ महारथौ ॥ ४-५९-४२ (३०८६५)
छाद्येतां शरौघैस्तावन्योन्यमुपराजितौ ।

संयुगे संचकाशेतां कालसूर्याविवोदितौ ॥ ४-५९-४३ (३०८६६)
विष्फार्य च महाचापं हेमपृष्ठं दुरासदम् ।
संरब्धस्तु तदा द्रोणः प्रत्ययुध्यत फल्गुनम् ॥ ४-५९-४४ (३०८६७)
स सायकमयैर्जालैरर्जुनस्य रथं प्रति ।
भानुमद्भिः शिलाधौतैर्बाणैः प्राच्छादयद्दिशः ॥ ४-५९-४५ (३०८६८)
अर्जुनस्तु तदा द्रोणं महावेगैर्महारथः ।
विव्याध शतशो बाणैर्धाराभिरिव पर्वतम् ॥ ४-५९-४६ (३०८६९)
कालमेघ इवोष्णान्ते फल्गुनः समवाकिरत् ॥ ४-५९-४७ (३०८७०)
तस्य जाम्बूनदमयैश्चितरैश्चापच्युतैः शरैः ।
प्राच्छादयद्रथश्रेष्ठं भारद्वाजोऽर्जुनस्य वै ॥ ४-५९-४८ (३०८७१)
तथैव दिव्यं गाण्डीवं धनुरानम्य चार्जुनः ।
शत्रुघ्नं वेगवत्सृष्टं भारसाधनमुत्तमम् ॥ ४-५९-४९ (३०८७२)
शोभते स्म महाबाहुर्गाण्डीवं विक्षिपन्धनुः ।
शरांश्च विसृजंश्चित्रान्सुवर्णविकृतान्बहून् ॥ ४-५९-५० (३०८७३)
प्राच्छादयदमेयात्मा भारद्वाजरथं प्रति ।
द्रोणचापविनिर्मुक्तान्बाणान्बाणैरवारयत् ॥ ४-५९-५१ (३०८७४)
सरथोऽप्यचरत्पार्थः प्रेक्षणीयो महारथः ।
युगपद्दिक्षु सर्वासु सर्वतोऽस्त्राण्यवासृजम् ॥ ४-५९-५२ (३०८७५)
आददानं शरान्घोरान्संदधानं च पाण्डवम् ।
विसृजन्तं च कौन्तेयं न स्म पश्यन्ति लाघवाम् ॥ ४-५९-५३ (३०८७६)
एकच्छायमिवाकाशं बाणैश्चक्रे समन्ततः ।
नादृश्यत ततो द्रोणो नीहारेणेव पर्वतः ॥ ४-५९-५४ (३०८७७)
मरीचिविकचस्येव राजन्भानुमतो वपुः ।
आसीत्पार्थस्य सुमहद्वपुः शरशतार्चितम् ॥ ४-५९-५५ (३०८७८)
क्षिपतः शरजालानि कौन्तेयस्य महात्मनः ।
तान्विधूय शरान्घोरान्द्रोणोऽपि समितिंजयः ।
बभासे तिमिरं व्योम्नि विधूय सविता यथा ॥ ४-५९-५६ (३०८७९)
अग्निचक्रोपमं घोरं मण्डलीकृतमाहवे ।
विकृष्य सुमहच्चापं मेघस्तनितनिस्वनम् ।
असकृत्मुञ्चतो बाणान्ददृशुः कुरवो युधि ॥ ४-५९-५७ (३०८८०)
दिक्षु सर्वासु विपुलः शुश्रुवेऽथ जनैस्तदा ।
द्रोणस्यापि धनुर्घोषो विद्युत्स्तनितनिस्वनः ।
अभवद्विस्मयकरः सैन्यानां भरतर्षभ ॥ ४-५९-५८ (३०८८१)
तप्तजाम्बूनदमयैर्दीप्तैरग्निसमैः शरैः ।
प्राच्छादयदमेयात्मा दिशः सूर्यस्य च प्रभाम् ॥ ४-५९-५९ (३०८८२)
ततः काञ्चनपङ्खानां शराणां नतपर्वणाम् ।

वियद्गतानां चरतां दृश्यन्ते बहवो व्रजाः ॥ ४-५९-६० (३०८८३)
शरासनात्तु द्रोणस्य प्रभवन्ति स्म सायकाः ।
एको दीर्घ इवाभान्तः प्रदृश्यन्ते महाशराः ।
आकाशे समदृश्यन्त हंसानामिव पङ्क्तयः ॥ ४-५९-६१ (३०८८४)
एवं सुवर्णविकृतान्विमुञ्चन्तौ शरान्बहून् ।
आकाशं संवृतं वीरावुल्काभिरिव चक्रतुः ॥ ४-५९-६२ (३०८८५)
तयोः शराश्च विबभुः कङ्कबर्हिणवाससः ।
पङ्क्त्यः शरदि मत्तानां सारसानामिवाम्बरे ॥ ४-५९-६३ (३०८८६)
तत्तु युद्धं महाघोरं तयोः संरब्धयोरभूत् ।
अत्यद्भुतमचिन्त्यं च वृत्रवासवयोरिव ॥ ४-५९-६४ (३०८८७)
महागजाविवासाद्य विषाणाग्रैः परस्परम् ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ ४-५९-६५ (३०८८८)
अथ त्वाचार्यमुख्येन शरान्सृष्टाञ्शिलाशितान् ।
अवारयच्छितैर्बाणैरर्जुनो जयतांवरः ॥ ४-५९-६६ (३०८८९)
दर्शयन्नैन्द्रमात्मानमुग्रमुग्रपराक्रमः ।
इषुभिस्तूर्णमाकाशं बहुभिश्च समावृणोत्। ४-५९-६७ (३०८९०)
जिघांसन्तं नरव्याघ्रमर्जुनं भीमदर्शनम् ।
विव्याध निशितैर्द्रोणः शरैः सन्नतपर्वभिः ॥ ४-५९-६८ (३०८९१)
हृष्टः समभवद्द्रोणो रणशौण्डः प्रतापवान् ।
अर्जुनेन समं क्रीडञ्शरैः सन्नतपर्वभिः ॥ ४-५९-६९ (३०८९२)
तौ व्यदारयतां शूरौ सन्नद्धौ रणशोभिनौ ।
उदीरयन्तौ दिव्यानि ब्राह्माद्यस्त्राणि भागशः ॥ ४-५९-७० (३०८९३)
पार्थस्तु समरे शूरो दर्शयन्वीर्यमात्मनः ।
स मह्यस्त्रैर्महात्मानं द्रोणं प्राच्छादयच्छरैः ॥ ४-५९-७१ (३०८९४)
अस्त्रैरस्त्राणि संवार्य पार्थो द्रोणमवारयत् ॥ ४-५९-७२ (३०८९५)
तयोरासीत्संप्रहारः क्रुद्धयोर्नरसिंहयोः ।
अमृष्यमाणयोः सङ्ख्ये बलिवासवयोरिव ॥ ४-५९-७३ (३०८९६)
दर्शयेतां महास्त्राणि भारद्वाजार्जुनौ रणे ॥ ४-५९-७४ (३०८९७)
ऐन्द्रं वायव्यमाग्नेयमस्त्रमस्त्रेण पाण्डवः ।
मुक्तंमुक्तं द्रोणचापाद्ग्रमते स्म पुनः पुनः ॥ ४-५९-७५ (३०८९८)
एवं शूरौ महेष्वासौ विसृजन्तौ शिलाशितान् ।
एकच्छायमकुर्वातां गगनं शरवृष्टिभिः ॥ ४-५९-७६ (३०८९९)
ततोऽर्जुनेन मुक्तानां पततां च शरीरिपु ।
पर्वतेष्विव वज्राणां शराणां श्रूयते स्वनः ॥ ४-५९-७७ (३०९००)
ततो नागा रथाश्वाश्च सादिनश्च विशांपते ।
शोणिताक्ताश्च दृश्यन्ते पुष्पिता इव किंशुकाः ॥ ४-५९-७८ (३०९०१)

बाहुभिश्च सकेयूरैर्निकृत्तैश्च महारथैः ।
सुवर्णाचित्रैः कवचैर्ध्वजैश्च विनिपातितैः ॥ ४-५९-७९ (३०९०२)
योधैश्च निहतैस्तत्र पार्थबाणाभिपीडितैः ।
बलमासीत्सुसंभ्रान्तं द्रोणार्जुनसमागमे ॥ ४-५९-८० (३०९०३)
विधून्वानौ तु तौ वीरौ धनुषी भारसाधने ।
प्राच्छादयेतामन्योन्यं दिधक्षन्तौ वरेषुभिः ॥ ४-५९-८१ (३०९०४)
अथान्तरिक्षे नादोऽभूद्द्रोणं तत्र प्रशंसताम् ।
दुष्करं कृतवान्द्रोणो यदर्जुनमयोधयत् ॥ ४-५९-८२ (३०९०५)
प्रमाथिनं महावीर्यं दृढमुष्टिं दुरासदम् ।
जेतारं सर्वदैत्यानां सर्वेषां च महारथम् ॥ ४-५९-८३ (३०९०६)
अविभ्रमं च शिक्षां च लाघवं दूरपातनम् ।
पार्थस्य समरे दृष्ट्वा द्रोणस्यासीच्च विस्मयः ॥ ४-५९-८४ (३०९०७)
तत्प्रवृत्तं चिरं घोरं तयोर्युद्धं महात्मनोः ।
अवर्तत महारौद्रं लोकसंक्षोभकरकम् ॥ ४-५९-८५ (३०९०८)
अथ गाण्डीवमुद्यम्य दिव्यं धनुरमर्षणः ।
विचकर्ष रणे पार्थो बाहुभ्यां भरतर्षभः ॥ ४-५९-८६ (३०९०९)
तस्य बाणमयं वर्षं शलभानामिवाभवत् ।
न च बाणान्तरे तस्य वायुः शक्नोति सर्पितुम् ॥ ४-५९-८७ (३०९१०)
अभीक्ष्णं संदधानस्य बाणानुत्सृजतस्तथा ।
नान्तरं ददृशे किंचित्पार्थस्यापततोपी च ॥ ४-५९-८८ (३०९११)
युद्धे तु कृतशीघ्रास्त्रे वर्तमाने सुदारुणे ।
शीघ्राच्छीघ्रतरं पार्थः शरानन्यानुदैरयत् ॥ ४-५९-८९ (३०९१२)
ततः शरसहस्राणि शराणां नतपर्वणाम् ।
युगपत्प्रापतंस्तत्र द्रोणस्य रथमन्तिकात् ॥ ४-५९-९० (३०९१३)
विकीर्यमाणे द्रोणे तु शरैर्गाण्डीवधन्वना ॥
हाहाकारो महानासीत्सैन्यानां भरतर्षभ ॥ ४-५९-९१ (३०९१४)
पाण्डवस्य तु शीघ्रास्त्रं मघवा समपूजयत् ।
गन्धर्वाप्सरसश्चैव ये च तत्र समागताः ॥ ४-५९-९२ (३०९१५)
द्रोणं युद्धार्णवे मग्नं दृष्ट्वा पुत्रः प्रतापवान् ।
ततो वृन्देन महता रथिनां रथियूथपः ।
आचार्यपुत्रस्तु शरैः पाण्डवं प्रत्यवारयत् ॥ ४-५९-९३ (३०९१६)
अश्वत्थामा तु तत्कर्म हृदयेन महात्मनः ।
पूजयामास पार्थस्य कोपं चास्य तदाऽकरोत् ॥ ४-५९-९४ (३०९१७)
स मन्युवशमापन्नः पार्थमभ्यद्रवद्रणे ।
किरञ्शरसहस्राणि पर्जन्य इव वृष्टिमान् ॥ ४-५९-९५ (३०९१८)
आवृत्य च महाबाहुर्यतो द्रोणस्ततोऽभवत् ।

अन्तरं प्रददौ पार्थो द्रोणस्य व्यपसर्पितुम् ॥ ४-५९-१६ (३०९१९)
स तु लब्धान्तरस्तूर्णमपायाञ्जवनैर्हयैः ।
छिन्नवर्मध्वजरथो निकृत्तः परमेषुभिः ॥ ४-५९-१७ (३०९२०)
पराजिते तदा द्रोणे द्रोणपुत्रः समागतः ।
सदण्ड इव रक्ताक्षः कृतान्तः समरे स्थितः ॥ ॥ ४-५९-१८ (३०९२१)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

विराटपर्व - अध्याय ०६०
॥ श्रीः ॥
४.६०. अध्यायः ६०

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन द्रोणिपराभवनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-६०-० (३०९२२)
वैशम्पायन उवाच। ४-६०-०क्ष् (३२४०)
तं पार्थः प्रतिजग्राह वायुवेगमिवाचलः ।
शरजालेन महता वर्षमाण इवाम्बुदः ॥ ४-६०-१ (३०९२३)
तयोर्देवासुरसमः सन्निपातो महानभूत् ।
किरतोः शरजालानि वृत्रवासवयोरिव ॥ ४-६०-२ (३०९२४)
न स्म सूर्यस्तदा भाति न च वाति समीरणः ।
शरगाढे कृते व्योम्नि छायाभूतमिवाभवत् ॥ ४-६०-३ (३०९२५)
महांश्चटचटाशब्दो योधयोर्युध्यमानयोः ।
दह्यतामिव वेणूनामासीत्परमदारुणः ॥ ४-६०-४ (३०९२६)
हयांस्तस्यार्जुनः सङ्ख्ये कृतवानल्पतेजसाः ।
ते राजन्न प्रजानन्ति दिशं कांचन मोहिताः ॥ ४-६०-५ (३०९२७)
ततो द्रौणिर्महावीर्यः पार्थस्य विचरिष्यतः ।
विवरं सूक्ष्ममालोक्य ज्यां नुनोद क्षुरेण सः ॥ ४-६०-६ (३०९२८)
तदस्यापूजयन्देवाः कर्म दृष्ट्वाऽतिमानुषम् ।
न शक्तोऽन्यः पुमान्स्थातुमृते द्रौणेर्धनंजयम् ॥ ४-६०-७ (३०९२९)
ततो द्रौणिर्धनुर्व्यस्य व्यपक्रम्य नरर्षभः ।
पुनरप्यभ्यहन्पार्थं हृदये कङ्कपत्रिभिः । ४-६०-८ (३०९३०)
ततः पार्थो महाबाहुः प्रहसन्स्वनवत्तदा ।

योजयामास च तदा मौर्व्या गाण्डीवमोजसा ॥ ४-६०-९ (३०९३१)
तं दृष्ट्वा ऋद्धमायान्तं प्रभिन्नमिव कुञ्जरम् ।
ऋद्धः समाह्वयामास द्रौणिर्युद्धाय भारत ॥ ४-६०-१० (३०९३२)
ततोऽर्धचन्द्रपाहृत्य तेन पार्थः समाहतः ।
चिच्छेद तस्य चापं च सूतं चाश्वं च तेजसा ।
विव्याध निशितैश्चापि शरैराशीविपोपमैः ॥ ४-६०-११ (३०९३३)
सोऽन्यं रथं समास्थाय प्रत्यायाद्रथिपुङ्गवः ।
वारणेनेव मत्तेन मत्तो वारणयूथपः ॥ ४-६०-१२ (३०९३४)
ततः प्रववृते युद्धं पृथिव्यामेकवीरयोः ।
रणमध्ये द्वयोरेव सुमहद्रोमहर्षणम् ॥ ४-६०-१३ (३०९३५)
तौ वीरौ कुरवः सर्वे ददृशुर्विस्मयान्विताः ।
युध्यमानौ महात्मानौ द्विरदाविव संगतौ ॥ ४-६०-१४ (३०९३६)
तौ समाजघ्नतुर्वीरौ परस्परजयैषिणौ ।
शरै राशीविषाकारैर्ज्वलद्भिरिव पावकैः ॥ ४-६०-१५ (३०९३७)
अक्षयाविषुधी दिव्यौ पाण्डवस्य महात्मनः ।
तेन पार्थो रणे शूरस्तस्थौ गिरिरिवाचलः ॥ ४-६०-१६ (३०९३८)
अश्वत्थाम्नः पुनर्बाणाः क्षिप्रमभ्यस्यतो रणे ।
जग्मुः परिक्षयं शीघ्रमभूत्तेनाधिकोऽर्जुनः ॥ ॥ ४-६०-१७ (३०९३९)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि षष्टितमोऽध्यायः
॥ ६० ॥

विराटपर्व - अध्याय ०६१
॥ श्रीः ॥
४.६१. अध्यायः ६१

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन युगपद्द्रोणादिभिः सह यद्धम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-६१-० (३०९४०)
वैशम्पायन उवाच। ४-६१-०क्ष् (३२४१)
एतस्मिन्नन्तरे तत्र महावीर्यपराक्रमः ।
आजगाम महाबाहुः कृपः शस्त्रभृतांवरः ।
अर्जुनं प्रतियोद्धुं वै युद्धकामो महारथः। ४-६१-१ (३०९४१)
अथं द्रौणे रथं त्यक्त्वा कृपस्य रथमुत्तमम् ।

आजगामार्जुनस्तूर्णं सूर्यवैश्वानरप्रभम् ॥ ४-६१-२ (३०९४२)
तौ वीर सूर्यसंकाशौ योत्स्यमानौ महारथौ ।
वार्षिकाविव जीमूतौ व्यरोचेतां व्यवस्थितौ ॥ ४-६१-३ (३०९४३)
श्रगृह्य गाण्डिवं लोके विश्रुतं पुनरर्जुनः ।
अभ्ययाङ्गरतश्रेष्ठो विनिघ्नञ्शरमालया ॥ ४-६१-४ (३०९४४)
कृपश्च धनुरादाय तथैवार्जुनमभ्यगाम् ॥ ४-६१-५ (३०९४५)
प्रगृह्य बलवच्चापं नाराचान्रक्तभोजनान् ।
कृपः पार्थाय चिक्षेप शंतशोऽथ सहस्रशः ॥ ४-६१-६ (३०९४६)
जीमूत इव धर्मान्ते शरवर्षं विमुञ्चति ।
नन्दयन्सुहृदः सर्वान्प्रत्ययुध्यत फल्गुनम् ॥ ४-६१-७ (३०९४७)
विकृष्य बलवच्चापं पाण्डवोऽमितविक्रमः ।
चचार समरे पार्थश्चित्रमार्गान्विदर्शयन् ॥ ४-६१-८ (३०९४८)
सर्वांश्चैव दिशो बाणैः प्रदिशश्च महाबलः ।
एकच्छायमिवाकाशं सर्वतः कृतवान्प्रभुः ॥ ४-६१-९ (३०९४९)
प्राच्छादयदमेयात्मा पार्थः शरशतैः कृपम् ।
उद्गतः समरे मेघो धाराभिरिव पर्वतम् ॥ ४-६१-१० (३०९५०)
स शरैरर्पितः क्रुद्धः शितैरग्निशिखोपमैः ।
कृपो बभूव समरे विधूमोऽग्निरिव ज्वलंम् ॥ ४-६१-११ (३०९५१)
ततः शरसहस्रेण पार्थमप्रतिमौजसम् ।
अर्दयित्वा महाबाहुर्ननाद समरे कृपः ॥ ४-६१-१२ (३०९५२)
ततः कनकपुङ्खेन शरेण नतपर्वणा ।
बिभेद समरे पार्थः कृपस्य ध्वजमुत्तमम् ॥ ४-६१-१३ (३०९५३)
ततः पश्चान्महातेजा नाराचान्सूर्यसन्निभान् ।
जग्राह समरे पार्थो भूयो बहुशिलीमुखान् ॥ ४-६१-१४ (३०९५४)
तैस्तदार्तीं महाबाहुः कृपस्य रथरक्षिणः ।
जघान क्षत्रियश्रेष्ठो युध्यमानान्महारथान् ॥ ४-६१-१५ (३०९५५)
चन्द्रकेतुः सुकेतुश्च चित्राश्वो मणिमांस्तद ।
मुञ्जमौलिश्च विक्रान्तो हेमवर्णो भयावहः ॥ ४-६१-१६ (३०९५६)
सुरथोऽतिरथश्चैव सुपेणोऽरिष्ट एव च ।
नृकेतुश्च सहानीकास्ते निषेदुर्गतासवः ॥ ४-६१-१७ (३०९५७)
तान्निहत्य ततः पार्थो निमेपादिव भारत ।
पुनरन्यान्समाधत्त त्रयोदश शिलीमुखान् ॥ ४-६१-१८ (३०९५८)
अथास्य युगमेकेन चतुर्भिश्चतुरो हयान् ।
षष्ठेन तु शिरः सङ्ख्ये कृपस्य रथसारथेः ॥ ४-६१-१९ (३०९५९)
त्रिभिस्त्रिवेणुं बलवान्द्वाभ्यामक्षं महाबलः ।
द्वादशेन तु भल्लेन कृपस्य सशरं धनुः ॥ ४-६१-२० (३०९६०)

छित्त्वा वज्रनिकाशेन फल्गुनः प्रहसन्निव ।
त्रयोदशेनेन्द्रसमः प्रत्यविध्यत्स्तनान्तरे ॥ ४-६१-२१ (३०९६१)
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
अथ शक्तिं परामृश्य सूर्यवैश्वानरप्रभाम् ।
चिक्षेप सहसा क्रुद्धः पार्थायाद्भुतकर्मणे ॥ ४-६१-२२ (३०९६२)
तामर्जुनस्तथारूपां शक्तिं हेमपरिष्कृताम् ।
रुरोध सायकैस्तीक्ष्णैरर्धचन्द्रमुखैश्च ताम् ॥ ४-६१-२३ (३०९६३)
आपतन्तीं महोल्काभां चिच्छेद दशभिः शरैः ।
सापतद्दशधा भूमौ पार्थेन निहता शरैः ॥ ४-६१-२४ (३०९६४)
शक्त्यां तु विनिकृत्तायां विरथः शरपीडितः ।
गदापाणिरवप्लुत्य रथात्तूर्णममित्रहा ।
गदां चिक्षेप सहसा पार्थायामिततेजसे ॥ ४-६१-२५ (३०९६५)
सा च मुक्ता गदा गुर्वी रूपेणास्य परिष्कृता ।
अर्जुनस्य शरैर्नुन्ना प्रतिमार्गं जगाम सा ॥ ४-६१-२६ (३०९६६)
अथ खड्गं समुद्धृत्य शतचन्द्रं च भानुमत् ।
इयेष पाण्डवं हन्तुं कृपो लघुपराक्रमः ॥ ४-६१-२७ (३०९६७)
स शरद्वत्सुतस्तूर्णं महाचार्यः सुशिक्षितः ।
खेचरेव चचारकैः क्रमाच्चर्मासिधृग्भुवि ॥ ४-६१-२८ (३०९६८)
ततः क्षुरप्रैः कौन्तेयो दशभिः खड्गचर्मणी ।
निमेषादिव चिच्छेद तदद्भुतमिवाभवत् ॥ ४-६१-२९ (३०९६९)
विषण्णवदमस्तत्र विनाशात्खड्गचर्मणोः ।
दन्तैर्दन्तच्छदान्दष्ट्वा चुकोप हृदि दीर्घवत् ॥ ४-६१-३० (३०९७०)
भवत्विति पुनश्चोक्त्वा युद्धापगमनोद्यतः ।
अश्वत्थाम्नस्तु स रथं कृपः समभिपुप्लुवे ।
स्वस्रीयस्य महातेजा जग्राह च धनुः पुनः ॥ ४-६१-३१ (३०९७१)
एतस्मिन्नन्तरे क्रुद्धो भीष्मो द्रोणमथाब्रवीत् ।
दृष्ट्वा कृपं फल्गुनेन पीडितं चोर्जितं च तम् ॥ ४-६१-३२ (३०९७२)
एकैकमस्मान्संग्रामे पराजयति फल्गुनः ।
अहं द्रोणश्च कर्णश्च द्रौणिर्गौतम एव च ।
अन्ये च बहवः शूरा वयं जेष्याम वासविम् ॥ ४-६१-३३ (३०९७३)
समागम्य ततः सर्वे भीष्मद्रोणमुखा रथाः ।
अर्जुनं सहसा युक्ताः प्रत्ययुध्यन्त भारत ॥ ४-६१-३४ (३०९७४)
स सायकमयैर्जालैः सर्वतस्तान्महारथान् ।
प्राच्छादयच्छरौघैस्तान्नीहार इव पर्वतान् ॥ ४-६१-३५ (३०९७५)
नदद्भिश्च महानागैर्हेषमाणैश्च वाजिभिः ।
भेरीशङ्खनिनादैश्च स शब्दस्तुमुलोऽभवत् ॥ ४-६१-३६ (३०९७६)

नागाश्वकायान्निर्भिद्य लौहानि कवचानि च ।
पार्थस्य शरवर्षाणि न्यपतञ्शतशः क्षितौ ॥ ४-६१-३७ (३०९७७)
त्वरमाणः शरानस्यन्पाण्डवस्तु प्रकाशते ।
मध्यंदिनगतोऽर्चिष्माञ्छरदीव दिवाकरः ॥ ४-६१-३८ (३०९७८)
अविषह्य शरान्सर्वे पार्थचापच्युपान्रणे ।
उदक्प्रयान्ति विध्वस्ता रथेभ्यो रथिनस्तदा ।
सादिनश्चाश्वपृष्ठेभ्यो भूमौ चापि पदातयः ॥ ४-६१-३९ (३०९७९)
शरैस्तु ताड्यमानानां कवचानां महात्मनाम् ।
ताम्रराजतलौहानां प्रादुरासीन्महास्वनः ॥ ४-६१-४० (३०९८०)
छन्नमायोधनं जज्ञे शरीरैर्गतचेतसाम् ।
श्रान्त्या गलितशस्त्राणां पतताम्श्वसादिनाम् ॥ ४-६१-४१ (३०९८१)
शून्यान्कुर्वन्नथोपस्थान्मानवैरास्तृणोन्महीम् ।
प्रनृत्यन्निव संग्रामे चापहस्ते धनंजयः ॥ ४-६१-४२ (३०९८२)
शिरांस्यपातयत्सङ्ख्ये क्षत्रियाणां नरर्षभः ।
श्रुत्वा गाण्डीवनिर्घोषं विष्णूजितमिवाशने ।
त्रस्तानि सर्वसैन्यानि व्यलीयन्त च भागश ॥ ४-६१-४३ (३०९८३)
कुण्डलोष्णीषधारीणि जातरूपस्रजानि च ।
पतितानि स्म दृश्यन्ते शिरांसि करणमूर्धनि ॥ ४-६१-४४ (३०९८४)
विशिखोन्मथितैर्गात्रैर्बाहुभिश्च सकार्मुकैः ।
सहस्ताभरणैश्चान्यैः प्रच्छन्ना भाति मेदिनी ॥ ४-६१-४५ (३०९८५)
शिरसां पात्यमानानां समरे निशितैः शरैः ।
अश्मवृष्टिरिवाकाशादभवद्भरतर्षभ ॥ ४-६१-४६ (३०९८६)
दर्शयित्वा तदाऽऽत्मानं रौद्रं रौद्रपराक्रमः ।
जघान समरे शूराञ्छतशोऽथ सहस्रशः ॥ ४-६१-४७ (३०९८७)
तथावरुद्धश्चारण्ये दशवर्षाणि त्रीणि च ।
क्रोधाग्निमुत्ससर्जाजौ धार्तराष्ट्रेषु पाण्डवः ॥ ४-६१-४८ (३०९८८)
तस्य तद्दहतः सैन्यं दृष्ट्वा चास्य पराक्रमम् ।
सर्वे शान्तिपरा योधा धार्तराष्ट्रस्य भारत ॥ ४-६१-४९ (३०९८९)
यथा नलवनं नागः प्रभिन्नः षष्टिहायनः ।
एवं सर्वानपामृद्रादर्जुनः शस्त्रतेजसा ॥ ४-६१-५० (३०९९०)
विद्राव्य च ततः सैन्यं त्रासयित्वा महारथान् ।
अर्जुनो जयतांश्रेष्ठः पर्यावर्तत भारत ॥ ४-६१-५१ (३०९९१)
तस्य मार्गान्विचरतो निघ्नतश्च रणाजिरे ।
प्रावर्तत नदी घोरा शोणितान्त्रतरङ्गिणी ॥ ४-६१-५२ (३०९९२)
अस्थिशैवालसंबाधां संग्रामे पार्थनिर्मिताम् ।
शरचापप्लवां घोरां मांसशोणितकर्दमाम् ॥ ४-६१-५३ (३०९९३)

रथोडुपां चान्त्रसर्पां केशशैवालशाड्वलाम् ।
करवालासिपाठीनां चामरोष्णीषफेनिलाम् ॥ ४-६१-५४ (३०९९४)
अश्वग्रीवामहावर्तां कबन्धजलमानुषाम् ।
काककङ्करुतां तीव्रां सारसक्रौञ्चनादिताम् ॥ ४-६१-५५ (३०९९५)
सिंहनादमहानादां शङ्खस्वनमहास्वनाम् ।
वीरोत्तमाङ्गपद्माढ्यां शरचापमहानलाम् ॥ ४-६१-५६ (३०९९६)
पदातिमत्स्यकलुषां गजशीर्षककच्छपाम् ।
गोमायुगसंघुष्टां मांसमज्जाभिकर्दमाम् ॥ ४-६१-५७ (३०९९७)
प्रावर्तयन्नदीं घोरां पिशाचगणसेविताम् ।
अपाराममनिवासां च रक्तोदां सर्वतो वृताम् ॥ ४-६१-५८ (३०९९८)
अभीक्ष्णमकरोत्पार्थो नदीमुत्तमशोणिताम् ।
गजवर्ममहाद्वीपामश्वदेहमहाशिलाम् ॥ ४-६१-५९ (३०९९९)
पदातिदेहसंघाटां रथावलिमहातरुम् ।
केशशाद्वलसंछन्नां सुतरां भीतिदां नृणाम् ॥ ४-६१-६० (३१०००)
अगाधरक्तोदवहां यमसागरगामिनीम् ।
दुस्तरां भीरुमर्त्यानां शूराणां सुतरां नृप ।
प्रावर्तयन्नदीमेवं भीषणां पाकशासनिः ॥ ४-६१-६१ (३१००१)
तस्याददानस्य शरान्सन्दधानस्य मुञ्चतः ।
विकर्षतश्च गाण्डीवं न किंचिद्ददृशेऽन्तरम् ॥ ॥ ४-६१-६२ (३१००२)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकषष्टितमोऽध्यायः ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-६१-२८ स्वेचरः इवेतिच्छेदः ॥

विराटपर्व - अध्याय ०६२
॥ श्रीः ॥
४.६२. अध्यायः ६२

Mahabharata - Virata Parva - Chapter Topics

रणाय भीष्मार्जुनयोः समागमे देवैस्तयोः प्रशंसनम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-६२-० (३१००३)
वैशम्पायन उवाच। ४-६२-०क्ष् (३२४२)
एवं विद्राव्य तत्सैन्यं पार्थो भीष्ममुपाद्रवत् ।

त्रस्तेषु सर्वसैन्येषु कौरव्यस्य महात्मनः ॥ ४-६२-१ (३१००४)
बाणान्धनुषि संधाय चतुरः पाकशासनिः ।
भीष्मं च प्राहिणोद्गीतस्तं द्वाभ्यामभ्यवादयत् ॥ ४-६२-२ (३१००५)
तस्य कर्णान्तिकं गत्वा द्वावब्रूतां च कौशलम् ।
सोऽप्याशीरवदद्भीष्मः कौन्तेयो जयतामिति ॥ ४-६२-३ (३१००६)
नरसिंहमुपायान्तं जिगीषन्तं परान्रणे ।
वृषसेनोऽभ्ययात्तूर्णं योद्धुकामो धनंजयम् ॥ ४-६२-४ (३१००७)
वैकर्तनात्मजो वीरः संग्रामे लोकविश्रुतः ।
शौर्यवीर्यादिभिः कर्णाद्बिम्बाद्बिम्ब इवोद्धृतः ॥ ४-६२-५ (३१००८)
आत्मना युध्यतस्तस्य वृषसेनस्य पाण्डवः ।
मुहूर्तं तस्य तद्दृष्ट्वा हस्तलाघवपौरुषे ।
तुतोष च ततः पार्थो वृषसेनपराक्रमम् ॥ ४-६२-६ (३१००९)
तस्य पार्थस्तदा क्षिप्रं क्षुरधारेण कार्मुकम् ।
न्यकृन्यद्गृध्रपत्रेण जाम्बूनदपरिष्कृतम् ॥ ४-६२-७ (३१०१०)
अथैनं पञ्चभिर्भूयः प्रत्यविध्यत्स्तनान्तरे ।
स पार्थबाणाभिहतो रथात्प्रस्कन्द्य दुद्रुवे ॥ ४-६२-८ (३१०११)
दुःशासनो विकर्णश्च शकुनिश्च विविंशतिः ।
आयान्तं भीमधन्वानं पर्यकीर्यन्त पाण्डवम् ॥ ४-६२-९ (३१०१२)
तेषां पार्थो रणे क्रुद्धः शरैः सन्नतपर्वभिः ।
युगं ध्वजं शरासं च चिच्छेद तरसा रणे ॥ ४-६२-१० (३१०१३)
ते निकृत्तध्वजाः सर्वे छिन्नकार्मुकवेष्टनाः ।
रणमध्यादपययुः पार्थबाणाभिपीडिताः ॥ ४-६२-११ (३१०१४)
ततः प्रहस्य बीभत्सुर्वैराटिमिदमब्रवीत् ।
एतं मे प्रापयेदानीं तालं सौवर्णमुच्छ्रितम् ॥ ४-६२-१२ (३१०१५)
मेघमध्ये यथा विद्युदुज्ज्वलन्ती पुनः पुनः ।
असौ शान्तनवो भीष्मस्तत्र याहि परंतप ॥ ४-६२-१३ (३१०१६)
अस्त्राणि तस्य दिव्यानि दर्शयिष्यामि संयुगे ।
घोररूपाणि चित्राणि लघूनि च गुरूणि च ॥ ४-६२-१४ (३१०१७)
अस्माकं पोषको नित्यमाबाल्यान्मत्स्यभूमिप ।
श्रेयस्कामी सदाऽस्माकं योगक्षेमकरः सदा ॥ ४-६२-१५ (३१०१८)
तस्याङ्के विर्धितो बाल्ये तद्योत्स्येऽनेन सांप्रतम् ।
अस्माकं धार्तराष्ट्राणां शमकामो दिवानिशम् ॥ ४-६२-१६ (३१०१९)
वैशम्पायन उवाच। ४-६२-१७ (३१०२०)
तस्य तद्वचनं श्रुत्वा वैराटिः पार्थसारथिः ।
वाहयच्चोदितस्तेन रथं भीष्मरथं प्रति ॥ ४-६२-१७ (३१०२१)
तं रथं चोदितं दृष्ट्वा फल्गुनस्य रथोत्तमम् ।

वायुनेव महामेघं सहसाऽभिसमीरितम् ।
तं प्रत्ययाच्च गाङ्गेयो रथेनादित्यवर्चसा ॥ ४-६२-१८ (३१०२२)
आयान्तमर्जुनं दृष्ट्वा भीष्मः परपुंजयः ।
प्रत्युञ्जगाम युद्धार्थी महर्षभमिवर्षभः ॥ ४-६२-१९ (३१०२३)
तथा हि गुप्त एतेषां दुराधर्षः पितामहः ।
हन्यमानेषु योधेषु धनंजयमुपाद्रवत् ॥ ४-६२-२० (३१०२४)
प्रगृह्य कार्मुकश्रेष्ठं जातरूपपरिष्कृतम् ।
शरानादाय तीक्ष्णाग्रान्मर्मदेहप्रमाथिनः ॥ ४-६२-२१ (३१०२५)
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
शुशुभे स नरव्याघ्रो गिरिः सूर्योत्तरे यथा ॥ ४-६२-२२ (३१०२६)
प्राध्माप्य शङ्खं गाङ्गेयो धार्तराष्ट्रान्प्रहर्षयन् ।
प्रदक्षिणमुपावृत्य बीभत्सुं प्रत्यवारयत् ॥ ४-६२-२३ (३१०२७)
तमवेक्ष्य समायान्तं कौन्तेयः परवीरहा ।
प्रत्यगृह्लादमेयात्मा प्रियातिथिमिवागतम् ।
देवदत्तं महाशङ्खं प्रदध्मौ युधि वीर्यवान् ॥ ४-६२-२४ (३१०२८)
तौ शङ्खनादावत्यर्थं भीष्मपाण्डवयोस्तदा ।
नादयामासतुर्द्यां च खं च भूमिं च सर्वशः ॥ ४-६२-२५ (३१०२९)
अन्तरिक्षे च जल्पन्ति सर्वे देवाः सवासवाः ।
यदर्जुनः कुरून्सर्वान्प्राकृन्तच्छस्त्रतेजसा ॥ ४-६२-२६ (३१०३०)
कुरुश्रेष्ठाविमौ वीरौ रणे भीष्मधनंजयौ ।
सर्वास्त्रकुशलौ वीरावप्रमत्तौ रणे सदा ॥ ४-६२-२७ (३१०३१)
उभौ देवमनुष्येषु विश्रुतौ स्वपराक्रमैः ।
उभौ परमसंरब्धावुभौ दीप्तधनुर्धरौ ॥ ४-६२-२८ (३१०३२)
समागतौ नरव्याघ्रौ व्याघ्राविव तरस्विनौ ।
उभौ सदृशकर्माणौ सूर्यस्याग्नेश्च भारत ॥ ४-६२-२९ (३१०३३)
वासुदेवस्य सदृशौ कार्तवीर्यसमावुभौ ।
उभौ विश्रुतकर्माणावुभौ शूरौ महाबलौ ।
सर्वास्त्रविदुषां श्रेष्ठौ सर्वशस्त्रभृतां वरौ ॥ ४-६२-३० (३१०३४)
अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च ॥
अनयोः सदृशं वीर्यं मित्रस्य वरुणस्य च ॥ ४-६२-३१ (३१०३५)
को वा कुन्तीसुतं युद्धे द्वैरथेनोपयास्यति ।
ऋते शान्तनवादन्यः क्षत्रियो भुवि विद्यते ॥ ४-६२-३२ (३१०३६)
इति संपूजयामासुर्भीष्मं दृष्ट्वाऽर्जुनं गतम् ।
तं रणे संप्रहृष्यन्तं दृष्ट्वा देवाः सवासवाः ॥ ४-६२-३३ (३१०३७)
अथ बहुविधतूर्यशङ्खघोषैर्विविधरवैः सह सिंहनादमिश्रैः ।
कुरुवृषभमपूजयत्कुरूणां बलममराधिपसैन्यसप्रभं तत्

॥ ॥ ४-६२-३४ (३१०३८)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्विषष्टितमोऽध्यायः ॥

विराटपर्व - अध्याय ०६३
॥ श्रीः ॥
४.६३. अध्यायः ६३

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन भीष्मपराजयः ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-६३-० (३१०३९)
वैशम्पायन उवाच। ४-६३-०x (३२४३)
ततो भीष्मः शरानष्टौ ध्वजे पार्थस्य वीर्यवान् ।
समार्पयन्महावेगाज्ज्वलतः पन्नगानिव ॥ ४-६३-१ (३१०४०)
ते ध्वजं पाण्डुपुत्रस्य समासाद्य पतत्रिणः ।
ध्वजस्थं कपिमाजघ्नुः ध्वजाग्रनिलयांश्च तान् ॥ ४-६३-२ (३१०४१)
सारथिं च हयांश्चास्य विव्याध दशभिः शरैः ।
उरस्यताडयत्पार्थं त्रिभिरेवायसैः शरैः ॥ ४-६३-३ (३१०४२)
ततोऽर्जुनः शरैस्तीक्ष्णैर्विद्ध्वा कुरुपितामहम् ।
ध्वजं च सारथिं चापि विव्याध दशभिः शरैः ॥ ४-६३-४ (३१०४३)
तद्युद्धमभवद्धोरं रोमहर्षणमद्भुतम् ।
भीष्मस्य सह पार्थेन बलिवासवयोरिव ॥ ४-६३-५ (३१०४४)
सन्ततं शरजालाभिराकाशं समपद्यत ।
अम्बुदैरिव धाराभिस्तयोः कार्मुकनिःसृतैः ॥ ४-६३-६ (३१०४५)
भल्लैर्भल्लाः समाहत्य कुरुपाण्डवयो रणे ।
अन्तरिक्षे व्यराजन्त खद्योताः प्रावृषीव हि ॥ ४-६३-७ (३१०४६)
अग्निवक्रोपमं घोरं मण्डलीकृतमाहवे ।
गाण्डीवमभवज्जिष्णोः सव्यं दक्षिणमस्यतः ॥ ४-६३-८ (३१०४७)
पर्वतं वारिधाराभिश्छादयन्निव तोयदः ।
अर्जुनश्छादयद्भीष्मं शरवर्षैरनेकशः ॥ ४-६३-९ (३१०४८)
तां समुद्रमिवोद्धूतां शरवृष्टिं समुद्यताम् ।
व्यधमत्सायकैर्भीष्मः सोर्जुनं च न्यवारयत् ॥ ४-६३-१० (३१०४९)
ततस्तानि विसृष्टानि शरजालानि सङ्घशः ।

आहतानि व्यशीर्यन्तं अर्जुनस्य रथं प्रति ॥ ४-६३-११ (३१०५०)
ततः कनकपुङ्खाग्रैः शितैः संनतपर्वभिः ।
पतद्भिः खगवाजैश्च द्यौरासीत्संवृता शरैः ॥ ४-६३-१२ (३१०५१)
ततः प्रासृजदुग्राणि शरजालानि पाण्डवः ।
तावन्ति शरजालानि भीष्मः पार्थाय प्राहिणोत् ॥ ४-६३-१३ (३१०५२)
साश्वं ससूतं सरथं स पार्थं समाचिनोद्भारतो वत्सदन्तैः ।
प्रच्छादयामास दिशश्च सर्वा नभश्च बाणैस्तपनीयपुङ्खैः
॥ ४-६३-१४ (३१०५३)
ततो देवर्षिगन्धर्वाः साधुसाध्वित्यपूजयन् ।
दुष्करं कृतवान्भीष्मो यदर्जुनमवारयत् ॥ ४-६३-१५ (३१०५४)
बलवानर्जुनो दक्षः क्षिप्रकारी च पाण्डवः ।
कोऽन्यः समर्थः पार्थस्य वेगं धारयितुं रणे ॥ ४-६३-१६ (३१०५५)
ऋते शान्तनवाद्भीष्मात्कृष्णाद्वा देवकीसुतात् ।
आचार्यवरमुख्याद्वा भारद्वाजान्महाबलात् ॥ ४-६३-१७ (३१०५६)
अस्त्रैरस्त्राणि संवार्य क्रीडतः पुरुषोत्तमौ ।
चक्षूंषि सर्वभूतानां मोदयन्तौ महाबलौ ॥ ४-६३-१८ (३१०५७)
प्राजापत्यं तथैवैन्द्रमाग्नेयं च सुदारुणम् ।
कौबेरं वारुणं चैव याम्यं वायव्यमेव च ।
प्रयुञ्जानौ महात्मानौ समरे तौ विरेजतुः ॥ ४-६३-१९ (३१०५८)
विस्मितान्यथ भूतानि तौ दृष्ट्वा संयुगे तदा ।
साधु पार्थ महाबाहो साधु भीष्मेति चाब्रुवन् ॥ ४-६३-२० (३१०५९)
नैतदन्यो मनुष्येषु प्रदर्शयितुमाहवे ।
महास्त्राणां संप्रयोगं समरे भीष्मपार्थयोः ॥ ४-६३-२१ (३१०६०)
एवं सर्वास्त्रविदुषोरस्त्रयुद्धमवर्तत ॥ ४-६३-२२ (३१०६१)
अथ जिष्णुरुदावृत्य शितधारेण कार्मुकम् ।
न्यकृन्तद्गृध्रपत्रेण शातकुम्भपरिष्कृतम् ॥ ४-६३-२३ (३१०६२)
निमेषान्तरमात्रेण भीष्मोऽन्यत्कार्मुकं रणे ।
समादाय नरव्याघ्रः सज्यं चक्रे महाबलः ॥ ४-६३-२४ (३१०६३)
शरांश्च सुबहून्क्रुद्धो मुमोचाशु धनंजये ।
अर्जुनोपि शरांस्तीक्ष्णान्भीष्माय निशितान्बहून् ।
चिक्षेप च महातेजास्तथा भीष्मश्च पाण्डवे ॥ ४-६३-२५ (३१०६४)
तयोर्दिव्यास्त्रविदुषोरस्यतोरनिशं शरान् ।
न विशेषस्तदा राजन्दृश्यते सुमहात्मनोः ॥ ४-६३-२६ (३१०६५)
अथावृणोद्दश दिशः शरैरतिरथस्तदा ।
किरीटमाली कौन्तेयः शूरं शान्तनवं तथा ॥ ४-६३-२७ (३१०६६)
अतीव पाण्डवो भीष्मं भीष्मश्चातीव पाण्डवम् ।

बभूव तत्र सङ्गेऽस्मिन्लोके राजंस्तदद्भुतम् ॥ ४-६३-२८ (३१०६७)
पाण्डवेन हताः शूरा भीष्मस्य रथरक्षिणः ।
शेरते स्म महाबाहो कौन्तेयस्याभितो रथम् ॥ ४-६३-२९ (३१०६८)
ततो गाण्डीवनिर्मुक्ता निरमित्रं चिकीर्षवः ।
असक्ताः पुङ्खसंसक्ताः श्वेतवाहनपत्रिणः ॥ ४-६३-३० (३१०६९)
निष्पतन्तो रथात्तस्य धौता हैरण्यवाससः ।
आकाशे प्रत्यदृश्यन्त हंसानामिव पङ्क्तयः ॥ ४-६३-३१ (३१०७०)
तस्य तद्दिव्यमस्त्रं हि प्रगाढं चित्रमस्यतः ।
प्रेक्षन्ते स्मान्तरिक्षस्थाः सर्वे देवाः सवासवाः ॥ ४-६३-३२ (३१०७१)
तं दृष्ट्वा परमप्रीतो गन्धर्वश्चित्रमद्भुतम् ।
शशंस देवराजाय चित्रसेनः प्रतापवान् ॥ ४-६३-३३ (३१०७२)
पश्येमानरिनिर्दारान्संसक्तानिव गच्छतः ।
चित्ररूपमिदं जिष्णोर्दिव्यमस्त्रमुदीर्यतः ॥ ४-६३-३४ (३१०७३)
नेदं मनुष्याः श्रद्दध्युर्न हीदं तेषु विद्यते ।
सौराणां च महास्त्राणां विचित्रोऽयं समागमः ॥ ४-६३-३५ (३१०७४)
मध्यन्दिनगतं सूर्यं प्रतपन्तमिवाम्बरे ।
न शक्नुवन्ति सैन्यानि पाण्डवं प्रसमीक्षितुम् ॥ ४-६३-३६ (३१०७५)
उभौ विश्रुतकर्माणावुभौ शूरौ महीक्षिताम् ।
उभौ विचित्रकर्माणावुभौ युधि दुरासदौ ॥ ४-६३-३७ (३१०७६)
इत्युक्तो देवराजस्तु पार्थभीष्मसमागमम् ।
पूजयामास दिव्येन पुष्पवर्षेण भारत ॥ ४-६३-३९अश्अश्वत्थामा
ततोऽभ्येत्य द्रुतं कर्णमभाषत ।
अहमेको हनिष्यामि समेतान्सर्वपाण्डवान् ॥ ४-६३-३८ (३१०७७)
इति कर्म समक्षं मे सभामध्ये त्वयोदितम् ।
न तु तत्कृतमेकस्माद्भीतो धावसि सूतज ॥ ४-६३-४० (३१०७८)
वैचित्रवीर्यजाः सर्वे त्वामाश्रित्य पृथासुतान् ।
जेतुमिच्छन्ति संग्रामे भवान्युध्यस्व फल्गुनम् ॥ ४-६३-४१ (३१०७९)
अश्वत्थामोदितं वाक्यं श्रुत्वा दुर्योधनस्तदा ।
प्रत्युवाच रुषा द्रौणिं कर्णप्रियचिकीर्षया ॥ ४-६३-४२ (३१०८०)
मा मानभङ्गं विप्रेन्द्र कुरु विश्रुतकर्मणः ।
मानभङ्गेन राज्ञां तु बलहानिर्भविष्यति ॥ ४-६३-४३ (३१०८१)
शूरा वदन्ति संग्रामे वाचा कर्माणि कुर्वते ।
पराक्रमन्ति संग्रामे स्वस्य वीर्यानुसारतः ॥ ४-६३-४४ (३१०८२)
तस्मात्तं नार्हति भवान्गर्हितुं शूरसंमतम् ।
राज्ञैवमुक्तः स द्रौणिर्गतरोषोऽभवत्तदा ॥ ४-६३-४५ (३१०८३)
ततो भीष्मः शान्तनवो बाणान्पार्श्वे समार्पयत् ।

अस्यतः प्रतिसन्धाय विवृतं सव्यसाचिनः ४-६३-४६ (३१०८४)
ततः प्रसह्य बीभत्सुः पृथुधारेण कार्मुकम् ।
न्यकृन्तद्गृध्रपत्रेण भीष्मस्यामिततेजसः ॥ ४-६३-४७ (३१०८५)
अथैनं दशभिः पश्चात्प्रत्यविध्यत्स्तनान्तरे ।
यतमानं पराक्रान्तं कुन्तीपुत्रो धनञ्जयः ॥ ४-६३-४८ (३१०८६)
स पीडितो महाबाहुर्गृहीत्वा रथकूबरम् ।
गाङ्गेयो युधि दुर्धर्षस्तस्थौ दीप इवातुरः ॥ ४-६३-४९ (३१०८७)
तं विसंज्ञमपोवाह संयन्ता रथवाजिनाम् ।
उपदेशमनुस्मृत्य रक्षमाणो महारथम् ॥ ४-६३-५० (३१०८८)
पराक्रमे च शौर्ये च वीर्ये सत्त्वे बले रणे ।
शस्त्रास्त्रेषु च सर्वेषु लाघवे दूरपातने ॥ ४-६३-५१ (३१०८९)
यस्य नास्ति समो लोके पितृदत्तवरश्च यः ।
जितश्रमो जितारातिर्निस्तन्द्रिः खेदवर्जितः ।
यः स्वेच्छामरणः शूरः पितृशुश्रूषणे रतः ॥ ४-६३-५२ (३१०९०)
दुर्योधनहितार्थाय युद्धवा पार्थेन संगरे ।
पृथासुतहितार्थाय पराजित इवाभवत् ॥ ॥ ४-६३-५३ (३१०९१)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिषष्टितमोऽध्यायः ॥

विराटपर्व - अध्याय ०६४
॥ श्रीः ॥
४.६४. अध्यायः ६४

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन द्रोणादिपञ्चरथान्प्रत्यभियानम् ॥ १ ॥

Mahabharata - Virata Parva - Chapter Text

४-६४-० (३१०९२)
वैशम्पायन उवाच। ४-६४-०क्ष् (३२४४)
भीष्मं विजित्य संग्रामे कुरूणां मिषतां रणे ।
ततो युद्धमनाः प्रायात्पार्थः पञ्च महारथान् ॥ ४-६४-१ (३१०९३)
आददानश्च नाराचान्विमृशन्निषुधी अपि ।
संस्पृशानश्च गाण्डीवं भूयः कर्णं समभ्यगाम् ॥ ४-६४-२ (३१०९४)
द्रौणिरुवाच। ४-६४-३क्ष् (३२४५)
कर्ण यत्तत्सभामध्ये बह्वबद्धं प्रभाषसे ।

न मे युधि समोऽस्तीति तदिदं प्रत्युपस्थितम् ॥ ४-६४-३ (३११०९५)
एषोऽन्तक इव क्रुद्धः सर्वभूतावमर्दनः ।
अदूरात्प्रत्युपस्थाय जृम्भते केसरी यथा ।
न पलायस्व शूरश्चेत्स्थित्वा युध्यस्व फल्गुनम् ॥ ४-६४-४ (३११०९६)
कर्ण उवाच। ४-६४-५क्ष् (३२४६)
नाहं बिभेमि बीभत्सोः कृष्णाद्वा देवकीसुतात् ।
पाण्डवेभ्योपि सर्वेभ्यः क्षत्रधर्ममनुव्रतः ॥ ४-६४-५ (३११०९७)
सत्वाधिकानां शूराणां धनुर्वेदोपजीविनाम् ।
दर्शनाञ्जायते दर्पः स्वरश्च न विषीदति ॥ ४-६४-६ (३११०९८)
पश्यत्वाचार्यपुत्रो मामर्जुनेन समं युधि ।
युध्यमानं सुसंयुक्तं दैवं तु दुरतिक्रमम् ॥ ४-६४-७ (३११०९९)
अश्वत्थामोवाच। ४-६४-८क्ष् (३२४७)
को दोषः कर्ण शूराणां वाचा साकं हि पौरुषम् ।
विद्यते यदि तल्लोके गुणोत्तरमिहोच्यते ॥ ४-६४-८ (३१११००)
युध्यस्व त्वमभीः पार्थं प्रपलायस्व मा रणात् ।
उक्तं वचः स्मरन्कर्ण नाहमित्यादि संयुगे ॥ ४-६४-९ (३१११०१)
वैशम्पायन उवाच। ४-६४-१०क्ष् (३२४८)
तं समन्ताद्रथाः पञ्च परिवार्य धनञ्जयम् ।
त इषून्सम्यगस्यन्तो मुमुक्षन्तोपि जीवितात् ॥ ४-६४-१० (३१११०२)
ते लाभमिव मन्वानाः क्षिप्रमाच्छन्धनञ्जयम् ।
शरौघान्सम्यगस्यन्तो जीमूता इव वार्षिकाः ॥ ४-६४-११ (३१११०३)
बहुभिर्निशितैर्बाणैर्विविधैर्लोमवापिभिः ।
आद्रवन्प्रत्यवस्थाय प्रत्यविध्यन्धनञ्जयम् ॥ ४-६४-१२ (३१११०४)
ततः प्रहस्य बीभत्सुः सर्वशस्त्रभृतांवरः ।
दिव्यमस्त्रं विकुर्वाणः प्रत्ययाद्रथसत्तमान् ॥ ४-६४-१३ (३१११०५)
यथा रश्मिभिरादित्यः प्रच्छादयति मेदिनीम् ।
एवं गाण्डीवनिर्मुक्तैः शरैः प्राच्छादयद्दिशः ॥ ४-६४-१४ (३१११०६)
न रथानां न नगानां न ध्वजानां न वाजिनाम् ।
अविद्धं निशितैर्बाणैरासीद्द्व्यङ्गुलमन्तरम् ॥ ४-६४-१५ (३१११०७)
सर्वे शान्तिपरा योधाः स्वचित्तं नाभिजज्ञिरे ।
हस्तिनोऽश्वाश्च वित्रस्ता व्यवलीयन्त भारत ॥ ४-६४-१६ (३१११०८)
यथा नलवनं नागः प्रभिन्नः षाष्टिहायनः ।
एवं सर्वानपामृद्नादर्जुनः शस्त्रतेजसा ॥ ४-६४-१७ (३१११०९)
गाण्डीवस्य तु घोषेण पृथिवी समकम्पत ।
मनांसि धार्तराष्ट्राणामप्यकृन्तद्धनञ्जयः ॥ ४-६४-१८ (३११११०)
ततो विगाह्य सैन्यानां मध्यं शस्त्रभृतांवरः ।

सारथिं समरे शूरस्त्वभ्यभाषत वीर्यवान् ॥ ४-६४-१९ (३११११)
संनियम्य हयानेतान्मन्दं वाहय सारथे ।
आचार्यपुत्रं समरे योधयिष्येऽपराजितम् ॥ ४-६४-२० (३१११२)
पुरा ह्येष मया युक्तः स मे भवति पृष्ठतः ॥
एवमुक्तेऽर्जुनेनासावश्वत्थामरथं प्रति। ४-६४-२१ (३१११३)
विराटपुत्रो जवनान्भृशमश्वानचोदयत् ॥ ४-६४-२२ (३१११४)
कर्ण उवाच ।
एषोपयाति बीभत्सुर्व्यथितो गाढवेदनः। ४-६४-२३क्ष् (३२४९)
तं तु तत्रैव यास्यामि नासौ मुच्येत जीवितात् ॥ ४-६४-२३ (३१११५)
द्रोण उवाच। ४-६४-२४क्ष् (३२५०)
नासौ भयेन निर्यातो महात्मा पाकशासनिः ।
नैवं भीता निवर्तन्ते न पुनर्गाढवेदनाः ॥ ४-६४-२४ (३१११६)
यद्येनमभिसंरब्धं पुनरेवाभियास्यसि ।
बहून्यस्त्राणि जानीते न पुनर्मोक्ष्यते भवान् ॥ ४-६४-२५ (३१११७)
दिष्ट्या दुर्योधनो मुक्तो दिष्ट्या गावः पलायिताः ।
मुक्तो दिष्ट्या च संग्रामे किं रणेन करिष्यसि ॥ ४-६४-२६ (३१११८)
क्रोशमात्रमपाक्रम्य बलमन्वानयामहे ।
अन्वागतबलाः पार्थं पुनरेवाभियास्यथ ॥ ॥ ४-६४-२७ (३१११९)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
चतुःषष्टितमोऽध्यायः ॥

विराटपर्व - अध्याय ०६५
॥ श्रीः ॥
४.६५. अध्यायः ६५

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेनोत्तरंप्रति भीष्मादिसकाशे रथप्रापणप्रेरणापूर्वकं
तदाप्यायनाय स्वपराक्रमप्रकथनम् ॥१ ॥
तदा दुःशासनादिपराभवनपूर्वकं भीष्मादिभिः सहायोधनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-६५-० (३११२०)
वैशम्पायन उवाच। ४-६५-०क्ष् (३२५१)
कर्णं पराजितं दृष्ट्वा पार्थो वैराटिमब्रवीत् ।
एतं मां प्रापयेदानीं रथवृन्दं प्रहारिणाम् ॥ ४-६५-१ (३११२१)

यत्र शान्तनवो भीष्मः सर्वेषां नः पितामहः ।
सुयुद्धं काङ्क्षमाणो वै रथे तिष्ठति दंशितः ॥ ४-६५-२ (३११२२)
तालो वै काञ्चनो यत्र वज्रवैडूर्यभूषितः ।
अतीव समरे भाति मातरिश्वप्रकम्पितः ॥ ४-६५-३ (३११२३)
दारुणं प्रहरिष्यामि रथबृन्दानि धन्विनाम् ।
आदास्याम्यहमेतेषां धनुर्ज्याविष्टनानि च ॥ ४-६५-४ (३११२४)
अस्यन्तं दिव्यमस्त्राणि चित्रमुत्तर पश्यसि ॥ ४-६५-५ (३११२५)
शतह्रदां जृम्भमाणां मेघस्थां प्रावृषीव च ।
सुवर्णपृष्ठं गाण्डीवं पश्यन्तु कुरवो मम ॥ ४-६५-६ (३११२६)
दक्षिणेनाथ वामेन कतमेन स्विदस्यति ।
इति मां शत्रवः सर्वे न विज्ञास्यन्ति सारथे ॥ ४-६५-७ (३११२७)
अस्त्रोदकां हयावर्तां नागनक्रां रथह्रदाम् ।
नदीं प्रस्कन्दयिष्यामि परलोकापहारिणीम् ॥ ४-६५-८ (३११२८)
पाणिपादशिरःपृष्ठबाहुशङ्खचराचरम् ।
वनं कुरूणां छेत्स्यामि भल्लैः सन्नतपर्वभिः ॥ ४-६५-९ (३११२९)
तूणीशयाः सुपुङ्खाग्रा विशिखा दुन्दुभिस्वनाः ।
मया प्रमुक्ताः संग्रामे कुरून्धक्ष्यन्ति सायकाः ॥ ४-६५-१० (३११३०)
ध्वजवृक्षं शरतृणं नागाश्वश्वापदाकुलम् ।
रथसिंहगणैर्युक्तं धनुर्वल्लिसमाकुलम् ।
वनमादीपयिष्यामि कुरूणामस्त्रतेजसा ॥ ४-६५-११ (३११३१)
जयतो भारतीं सेनामेकस्य मम संयुगे ।
शतं मार्गा भविष्यन्ति पावकस्येव कानने ॥ ४-६५-१२ (३११३२)
मया चक्रमिवाविद्धं सैन्यं द्रक्ष्यसि केवलम् ।
तानहं रथनीडेभ्यः परलोकाय शात्रवान् ।
एकः प्रद्रावयिष्यामि चक्रपाणिरिवासुरान् ॥ ४-६५-१३ (३११३३)
असंभ्रान्तो रथे तिष्ठन्समेषु विषमेषु च ।
मार्गमावृत्य तिष्ठन्तमपि भेत्स्यामि पर्वतम् ॥ ४-६५-१४ (३११३४)
अहमिन्द्रस्य संग्रामे द्विषतो बलदर्पितान् ।
मातलिं सारथिं कृत्वा निवातकवचान्रणे ।
हतवान्सर्वतः सर्वान्धावतो युध्यतस्तदा ॥ ४-६५-१५ (३११३५)
निवातकवचान्हत्वा गाण्डीवास्त्रैः सहस्रशः ।
परं पारे समुद्रस्य हिरण्यपुरमारुजम् ॥ ४-६५-१६ (३११३६)
हत्वा षष्टिसहस्राणि रथानामुग्रधन्विनाम् ।
पौलोमान्कालकेयांश्च समरे भृशदारुणान् ।
असुरानहनं घोरान्रौद्रेणास्त्रेण सारथे ॥ ४-६५-१७ (३११३७)
अहमिन्द्राद्दृढां मुष्टिं ब्रह्मणः क्षिप्रहस्तताम् ।

प्रगाढनिपुणं चित्रमतिवृद्धं प्रजापतेः ॥ ४-६५-१८ (३११३८)
रौद्रं रुद्रादहं वेद्मि वारुणं वरुणादपि ।
सौर्यं सूर्यादहं वेद्मि याम्यं दण्डधरादपि ॥ ४-६५-१९ (३११३९)
अस्त्रमाग्नेयमग्नेश्च वायव्यं मातरिश्वनः ।
अन्यैर्देवैरहं प्राप्तः को मां विषहते पुमान् ॥ ४-६५-२० (३११४०)
अद्य गाण्डीवनिर्मुक्तैःशरौघै रोमहर्षणैः ।
कुरूणां पातयिष्यामि रथवृन्दानि धन्विनाम् ॥ ४-६५-२१ (३११४१)
वैशम्पायन उवाच। ४-६५-२२क्ष् (३२५२)
एवमाश्वासितस्तेन वैराटिः सव्यसाचिना ।
व्यगाहत रथानीकं भीमं भीष्मस्य वाजिभिः ॥ ४-६५-२२ (३११४२)
रथिसिंहमनाधृष्यं जिगीषन्तं परान्रणे ।
अभ्यधावत्तदैवोग्रो ज्यां विकर्षन्धनञ्जयः ॥ ४-६५-२३ (३११४३)
दुःशासनोऽभ्ययात्तूर्णमर्जुनं भरतर्षभः ॥ ४-६५-२४ (३११४४)
अन्येऽपि चित्राभरणा युवानो मृष्टकुण्डलाः ।
अभ्ययुर्भीमधन्वानो मौर्वी पर्यस्य बाहुभिः ॥ ४-६५-२५ (३११४५)
दुःशासनो विकर्णश्च वृषसेनो विविंशतिः ।
अभीता भीमधन्वानं पाण्डवं पर्यवारयन् ॥ ४-६५-२६ (३११४६)
तस्य दुःशासनः षष्टिं वामपार्श्वे समार्पयत् ।
अस्यतः प्रतिसन्धाय कुन्तीपुत्रस्य धीमतः ॥ ४-६५-२७ (३११४७)
पुनश्चैव स भल्लेन विद्धवा वैराटिमुत्तरम् ।
द्वितीयेनार्जुनं वीरं प्रत्यविध्यत्स्तनान्तरे ॥ ४-६५-२८ (३११४८)
तस्य जिष्णुरुदावृत्य क्षुरधारेण कार्मुकम् ।
प्राकृन्तद्गृध्रपत्रेण जातरूपपरिष्कृतम् ॥ ४-६५-२९ (३११४९)
अथैनं पञ्चभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ।
सोपयातो रथोपस्थात्पार्थबाणाभिपीडितः ॥ ४-६५-३० (३११५०)
सर्वा दिशश्चाभ्यपतद्बीभत्सुरपाराजितः ।
तं विकर्णः शरैस्तीक्ष्णैर्गृध्रपक्षैः शिलाशितैः ।
विव्याध परवीरघ्नमर्जुनं धृतराष्ट्रजः ॥ ४-६५-३१ (३११५१)
ततस्तमपि कौन्तेयः शरेण नतपर्वणा ।
ललाटेऽभ्यहनद्गाढं स विद्धः प्राद्रवद्भयात् ॥ ४-६५-३२ (३११५२)
ततः पार्थमुपाद्रुत्य दुस्सहः सविविंशतिः ।
अवाकिरच्छरैस्तीक्ष्णैः परीप्सन्भ्रातरं रणे ॥ ४-६५-३३ (३११५३)
तावुभौ गृध्रपत्राभ्यां निशिताभ्यां धनञ्जयः ।
विव्याध युगपद्व्यग्रस्तयोर्वाहानसूदयत् ॥ ४-६५-३४ (३११५४)
तौ हताश्वौ तु विद्धाङ्गौ धृतराष्ट्रात्मजावुभौ ।
अभिपत्य रथैरन्यैरपनीतौ पदानुगैः ॥ ४-६५-३५ (३११५५)

व्यद्रावयदशेषांश्च धृतराष्ट्रसुतांस्तदा ।
विद्राव्य च रणे पार्थो रणभूमिं व्यराजयत् ॥ ४-६५-३६ (३११५६)
किरीटमाली कौन्तेयो लब्धलक्षः प्रतापवान् ।
पातयन्नुत्तमाङ्गानि बाहूंश्च परिघोपमान् ॥ ४-६५-३७ (३११५७)
अशेरत महावीराः शतशो रुक्ममालिनः ॥ ४-६५-३८ (३११५८)
कमलदिनकरेन्दुसन्निभैः सितदशनैः सुमुखाक्षिनासिकैः ।
रुचिरमकरकुण्डलैर्मही पुरुषशिरोभिरथास्तृता बभौ ॥ ४-६५-३९ (३११५९)
सुनसं चारुदीप्ताक्षं क्लृप्तश्मश्रु स्वलंकृतम् ।
अदृश्यत शिरश्छिन्नमनेकं हेमकुण्डलम् ॥ ४-६५-४० (३११६०)
एवं तत्प्रहतं सैन्यं समन्तात्प्रद्रुतं भयात् ॥ ४-६५-४१ (३११६१)
अथ दुर्योधनः कर्णः सौबलः शकुनिस्तदा ।
द्रोणश्च द्रोणपुत्रश्च कृपश्चातिरथो रणे ॥ ४-६५-४२ (३११६२)
सहिता विजयं तत्र योधयन्तो महारथाः ।
विष्फारयन्तश्चापानि बलवन्ति महाबलाः ॥ ४-६५-४३ (३११६३)
ततः कीर्णपताकेन रथेनादित्यवर्चसा ।
पुनरावृत्य मार्गस्थं ददृशुर्वानरध्वजम् ॥ ४-६५-४४ (३११६४)
ते महास्त्रैर्महेष्वासाः परिवार्य धनञ्जयम् ।
अभ्यवर्षन्सुसंक्रुद्धा महामेघा इवाचलम् ॥ ४-६५-४५ (३११६५)
शरौघान्सम्यगस्यन्तो जीमूता इव शारदाः ।
युद्धे तस्थुर्महावीर्याः प्रतपन्तः किरीटिनम् ॥ ४-६५-४६ (३११६६)
इषुभिर्बहुभिस्तूर्णं निशितैर्लोमवापिभिः ।
अदूरात्प्रत्यवस्थाय पाण्डवं समयोधयन् ॥ ४-६५-४७ (३११६७)
ततः प्रहस्य बीभत्सुस्तमैन्द्रं पञ्चवार्षिकम् ।
अस्त्रमादित्यसंकाशं गाण्डीवे समयोजयत् ॥ ४-६५-४८ (३११६८)
नाक्षणां न च चक्राणां न रथानां न वाजिनाम् ।
अङ्गुलाद्व्यङ्गुलाद्वापि विवृतं प्रत्यदृश्यत ॥ ४-६५-४९ (३११६९)
यथा रश्मिभिरादित्यो वृणुते सर्वतो दिशम् ।
एवं किरीटिना मुक्तं सर्वं प्राच्छादयञ्जगत् ॥ ४-६५-५० (३११७०)
यथा बलाहके विद्युत्पावको वा शिलोच्चये ।
तथा गाण्डीवमभवच्चक्राभुधमिवाततम् ॥ ४-६५-५१ (३११७१)
यथा वर्षति पर्जन्यो विद्युत्पतति पर्वते ।
विस्फूर्जिता दिशः सर्वा ज्वलद्गाण्डीवमावृणोत् ॥ ४-६५-५२ (३११७२)
त्रस्ताश्च रथिनःक सर्वे चैन्द्रमस्त्रं विकुर्वति ।
सर्वे शान्तिपरा योधाः स्वचित्तं नाभिजज्ञिरे ।
सहिता द्रोणभीष्माभ्यां प्रमोहगतचेतनाः ॥ ४-६५-५३ (३११७३)

तानि सर्वाणि सैन्यानि भग्नानि भरतर्षभ ।
प्राद्रवन्त दिशः सर्वा भयाद्वै सव्यसाचिनः ॥ ॥ ४-६५-५४ (३११७४)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
पञ्चषष्टितमोऽध्यायः ॥

विराटपर्व - अध्याय ०६६
॥ श्रीः ॥
४.६६. अध्यायः ६६

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन भीतमुत्तरंप्रति समाश्वासनपूर्वकं दुर्योधनंप्रति
रथयापनचोदना ॥ १.। तथा स्वबाणाभिघातासहनेन पलायमानं
तंप्रति सोपहासमाह्वानम् ॥२ ॥

Mahabharata - Virata Parva - Chapter Text

४-६६-० (३११७५)
अर्जुन उवाच। ४-६६-०क्ष् (३२५३)
दक्षिणामेव तु दिशं हयानुत्तर वाहय ।
पुरा सार्थी भवत्येषामयं शब्दोऽत्र तिष्ठताम् ॥ ४-६६-१ (३११७६)
अश्वत्थाम्नः प्रतिरथं प्राचीमुद्याहि सारथे ।
अचिराद्द्रष्टुमिच्छामि गुरुपुत्रं यशस्विनम् ॥ ४-६६-२ (३११७७)
वैशम्पायन उवाच। ४-६६-३क्ष् (३२५४)
मोहयित्वा तु तान्सर्वान्धनुर्घोषेण पाण्डवः ।
प्रसव्यं चैवमावृत्य क्रोशार्धं प्राद्रवत्तदा ॥ ४-६६-३ (३११७८)
यथा सततगो वायुः सुपर्णश्चापि शीघ्रगः ।
तथा पार्थरथः शीघ्रमाकाशे पर्यवर्तत ॥ ४-६६-४ (३११७९)
मुहूर्तोपरते शब्दे प्रतियाते धनञ्जये ।
हस्त्यश्वरथपादातं पुरस्कृत्य महारथाः ॥ ४-६६-५ (३११८०)
द्रोणभीष्ममुखाः सर्वे सैन्यानां जघने ययुः ।
यत्ताः पार्थमपश्यन्तः सहिताः शरविक्षताः ॥ ४-६६-६ (३११८१)
सैनिका ऊचुः । ४-६६-७क्ष् (३२५५)
दिष्ट्या दुर्योधनो मुक्तः सैन्यं भूयिष्ठमागतम् ।
क्रोशमात्रमतिक्रम्य बलमन्वानयामहे ।
यात यत्र वनं गुल्मं नदीमन्वश्मकां प्रति ॥ ४-६६-७ (३११८२)
वैशम्पायन उवाच। ४-६६-८क्ष् (३२५६)

अथ दुर्योधनो दृष्ट्वा भग्नं स्वं बलमाहवे ।
अमृष्यमाणः क्रोधेन प्रतिमार्गन्धनञ्जयम् ॥ ४-६६-८ (३११८३)
न्यवर्तत कुरुश्रेष्ठ स्वेनानीकेन संवृतः ।
वार्यमाणो दुराधर्षैर्भीष्मद्रोणकृपैर्भृशम् ॥ ४-६६-९ (३११८४)
ततोऽर्जुनश्चित्रमुदारवेगं समीक्ष्य गाण्डीवमुवाच वाक्यम् ।
भोगीन्द्रकल्पं भुवनेषु रूढमभेद्यमच्छेद्यमदाह्यमाजौ
॥ ४-६६-१० (३११८५)
इदं त्विदानीमनयं कुरूणां शिवं धनुः शत्रुनिबर्हणं च ।
अत्याशुगं वेगवदाशुकर्तृ अवारणीयं महते रणाय ॥ ४-६६-११ (३११८६)
प्रदारणं शत्रुवरूथिनीनामनीकजित्संयति वज्रकल्पम् ।
वैधव्यदं शत्रुनितम्बिनीनां मुखप्रदं कौरववंशजानाम्
॥ ४-६६-१२ (३११८७)
प्रयाहि यत्रैष सुयोधनो हि तं पातयिष्यामि शरैः सुतीक्ष्णैः ।
आचार्यपुत्रं च सुयोधनं च पितामहं सूतसुतं च सङ्ख्ये ।
द्रोणं कृपं चैव निवार्य सर्वाञ्शिरो हरिष्यामि सुयोधनस्य ॥
४-६६-१३ (३११८८)
वैशम्पायन उवाच। ४-६६-१४क्ष् (३२५७)
तदुत्तरश्चित्रमुदारवेगं धनुश्च दृष्ट्वा निशिताञ्शरांश्च ।
भीतोऽब्रवीदर्जुनमाजिमध्ये नाहं तवाश्वान्विषहे नियन्तुम् ॥ ४-६६-१४
(३११८९)
तमब्रवीन्मात्स्यसुतं प्रहस्य गाण्डीवधन्वा द्विषतां निहन्ता ।
मया सहायेन कुतो भयं ते प्रेह्युत्तराश्वानुपमन्त्रयस्व ॥ ४-६६-१५ (३११९०)
आश्वासितस्तेन धनञ्जयेन वैराटिरश्वानतुदञ्जवेन ।
विष्फारयंस्तद्धनुरुग्रवेगं युयुत्समानः पुनरेव जिष्णुः ॥ ४-६६-१६
(३११९१)
गाण्डीवशब्देन तु तत्रतत्र भूमौ निषेदुर्बहवोऽतिवेलम् ।
शङ्खस्य शब्देन तु वानरस्य शब्देन ते योधवराः समन्तात्
॥ ४-६६-१७ (३११९२)
अर्जुन उवाच। ४-६६-१८क्ष् (३२५८)
एषोऽतिमानी धृतराष्ट्रपुत्रः सेनामुखे सर्वसमृद्धतेजाः ।
पराजयं नित्यममृष्यमाणो निवर्तते युद्धमनाः पुरस्तात् ॥ ४-६६-१८
(३११९३)
तमेव याहि प्रसमीक्ष्य युक्तः सुयोधनं तत्र सहानुजं च ॥
४-६६-१९ (३११९४)
वैशम्पायन उवाच। ४-६६-२०क्ष् (३२५९)
तमापतन्तं प्रसमीक्ष्य सर्वे कुरुप्रवीराः सहसाऽभ्यगच्छन् ।

प्रहस्य वीरः स तु तानतीत्य दुर्योधने द्वौ निचखान बाणौ
॥ ४-६६-२० (३११९५)
तेनार्दितो नाग इव प्रभिन्नः पार्थेन विद्धो धृतराष्ट्रपुत्रः ।
युयुत्समानोऽतिरथेन सङ्ख्ये स्वयं विगृह्यार्जुनमाससाद ॥ ४-६६-२१
(३११९६)
स भीमधन्वानमुदग्रवेगो धनञ्जयं शत्रुशतैरजेयम् ।
आकर्णपूर्णायतचोदितेन भल्लेन विव्याध ललाटमध्ये ॥ ४-६६-२२ (३११९७)
स तेन बाणेन समर्पितेन जाम्बूनदाभेन सुसंहितेन ।
रराज पार्थो रुधिरं क्षरन्वै यथैकरश्मिर्भगवान्दिवार्कः
॥ ४-६६-२३ (३११९८)
अथास्य बाणेन विदारितस्य प्रादुर्बभूवास्रमजस्रमुष्णम् ।
सा तस्य जाम्बूनदपुष्पचित्रा मालेव धाराऽभिविराजते स्म ॥ ४-६६-२४
(३११९९)
स तेन बाणाभिहतस्तरस्वी दुयोधनेनोद्धतमन्युवेगः ।
शरानुपादाय विषाग्निकल्पान्विव्याध राजानमदीनसत्वः ॥ ४-६६-२५ (३१२००)
दुर्योधनश्चापि तमुग्रतेजाः पार्थश्च दुर्योधनमेकवीरः ।
अन्योन्यमाजौ पुरुषप्रवीरौ सम समाजघ्नतुराजमीढौ ॥ ४-६६-२६ (३१२०१)
ततः प्रभिन्नेन महागजेन महीधराभेन पुनर्विकर्णः ।
रथैश्चतुर्भिर्गजपादरक्षैः कुन्तीसुतं पाण्डवमभ्यधावत्
॥ ४-६६-२७ (३१२०२)
तमापतन्तं त्वरितं गजेन्द्रं धनञ्जयः कुम्भललाटमध्ये ।
आकर्णपूर्णेन दृढायसेन बाणेन विव्याध भृशं तु वीरः
॥ ४-६६-२८ (३१२०३)
पार्थेन सृष्टः स तु गृध्रपत्रो ह्यापुङ्खदेशं प्रविवेश नागम् ।
विदार्य शैलप्रवरप्रकाशं यथाऽशनिः पर्वतमिन्द्रसृष्टः
॥ ४-६६-२९ (३१२०४)
शरप्रतप्तः स तु नागराजः प्रवेपिताङ्गो व्यथितान्तरात्मा ।
संसीदमानो निपपात भूमौ वज्राहतं शृङ्गमिवाचलस्य ॥ ४-६६-३०
(३१२०५)
निपातिते दन्तिवरे पृथिव्यां त्रासाद्विकर्णः सहसाऽवतीर्य ।
तूर्णं पदान्यष्टशतानि गत्वा विविंशतेः स्यन्दनमारुरोह ॥ ४-६६-३१
(३१२०६)
निहत्य नागं तु शरेण तेन वज्रोपमेनाद्रिवरप्रकाशम् ।
तथाविधेनैव शरेण पार्थो दुर्योधनं वक्षसि निर्बिभेद
॥ ४-६६-३२ (३१२०७)
हते गजे राजनि चैव भिन्ने भग्ने विकर्णे च सपादरक्षे ।

गाण्डीवमुक्तैर्विशिखैः प्रभिन्नास्ते योधमुख्याः सहसा प्रजग्मुः
॥ ४-६६-३३ (३१२०८)
दृष्ट्वैव बाणेन हतं च नागं योधांश्च सर्वान्नृपतिर्निरीक्ष्य ।
रथं समावृत्य कुरुग्नवीरो रणात्प्रदुद्राव यतो न पार्थः
॥ ४-६६-३४ (३१२०९)
तं भीतरूपं त्वरितं व्रजन्तं दुर्योधनं शत्रुगणावमर्दी ।
अन्वाह्वयद्योद्धुमनाः किरीटी बाणाभिविद्धं रुधिरं वमन्तम् ॥ ४-६६-३५
(३१२१०)
तस्मिन्महेष्वासवरेऽतिविद्धे धनञ्जयेनाप्रतिमेन युद्धे ।
सर्वाणि सैन्यानि भयार्दितानि त्रासं ययुः पार्थमुदीक्ष्य तानि
॥ ४-६६-३६ (३१२११)
ततस्तु ते शान्तिपराश्च सर्वे दृष्ट्वाऽर्जुनं नागमिव प्रभिन्नम् ।
उच्चैर्नदन्तं बलमत्तमाजौ मध्ये स्थितं सिंहमिवर्षभाणाम्
॥ ४-६६-३७ (३१२१२)
गाण्डीवशब्देन तु पाण्डवस्य योधा निपेतुः सहसा रथेभ्यः ।
भयार्दिताः पार्थशराभितप्ताः सिंहाभिपन्ना इव वारणेन्द्राः
॥ ४-६६-३८ (३१२१३)
संरक्तनेत्रः पुनरिन्द्रकर्मा वैकर्तनं द्वादशभिः पृषत्कैः ।
वित्रास्य तेषां द्रवतां समैक्षद्दुःशासनं चैकरथेन पार्थः
॥ ४-६६-३९ (३१२१४)
कर्णोऽब्रवीत्पार्थशराभितप्तो दुर्योधनं दुष्प्रसहं च दृष्ट्वा ।
दृष्टोऽर्जुनोऽयं प्रतियाम शीघ्रं श्रेयो विधास्याम इतो गतेन
॥ ४-६६-४० (३१२१५)
मन्ये त्वया तात कृतं च कार्यं यदर्जुनोऽस्माभिरिहाद्य दृष्टः ।
भूयो वनं गच्छतु सव्यसाची पश्यामि पूर्णं समयं न तेषाम्
॥ ४-६६-४१ (३१२१६)
वैशम्पायन उवाच। ४-६६-४२क्ष् (३२६०)
शरार्दितास्ते युधि पाण्डवेन प्रससुरन्योन्यमथाह्वयन्तः ।
कर्णोऽब्रवीदापतत्येष जिष्णुर्दुर्योधनं संपरिवार्य यामः
॥ ४-६६-४२ (३१२१७)
सर्वास्त्रविद्वारणयूथपाभः काले प्रहर्ता युधि शात्रवाणाम् ।
अयं च पार्थः पुनरागतो नो मूलं च रक्ष्यं भरतर्षभाणाम्
॥ ४-६६-४३ (३१२१८)
समीक्ष्य पार्थं तरसाऽऽपतन्तं दुर्योधनः कालमिवात्तशस्त्रम् ।
भयार्तरूपः शरणं प्रपेदे द्रोणं च कर्णं च कृपं च भीष्मम्
॥ ४-६६-४४ (३१२१९)

तं भीतरूपं शरणं व्रजन्तं दुर्योधनं शत्रुसहो निषङ्गी ।
इत्यब्रवीत्प्रीतमनाः किरीटी बाणाभितप्तं रुधिरं वमन्तम् ॥ ४-६६-४५ (३१२२०)
विहाय कीर्तिं च यशश्च लोके युद्धात्परावृत्य पलायसे किम् ।
न नन्दयिष्यन्ति तवाहतानि तूर्याणि युद्धादवरोपितस्य ॥ ४-६६-४६ (३१२२१)
न भोक्ष्यसे सोऽद्य महीं समग्रां यानानि वस्त्राण्यथ भोजनानि ।
कल्याणगन्धीनि च चन्दनानि युद्धात्परावृत्य तु भोक्ष्यसे किम् ।
सुवर्णमाल्यानि च कुण्डलानि हारांश्च वैडूर्यकृतोपधानान् ॥
४-६६-४७ (३१२२२)
च्युतरा युद्धान्न तु शङ्खशब्दास्तथा भविष्यन्ति तवाद्य पाप ।
न भोगहेतोर्वरचन्दनं च स्त्रियश्च मुख्या मधुरप्रलापाः ।
युद्धात्प्रयातस्य नरेन्द्रसूनो परे च लोके फलिता न चेह ॥
४-६६-४८ (३१२२३)
युधिष्ठिरस्यास्मि निदेशकारी पार्थस्तृतीयो युधि च स्थिरोस्मि ।
तदर्थमावृत्य मुखं प्रयच्छ नरेन्द्रवृत्तं स्मर धार्तराष्ट्रः
॥ ४-६६-४९ (३१२२४)
मोघं तवैतद्भुवि नामधेयं दुर्योधनेतीह कृतं पुरस्तात् ।
दुर्योधनस्त्वं प्रथितोसि नाम्ना सुयोधनः सन्निकृतिप्रधानः ।
४-६६-५० (३१२२५)
न ते पुरस्तादथ पृष्ठतो वा पश्यामि दुर्योधन रक्षितारम् ।
परीप्स युद्धेन कुरुप्रवीर प्राणान्मया बाणबलाभितप्तान् ॥ ॥ ४-६६-५१
(३१२२६)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
षट्षष्टितमोऽध्यायः ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-६६-५० सुयोधनस्त्वं निकृतिप्रधान इति खो पाठः ॥
५० ॥

विराटपर्व - अध्याय ०६७
॥ श्रीः ॥
४.६७. अध्यायः ६७

Mahabharata - Virata Parva - Chapter Topics
सोपहासमर्जुनसमाहूतेन दुर्योधनेन पुनः परावृत्याभियानम् ॥ १ ॥
भीष्मादिभिस्तद्रक्षणाय परितोऽवस्थानम् ॥ २ ॥
अर्जुनेन तैः सह चिरं प्रयुध्य पश्चात्संमोहनास्त्रप्रयोगः ॥ ३ ॥

उत्तरेणार्जुनचोदनयाऽस्त्रमोहितानां द्रोणादीनां वस्त्रापहरणम् ॥ ४ ॥
अर्जुनेन बाणैर्भीष्माद्यभिवादनम् ॥ ५ ॥

Mahabharata - Virata Parva - Chapter Text

वैशम्पायन उवाच ।
आहूयमानस्तु स तेन सङ्ख्ये महात्मना वै धृ
निवर्तितस्त्वापि गिराङ्कुशेन गजो मदोन्मत्त इवाङ्कुशेन ॥ ४-६७-१ (३१२२७)
सोमृष्यमाणो वचसाऽभिमृष्टो महारथेनातिरथस्तरस्वी ।
ततः स पर्याववृते रथेन भोगी यथा पादतलाभिमृष्टः
॥ ४-६७-२ (३१२२८)
ततो दुर्योधनः क्रुद्धो विक्षिपन्धनुरुत्तमम् ।
धृतिं कृत्वा सुविपुलां प्रत्युवाच पनञ्जयम् ॥ ४-६७-३ (३१२२९)
सोहमिन्द्रादभिक्रुद्धान्न बिभेमीह भारत ।
भुक्त्वा सुविपुलं राज्यं वित्तानि च सुखानि च ।
किमर्थं युद्धसमये पलापिष्ये नरोत्तम ॥ ४-६७-४ (३१२३०)
एवमुक्त्वा महाराजः प्रत्ययुध्यत भारत ।
संन्यवर्तत शीघ्राश्वस्तोत्रार्दित इव द्विपः ॥ ४-६७-५ (३१२३१)
आक्रान्तभोगस्तेजस्वी धनुर्वक्र इवोरगः ।
रथं रथेन संगम्य योधयामास पाण्डवम् ॥ ४-६७-६ (३१२३२)
तं प्रेक्ष्य कर्णः परिवर्तमानं निवृत्य संस्तम्भितसर्वगात्रम् ।
दुर्योधनं दक्षिणतोऽन्वरक्षत्पार्थान्महाबाहुरधिज्यधन्वा
॥ ४-६७-७ (३१२३३)
गान्धारराजः शकुनिर्निवृत्य द्रौणिश्च सर्वास्त्रविदां वरिष्ठः ।
ररक्षतुः कौरवमभ्युपेत्य पार्थान्नृवीरौ युधि सव्यतश्च
॥ ४-६७-८ (३१२३४)
भीष्मस्ततः शान्तनवो विवृत्य हिरण्यकक्ष्यांस्त्वरया तुरंगान् ।
दुर्योधनं पश्चिमतो ररक्ष पार्थान्महाबाहुरधिज्यधन्वा ॥ ४-६७-९
(३१२३५)
द्रोणः कृपश्चैव विविंशतिश्च दुःशासनश्चैव निवृत्य शीघ्रम् ।
सर्वे पुरस्तात्प्रणिधाय बाणान्दुर्योधनार्थं त्वरिताऽभ्युपेयुः
॥ ४-६७-१० (३१२३६)
सर्वाण्यनीकानि निवर्तितानि संप्रेक्ष्य पूर्णौघनिभानि पार्थः ।
हंसो महामेघमिवापतन्तं धनञ्जयः प्रत्यपतत्तरस्वी ॥ ४-६७-११ (३१२३७)
ते सर्वतः संपरिवार्य पार्थमस्त्राणि दिव्यानि समाददानाः ।
ववर्षुरभ्येत्य शरैः समग्रैर्मेघा यथा भूधरमम्बुवेगैः

॥ ४-६७-१२ (३१२३८)
ततोऽस्त्रमस्त्रेण निवार्य तेषां गाण्डीवधन्वा कुरुपुङ्गवानाम् ।
संमोहनं शत्रुसहोऽन्यदस्त्रं प्रादुश्चकारैन्द्रमवारणीयम्
॥ ४-६७-१३ (३१२३९)
ततो दिशश्चानुदिशो निवार्य शरैः सुघोरैर्निशितैः सुपुङ्खैः ।
गाण्डीवशब्देन मनांसि तेषां महाबलं प्रवथयांचकार ॥ ४-६७-१४ (३१२४०)
ततः पुनर्भीमरवं निगृह्य दोर्भ्यां महाशङ्खमुदारघोषम् ।
व्यनादयन्संप्रदिशो दिशः खं भुवं च पार्थो द्विषतां निहन्ता
॥ ४-६७-१५ (३१२४१)
संमोहनास्त्रप्रभवैः शरौघैर्विनष्टदेहाश्च निपत्य योधाः ।
निःसत्ववेगाः कुरुराजसैन्याः कुडयोपमास्तस्थुरनीहमानाः ॥ ४-६७-१६ (३१२४२)
ते शङ्खनादेन कुरुप्रवीराः संमोहिताः पार्थसमीरितेन ।
उत्सृज्य चापानि दुरासदानि सर्वे तदा मोहपरा बभूवुः ॥ ४-६७-१७ (३१२४३)
ततो विसंज्ञानि परेषु पार्थः संस्मृत्य संदेशमथोत्तरायाः ।
निर्याहि वाहादिति मात्स्यपुत्रमुवाच यावत्कुरवो विसंज्ञाः ॥ ४-६७-१८ (३१२४४)
आचार्यशारद्वतयोः सुशुक्ले कर्णस्य पीतं रुचिरं च वस्त्रम् ।
द्रौणेश्च राज्ञश्च तथैव नीले वस्त्रे समादत्स्व नरप्रवीर
॥ ४-६७-१९ (३१२४५)
भीष्मस्य संज्ञां तु तथैव मन्ये जानाति मेऽस्त्रप्रतिघातमेषः ।
एतस्य वाहान्कुरु सव्यतस्त्वमेवं प्रयातव्यममूढसंज्ञैः ॥ ४-६७-२०
(३१२४६)
रश्मीन्समुत्सृज्य ततो महात्मा रथादवप्लुत्य विराटपुत्रः ।
वस्त्राण्युपादाय महारथानां नानाविधान्यद्भुतवर्णकानि ॥ ४-६७-२१ (३१२४७)
महान्ति चीनांशुदुकूलकानि पट्टांशुकानि विविधानि मनोज्ञकानि ।
हारांश्च राज्ञां मणिभूषणानि सुवर्णनिष्काभरणानि मारिष
॥ ४-६७-२२ (३१२४८)
माणिक्यबाह्वङ्गदकङ्कणानि अन्यानि राज्ञां मणिभूषणानि ।
वस्त्राण्युपादाय महारथानां तूर्णं पुनः खं रथमारुरोह ॥ ४-६७-२३
(३१२४९)
राज्ञश्च सर्वान्कृतसंनिकाशान्संमोहनास्त्रेण विसंज्ञकल्पान् ।
नासाग्रविन्यस्तकराङ्गुलीकः पार्थो जहास स्मयमानचेताः ॥ ४-६७-२४ (३१२५०)
ततोऽन्वशात्तांश्चतुरः सदश्वान्पुत्रो विराटस्य हिरण्यकक्ष्यान् ।
ते तद्व्यतीयुर्द्विषतामनीकं श्वेता वहन्तोऽर्जुनमाजिमध्यात्
॥ ४-६७-२५ (३१२५१)
तथा प्रयान्तं पुरुषप्रवीरं भीष्मः शरैरभ्यहनत्तरस्वी ।
स चापि भीष्मस्य हयान्निहत्य विव्याध भीष्मं दशभिः पृषत्कैः

॥ ४-६७-२६ (३१२५२)
ततोऽर्जुनो भीष्ममपास्य युद्धे विद्ध्वाऽस्य यन्तारमरिष्टधन्वा ।
तस्थौ विमुक्तो रथवृन्दमध्याद्राहुं विदार्येव सहस्ररश्मिः
॥ ४-६७-२७ (३१२५३)
लब्ध्वा तु संज्ञां पुरुषप्रवीरः पार्थं निरीक्ष्याथ महेन्द्रकल्पम् ।
रणात्प्रमुक्तं पुरुषप्रवीरं स धार्तराष्ट्रस्त्वरितो बभाषे
॥ ४-६७-२८ (३१२५४)
अयं कथंचिद्भवतो विमुक्तस्तं वै प्रबध्नीत यथा न मुच्येत् ।
तमब्रवीच्छान्तनवः प्रहस्य क्व ते गता बुद्धिरभूत्क्क वीर्यम्
॥ ४-६७-२९ (३१२५५)
शान्तिं परां प्राप्य यथा स्थितस्त्वमुत्सृज्य बाणांश्च धनुश्च चित्रम् ।
न त्वेव बीभत्सुरलं नृशंसं कर्तुं न पापेऽस्य मनो निविष्टम्
॥ ४-६७-३० (३१२५६)
जह्यान्न धर्मं त्रिदिवस्य हेतोः सर्वे तु तस्मान्न हता रणेऽस्मिन् ।
क्षिप्रं कुरून्याहि कुरुप्रवीर विजित्य गाश्च प्रतियातु पार्थः
॥ ४-६७-३१ (३१२५७)
संमोहनास्त्रप्रतिमोहिताः स्थ यूयं न जानीथ धनापहारम् ।
पश्यामि वस्त्राभरणानि राजन्विराटपुत्रेण समाहृतानि ॥ ४-६७-३२ (३१२५८)
नृपेषु सर्वेषु च मोहितेषु हन्तुं यदीच्छेत्स हनिष्यतीति ।
तदा तु धर्मात्मतया नृवीरो न चाहनद्वो बलभित्तनूजः ॥ ४-६७-३३
(३१२५९)
भाग्येन युष्मानवधीन्न पार्थः संधिं कुरूणामनुमन्यमानः ।
तद्यात यूयं सहसैनिकैस्तैर्हतावशिष्टैर्गजसाह्वयं पुरम्
॥ ४-६७-३४ (३१२६०)
वैशम्पायन उवाच। ४-६७-३५क्ष् (३२६१)
दुर्योधनस्तस्य निशम्य वाक्यं पितामहस्यात्महितं प्रशस्य ।
अतीतकामो युधि सोऽत्यमर्षी राजा विनिश्वस्य बभूव तूष्णीम्
॥ ४-६७-३५ (३१२६१)
तद्भीष्मवाक्यं हि निशम्य सर्वे धनञ्जयाग्निं च विवर्धमानम् ।
निवर्तनायैव मतिं निदध्युर्दुर्योधनं तं परिरक्षमाणाः ॥ ४-६७-३६
(३१२६२)
तान्प्रस्थितान्प्रीतमनाः समर्थो धनञ्जयः सर्वकुरुप्रवीरः ।
आमन्त्र्य वीरोऽनुययौ मुहूर्तं गाण्डीवघोषेण विनद्य लोकम् ॥ ४-६७-३७
(३१२६३)
तेषामनीकानि निरीक्ष्य पार्थो विकीर्णयानध्वजकार्मुकाणि ।
गाण्डीवधन्वा प्रहसन्कुरूणां शङ्खं प्रदध्मौ बलवान्बलेन

॥ ४-६७-३८ (३१२६४)
ते शङ्खशब्दं तुमुलं निशम्य ध्वजस्य शब्दं च ततोऽन्तरिक्षे ।
गाण्डीवशब्देन मुहुर्मुहुस्ते भीता ययुः सर्वधनं विहाय ॥ ४-६७-३९ (३१२६५)
तानर्जुनो दूरतरं विभज्य धनं च सर्वं निखिलं निवर्त्य ।
आपृच्छ्य तान्दूरमनुप्रयात्वा धनञ्जयस्तत्र कुरून्महात्मा ।
गुरूंश्च सर्वानभिवाद्य बाणैर्न्यवर्ततोदग्रमनाः शरैः सह ॥
४-६७-४० (३१२६६)
पितामहं शान्तनवं महात्मा द्वाभ्यां शराभ्यामभिवाद्य वीरः ।
द्रोणं कृपं चैव कुरूंश्च मान्याञ्शरैश्च सर्वानभिवाद्य सङ्ख्ये ।
दुर्योधनस्योत्तमरत्नचित्रं चिच्छेद पार्थो मकुटं शरौघैः ॥
४-६७-४१ (३१२६७)
अराजवंशस्य किमर्थमेतन्नित्यं न धार्यं मकुटं त्वयेति ।
संपातितं भूमितले सरत्नं प्रीतस्तुतो मात्स्यसुतो बभूव ॥ ४-६७-४२ (३१२६८)
धनञ्जयं नागमिव प्रभिन्नं विजित्य शत्रून्परिवर्तमानम् ।
गास्ता विजित्याभिमुखं प्रयान्तं न शक्नुवन्तः कुरवः प्रयाताः
॥ ४-६७-४३ (३१२६९)
धनञ्जयं सिंहमिवात्तशस्त्रं गा वै विजित्याभिमुखं प्रयान्तम् ।
उदीक्षितुं पार्थिवास्ते न शेकुर्यथैव मध्याह्नगतं हि सूर्यम्
॥ ४-६७-४४ (३१२७०)
रक्तानि वासांसि च तानि गृह्य रणोत्कटो नाग इव प्रभिन्नः ।
जित्वा च वैराटिमुवाच पार्थः प्रहृष्टरूपो रथिनां वरिष्ठः
॥ ४-६७-४५ (३१२७१)
आवर्तयाश्वान्पशवो जितास्ते याताः परे प्रैहि पुरं प्रहृष्टः ।
उद्घुष्यतां ते विजयोऽद्य शीघ्रं गात्रं तु ते सेवतु माल्यगन्धः ।
माता तु ते नन्दतु बान्धवाश्च त्वामद्य दृष्ट्वा समुदीर्णहर्षम् ॥ ॥
४-६७-४६ (३१२७२)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि सप्तषष्टितमोऽध्यायः ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-६७-११ पूर्णौघनिभानि पूर्वनदीप्रवाहसदृशानि ॥
११ ॥
४-६७-१६ अनीहमानाः अचेष्टमानाः ॥
१६ ॥
४-६७-१८ यावद्विसंज्ञास्तावन्निर्याहीत्यध्याहारेण योजना ॥
१८ ॥

४-६७-१९ आदस्त्व गृहाण ॥
१९ ॥
४-६७-२० अमूढसंज्ञैः अस्माभिरिति शेषः । सव्यतस्त्वमेवं हि धममाहुर्जितस्येति धो पाठः ॥
२० ॥
४-६७- २५ संनिकाशान् कृतं कृतकं प्रतिमादि निश्चेष्टतया तत्सदृशानित्यर्थः ॥
२५ ॥
४-६७-४५ हिमत्वा च वैराटिमुवाचेति पाठान्तरम् ॥
४५ ॥

विराटपर्व - अध्याय ००
॥ श्रीः ॥
४.६८. अध्यायः

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेनोत्तरंप्रति युधिष्ठिरादितत्वप्रकाशनप्रतिषेधनम् ॥ १ ॥
तथा श्मशानमेत्य शमीतरौ गाण्डिवादिनिधानपूर्वकं पुनर्बृहन्नलावेषपरिग्रहेण सारथ्यकरणम् ॥ २ ॥
उत्तरेणार्जुनचोदनया स्वजयोद्घोषणाय नगरंप्रति दूतप्रेषणम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-६८-० (३१२७३)
वैशम्पायन उवाच। ४-६८-०क्ष् (३२६२)
ततो विजित्य संग्रामे कुरुगोवृषभेक्षणः ।
समानयामास तदा विराटस्य धनं महत् ॥ ४-६८-१ (३१२७४)
मतषु च प्रभग्नेषु धार्तराष्ट्रेषु सर्वशः ।
वनान्निष्क्रम्य गहनाद्बहवः कुरुसैनिकाः ।
भयात्संत्रस्तमनसः समाजग्मुस्ततस्ततः ॥ ४-६८-२ (३१२७५)
मुक्तकेशाः प्रदृश्यन्ते स्थिताः प्राञ्जलयस्तदा ।
क्षुत्पिपासापरिश्रान्ता विदेशस्था विचेतसः ।
ऊचुः प्राञ्जलयः सर्वे पार्थ किं करवामहे ॥ ४-६८-३ (३१२७६)
प्राणानन्तर्मनोयातान्प्रयाचिष्यामहे वयम् ।
वयं चार्जुन ते दासा ह्यनुरक्ष्या ह्यनाथकाः ॥ ४-६८-४ (३१२७७)
अर्जुन उवाच। ४-६८-५क्ष् (३२६३)
अनाथान्दुःखितान्दीनान्कृशान्वृद्धान्पराजितान् ।

न्यस्तशस्त्रान्निराशांश्च नाहं हन्मि कृताञ्जलीन् ॥ ४-६८-५ (३१२७८)
भवन्तो यान्तु विस्रब्धा निर्भया अमृता यथा ।
मम पादरजोलक्ष्म्या जीवन्तु सुचिरं भुवि ॥ ४-६८-६ (३१२७९)
तस्य तामभयां वाचं श्रुत्वा योधाः समागताः ।
आयुः कीर्तियशोभिस्ते तमाशीर्भिरवर्धयन् ॥ ४-६८-७ (३१२८०)
ततो निवृत्ताः कुरवो यग्नाश्च दिवमास्थिताः ।
प्रयाताः सर्वतस्तत्र नमस्कृत्य धनञ्जयम् ॥ ४-६८-८ (३१२८१)
एवं दत्ताभयास्तेन ततो याताः कुरून्प्रति ॥ ४-६८-९ (३१२८२)
स कर्म कृत्वा परमार्यकर्मा निहत्य शत्रून्द्विषतां निहन्ता ।
यातो महामेघ इवातपान्ते विद्राव्य पार्थः कुरुसैन्यमेकः ॥ ४-६८-१० (३१२८३)
तं मात्स्यपुत्रं द्विषतां निहन्ता वचोऽब्रवीत्संपरिगृह्य राजन् ॥
४-६८-११ (३१२८४)
पितुः सकाशे तव तात सर्वे वसन्ति पार्था विदितं त्वयेति ।
तान्मास्म शंसीर्नगरं प्रविश्य भीतः प्रणश्येत्स च मत्स्यराजः
॥ ४-६८-१२ (३१२८५)
मया जिता सा ध्वजिनी कुरूणां मया हि गावो विजिता द्विषद्भ्यः ।
एवं तु कामं नगरं प्रविश्य त्वमात्मना कर्म कृतं ब्रवीहि
॥ ४-६८-१३ (३१२८६)
र उवाच । ४-६८-१४क्ष् (३२६४)
यत्ते कृतं कर्म न वारणीयं तत्कर्म कर्तुं मम नास्ति शक्तिः ।
न त्वां प्रवक्ष्यामि पितुः सकाशे यावन्न मां वक्ष्यसि सव्यसाचिन्
॥ ४-६८-१४ (३१२८७)
पायन उवाच। ४-६८-१५क्ष् (३२६५)
स शत्रुसेनां तरसा विजित्य आच्छिद्य सर्वं तु धनं कुरूणाम् ।
श्मशानमागम्य पुनः शमीं तामभ्येत्य तस्थौ शरविक्षताङ्गः
॥ ४-६८-१५ (३१२८८)
ततः स वह्निप्रतिमो महाकपिः सहैव भूतैर्दिवमुत्पपात ।
तथा च माया विहिता बभूव सा ध्वजं च सिंहं युयुजे रथे पुनः
॥ ४-६८-१६ (३१२८९)
निधाय तच्चायुधमाजिमर्दनः कुरूत्तमानामिषुधीन्ध्वजांस्तथा ।
प्रायात्स मात्स्यो नगरं प्रवेष्टुं किरीटिना सारथिना महात्मा ॥ ४-६८-१७
(३१२९०)
पार्थश्च कृत्वा परमार्यकर्म निहत्य शत्रून्द्विषतां निहन्ता ।
विधाय भूयश्च तथैव वेषं जग्राह रश्मीन्पुनरुत्तरस्य ।
बृहन्नलारूपमथो विधाय प्रायात्य मात्स्यो नगरं प्रवेष्टुम् ॥
४-६८-१८ (३१२९१)

वैशम्पायन उवाच। ४-६८-१९क्ष् (३२६६)
ततो निवृत्ताः कुरवः प्रभग्नाः शममास्थिताः ।
परस्परमवेक्ष्यैव जग्मुस्ते हृतवाससः ॥ ४-६८-१९ (३१२९२)
पन्थानमुपसंगम्य फल्गुनो वाक्यमब्रवीत् ।
राजपुत्र प्रपद्यस्व धनानीमानि सर्वशः ।
गोकुलानि महाबाहो वीरगोपालकैः सह ॥ ४-६८-२० (३१२९३)
ततोऽपराह्णे यास्यामो विराटनगरं प्रति ।
आश्वास्य पाययित्वा च परिप्लाव्य च वाजिनः। ४-६८-२१ (३१२९४)
गच्छन्तु त्वरितं दूता गोपालाः प्रेषितास्त्वया ।
नगरे प्रियमाख्यातुं घोषयन्तु च ते जयम् ॥ ४-६८-२२ (३१२९५)
उत्तरस्त्वरमाणोऽथ दूतानाज्ञापयत्ततः ।
वचनादर्जुनस्यैव ह्याचक्षध्वं जयं मम ॥ ४-६८-२३ (३१२९६)
४-६८-२४ (३१२९७)
मया जिता सा ध्वजिनी कुरुणं
मया च गावो विजिता द्विषद्भ्यः ।
एवं तु कामं नगरं प्रविश्य
मयाऽऽत्मना कर्म कृतं ब्रवीत ॥

विराटपर्व - अध्याय ०६९
॥ श्रीः ॥
४.६९. अध्यायः ६९

Mahabharata - Virata Parva - Chapter Topics
विराटेन युधिष्ठिरादिभिः सह सुशर्मादिजयानन्तरं पुसंप्रत्यागमनम्
॥ १.। तथा उत्तरस्य कुरुविजयाय सहबृहन्नलया गमनश्रवणेन
तद्रक्षणाय सेनाचोदना ॥ २ ॥
अत्रान्तरे विराटाय दूतैरुत्तरजनिवेदनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-६९-० (३१२९८)
वैशम्पायन उवाच। ४-६९-०क्ष् (३२६७)
स विजित्य धनं चापि विराटो वाहिनीपतिः ।
प्राविशन्नगरं हृष्टश्चतुर्भिः सह पाण्डवैः ॥ ४-६९-१ (३१२९९)
जित्वा त्रिगर्तान्संग्रामे गाश्चैवानाय्य केवलाः ।
अशोभत महाराजः सह पार्थैः श्रिया वृतः ॥ ४-६९-२ (३१३००)
तमासनगत वीरं सुहृदां प्रीतिवर्धनम् ।

तपतस्थुः प्रकृतयः समन्ताद्ब्राह्मणैः सह ॥ ४-६९-३ (३१३०१)
सभाजितः सभासद्भिः प्रतिनन्द्य स मत्स्यराट् ।
विसर्जयामास तदा द्विजांश्च प्रकृतीस्तथा ॥ ४-६९-४ (३१३०२)
ततः स राजा मात्स्यानां विराटो वाहिनीपतिः ।
प्रविश्यान्तःपुरं रम्यं स्त्रीशतैरुपशोभितम् ।
उत्तरं तत्र नापश्यत्क्व यात इति चाब्रवीत् ॥ ४-६९-५ (३१३०३)
आचख्युस्तत्र संहृष्टाः स्त्रियः कन्याश्च वेश्मनि ।
अन्तःपुरचराश्चैव कुरुभिर्गोधनं हृतम् ॥ ४-६९-६ (३१३०४)
ताञ्जेतुमभिसंरब्ध एक एवातिसाहसात् ।
बृहन्नलासहायश्च निर्यातः पृथिवींजयः ॥ ४-६९-७ (३१३०५)
उपयातानतिरथान्द्रोणं शान्तनवं कृपम् ।
कर्णं दुर्योधनं चैव द्रोणपुत्रं च षड्रथान् ॥ ४-६९-८ (३१३०६)
ततो विराटः परमाभितप्तः
पुत्रं निशम्यैकरथेन यातम् ।
बृहन्नलासारथिमाजिमर्दनं
प्रोवाच सर्वानथ मन्त्रिमुख्यान् ॥ ४-६९-९ (३१३०७)
गवां शतसहस्राणि उभिभूय ममात्मजम् ।
कुरवः कालयन्ति स्म सर्वे युद्धविशारदाः ॥ ४-६९-१० (३१३०८)
तस्माद्गच्छतु मे योधा बलेन महता वृताः ।
उत्तरस्य परीप्सार्थं ये त्रिगर्तैरविक्षताः ॥ ४-६९-११ (३१३०९)
वैशम्पायन उवाच। ४-६९-१२क्ष् (३२६८)
हयांश्च नागांश्च रथांश्च शीघ्रं
वादित्रसङ्घांश्च ततः प्रभूतान् ।
प्रस्थापयामास सुतस्य हेतो-
र्विचित्रचित्राभरणोपपन्नान् ॥ ४-६९-१२ (३१३१०)
एवं स राजा मात्स्यानां महानक्षोहिणीपतिः ।
व्यादिदेशाथ स क्षिप्रं वाहिनीं चतुरङ्गिणीम् ॥ ४-६९-१३ (३१३११)
कुमारमाशु जानीत यदि जीवति वा नवा ।
यस्य यन्ता गतः षण्डो मन्येऽहं स न जीवति ॥ ४-६९-१४ (३१३१२)
तमब्रवीद्धर्मसुतो विराट-
मार्तं विदित्वा कुरुभिः प्रतप्तम् ।
बृहन्नला सारथिश्चेन्नरेन्द्र
परे न नेष्यन्ति तवाद्य गाश्च ॥ ४-६९-१५ (३१३१३)
सर्वान्महीपान्सहितान्कुरूंश्च
तथैव देवासुरनागयक्षान् ।
अलं विजेतुं समरे सुतस्ते

अनुष्ठितः सारथिना हि तेन ॥ ४-६९-१६ (३१३१४)
सर्वथा कुरवश्चापि ये चान्ये वसुधाधिपाः ।
त्रिगर्तान्निर्जिताञ्श्रुत्वा न स्थास्यन्ति कथंचन ॥ ४-६९-१७ (३१३१५)
वैशम्पायन उवाच। ४-६९-१८क्ष् (३२६९)
अथोत्तरेण प्रहिता दूतास्ते शीघ्रगामिनः ।
विराटनगरं प्राप्य जयं प्रावेदयंस्तदा ॥ ४-६९-१८ (३१३१६)
राजानं वृतमाचख्युर्मन्त्रिभिर्जयमुत्तमम् ।
पराजयं कुरूणां च उपायान्तं तथोत्तरम् ॥ ४-६९-१९ (३१३१७)
सर्वा विनिर्जिता गावः कुरवश्च पराजिताः ।
उत्तरः सह सूतेन कुशली च परंतपः ॥ ४-६९-२० (३१३१८)
कङ्क उवाच। ४-६९-२१क्ष् (३२७०)
दिष्ट्या ते निर्जिता गावः कुरवश्च पराजिताः ।
दिष्ट्या ते विजयी पुत्रः श्रूयते पार्थिवर्षभः ॥ ४-६९-२१ (३१३१९)
नाद्भुतं त्विह मन्येऽहं यत्ते पुत्रोऽजयत्कुरून् ।
ध्रुव एव जयस्तस्य यस्य यन्ता बृहन्नला ॥ ४-६९-२२ (३१३२०)
देवेन्द्रसारथिश्चैव मातलिः ख्यातविक्रमः ।
कृष्णस्य सारथिश्चैव न बृहन्नलया समौ ॥ ४-६९-२३ (३१३२१)
वैशम्पायन उवाच। ४-६९-२४क्ष् (३२७१)
ततो विराटो नृपतिः संप्रहृष्टतनूरुह ।
श्रुत्वा तु विजयं तस्य कुमारस्यामितौजसः ।
संतोषयित्वा दूतांस्तान्धनरत्नैश्च सर्वशः ॥ ४-६९-२४ (३१३२२)
गते त्वनुजने तस्मिन्दूतवाक्यं निशम्य च ।
उत्तरस्य जयात्प्रीतो विराटः प्रत्यभाषत ॥ ४-६९-२५ (३१३२३)
राजमार्गाः क्रियन्तां वै पताकाभिरलंकृताः ।
पुष्पोपहारैरर्च्यतां देवताश्चापि सर्वशः ॥ ४-६९-२६ (३१३२४)
कुमारा योधमुख्याश्च गणिकाश्च स्वलंकृताः ।
वादित्राणि च सर्वाणि प्रत्युद्यान्तु सुतं मम ॥ ४-६९-२७ (३१३२५)
भवन्तु ते लब्धजये सुते मे
पौराश्च मर्त्याश्च परे च नार्यः ।
ते शुक्लवस्त्राः प्रभवन्तु मार्गे
सुगन्धमाल्याभरणाश्च नार्यः ॥ ४-६९-२८ (३१३२६)
भजन्तु सर्वा गणिकाः सुतं मे
नार्यश्च कन्याः सहसैनिकाश्च ।
स्वलंकृतास्ताः सुभगाः सुवेषाः
पुत्रस्य पन्थानमनुव्रजन्तु ॥ ४-६९-२९ (३१३२७)
घण्टापणवकाः शीघ्रं मत्तमारुह्य कुञ्जरम् ।

शृङ्गाटकेषु सर्वेषु समाख्यान्तु जयं मम् ॥ ४-६९-३० (३१३२८)
उत्तरा च कुमारीभिर्बह्वाभरणभूषिता ।
सखीं विजितसंग्रामां प्रत्युद्यातु बृहन्नलाम् ॥ ४-६९-३१ (३१३२९)
श्रुत्वा तु वचनं तस्य पार्थिवस्य महात्मन ।
तथैव चक्रुः संहृष्टाः पौराः स्वस्तिकपाणयः ॥ ४-६९-३२ (३१३३०)
सूताश्च सर्वे सहमागधाश्च
हृष्टा विराटस्य पुरे जनौघाः ।
भेर्यश्च तूर्याणि च वारिजाश्च
वेषैः परार्ध्यैः प्रमदाजनाश्च ॥ ४-६९-३३ (३१३३१)
वन्दिप्रवादाः पणवादिकाश्च
तथैव वाद्यानि च वंशशब्दाः ।
कांस्यं सतालं मधुरं च गीत-
मादाय नार्यो नगरान्निरीयुः ॥ ४-६९-३४ (३१३३२)
प्रत्युद्ययुः पुत्रमनन्तवीर्यं
ते ब्राह्मणाः शान्तिपराः प्रधानाः ।
स्वाध्यायवेदाध्ययनक्रमज्ञाः
स्वस्तिक्रियागीतजपप्रधानाः ॥ ॥ ४-६९-३५ (३१३३३)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि
एकोनसप्ततितमोऽध्यायः ॥

विराटपर्व - अध्याय ०७०
॥ श्रीः ॥
४.७०. अध्यायः ७०

Mahabharata - Virata Parva - Chapter Topics
उत्तरजयश्रवणहृष्टेन विराटेन युधिष्ठिरेण सह द्यूतदेवनम् ॥ १ ॥
विराटेनोत्तरप्रशंसने कङ्केन बृहन्नलया कुरुपराजयकथनम् ॥ २ ॥
ततो रुष्टेन विराटेन कङ्कस्य कर्णमूलेऽक्षेणाभिहननम् ॥ ३ ॥
सैरन्ध्र्या क्षतात्प्रस्रवतो रक्तस्य निजोत्तरीयेण ग्रहणम् ॥ ४ ॥
तथा विराटेन तद्ग्रहणकारणप्रश्ने तत्कथनम् ॥ ५ ॥

Mahabharata - Virata Parva - Chapter Text

४-७०-० (३१३३४)
वैशम्पायन उवाच । ४-७०-०क्ष् (३२७२)
प्रस्थाप्य सेनां कन्याश्च गणिकाश्च स्वलंकृताः ।

मत्स्यराजो महाराजः प्रहृष्ट इदमब्रवीत् ॥ ४-७०-१ (३१३३५)
त्रिगर्ताः कुरवः सर्वे संग्रामे निर्जिता मया ।
प्रविश्यान्तःपुरं हृष्टा द्यूतं दीव्याम ब्राह्मण ॥ ४-७०-२ (३१३३६)
अक्षानाहर सैरन्ध्रि आसनं चोपकल्पय ।
आदाय व्यजनं त्वं च पार्श्वतोऽनन्तरा भव ॥ ४-७०-३ (३१३३७)
तं तथावादिनं दृष्ट्वा पाण्डवः प्रत्यभापत ।
न देवितव्यं हृष्टेन कितवेनेति नः श्रुतम् ॥ ४-७०-४ (३१३३८)
न त्वामद्य मुदा युक्तमहं देवितुमुत्सहे ।
प्रियं तु ते चिकीर्पामि वर्ततां यदि रोचते ।
द्यूतं कर्तुं न वाञ्छामि नरेन्द्र जनसंसदि ॥ ४-७०-५ (३१३३९)
विराट उवाच। ४-७०-६क्ष् (३२७३)
स्त्रियो गावो हिरण्यं च यच्चान्यद्वसु किंचन ।
न मे किंचित्त्वया कार्यमन्तरेणापि देवितम् ॥ ४-७०-६ (३१३४०)
कङ्क उवाच। ४-७०-७क्ष् (३२७४)
किं ते द्यूतेन राजेन्द्र बहुदोषेण मानद ।
देवने बहवो दोषास्तस्मात्तत्परिवर्जयेत् ॥ ४-७०-७ (३१३४१)
श्रुतो वा यदि वा दृष्टो धर्मराजो युधिष्ठिरः ।
स राज्यं धनमक्षय्यं पणमेकममन्यत ॥ ४-७०-८ (३१३४२)
कृष्णां च भार्यां दयितां भ्रातॄंश्च त्रिदशोपमान् ।
निःसंशयं स कितवः पश्चात्तप्यति पाण्डवः ॥ ४-७०-९ (३१३४३)
विविधानां च रत्नानां धनानां च पराजये ।
अभीप्सितविनाशश्च वाक्पारुष्यमनन्तरम् ॥ ४-७०-१० (३१३४४)
अविश्वास्यं बुधैर्नित्यमेकाह्ना द्रव्यनाशनम् ।
द्यूते हारितवान्सर्वं तस्माद्द्यूतं न रोचये ॥ ४-७०-११ (३१३४५)
अथवा मन्यसे राजन्दीव्याव यदि रोचते ।
एवमाभाष्य वाक्यैस्तु क्रीडतस्तौ नरोत्तमौ ॥ ४-७०-१२ (३१३४६)
प्रवर्तमाने द्यूते तु मात्स्यः पाण्डवमब्रवीत् ॥ ४-७०-१३ (३१३४७)
पश्य पुत्रेण मे युद्धे तादृशाः कुरवो जिताः ।
कुरवोऽतिरथाः सर्वे देवैरपि सुदुर्जयाः ॥ ४-७०-१४ (३१३४८)
ततोऽब्रवीद्धर्मराजो द्यूते मात्स्यं युधिष्ठिरः ।
दिष्ट्या ते विजिता गावः कुरवश्च पराजिताः ॥ ४-७०-१५ (३१३४९)
अत्यद्भुततमं मन्ये उत्तरश्चेत्कूरूञ्जयेत् ।
यन्ता बृहन्नला यस्य स कथंचिद्विजेष्यते ॥ ४-७०-१६ (३१३५०)
ततो विराटः क्षुभितो मन्युना च परिप्लुतः ।
उवाच वचनं क्रुद्धः परिव्राजमनन्तरम् ॥ ४-७०-१७ (३१३५१)
तादृशेन तु योधेन महेष्वासेन धीमता ।

कुरवो निर्जिता युद्धे तत्र किं ब्राह्मणाद्भुतम् ॥ ४-७०-१८ (३१३५२)
युधिष्ठिर उवाच। ४-७०-१९क्ष् (३२७५)
समं षण्डेन मे पुत्रं ब्रह्मबन्धो प्रशंससि ।
वाच्यावाच्यं न जानीषे नूनं मामवमन्यसे ॥ ४-७०-१९ (३१३५३)
विराट उवाच। ४-७०-२०क्ष् (३२७६)
समं षण्डेन मे पुत्रं ब्रह्मबन्धो प्रशंससि ।
वाच्यावाच्यं न जानीषे नूनं मामवमन्यसे ॥ ४-७०-२० (३१३५४)
पुमांसो बहवो दृष्टाः सूताश्च बहवो मया ।
विक्रम्य यन्ता योद्धा च न मे दृष्टः कदाचन ॥ ४-७०-२१ (३१३५५)
विप्रियं न चरेद्राज्ञामनुकूलं प्रियं वदेत् ।
आचरन्विप्रियं राज्ञां न जातु सुखमेधते ॥ ४-७०-२२ (३१३५६)
वयस्यत्वात्तु ते सर्वमपराधमिमं क्षमे ।
नेदृशीं प्रवदर्वाचं यदि जीवितुमिच्छसि ॥ ४-७०-२३ (३१३५७)
वैशम्पायन उवाच। ४-७०-२४क्ष् (३२७७)
ततोऽब्रवीत्पुनः कङ्कः प्रहस्य कुरुवर्धनः ।
बृहन्नलाया सजेन्द्र धुष्यतां नगरे जयः ॥ ४-७०-२४ (३१३५८)
उत्तरेण तु सारथ्यं कृतं नूनं भविष्यति ।
निमित्तं किंचिदुत्पन्नं तर्कश्चापि दृढो मम ।
यतो जानामि राजेन्द्र नान्यथा तद्भविष्यति ॥ ४-७०-२५ (३१३५९)
कुरवोऽपि महावीर्या देवैरपि सुदुर्जयाः ।
ससोमवरुणादित्यैः सयक्षेशहुताशनैः ॥ ४-७०-२६ (३१३६०)
यत्र शान्तनवो भीष्मो द्रोणकर्णौ सुदुर्जयौ ।
अश्वत्थामा विकर्णश्च सोमदत्तो जयद्रथः ॥ ४-७०-२७ (३१३६१)
भूरिश्रवाः शलो भूरिर्जलसन्धिश्च वीर्यवान् ।
दुर्योधनो दुष्प्रसहो दुःशासनविविंशती ॥ ४-७०-२८ (३१३६२)
वृषसेनोऽश्ववेगश्च वायुवेगसुवर्चसौ ।
बाह्लीकः शूरसेनश्च युयुत्सुश्च परन्तपः ॥ ४-७०-२९ (३१३६३)
सौबलः शकुनिश्चैव द्युमत्सेनश्च साल्वराट् ।
अन्ये च बहवः शूरा नानाजनपदेश्वराः ॥ ४-७०-३० (३१३६४)
कृपेणाचार्यमुख्येन सहिताः कुरवो नृपाः ।
सञ्जकार्मुकनिस्त्रिंशा रथिनो रथयूथपाः ।
अन्ये चैव महावीर्या राजपुत्रा महारथाः ॥ ४-७०-३१ (३१३६५)
मरुद्गणैः परिवृतः साक्षादपि पुरंदरः ।
तद्बलं न जयेत्क्रुद्धो भीष्मद्रोणादिभिर्वृतम् ॥ ४-७०-३२ (३१३६६)
कस्तद्बृहन्नलादन्यो मनुष्यः प्रतियोत्स्यति ।
यस्य बाहुबले तुल्यो न भविष्यति कश्चन ॥ ४-७०-३३ (३१३६७)

अतीव समरं दृष्ट्वा हर्षो यस्याभिवर्धते ।
किमेवं पुरुषो लोको दिवि वा भुवि विद्यते ॥ ४-७०-३४ (३१३६८)
वैशम्पायन उवाच। ४-७०-३५क्ष् (३२७८)
तेन संक्षुभितो राजा दीर्यमाणेन चेतसा ।
अब्रवीद्वचनं क्रूरमजानन्वै युधिष्ठिरम् ॥ ४-७०-३५ (३१३६९)
कङ्क मा ब्रूहि मे वाक्यं प्रतिकूलं द्विजोत्तम ।
बहुशः प्रतिषिद्धस्त्वं न च वाचं नियच्छसि ॥ ४-७०-३६ (३१३७०)
नियन्ता चेन्न विद्येत न कश्चिद्धर्ममाचरेत् ।
इति प्रक्षुभितो राजा सोऽक्षेणाभ्यहनङ्कशम् ॥ ४-७०-३७ (३१३७१)
तस्य तक्षकभोगाभं बाहुमुत्क्षिप्य दक्षिणम् ।
विराटः प्राहनत्क्रुद्धः कर्णमाश्रित्य दक्षिणम् ॥ ४-७०-३८ (३१३७२)
मुखे युधिष्ठिरं कोपान्मैवमित्यवभर्त्सयन् ।
बलवत्प्रतिविद्धस्य नस्तः शोणितमास्रवत् ॥ ४-७०-३९ (३१३७३)
अक्षेणाभिहतो राजा विराटेन युधिष्ठिरः ।
तूष्णीमासीन्महाबाहुः कृष्णां पश्यन्सुदुःखिताम् ॥ ४-७०-४० (३१३७४)
तस्य रक्तोत्पलनिभं शिरसः शोणितं तदा ।
प्रावर्तत महाबाहोरभिघातान्महात्मनः ॥ ४-७०-४१ (३१३७५)
तदप्राप्तं महीं पार्थः पाणिभ्यां समधारयत् ।
अवैक्षत च धर्मात्मा द्रौपदीं पार्श्वतः स्थिताम् ॥ ४-७०-४२ (३१३७६)
सा वेदनामभिज्ञाय भर्तुश्चित्तवशानुगा ।
सा विषण्णा च भीता च क्रुद्धा च द्रुपदात्मजा ॥ ४-७०-४३ (३१३७७)
बाष्पं नियम्य कृच्छ्रेण भर्तुर्निःश्रेयसैषिणी ।
उत्तरीयेण सूक्ष्मेण तूर्णं जग्राह शोणितम् ॥ ४-७०-४४ (३१३७८)
निगृह्य रक्तं वस्त्रेण सैरन्ध्री दुःखमोहिता ।
सौवर्णं गृह्य भृङ्गारं शोणितं तदपामृजत् ।
युधिष्ठिरस्य राजेन्द्र द्रुपदेन्द्रसुता तदा ॥ ४-७०-४५ (३१३७९)
विराट उवाच। ४-७०-४६क्ष् (३२७९)
सैरन्ध्रि किमिदं रक्तमुत्तरीयेण गृह्यते ।
कोत्र हेतुर्विशालाक्षि तन्मप्राचक्ष्व तत्वतः ॥ ४-७०-४६ (३१३८०)
सैरन्ध्र्युवाच। ४-७०-४७क्ष् (३२८०)
रक्तबिन्दनि यावन्ति कङ्कस्य धरणीतले ।
तावद्वर्षाणि राष्ट्रे ते अनावृष्टिर्भविष्यति ॥ ४-७०-४७ (३१३८१)
एतन्निमित्तं मात्स्येन्द्र कङ्कस्य रुधिरं मया ।
गृहीतमुत्तरीयेण विनाशो मा भवेत्तव ॥ ४-७०-४८ (३१३८२)
यतीशं यो विहन्येत तस्यायुर्विनशिष्यति ।
यो यतीशं नियम्येत सहस्रं यातना यमे ॥ ४-७०-४९ (३१३८३)

यतौ रक्तं दर्शयति यावत्पांसुरगृह्यत ।
तावन्तः पितृलोकस्थाः पितरः प्रपतन्त्यधः ॥ ४-७०-५० (३१३८४)
इति ज्ञात्वा विराटेन्द्र धृतं रक्तं च वाससा ।
मया तव हितार्थाय त्वयि प्रणयकारणात् ॥ ॥ ४-७०-५१ (३१३८५)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि सप्ततितमोऽध्यायः ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-७०-१० धनानां च विना ॥॥।
वाक्पारुष्यं चाभवदिति शेषपूरणेन योजना ॥
१० ॥
४-७०-१९ किं किमपि ॥
१९ ॥
४-७०-४७ धरणीतले पतेयुरिति शेषः ॥
४७ ॥
४-७०-४८ नियम्येत नियमयेत् तस्येति शेषः ॥
४९ ॥
४-७०-५० अगृह्यत गृह्येत रक्तेनेति ॥
५० ॥
४-७०-५१ इतीममर्थम् ॥
५१ ॥

विराटपर्व - अध्याय ०७१
॥ श्रीः ॥
४.७१. अध्यायः ७१

Mahabharata - Virata Parva - Chapter Topics
अर्जुनकुरुयुद्धदिदृक्षया समागतैर्देवैरर्जुनं श्लाघमानैः
सद्भिः पुनः स्वर्गंप्रति गमनम् ॥ १ ॥
उत्तरेण सवादित्रगोषं पौरैः प्रत्युद्गम्यमानेन स्वनगरप्रवेशनम् ॥ २ ॥

Mahabharata - Virata Parva - Chapter Text

४-७१-० (३१३८६)
जनमेजय उवाच। ४-७१-०क्ष् (३२८१)
युद्धं तु मानुषं द्रष्टुमागतास्त्रिदशाः पुरा ।
किमकुर्वन्त ते पश्चात्कथयस्व ममानघ ॥ ४-७१-१ (३१३८७)

वैशम्पायन उवाच। ४-७१-२क्ष् (३२८२)
वासवप्रमुखाः सर्वे देवाः सर्षिपुरोगमाः ।
यक्षगन्धर्वसङ्घाश्च गणा अप्सरसां तथा ॥ ४-७१-२ (३१३८८)
युद्धं तु मानुषं दृष्ट्वा कुरूणां फल्गुनस्य च ।
एकस्य च बहूनां च रौद्रमत्युग्रदर्शनम् ॥ ४-७१-३ (३१३८९)
अस्त्राणामथ दिव्यानां प्रयोगानथ संग्रहान् ।
लघु सुष्ठु च चित्रं च कृतीनां च प्रयत्नतः ॥ ४-७१-४ (३१३९०)
भीष्मं शारद्वतं द्रोणं कर्णं गाण्डीवधन्वना ।
जितानन्यान्भूमिपालान्दृष्ट्वा जग्मुर्दिवौकसः ॥ ४-७१-५ (३१३९१)
सर्वे ते परितुष्टाश्च प्रशस्य च मुहुर्मुहुः ।
असङ्गतिना तेन विमानेनाशुगामिना ।
प्रतिजग्मुरसङ्घास्ते त्रिदिवं च दिवौकसः ॥ ४-७१-६ (३१३९२)
शक्रकुरवो निर्जिताः सर्वे भीष्मद्रोणकृपादयः ।
अजय्यास्त्रिदशैः सर्वैः सेन्द्रैः सर्वैः सुरासुरैः ।
पार्थेनैकेन संग्रामे विस्मयो नो महानहो ॥ ४-७१-७ (३१३९३)
कस्मिन्मुहूर्ते संजातः कस्य धर्मस्य वा फलम् ॥ ४-७१-८ (३१३९४)
किमाश्चर्यं फल्गुनेऽस्मिन्यो रुद्रेण न्ययोधयत् ।
निवातकवचानाजौ यस्त्रिंशत्कोटिसंमितान् ॥ ४-७१-९ (३१३९५)
तस्य चैतत्किमाश्चर्यं स्तुवन्त इति ते सुराः ।
जग्मुः सुरालयं हृष्टा विस्मयाविष्टचेतसः ॥ ४-७१-१० (३१३९६)
कुरवोऽर्जुनबाणैश्च ताडिताः शरविक्षताः ।
कुरूनभिमुखां याताः समग्रबलवाहनाः ॥ ४-७१-११ (३१३९७)
विराटनगराच्चैव गजाश्वरथसंकुलाः ।
योधैः क्षत्रियदायादैर्बलवद्भिरधिष्ठिताः ॥ ४-७१-१२ (३१३९८)
विराटप्रहिता सेना नगराच्छीघ्रयायिनी ।
उत्तरं सह सूतेन प्रत्ययात्तमरिन्दमम् ॥ ४-७१-१३ (३१३९९)
तस्मिंस्तूर्यशताकीर्णे हस्त्यश्वरथसंकुले ।
प्रहर्षः स्त्रीकुमाराणां तुमुलः समपद्यत ॥ ४-७१-१४ (३१४००)
अर्जुनस्तु ततो दृष्ट्वा सैन्यरेणुं समुत्थितम् ।
सैन्यध्वजं निशम्याथ वैराटिं समभाषत ॥ ४-७१-१५ (३१४०१)
नगरे तुमुलः शब्दो रेणुश्चाक्रमते नभः ।
किंनु खल्वपयातास्ते कुरवो नगरं गताः ॥ ४-७१-१६ (३१४०२)
ते चैव निर्जिताऽस्माभिर्महेष्वासाः सुतेजसः ।
आमुञ्च कवचं वीर चोदयस्व च वाजिनः ।
जवेनाभिप्रपद्यस्व विराटनगरं प्रति ॥ ४-७१-१७ (३१४०३)
न तावत्तलनिर्घोषं गाण्डीवस्य च निस्वनम् ।

ध्वजं वा दर्शयिष्यामि अथवा स्वजनो भवेत् ॥ ४-७१-१८ (३१४०४)
उत्तर उवाच। ४-७१-१९क्ष् (३२८३)
सेनाग्रमेतन्मात्स्यानां गणिकाश्च स्वलंकृताः ।
कन्या रथेषु दृश्यन्ते योधा विविधवाससः ॥ ४-७१-१९ (३१४०५)
उत्तरामत्र पश्यामि सखीभिः परिवारिताम् ।
अनीकिन्यः प्रदृश्यन्ते हस्तिनोश्वाश्च वर्मिताः ॥ ४-७१-२० (३१४०६)
रथिनश्च पदाताश्च बहवो न च शस्त्रिणः ।
विराटवचनात्सर्वे संहृष्टाः प्रतिभान्ति मे ।
न च मेऽत्र प्रतीघातश्चित्तस्य स्वजने यथा ॥ ४-७१-२१ (३१४०७)
वैशम्पायन उवाच। ४-७१-२२क्ष् (३२८४)
ततः शीघ्रं समासाद्य उत्तरं स्वजनो बहु ।
परस्परममित्रघ्नं सस्वजे तं समागतम् ॥ ४-७१-२२ (३१४०८)
जना ऊचुः। ४-७१-२३क्ष् (३२८५)
प्रीतिमान्पुरुषव्याघ्रो हर्षयुक्तः पुनः पुनः ।
दिष्ट्या जयसि भद्रं ते दिष्ट्या सूतो बृहन्नलाः ।
दिष्ट्या संग्राममागम्य भयं तव न किंचन ॥ ४-७१-२३ (३१४०९)
उत्तर उवाच। ४-७१-२४क्ष् (३२८६)
अजैषीदेष जाञ्जिष्णुः कुरूनेकरथो रणे ।
एतस्यक बाहुवीर्यं तद्येन गावो जिता मया ।
कुरवो निर्जिता यस्मात्सग्रामेऽमिततेजसः ॥ ४-७१-२४ (३१४१०)
अकार्षीदेष तत्कर्म देवपुत्रोपमो युवा ।
एष तत्पुरुषव्याघ्रो विक्षोभ्य कुरुमण्डलम् ।
गावः प्रसह्य विजिता रणे मां चाभ्यपालयत् ॥ ४-७१-२५ (३१४११)
वैशम्पायन उवाच। ४-७१-२६क्ष् (३२८७)
उत्तरस्य वचः श्रुत्वा शंसमानस्य चार्जुनम् ।
चोदिता राजपुत्रेण जयं मङ्गलवादिनः ॥ ४-७१-२६ (३१४१२)
ततो गन्धैश्च माल्यैश्च धूपैश्च वसुसंभृतैः ।
कन्याः पार्थममित्रघ्नं किरन्त्यः समपूजयन् ॥ ४-७१-२७ (३१४१३)
आपूर्यमाणो माल्यैश्च गन्धैश्च विविधैः शुभैः ।
संपूज्यमानो लोकेन नगरद्वारमागमत् ॥ ४-७१-२८ (३१४१४)
भेर्यश्च तूर्याणि च वेणवश्च
विचित्रवेषाः प्रमदाजनाश्च ।
पुरो विराटस्य महाबलस्य
निष्क्रम्य भूमिंजयमभ्यनन्दनम् ॥ ४-७१-२९ (३१४१५)
प्रशस्यमानस्तु जयेन तत्र
पुत्रो विराटस्य न हृष्यति स्म ।

संभाष्यमाणस्तु जयेन तत्र
सोऽन्तर्मनाः पाण्डवमीक्षमाणः ॥ ४-७१-३० (३१४१६)
पुत्र्यै विराटस्य ततो वराणि
वस्त्राण्यदात्पाण्डुसुतः सखीभ्यः ।
सभाजयंश्चापि समागतास्ता
दृष्ट्वा जयं तच्च बलं कुमार्यः ॥ ॥ ४-७१-३१ (३१४१७)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकसप्ततितमोऽध्यायः ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-७१-७ क़इमे श्लोकाः थो पुस्तकमात्रे वर्तन्ते ।

विराटपर्व - अध्याय ०७२
॥ श्रीः ॥
४.७२. अध्यायः ७२

Mahabharata - Virata Parva - Chapter Topics
उत्तरेण राजाभ्यनुज्ञयाऽन्तःपुरमेत्य तदभिवादनम् ॥ १ ॥
युधिष्ठिरघ्रणावलोकनभीतोत्तरचोदनया विराटेन
युधिष्ठिरक्षमापनम् ॥ २ ॥
ततोऽर्जुनस्यान्तःप्रवेशः ॥ ३ ॥
उत्तरस्यैव जेतृत्वभ्रमहृष्टेन विराटेन तत्प्रशंसनम् ॥ ४ ॥
तेन तंतपि कस्यचिद्देवपुत्रस्यैव जेतृत्वकथनम् ॥ ५ ॥
ततोऽर्जुनेनोत्तराप्रभृतिभ्यः कुरुवस्त्रप्रदानम् ॥ ६ ॥

Mahabharata - Virata Parva - Chapter Text

४-७२-० (३१४१८)
वैशम्पायन उवाच। ४-७२-०क्ष् (३२८८)
सभाज्यमानः पौरैश्च स्त्रीभिर्जानपदैरपि ।
आसाद्यान्तःपुरद्वारं पित्रे संप्रत्यवेदयत् ॥ ४-७२-१ (३१४१९)
ततो द्वाःस्थः समासाद्य प्रणिपत्य कृताञ्जलिः ।
वर्धयित्वा जयाशीर्भिरिदं वचनमब्रवीत् ॥ ४-७२-२ (३१४२०)
राजन्पृथुयशस्तुभ्यं जित्वा शत्रून्समागतः ।
उत्तरः सह सूतेन द्वारि तिष्ठति वारितः ॥ ४-७२-३ (३१४२१)
कुमारो योधमुख्यैस्च गणिकाभिस्च संवृतः ।
पौरजानपदैर्युक्तः पूज्यमानो जयाशिषाः ॥ ४-७२-४ (३१४२२)

ततो हृष्टो महीपालः क्षत्तारमिदमब्रवीत् ।
प्रवेशयोभौ तौ तूर्णं दर्शनेप्सुरहं तयोः ॥ ४-७२-५ (३१४२३)
क्षत्तारं कुरुराजस्तु शनैः कर्ण उपाजपत् ।
उत्तरः प्रविशत्वेको न प्रवेश्या बृहन्नलाः ॥ ४-७२-६ (३१४२४)
तस्य हि महाबाहोर्व्रतं नित्यं महात्मनः ।
यो ममाङ्गे व्रणं कुर्याच्छोणितं वा प्रदर्शयेत् ।
अन्यत्र संग्रामगतान्न स जीवेत्कथंचन ॥ ४-७२-७ (३१४२५)
व्यक्तं भृसं सुसंक्रुद्धो मां दृष्ट्वैव सशोणितम् ।
विराटमिह सामात्यं हन्यात्सबलावाहनम् ॥ ४-७२-८ (३१४२६)
इन्द्रं वापि कुबेरं वा यमं वा वरुणं तथा ।
मम शोणितकर्तारं मृद्नीयात्किं पुनर्नरम् ॥ ४-७२-९ (३१४२७)
क्षणमात्रं तु तत्रैव द्वारि तिष्ठतु वीर्यवान् ।
इति प्रोवाच धर्मात्मा युधिष्ठिर उदारधीः ॥ ४-७२-१० (३१४२८)
इत्युक्त्वा क्षमया युक्तो धर्मराजो घृणान्वितः ।
सभायां सह मात्स्येन तूष्णीमुपविवेश ह ॥ ४-७२-११ (३१४२९)
ततो राजसुतो ज्येष्ठः प्राविशत्पृथिवींजयः ।
ववन्दे स पितुः पादौ कङ्कं चाप्युपतिष्ठत ॥ ४-७२-१२ (३१४३०)
पश्यन्युधिष्ठिरं दृष्ट्या वक्रया चरणौ पितुः ।
अभिवाद्य ततो दृष्ट्वा कङ्कस्य रुधिरप्लुतम् ।
हृदयेऽदह्यत तदा मृत्युग्रस्त इवोत्तरः ॥ ४-७२-१३ (३१४३१)
ततो रुधिरसिक्ताङ्गमनेकाग्रमनागसम् ।
भूमावेकान्त आसीनं सैरन्ध्र्या समुपासितम् ।
ततः पप्रच्छ राजानं त्वरमाण इवोत्तरः ॥ ४-७२-१४ (३१४३२)
केनायं ताडितः कङ्कः केन पापमिदं कृतम् ।
को वा जिगमिषुर्मृत्युं केन स्पृष्टः पदोरगः ॥ ४-७२-१५ (३१४३३)
श्रोत्रियो ब्राह्मणश्रेष्ठ इन्द्रासनरतिक्षमः ।
पूजनीयोऽभिवाद्यश्च न प्रबाध्योऽयमीदृशः ॥ ४-७२-१६ (३१४३४)
वैशम्पायन उवाच। ४-७२-१७क्ष् (३२८९)
स पुत्रस्य वचः श्रुत्वा विराटो राष्ट्रवर्धनः ।
प्रत्युवाचोत्तरं वाक्यं साध्वसाद्ध्वस्तमानसः ॥ ४-७२-१७ (३१४३५)
पुत्र ते विजयं श्रुत्वा प्रहृष्टोऽहं मुदा भृशम् ।
अक्षक्रीडनयाऽनेन कालक्षेपमकारिषम् ॥ ४-७२-१८ (३१४३६)
तत्राजयत्कुरून्सर्वानुत्तरो राष्ट्रवर्धनः ।
इत्युक्तं हि मया पुत्र नेति कङ्को बृहन्नला ।
अजयत्सा कुरून्सर्वानिति मामब्रवीन्मुहुः ॥ ४-७२-१९ (३१४३७)
प्रशंसिते मया पुत्र विजये तव विश्रुते ।

बृहन्नलाया विजयं कङ्कोऽस्तुवत वै रुषा ॥ ४-७२-२० (३१४३८)
मया प्रशस्यमाने तु त्वयि पण्डं प्रशंसति ।
बृहन्नलाप्रशंसाभिरभ्यसूयमहं तदा ।
ताडितोऽयं मया पुत्र दुरात्मा शत्रुपक्षकृत् ॥ ४-७२-२१ (३१४३९)
ताडितोऽयं यतिः कङ्क इत्युक्तं तद्वचोत्तरः ।
श्रुत्वा पितुर्भृशं क्रुद्धः पितरं वाक्यमब्रवीत् ॥ ४-७२-२२ (३१४४०)
अकार्यं ते कृतं राजन्क्षिप्रमेष प्रसाद्यताम् ।
मा त्वा ब्रह्मविषं घोरं समूलमुपनिर्दहेत् ॥ ४-७२-२३ (३१४४१)
यावन्न क्षयमायाति कुलं सर्वमशेषनः ।
स्फीतं वृद्धं च मात्स्यानामयं तावत्प्रसाद्यताम् ॥ ४-७२-२४ (३१४४२)
प्रणम्य पादयोरस्य दण्डवत्क्षितिमण्डले ।
प्रगृह्य पादौ पाणिभ्यामयं तावत्प्रसाद्यताम् ॥ ४-७२-२५ (३१४४३)
दक्षेण पाणिना स्पृष्ट्वा शपे त्वां क्षपितं मया ।
इति यावद्वदेत्कङ् अयं तावत्प्रसाद्यताम् ॥ ४-७२-२६ (३१४४४)
स पुत्रस्य वचः श्रुत्वा विराटः साध्वसाकुलः ।
क्षमयामास कौन्तेयं छन्नं ब्राह्मणवर्चसा ॥ ४-७२-२७ (३१४४५)
क्षमयन्तं तु राजानं पाण्डवः प्रत्यभाषत ।
चिरं क्षान्तं मया राजन्मन्युर्मम न विद्यते ॥ ४-७२-२८ (३१४४६)
यदि स्म तत्पतेद्भूमौ रुधिरं मम पार्थिव ।
सराष्ट्रस्त्वमिहोच्छेदमापद्येथा नरर्षभ ॥ ४-७२-२९ (३१४४७)
न दूषयामि राजेन्द्र यस्तु हन्याददूषकम् ।
फलं तस्य महाराज क्षिप्रं दारुणमाप्नुयात् ॥ ४-७२-३० (३१४४८)
वैशम्पायन उवाच। ४-७२-३१क्ष् (३२९०)
शोणिते तु व्यतिक्रान्ते प्रविवेश बृहन्नला ।
अभिवाद्य महाराजं कङ्कं चाप्युपतिष्ठत ॥ ४-७२-३१ (३१४४९)
क्षमयित्वा तु कौरव्यं रणादुत्तरमागतम् ।
परिष्वज्य दृढं राजा प्रवेश्य भवनोत्तमम् ।
प्रशशंस ततो मात्स्यः शृण्वतः सव्यसाचिनः ॥ ४-७२-३२ (३१४५०)
विराट उवाच। ४-७२-३३क्ष् (३२९१)
त्वया दायादवानस्मि कैकेयीनन्दिवर्धन ।
त्वया मे सदृशः पुत्रो न भूतो न भविष्यति ॥ ४-७२-३३ (३१४५१)
पदं पदसहस्रेण यश्चरन्नापराध्नुयात् ।
तेन कर्णेन ते तात कथमासीत्समागमः ॥ ४-७२-३४ (३१४५२)
रणे यं प्रेक्ष्य सीदन्ति हृतवीर्यपराक्रमाः ।
कृपेन तेन ते तात कथमासीत्समागमः ॥ ४-७२-३५ (३१४५३)
यस्य तद्विश्रुतं लोके महद्वृत्तमनुत्तमम् ।

पितुः कृते कृतं घोरं ब्रह्मचर्यमनुत्तमम् ॥ ४-७२-३६ (३१४५४)
योऽयोधीत्समरे रामं जामदग्न्यं प्रतापिनम् ।
भीष्मोसौ पुरुषव्याघ्र न च युद्धे पराजितः ॥ ४-७२-३७ (३१४५५)
पराक्रमी च दुर्धर्षो विद्वाञ्शूरो जितेन्द्रियः ।
दृढवेधी क्षिप्रकारी विश्रुतः सर्वकर्मसु ॥ ४-७२-३८ (३१४५६)
तेन ते सह भीष्मेण कुरुवृद्धेन संयुगे ।
युद्धमासीत्कथं तात सर्वमेतद्ब्रवीहि मे ॥ ४-७२-३९ (३१४५७)
पर्वतं यो विनिर्भिन्द्याद्राजपुत्रो वरेषुभिः ।
दुर्योधनेन ते तात कथमासीत्समागमः ॥ ४-७२-४० (३१४५८)
आचार्यो वृष्णिरीराणां पाञ्चालानां च यः प्रभुः ।
कुरूणां पाण्डवानां च सर्वक्षत्रस्य यो गुरुः ॥ ४-७२-४१ (३१४५९)
सर्वशस्त्रभृतां श्रेष्ठः सर्वलोकेषु विश्रुतः ।
तेन द्रोणेन ते तात कथमासीत्समागमः ॥ ४-७२-४२ (३१४६०)
आचार्यपुत्रो यः शूरो द्रोणादनवमो रणे ।
तेन वीरेण ते तात कथमासीत्समागमः ॥ ४-७२-४३ (३१४६१)
सर्वे चैव महावीर्या धार्तराष्ट्रः महारथाः ।
तैस्तैर्वीरैश्च ते तात कथमासीत्समागमः ॥ ४-७२-४४ (३१४६२)
उत्तर उवाच। ४-७२-४५क्ष् (३२९२)
न मया निर्जिता गावो न मया कुरवो जिताः ।
कृतं च कर्म तत्सर्वं देवपुत्रेण केनचित् ॥ ४-७२-४५ (३१४६३)
स हि भीतं द्रवन्तं मां भीष्मद्रोणमुखान्कुरून् ।
दृष्ट्वा विषण्णं संग्रामे देवपुत्रो न्यवारयत् ॥ ४-७२-४६ (३१४६४)
स हि तिष्ठन्रथोपस्थे वज्रपाणिनिभो युवा ।
तेन ते निर्जिता गावस्तेन ते कुरवो जिताः ॥ ४-७२-४७ (३१४६५)
तस्य तत्कर्म वीरस्य न मया तात तत्कृतम् ।
स हि शारद्वतं द्रोणं द्रोणपुत्रं च वीर्यवान् ट
सूतपुत्रं च भीष्मं च चकार विमुखाञ्शरैः ॥ ४-७२-४८ (३१४६६)
दुर्योदनं च समरे प्रभिन्नमिव कुञ्जरम् ।
प्रभग्नमब्रवीद्भीतं राजपुत्रं महाबलम् ॥ ४-७२-४९ (३१४६७)
न हास्तिनपुरे त्राणं तव पश्यामि किंचन ।
न हास्तिनपुरे भोगा भोक्तुं शक्याः पलायता ॥ ४-७२-५० (३१४६८)
व्यायामेन परीप्सस्व जीवितं कौरवात्मज ।
न मोक्ष्यसे पलायंस्त्वं लोके युद्धमना भव ।
पृथिवीं भोक्ष्यसे जित्वा हतो वा स्वर्गमाप्स्यसि ॥ ४-७२-५१ (३१४६९)
स निवृत्तो नरव्याघ्रो मुञ्चन्वज्रनिभाञ्शरान् ।
सचिवैः संवृतो राजा भीष्मद्रोणकृपादिभिः ।

ततो मे रोमहर्षोऽभूदूरुस्तम्भश्च मेऽभवत् ॥ ४-७२-५२ (३१४७०)
यदभूद्धनसंकाशमनीकं व्यधमच्छरैः ।
तत्प्रपुद्य रथानीकं सिंहदर्पसमो युवा ।
तान्कुरुन्द्रावयद्राजन्रणे नाग इव श्वसन् ॥ ४-७२-५३ (३१४७१)
एकेन तेन शूरेण षड्रथाः परिनिर्जिताः ।
शार्दूलेनेव मत्तेन मृगास्तृणचरा यथा ॥ ४-७२-५४ (३१४७२)
हयानां च गजानां च शूराणां च धनुष्मताम् ।
निहतानि सहस्राणि भग्ना च कुरुवाहिनी ॥ ४-७२-५५ (३१४७३)
सूतपुत्रं शतैर्विद्ध्वा हयान्हत्वा महारथः ।
अस्त्रेण मोहयित्वा तं रक्तवस्त्रं समाददे ॥ ४-७२-५६ (३१४७४)
चतुर्भिः पुनरानर्च्छद्भीष्मं शान्तनवं शरैः ।
स तं विद्ध्वा हयांश्चाशु नास्य वस्त्रं समाददे ॥ ४-७२-५७ (३१४७५)
दुर्योधनं च बलवान्बाणैर्विव्याध सप्तभिः ।
तं स विद्ध्वा हयांश्चास्य पीतवस्त्रं समाददे ॥ ४-७२-५८ (३१४७६)
द्रोणं कृपं च बलवान्सोमदत्तं जयद्रथम् ।
भूरिश्रवसमिन्द्राभं शकुनिं च महारथम् ॥ ४-७२-५९ (३१४७७)
त्रिभिस्त्रिभिः स विद्ध्वा तु दुःशासनमुखानपि ।
विविधानि च वस्त्राणि महार्हाण्याजहार सः ॥ ४-७२-६० (३१४७८)
द्वाभ्यां शराभ्यां विद्ध्वाऽथ तथाऽऽचार्यसुतं रणे ।
चापं छित्त्वा विकर्णस्य नीले चादत्त वाससी ॥ ४-७२-६१ (३१४७९)
विराट उवाच। ४-७२-६२क्ष् (३२९३)
क्व स वीरो महाबाहुर्देवपुत्रो महायशाः ।
यो ममामोचयत्पुत्रं कुरुभिर्ग्रस्तमाहवे ॥ ४-७२-६२ (३१४८०)
इच्छामि तममित्रघ्नं दुष्टुमर्चितुमेव च ।
येन मे त्वं च गावश्च मोक्षिता देवसूनुना ॥ ४-७२-६३ (३१४८१)
तस्मै दास्यामि तां पुत्रीं ग्रामांश्चैव तु हाटकान् ।
स्फुरितं कटिसूत्रं च स्त्रीसहस्रशतानि च ॥ ४-७२-६४ (३१४८२)
उत्तर उवाच। ४-७२-६५क्ष् (३२९४)
अन्तर्धानं गतस्तात देवपुत्रः प्रतापवान् ।
अद्य श्वो वा परश्वो वा मन्ये प्रादुर्भविष्यति ॥ ४-७२-६५ (३१४८३)
वैशम्पायन उवाच। ४-७२-६६क्ष् (३२९५)
एवमाख्यायमानस्तु छन्नं सत्रेण पाण्डवम् ।
वसन्तं तं तु नाज्ञासीद्विराटः पार्थमर्जुनम् ॥ ४-७२-६६ (३१४८४)
ततः पार्थोऽभ्यनुज्ञातो विराटेन महात्मना ।
सह पुत्रेण मात्स्यस्य मन्त्रयित्वा धनंजयः ॥ ४-७२-६७ (३१४८५)
इत्येवं ब्रूहि राजानं विराटं समुपस्थितम् ।

इत्युक्त्वा सहसा पार्थः प्रविश्यान्तःपुरं शुभम् ।
ददौ वस्त्राणि रन्तानि विराटदुहितुः स्वयम् ॥ ४-७२-६८ (३१४८६)
उत्तरा तु महार्हाणि वस्त्राण्याभरणानि च ।
प्रगृह्य तानि सर्वाणि प्रीता सानुचराऽभवत् ॥ ॥ ४-७२-६९ (३१४८७)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्विसप्ततितमोऽध्यायः ॥

Mahabharata - Virata Parva - Chapter Footnotes

४-७२-५ क्षत्तारं सारथिम् ॥
५ ।४-७२-६ कर्ण उपाजपत् कर्णे इति च्छेदः ॥
६ ॥
४-७२-७ ममाङ्ग इति मम युधिष्ठिरस्य ।संग्रामाय गतात् गमनात् ॥
७ ॥
४-७२-१३ रुधिरप्लुतं रुधिरत्रावम् ॥
१३ ॥
४-७२-१४ अनेकाग्रं व्यग्रम् ।युधिष्ठिरं दृष्ट्वा राजानं
पप्रच्छेत्यन्वयः ॥
१४ ॥
४-७२- २२ तद्वचः इति च्छेदः संधिरार्षः ॥
२२ ॥
४-७२-३० तस्येति ।स इति शेषः।स हन्ता तस्य स्वकृतहननस्य ॥
३० ।४-७२-३१ उपतिष्ठत उपातिष्ठत असेवत ॥
३१ ॥
४-७२- ३३ दायादवान्पुत्रवान् ॥
३३ ।४-७२-३४ पदसहस्रेण लक्ष्यसहस्रार्थम् ।हेत्वर्थे
तृतीया।युगपत्सहस्रलक्ष्याणि वेद्धुमित्यर्थः।चरन् बाणैः ।पदं
एकमपि लक्ष्यं नापराध्नुयात् लक्ष्यात् च्युतसायको न भवेदित्यर्थः ॥
३४ ॥
४-७२-४७ तिष्ठन् अयुध्यतेति शेषः ॥
४७ ॥
४-७२-५२ स निवृत्तोऽभूदित्यन्वयः ॥
५२ ॥
४-७२-५३ सिंहेन दर्पे रामः ।द्रावयत् ॥॥॥॥॥।
५३ ॥
४-७२-५४ तृणचरास्तृणभक्षकाः ॥
५४ ॥

४-७२-६६ सत्रेण वेषान्तरेण ॥
६६ ॥
४-७२-६८ श्व इतो ब्रूहि राजानं विराट ॥ॅहेति शो पाठः ॥
६८ ॥

विराटपर्व - अध्याय ०७३
॥ श्रीः ॥
४.७३. अध्यायः ७३

Mahabharata - Virata Parva - Chapter Topics
भीमार्जुनादिभी रात्रौ युधिष्ठिरसमीपगमनम् ॥ १ ॥
युधिष्ठिरेण सहर्षं स्वानभिभाषणे अर्जुनेन भीमंप्रति
तत्कारणप्रश्नः ॥ २ ॥
युधिष्ठिरेण तं प्रति विराटेनाक्षताडनस्य तत्कारणत्वकथनम् ॥ ३ ॥
भीमादिभिः क्रोधाद्विराटवधाध्यवसाये युधिष्ठिरेण हेतुकथनेन
तत्प्रतिषेधनम् ॥ ४ ॥

Mahabharata - Virata Parva - Chapter Text

४-७३-० (३१४८८)
वैशम्पायन उवाच। ४-७३-०क्ष् (३२९६)
प्रदाय वस्त्राणि किरीटमाली
विराटगेहे मुदितः सखीभ्यः ।
कृत्वा महर्तर्म तदाऽऽजिमध्ये
दिदृक्षया सोऽभिजगाम पार्थम् ॥ ४-७३-१ (३१४८९)
तं प्रेक्षमाणस्त्वथ धर्मराजं
पप्रच्छ पार्थोऽथ स भीमसेनम् ।
किं धर्मराजो हि यथापुरं मां
मुखं प्रतिच्छाद्य न चाह किंचित् ॥ ४-७३-२ (३१४९०)
तमेवमुक्त्वा परिशङ्कमानं
दृष्ट्वाऽर्जुनं भीमसेनं च राजा ।
तदाऽब्रवीत्तावभिवीक्ष्य राज-
न्युधिष्ठिरस्तत्परिमृज्य रक्तम् ॥ ४-७३-३ (३१४९१)
दुरात्मना त्वय्यभिपूज्यमाने
विराटराज्ञाऽभिहतोऽस्मि पार्थ ।
तस्मात्प्रहाराद्रुधिरस्य बिन्दू-
न्पश्यन्न चेमे पृथिवीं स्पृशेयुः ।

इति प्रतिच्छाद्य मुखं ततोऽहं
मन्युं नियच्छन्नुपविष्ट आसम् ॥ ४-७३-४ (३१४९२)
शुभार्ह राष्ट्रं न खिलीकृतं भवे-
द्वयं तु यस्मिन्सुखिनोऽभवाम ।
क्रुद्धे तु वीरे त्वयि चाप्रतीते
राजा विराटो न लभेत शर्म ॥ ४-७३-५ (३१४९३)
अजानता तेन च शौर्यमाजौ
छन्नस्य सत्रेण बलं च पार्थ ।
इदं विराटेन मयि प्रयुक्तं
त्वां वीक्षमाणो न गतोस्मि हर्षम् ॥ ४-७३-६ (३१४९४)
वैशम्पायन उवाच ४-७३-७क्ष् (३२९७)
तेनाप्रमेयेन महाबलेन
तस्मिंस्तथोक्ते शममास्थितेन ।
तं भीमसेनो बलवानमर्षी
धनंजयं क्रुद्धमुवाच वाक्यम् ॥ ४-७३-७ (३१४९५)
न पार्थ नित्यं क्षमकालमाह
बृहस्पतिर्ज्ञानवतां वरिष्ठः ।
क्षमीह सर्वैः परिभूयतेसौ
यथा भुडङ्गो विषवीर्यहीनः ॥ ४-७३-८ (३१४९६)
विराटमद्यैव निहत्य शीघ्रं
सपुत्रपौत्रं सकुलं ससैन्यम् ।
योक्ष्यामहे धर्मसुतं च राज्ये
अद्यैव शीघ्रं त्वरिरेष मात्स्यः ॥ ४-७३-९ (३१४९७)
अनेन पाञ्चालसुताऽथ कृष्णा
उपेक्षिता कीचकेनाभियुक्ता ।
तस्मादयं नार्हति राजशब्दं
राजा भव त्वं नृप पार्थवीर्यात् ॥ ४-७३-१० (३१४९८)
राजा कुरूणां च युधिष्ठिरोऽयं
मात्स्येषु राजा भवतु प्रवीरः
तं मात्स्यदेहं शतधा भिनद्मि
पूर्णोदकं कुम्भमिवाश्मनीह ॥ ४-७३-११ (३१४९९)
अर्जुन उवाच। ४-७३-१२क्ष् (३२९८)
भवतः क्षमया राजन्त्सर्वे दोषाश्च नोऽभवन् ।
तं मात्स्यं सबलं हत्वा सपुत्रज्ञातिबान्धवम् ।
पश्चाच्चैव कुरून्सर्वान्हनिष्यामि न संशयः ॥ ४-७३-१२ (३१५००)
भीमसेनश्च ये चान्ये तथैवेति तमब्रुवन् ॥ ४-७३-१३ (३१५०१)

तमब्रवीद्धर्मसुतो महात्मा
क्षमी वदान्यः कुपितं च भीमम् ।
न प्रत्युपस्थास्यति चेत्सदारः
प्रसादने सम्यगथास्तु वध्यः ॥ ४-७३-१४ (३१५०२)
न हन्तव्यो दुरात्माऽयं विराटश्चापि तेऽर्जुन ॥ ४-७३-१५ (३१५०३)
श्वः प्रभाते प्रवेक्ष्यामः सभां सिंहासनेष्वपि ।
राजवेषेण संयुक्ताः स्थानमस्व स्वलंकृताः ॥ ४-७३-१६ (३१५०४)
विराटो यदि तत्रस्थान्राजालङ्कारशोभितान् ।
राजलक्षणसंपन्नान्यदि तत्र न मंस्यते ।
पश्चाद्धन्यामहे पार्थ विराटं सहबान्धवम् ॥ ४-७३-१७ (३१५०५)
इतिकर्तव्यतां सर्वे मन्त्रयित्वा तु पाण्डवाः ।
न्यवसंश्चैव तां रात्रिं धर्मज्ञा धर्मवत्सलाः ॥ ४-७३-१८ (३१५०६)
सहपुत्रेण मात्स्यः स संप्रहृष्टो नराधिपः ।
तां रात्रिमवसत्प्रीतः संप्रहृष्टेन चेतसा ॥ ॥ ४-७३-१९ (३१५०७)

इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिसप्ततितमोऽध्यायः ॥

विराटपर्व - अध्याय ०७४
॥ श्रीः ॥
४.७४. अध्यायः ७४

Mahabharata - Virata Parva - Chapter Topics
कुरुविजयदिनात्परेद्युः प्रभाते युधिष्ठिरादिभी राजलक्षणधारणेन सिंहासनादिषूपवेशनम् ॥ १ ॥
ततः सहोत्तरेण सभामागतवता विराटेन युधिष्ठिरंप्रति राजासनोपवेशनाक्षेपः ॥ २ ॥
अर्जुनेन तंप्रति युधिष्ठिरस्य याथातथ्यकथनेन तदीयगुणानुवर्णनपूर्वकं तस्य राजासनारोहणार्हत्वप्रतिपादनम् ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

वैशम्पायन उवाच ।
ततो द्वितीये दिवसे भ्रातरः पञ्च पाण्डवाः ।
स्नाताः शुक्लाम्बरधराः सर्वे सुचरितव्रताः ॥ ४-७४-१ (३१५०८)
युधिष्ठिरं पुरस्कृत्य सर्वाभरणभूषिताः ।
अभिपन्ना महाभागा भ्राजमाना महारथाः ॥ ४-७४-२ (३१५०९)

विराटस्य सभां प्राप्य भूमिपालासनेषु ते ।
निषेदुः पावकप्रख्याः सत्रे धिष्ण्येष्विवाग्नयः ॥ ४-७४-३ (३१५१०)
तेषु तत्रोपविष्टेषु विराटः पृथिवीपतिः ।
तस्यां रात्र्यां व्यतीतायां प्रातःकृत्यं समाप्य च ॥ ४-७४-४ (३१५११)
गोसुवर्णादिकं दत्त्वा ब्राह्मणेभ्यो यथाविधि ।
आजगाम सभां राजा उत्तरेण सह प्रभो ॥ ४-७४-५ (३१५१२)
स तान्दृष्ट्वा महासत्वाञ्ज्वलतः पावकानिव ।
राजवेषानुपादाय पार्थिवो विस्मितोऽभवत्। ४-७४-६ (३१५१३)
किमिदं को विधिस्त्वेष भयार्त इव पार्थिवः ।
पुरुषप्रवरान्दृष्ट्वा विषादमगमन्नृपः ॥ ४-७४-७ (३१५१४)
अथ मात्स्योऽब्रवीत्कङ्कं देवराजमिव स्थितम् ।
मरुद्गणैरुपासीनं त्रिदशानामिवेश्वरम् ॥ ४-७४-८ (३१५१५)
स किलाक्षनिवापस्त्वं सभास्तारो मया कृतः ।
अथ राजासने कस्मादुपविष्टोऽस्यलंकृतः ॥ ४-७४-९ (३१५१६)
वैशम्पायन उवाच। ४-७४-१०क्ष् (३२९९)
परिहासेच्छया राज्ञो विराटस्य निशम्य तत् ।
स्मयमानोऽब्रवीद्वाक्यमर्जुनः परवीरहा ॥ ४-७४-१० (३१५१७)
इन्द्रस्यार्धासनं राजन्नयमारोढुमर्हति ।
ब्रह्मण्यः श्रुतवांस्त्यागी सर्वलोकाभिपूजितः ॥ ४-७४-११ (३१५१८)
एष विग्रहवान्धर्म एष वीर्यवतां वरः ।
एष बुद्ध्याधिको लोके तपसां च परायणम् ॥ ४-७४-१२ (३१५१९)
एषोऽस्त्रं विविधं वेत्ति त्रैलोक्ये सचराचरे ।
न चैवान्यः पुमान्वेत्ति न वेत्स्यति कदाचन ॥ ४-७४-१३ (३१५२०)
न देवा नासुराः केचिन्न मनुष्या न राक्षसाः ।
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ॥ ४-७४-१४ (३१५२१)
दीर्घदर्शी महातेजाः पारैजानपदप्रियः ।
पाण्डवानामतिरथो यज्ञधर्मपरो वशी ॥ ४-७४-१५ (३१५२२)
महर्षिकल्पो राजर्षिः सर्वलोकेषु विश्रुतः ।
बलवान्धृतिमान्दक्षः सत्यवादी जितेन्द्रियः ॥ ४-७४-१६ (३१५२३)
धनैश्च संचयैश्चैव शक्रवैश्रवणोपमः ।
यथा मनुर्महातेजा लोकानां परिरक्षिता ।
एवमेव महातेजाः प्रजानुग्रहकारकः ॥ ४-७४-१७ (३१५२४)
अयं कुरूणामृषभः कुन्तीपुत्रो युधिष्ठिरः ।
यस्य कीर्तिः स्थिता लोके सूर्यस्येवोद्यतः प्रभा ॥ ४-७४-१८ (३१५२५)
संसरन्ति दिशः सर्वा यशसोस्य गभस्तयः ।
उदितस्येव सूर्यस्य तेजसोऽनुगभस्तयः ॥ ४-७४-१९ (३१५२६)

एनं त्रिंशत्सहस्राणि कुञ्जराणां तरस्विनाम् ।
अन्वयुः पृष्ठतो राजन्यावदध्यावसत्कुरून् ॥ ४-७४-२० (३१५२७)
त्रिंशच्चैव सहस्राणि रथानां रथिनां वरम् ।
सदश्वैरुपसंपन्नाः पृष्ठतोऽनुययुस्तदा ॥ ४-७४-२१ (३१५२८)
वाजिनां च शतं राजन्त्सहस्राण्ययुतानि च ।
इममष्टशतं सूताः सुमृष्टमणिकुण्डलाः ।
तुष्टुवुर्मागधैः सार्धं पुरा शक्रमिवर्षयः ॥ ४-७४-२२ (३१५२९)
इमं नित्यपुमातिष्ठन्कुरवः किंकरास्तदा ।
सर्वे च नृप राजानं धनेश्वरमिवामराः ॥ ४-७४-२३ (३१५३०)
एष सर्वान्महीपालान्करमाहारयत्तदा ।
वैश्यानिव महाराज विवशान्स्ववशानपि ॥ ४-७४-२४ (३१५३१)
अष्टाशीतिसहस्राणि स्नातकानां महात्मनाम् ।
उपजीवन्ति राजानमेनं सुचरितव्रताः ॥ ४-७४-२५ (३१५३२)
एष वृद्धाननाथांश्च व्यङ्गान्पङ्गूंश्च वामनान् ।
पुत्रवत्पालयामास प्रजाधर्मेण चाभिभूः ॥ ४-७४-२६ (३१५३३)
एष धर्मे दमे चैव दाने सत्ये रतः सदा ।
महाप्रसादो ब्रह्मण्यः सत्यवादी च पार्थिवः ॥ ४-७४-२७ (३१५३४)
श्रीमत्संपत्प्रभावेन तप्यते यस्य कौरवः ।
रगणः सह कर्णेन सौबलेन च वीर्यवान् ॥ ४-७४-२८ (३१५३५)
गुणा न शक्याः संख्यातुमेतस्यैव नरेश्वर ।
एष धर्मपरो नित्यमनृशंसः सुशीलवान् ॥ ४-७४-२९ (३१५३६)
एवं युक्तो महाराजा पाण्डवः पुरुषर्षभः ।
कथं नार्हति राजार्हमासनं पृथिवीपतिः ॥ ॥ ४-७४-३० (३१५३७)

इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि
चतुःसप्ततितमोऽध्यायः ॥

विराटपर्व - अध्याय ०७५
॥ श्रीः ॥
४.७५. अध्यायः ७५

Mahabharata - Virata Parva - Chapter Topics
अर्जुनेन विराटप्रश्नाद्बृलललादीनां भीमसेनादित्वकथनम् ॥ १ ॥
उत्तरेण विराटंप्रति तत्तल्लक्षणाभिधानपूर्वकं युधिष्ठिरादीनां
निर्देशः ॥ २ ॥
तथाऽर्जुनपराक्रमवर्णनम् ॥ ३ ॥
ततो विराटेन सप्रणामं युधिष्ठिरादिप्रसादनम् ॥ ४ ॥

४-७५-० (३१५३८)
विराट उवाच। ४-७५-०क्ष् (३३००)
यद्येष राजा कौरव्यः कुन्तीपुत्रो युधिष्ठिरः ।
कतमोऽस्यार्जुनो भ्राता भीमश्च कतमो बली ॥ ४-७५-१ (३१५३९)
नकुलः सहदेवो वा द्रौपदी वा यशस्विनी ।
यदा ह्यक्षैर्जिता ह्येते नान्तरा श्रूयते कथा ॥ ४-७५-२ (३१५४०)
अर्जुन उवाच। ४-७५-३क्ष् (३३०१)
य एष बलल्लोऽभूत्ते सूपकारश्च ते नृप ।
एष भीमो महाभाग भीमवेगपराक्रमः ॥ ४-७५-३ (३१५४१)
एष क्रोधवशान्हत्वा पर्वते गन्धमादने ।
सौगन्धिकानि पुष्पाणि कृष्णार्थे समुपानयत् ॥ ४-७५-४ (३१५४२)
गन्धर्व एष वै हन्ता कीचकानां दुरात्मनाम् ।
व्याघ्रानृक्षान्गाजांश्चैव हतवांश्च पुरे तव ॥ ४-७५-५ (३१५४३)
हिडिम्बं च बकं चैव किर्मीरं च जटासुरम् ।
हत्वा निष्कण्टकं चक्रे अरण्यं सर्वतः शुभम् ॥ ४-७५-६ (३१५४४)
यश्चासीदश्वबन्धस्ते नकुलोऽयं परन्तप ।
गोसङ्ख्यः सहदेवश्च माद्रीपुत्रौ महाबलौ ॥ ४-७५-७ (३१५४५)
शृङ्गारवेषारणौ रूपवन्तौ मनस्विनौ ।
नानारथसहस्राणां समर्थौ भरतर्षभौ ॥ ४-७५-८ (३१५४६)
एषा पद्मपलाशाक्षी सुमध्या चारुहासिनी ।
सैरन्ध्री द्रौपदी राजन्यकृते कीचका हताः ॥ ४-७५-९ (३१५४७)
द्रुपदस्य प्रिया पुत्री धृष्टद्युम्नस्य चानुजा ।
अग्निकुण्डात्समुद्भूता द्रौपदी त्ववगम्यताम् ॥ ४-७५-१० (३१५४८)
भीम उवाच। ४-७५-११क्ष् (३३०२)
अस्त्रज्ञो दुर्लभः कश्चित्केवलं पृथिवीमनु ।
धनुर्भृतामतिश्रेष्ठः कौन्तेयोयं धनंजयः ॥ ४-७५-११ (३१५४९)
एतेन खाण्डवं तस्य ह्यकामस्य शतक्रतोः ।
दग्धं नागवनं चैव सह नागैर्नराधिप ॥ ४-७५-१२ (३१५५०)
वर्षं च शरवर्षेण वारितं दुर्जयेन वै ।
करमाहारिताः सर्वे पार्थिवाः पृथिवीतले ॥ ४-७५-१३ (३१५५१)
स्त्रीवेषं कृतवानेष तव राजन्निवेशने ।
बृहन्नलेति यामाहुरर्जुनं जयतांवरम् ॥ ४-७५-१४ (३१५५२)
उषिताःस्म सुखं सर्वे तव राजन्निवेशने ।

अज्ञातवासे निभृता गर्भवास इव प्रजाः ॥ ४-७५-१५ (३१५५३)
वैशम्पायन उवाच। ४-७५-१६क्ष् (३३०३)
यदाऽर्जुनेन ते वीराः कथिताः पञ्च पाण्डवाः ।
पुनरेव च तान्पार्थान्दर्शयामास चोत्तरः ॥ ४-७५-१६ (३१५५४)
उत्तर उवाच। ४-७५-१७क्ष् (३३०४)
य एष जाम्बूनदशुद्धगौर-
तनुर्महान्सिंह इव प्रवद्धः ।
प्रचण्डघोणः पृथुदीर्घनेत्र-
स्ताम्रायताक्षः कुरुराज एषः ॥ ४-७५-१७ (३१५५५)
अयं पुनर्मत्तगजेन्द्रगामी
प्रतप्तचामीकरशुद्धगौरः ।
पृथ्वायतांसो गुरुदीर्घबाहु-
र्वृकोदरः पश्यत पश्यतैनम् ॥ ४-७५-१८ (३१५५६)
यस्त्वेव पार्श्वेऽस्य महाधनुष्मा-
ञ्श्यामो युवा वारणयूथपोपमः ।
सिंहोन्नतांसो गजराजगामी
पद्मायताक्षोऽर्जुन एष वीरः ॥ ४-७५-१९ (३१५५७)
राज्ञः समीपे पुरुषोत्तमौ तु
यमाविमौ विष्णुमहेन्द्रकलौ ।
मनुष्यलोके सकले समोऽस्ति
ययोर्न रूपे न बले न शीले ॥ ४-७५-२० (३१५५८)
आभ्यां तु पार्श्वे कनकोत्तमाङ्गी
यैषा प्रभा मूर्तिमतीव गौरी ।
नीलोत्पलाभा सुरदेवतेव
कृष्णा स्थिता मूर्तिमतीव लक्ष्मीः ॥ ४-७५-२१ (३१५५९)
वैशम्पायन उवाच। ४-७५-२२क्ष् (३३०५)
एवं निवेद्य तान्पार्थान्पाण्डवान्पञ्च भूपतेः ।
ततोऽर्जुनस्य वैराटिः कथयामास विक्रमम् ॥ ४-७५-२२ (३१५६०)
अयं स द्विषतां मध्ये मृगाणामिव केसरी ।
अचरद्रथबृन्देषु निघ्नंस्तेषां परावरान् ॥ ४-७५-२३ (३१५६१)
अनेन विद्धा मातङ्गा महामेघोपमास्तदा ।
हिरण्यकक्ष्याः संग्रामे दन्ताभ्यामगमन्महीम् ४-७५-२४ (३१५६२)
अनेन विजिता गावो निर्जिताः कुरवो युधि ।
अस्य शङ्खस्य शब्देन कर्णौ मे बधिरीकृतौ ॥ ४-७५-२५ (३१५६३)
जायते रोमर्षो मे संस्मृत्यास्य धनुर्ध्वनिम् ।
ध्वजस्य वानरं भूतैराक्रोशन्तं सहानुगैः ॥ ४-७५-२६ (३१५६४)

नाददानं शरान्घोरान्न मुञ्चन्तं शरोत्करान् ।
न कार्मुकं विकर्षन्तमेनं पश्यामि संयुगे ॥ ४-७५-२७ (३१५६५)
एतद्धनुःप्रमुक्ताश्च शराः पुङ्खानुपुङ्खिनः ।
नालक्ष्येषु रणे पेतुर्नाराचा रक्तभोजनाः ॥ ४-७५-२८ (३१५६६)
तीक्ष्णनाराचसंकृत्तशिरोबाहूरुवक्षसाम् ।
कलेबराणि दृश्यन्ते योधानां साश्वसादिनां ॥ ४-७५-२९ (३१५६७)
अनेन तटिनी तत्र शोणिताम्बुप्रवाहिनी ।
प्रवर्तिता भीमरूपा यां स्मृत्वाऽद्यापि मे मनः ।
प्रकम्पते चण्डवायुकम्पिता कदली यथा ॥ ४-७५-३० (३१५६८)
अनेन राजन्वीरेण भीष्मद्रोणमुखा रथाः ।
दुर्योधनेन सहिता निर्जिता भीमकर्मणा ॥ ४-७५-३१ (३१५६९)
अयं भीतं द्रवन्तं मां देवपुत्रो न्यवारयत् ।
यस्य बाहुबलेनास्मि जीवन्प्रत्यागतः पुरम् ॥ ४-७५-३२ (३१५७०)
वैशम्पायन उवाच। ४-७५-३३क्ष् (३३०६)
तस्य तद्वचनं श्रुत्वा मात्स्यराजः प्रतापवान् ।
धनंजयं परिष्वज्य पाण्डवानथ सर्वशः ॥ ४-७५-३३ (३१५७१)
धर्मराजं नमस्कृत्य राजा राज्येऽभिषेचितम् ।
नातृप्यद्दर्शने तेषां विराटो वाहिनीपतिः ॥ ४-७५-३४ (३१५७२)
संप्रीयमाणो राजानां युधिष्ठिरमथाब्रवीत् ।
दिष्ट्या भवन्तः संप्राप्ताः सर्वे कुशलिनो वनात् ।
दिष्ट्या विचरितं कृच्छ्रमज्ञातं च दुरात्मभिः ॥
इदं राज्यं च वः सर्वं यच्चापि वसु किंचन ।
विभक्तमेतद्भवतां नोत्कण्ठां कर्तुमर्हथ ।
अविभक्तं भवद्भिर्मे न सन्देहो नराधिपाः ॥ ॥ ४-७५-३५ (३१५७३)

इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥

विराटपर्व - अध्याय ०७६
॥ श्रीः ॥
४.७६. अध्यायः ७६

Mahabharata - Virata Parva - Chapter Topics
उत्तरेण विराटंप्रति युधिष्ठिरादिकृतोपकारस्मारणपूर्वकमुत्तरायाः
प्रदानेन तत्प्रसादनचोदना ॥ १ ॥
युधिष्ठिरेणोत्तराया पुरस्कारेण सप्रणामं प्रसादयते
विराटायाभयप्रदानम् ॥ २ ॥

४-७६-० (३१५७४)
वैशम्पायन उवाच। ४-७६-०क्ष् (३३०७)
विराटस्य वचः श्रुत्वा पार्थिवस्य महात्मनः ।
उत्तरः प्रत्युवाचेदमभिपन्नो युधिष्ठिरे ॥ ४-७६-१ (३१५७५)
प्रसादनं प्राप्तकालं पाण्डवस्याभिरोचये ।
तेजस्वी बलवाञ्शूरो राजराजेश्वरः प्रभुः ॥ ४-७६-२ (३१५७६)
उत्तरां च स्वसारं मे पार्थस्यामित्रकर्शन ।
प्रणिपत्य प्रयच्छामस्ततः शिष्टा भवामहे। ४-७६-३ (३१५७७)
वयं च सर्वे सामात्याः कुन्तीपुत्रं युधिष्ठिरम् ।
प्रसाद्याभ्युपतिष्ठामो राजन्किं करवागहे ॥ ४-७६-४ (३१५७८)
राजंस्त्वमसि संग्रामे गृहीतस्तेन मोक्षितः ।
एतेषां बाहुवीर्येण गावश्च विजितास्त्वया ॥ ४-७६-५ (३१५७९)
कुरवो निर्जिता यस्मात्संग्रामेऽमिततेजसः ।
एष तत्सर्वमकरोत्कुन्तीपुत्रो युधिष्ठिरः ॥ ४-७६-६ (३१५८०)
अर्च्याः पूज्याश्च मान्याश्च प्रत्युत्थेयाश्च पाण्डवाः ।
अर्वार्हाश्चाभिवाद्याश्च प्राप्तकालं च मे मतम् ॥ ४-७६-७ (३१५८१)
पूज्यतां पूजनीयाश्च महाभागाश्च पाण्डवाः ।
न ह्येते कुपिता शेषं कुर्युराशीविषोपमाः ॥ ४-७६-८ (३१५८२)
तस्माच्छीघ्रं प्रपद्येम कुन्तीपुत्रं युधिष्ठिरम् ।
प्रसादयाम्यहं तत्र सह पार्थैर्महात्मभिः ॥ ४-७६-९ (३१५८३)
उत्तरामग्रतः कृत्वा शिरःस्नातां कृताञ्जलिः ।
जानाम्यहमिदं सर्वमेषां तु बलपौरुषम् ।
कुले च जन्म महति फल्गुनस्य च विक्रमम् ॥ ४-७६-१० (३१५८४)
वैशम्पायन उवाच। ४-७५-११क्ष् (३३०८)
उत्तरात्पाण्डवाञ्श्रुत्वा विराटो रिपुसूदनः ।
उत्तरं चापि संप्रेक्ष्य प्राप्तकालमचिन्तयत् ॥ ४-७६-११ (३१५८५)
ततो विराटः सामात्यः सहपुत्रः सबान्धवः ।
उत्तरामग्रतः कृत्वा शिरःस्नातां कृताञ्जलिः ।
भूमौ निपतितस्तूर्णं पाण्डवस्य समीपतः ॥ ४-७६-१२ (३१५८६)
विराट उवाच। ४-७६-१३क्ष् (३३०९)
प्रसीदतु महाराजो धर्मपुत्रो युधिष्ठिरः ।
प्रच्छन्नरूपवेषत्वान्नाग्निर्दृष्टस्तृणैर्वृतः ॥ ४-७६-१३ (३१५८७)
शिरसाऽभिप्रपन्नोस्मि सपुत्रपरिचारकः ॥ ४-७६-१४ (३१५८८)

यदस्माभिरजानद्भिरधिक्षिप्तो महीपतिः ।
अवमत्य कृतं सर्वमज्ञानात्प्राकृते यथा ।
क्षन्तुमर्हसि तत्सर्वं धर्मज्ञो धर्मवत्सल ॥ ४-७६-१५ (३१५८९)
यदिदं मामकं राष्ट्रं पुरं राज्यं च पार्थिव ।
सदण्डकोशं विसृजे तव वश्योस्मि पार्थिव ।
वयं च सर्वे सामात्या भवन्तं शरणं गताः ॥ ४-७६-१६ (३१५९०)
वैशम्पायन उवाच। ४-७६-१७क्ष् (३३१०)
तं धर्मराजः पतितं महीतले
सबन्धुवर्गं प्रसमीक्ष्य पार्थिवम् ।
उवाच वाक्यं परलोकदर्शनः
प्रनष्टमन्युर्गतशोकमत्सरः ॥ ४-७६-१७ (३१५९१)
न मे भयं पार्थिव विद्यते मयि
प्रतीतरूपोस्म्यनुचिन्त्य मानसम् ।
एतत्त्वया सम्यगिहोपपादितं
द्विजैरमात्यैः सदृशैश्च पाण्डितैः ।
इमां च कन्यां समलंकृतां भृशं
समीक्ष्य तुष्टोस्मि नरेन्द्रसत्तम ॥ ४-७६-१८ (३१५९२)
क्षान्तमेतन्महाबाहो यन्मां वदसि पार्थिव ।
न चैव किंचित्पश्यामि विकृतं ते नराधिप ॥ ४-७६-१९ (३१५९३)
वैशम्पायन उवाच। ४-७६-२०क्ष् (३३११)
ततो विराटः परमामितुष्टः
समेत्य राज्ञा समयं चकार ।
राज्यं च सर्वं विससर्ज तस्मै
सदण्डकोशं सपुरं महात्मा ॥ ॥ ४-७६-२० (३१५९४)

इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि
षट्सप्तिततमोऽध्यायः ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-७६-१ अभिपन्नोऽपराधं कृतवान् ॥
१ ॥
४-७६-३ ततस्तुष्टा भवन्तु ते इति थो पाठः ॥
३ ॥

विराटपर्व - अध्याय ०७७
॥ श्रीः ॥
४.७७. अध्यायः ७७

Mahabharata - Virata Parva - Chapter Topics
विराटेनार्जुनंप्रति स्वकुमार्या उत्तराया भार्यात्वेन प्रतिग्रहणप्रार्थने
तंप्रत्यर्जुनेन सहेतुकथनं स्नुपात्वेन परिग्रहाङ्गीकरणम् ॥ १ ॥
दुर्योधनेन युधिष्ठिरंप्रति दूतमुखेन
त्रयोदशवत्सरस्यासंपूर्तावेवार्जुनेनात्मप्रकाशनात्पुनर्वनवास-
विधेयतानिवेदनम् ॥ २ ॥
युधिष्ठिरेण तंप्रति तेनैव दूतेन भीष्ममुखात्संदेहस्य
परिहरणीयताप्रतिवेदनम् ॥ ३ ॥
भीष्मेण विचार्य निर्धारणपूर्वकं संकेतकालस्य पूर्णत्वोक्तिः ॥ ४ ॥

Mahabharata - Virata Parva - Chapter Text

४-७७-० (३१५९५)
विराट उवाच। ४-७७-०क्ष् (३३१२)
यच्च वक्ष्याम्यहं तेऽद्य मा शङ्केथा युधिष्ठिर ।
इदं सनगरं राष्ट्रं सजनं सवधूजनम् ।
युष्यभ्यं संप्रदास्यामि भोक्ष्याम्युच्छिष्टमेव च ॥ ४-७७-१ (३१५९६)
अहं वद्धश्चिरं राजन्भुक्तभोगश्चिरं सुखम् ।
राज्यं दत्त्वा तु युष्मभ्यं प्रव्रजिष्यामि काननम् ॥ ४-७७-२ (३१५९७)
उत्तरां प्रतिगृह्णातु सव्यसाची धनंजयः ।
अयं ह्यौपयिको भर्ता तस्याः पुरुषसत्तमः ॥ ४-७७-३ (३१५९८)
वैशम्पायन उवाच। ४-७७-४क्ष् (३३१३)
एवमुक्तो धर्मराजः पार्थपैक्षद्धनंजयम् ।
ईक्षितं चार्जुनो ज्ञात्वा मात्स्यं वचनमब्रवीत् ॥ ४-७७-४ (३१५९९)
वयं वनान्तरात्प्राप्ता न ते राज्यं गृहामहे ।
किंतु दुर्योधनादीनां राज्ञां राज्यं गृहामहे ॥ ४-७७-५ (३१६००)
प्रतिगृह्णाम्यहं राजन्स्नुषं दुहितरं तव ।
युक्तो ह्यावां हि संबन्धो मात्स्यभारतवंशयोः ॥ ४-७७-६ (३१६०१)
विराट उवाच। ४-७७-७क्ष् (३३१४)
किमर्थं पाण्डवश्रेष्ठ भार्यां दुहितरं मम ।
प्रतिग्रहीतुं नेमां त्वं मया दत्तमिहेच्छसि ॥ ४-७७-७ (३१६०२)
अर्जुन उवाच। ४-७७-८क्ष् (३३१५)
अन्तःपुरेऽहमुषितः सदा पश्यन्सुतां तव ।
सहस्यं च प्रकाशं च विश्वस्ता पितृवन्मयि ॥ ४-७७-८ (३१६०३)
प्रियो बहुमतश्चाहं नर्तने गीतवादिते ।

आचार्यवच्च मां नित्यं मन्यते दुहिता तव ॥ ४-७७-९ (३१६०४)
वयस्यया तया राजन्सह संवत्सरोषितः ।
अतिशङ्का ततोऽस्थाने तव लोकस्य च प्रभो ॥ ४-७७-१० (३१६०५)
तस्मादामन्त्रये त्वाऽद्य पुत्रार्थं मे विशांपते ।
सुद्धं जितेन्द्रियं मन्ये तस्याः शुद्धिः कृता मया ॥ ४-७७-११ (३१६०६)
स्नुषायां दुहितुर्वापि पुत्रे चात्मनि वा पुनः ।
अतिशङ्कां न पश्यामि तेन शुद्धिर्भविष्यति ॥ ४-७७-१२ (३१६०७)
अभिषङ्गादहं भीतो मिथ्याचारात्परंतप ।
स्नुषार्थमुत्तरां राजन्प्रतिगृह्णामि ते सुताम् ॥ ४-७७-१३ (३१६०८)
स्वस्त्रीयो वासुदेवस्य साक्षाद्देवसुतो यथा ।
दयितश्चक्रहस्तस्य बलवानस्त्रकोविदः ॥ ४-७७-१४ (३१६०९)
अभिमन्युर्गहाबाहुः पुत्रो मम विशांपते ।
जामाता तव युक्तो वै भर्ता च दुहितुस्तव ॥ ४-७७-१५ (३१६१०)
विराट उवाच। ४-७७-१६क्ष् (३३१६)
उपपन्नं कुरुश्रेष्ठे कुन्तीपुत्रे धनंजये ।
सदैव धर्मनित्यश्च ज्ञातज्ञानश्च पाण्डवः ॥ ४-७७-१६ (३१६११)
यत्कृत्यं मन्यसे पार्थ क्रियतां तदनन्तरम् ।
सर्वे कामाः समृद्धा मे संबन्धी यस्य मेऽर्जुनः ॥ ४-७७-१७ (३१६१२)
वैशम्पायन उवाच। ४-७७-१८क्ष् (३३१७)
एवं ब्रुवति राजेन्द्रे कुन्तीपुत्रो युधिष्ठिरः ।
अन्वजानत संबन्धं समये कृष्णमात्स्ययोः ॥ ४-७७-१८ (३१६१३)
दूतान्सर्वेषु मित्रेषु वासुदेवे च भारत ।
प्रेषयामास कौन्तेयो विराटश्च महीपतिः । ४-७७-१९ (३१६१४)
प्रतिगृह्य स्नुषार्थं वै दर्शयन्व्रतमात्मनः ।
शीलशौचसमाचारं लोकस्यावेद्य फल्गुनः ॥ ४-७७-२० (३१६१५)
लोके विख्याप्य माहात्म्यं यशश्च स परंतपः ।
कृतार्थः शुचिरव्यग्रस्तुष्टिमानभवत्तदा ॥ ४-७७-२१ (३१६१६)
युधिष्ठिर उवाच। ४-७७-२२क्ष् (३३१८)
राजन्प्रीतोस्मि भद्रं ते सखा मेऽसि परन्तप ।
सुखमध्युषिताः सर्वे अज्ञातास्त्वयि पार्थिव ॥ ४-७७-२२ (३१६१७)
वैशम्पायन उवाच। ४-७७-२३क्ष् (३३१९)
विराटनगरे राजा धर्मात्मा संशितव्रतः ।
पूजितश्चाभिषिक्तश्च रत्नैश्च शतशोर्चितः ॥ ४-७७-२३ (३१६१८)
तथा ब्रुवन्तं प्रसमीक्ष्य राजा
परं प्रहृष्टः स्वजनेन तेन ।
स्नेहात्परिष्वज्य नृपो भुजाभ्यां

ददौ महार्थं कुरुपाण्डवानाम् ॥ ४-७७-२४ (३१६१९)
युद्धात्प्रयाताः कुरवो हि मार्गे
समेत्य सर्वे हितमेव तत्र ।
आचार्यपुत्रः शकुनिश्च राजा
दुर्योधनः सूतपुत्रश्च कर्णः ।
संमन्त्र्य राजन्सहिताः समर्थाः
समादिशन्दूतमथो समग्राः ॥ ४-७७-२५ (३१६२०)
युधिष्ठिरश्चापि सुसंग्रहृष्टो
दुर्योधनाद्दूतमपश्यदागतम् ।
स चाब्रवीद्धर्मराजं समेत्य
युधिष्ठिरं पाण्डवमुग्रवीर्यम् ॥ ४-७७-२६ (३१६२१)
धनञ्जयेनासि पुनर्वनाय
प्रव्राजितः समये तिष्ठ पार्थः ।
त्रयोदशे ह्येव किरीटमाली
संवत्सरे पाण्डवेयोऽद्य दृष्टः ॥ ४-७७-२७ (३१६२२)
वैशम्पायन उवाच। ४-७७-२८क्ष् (३३२०)
ततोऽब्रवीद्धर्मसुतः प्रहस्य
क्षिप्रं गत्वा ब्रूहि सुयोधनं तम् ।
पितामहः शान्तनवो ब्रवीतु
पूर्णो न पूर्णोऽद्य त्रयोदशो नः ॥ ४-७७-२८ (३१६२३)
संवत्सरात्ते तु धनञ्जयेन
विष्फारितं गाण्डिवमाजिमध्ये ।
पूर्णो न पूर्णो न इति ब्रवीतु
यदस्य सत्यं मम तत्प्रमाणम् ॥ ४-७७-२९ (३१६२४)
तेनैवमुक्तः स निवृत्य दूतो
दुर्योधनं प्राप्य शशंस तत्त्वम् ॥ ४-७७-३० (३१६२५)
समेत्य दूतेन स राजपुत्रो
दुर्योधनो मन्त्रयामास तत्र ।
भीष्मेण कर्णेन कृपेण चैव
द्रोणेन भूरिश्रवसा च सार्धम् ॥ ४-७७-३१ (३१६२६)
संमन्त्र्य रात्रौ बहुभिः सुहृद्भि-
र्भीष्मोऽब्रवीद्धार्तराष्ट्रं महात्मा ।
तीर्णप्रतिज्ञेन धनंजयेन
विष्फारितं गाण्डिवमाजिमध्ये ॥ ४-७७-३२ (३१६२७)
वैशम्पायन उवाच। ४-७७-३३क्ष् (३३२१)
नेच्छन्त्यसत्येन सुरेन्द्रलोकं

पाण्डोः सुता ब्रह्मणश्चापि लोकम् ।
तथ्यं च ते पथ्यमहं ब्रवीमि
स्वर्ग्यं यशस्यं परलोकपथ्यम् ॥ ४-७७-३३ (३१६२८)
कुन्तीसुतैस्त्वं समुपैहि सन्धिं
भुङ्क्ष्व स्वराज्यं सह पाण्डवेयैः ।
युध्यस्व नोचेत्स्थिरबुद्धिराजौ
कुन्तीसुतैर्यद्यपि राज्यमिच्छेः ॥ ४-७७-३४ (३१६२९)
आन्तं न शक्यं कपटेन भोक्तुं
राज्यं परेषां महतां बलीनाम् ।
जित्वा शत्रून्भुङ्क्ष्व राज्यं समग्रं
हतो भवान्भोक्ष्यति वज्रिलोकम् ॥ ४-७७-३५ (३१६३०)
वैशम्पायन उवाच। ४-७७-३६क्ष् (३३२२)
ततः स भागीरथिसूनुवाक्यं
निशम्य गान्धारितनूद्भवो नृपः ।
उवाच भीष्मं प्रमुखे च पित्रो-
र्महीं न दद्यामणुमात्रिकामपि ।
निहन्मि पाण्डूदरसंभवान्वा
हतोस्मि तैर्वा सुरलोकमेमि ॥ ४-७७-३६ (३१६३१)
ते धार्तराष्ट्राः समयं निशम्य
तीर्णप्रतिज्ञस्य धनंजयस्य
संचिन्त्य सर्वे सहिताः सुहृद्भिः
सपार्थिवाः स्वानि गृहाणि जग्मुः ॥ ॥ ४-७७-३७ (३१६३२)

इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि
सप्तसप्ततितमोऽध्यायः ॥
Mahabharata - Virata Parva - Chapter Footnotes

४-७७-६ आवां आवयोः ॥
६ ॥

विराटपर्व - अध्याय ०७८
॥ श्रीः ॥
४.७८. अध्यायः ७८

Mahabharata - Virata Parva - Chapter Topics
अज्ञातवासपरिसमापनानन्तरमुपप्लाव्यनगरे वसद्भिः
पाण्डवैर्दूतमुखेन समाहूतै रामकृष्णादिभिः

सुभद्राभिमन्युप्रभृतिभिः सहोपप्लाव्यं प्रत्यागमनम् ॥ १ ॥
तथा द्रौपदेयादिभिः सह द्रुपदादिभिरागमनम् ॥ २ ॥
तत उत्तरयाऽभिमन्योरुद्वाहः ॥ ३ ॥

Mahabharata - Virata Parva - Chapter Text

४-७८-० (३१६३३)
वैशम्पायन उवाच। ४-७८-०क्ष् (३३२३)
ततस्त्रयोदशे वर्षे निवृत्ते पञ्च पाण्डवाः ।
उपप्लाव्ये विराटस्य वासं चक्रुः पुरोत्तमे ॥ ४-७८-१ (३१६३४)
दूतान्मित्रेषु सर्वेषु ज्ञातिसंबन्धिकेष्वपि ।
प्रेषयामास कौन्तेयो विराटश्च महीपतिः ॥ ४-७८-२ (३१६३५)
तेषु तत्रोपविष्टेषु प्रेषितेषु ततस्ततः ।
तत्रागमन्महाबाहुर्वनमाली बलानुजः ॥ ४-७८-३ (३१६३६)
तस्मिन्काले निशम्याथ दूतवाक्यं जनार्दनः ।
दयितं स्वस्त्रियं पुत्रं सुभद्रायाः सुमानितम् ।
अभिमन्युं समादाय रामेण सहितस्तदा ॥ ४-७८-४ (३१६३७)
सर्वयादवमुख्यैश्च संवृतः परवीरहा ।
शङ्खदुन्दुभिनिर्घोषैर्विराटनगरं ययौ ॥ ४-७८-५ (३१६३८)
कृतवर्मा च हार्दिक्यो युयुधानश्च सात्यकिः ।
अनाधृष्टिस्तथाऽक्रूरः सांबो निशठ एव च ।
प्रद्युम्नश्च महाबाहुरुल्मुकश्च महाबलः ॥ ४-७८-६ (३१६३९)
अभिमन्युमुपादाय सह मात्रा परन्तपाः ।
कृष्णेन सहिताः सर्वे पाण्डवान्द्रष्टुमागताः ॥ ४-७८-७ (३१६४०)
इन्द्रसेनादयश्चैव रथैस्तैः सुसमाहितैः ।
उपेयुः सहिताः सर्वे परिसंवत्सरोषिताः ॥ ४-७८-८ (३१६४१)
दशनागसहस्राणि हयानां द्विगुणं तथा ।
रथानां नियुतं पूर्णं निखर्वं च पदातयः ॥ ४-७८-९ (३१६४२)
वृष्ण्यन्धकाश्च शतशो भोजाश्च परमौजसः ।
अन्युर्वृष्णिशार्दूलं वासुदेवं महाबलम् ॥ ४-७८-१० (३१६४३)
वासुदेवं तथाऽऽयान्तं श्रुत्वा पाण्डुसुतास्तदा ।
मात्स्येन सहिताः सर्वे प्रत्युद्याता जनार्दनम् ॥ ४-७८-११ (३१६४४)
शङ्खदुन्दुभिनिर्घोषैर्मङ्गलैश्च जनार्दनम् ।
ववन्दुर्मुदिताः सर्वे पादयोस्तस्य पाण्डवाः ।
मात्स्येन सहिताः सर्वे आनन्दाश्रुपरिप्लुताः ॥ ४-७८-१२ (३१६४५)
पाण्डवा ऊचुः। ४-७८-१३क्ष् (३३२४)

तव कृष्ण प्रसादाद्धि वर्षाण्येतानि सर्वशः ।
त्रयोदशोपि दाशार्ह यथा स समयः कृतः ॥ ४-७८-१३ (३१६४६)
उषिताः स्मो जगन्नाथ त्वं नाथो नो जनार्दन ।
रक्षस्व देवदेवेश त्वामार्य शरणं गताः ॥ ४-७८-१४ (३१६४७)
वैशम्पायन उवाच। ४-७८-१५क्ष् (३३२५)
तान्वन्दमानान्सहसा परिष्वज्य जनार्दनः ।
विराटस्य सहायांस्तान्सर्वयादवसंवृतः ॥ ४-७८-१५ (३१६४८)
यथार्हं पूजयामास मुदा परमया युतः ।
वृष्णिवीराश्च तान्सर्वान्यथार्हं प्रतिपेदिरे ॥ ४-७८-१६ (३१६४९)
कृष्णा च देवकीपुत्रं ववन्दे पादयोस्तथा ।
तामुद्यम्य सुकेशान्तां नयने परिमृज्य च ।
उवाच वाक्यं देवेशः सर्वयादवसन्निधौ ॥ ४-७८-१७ (३१६५०)
मा शोकं कुरु कल्याणि धार्तराष्ट्रान्समाहितान् ।
अचिराद्धातयित्वाऽहं पार्थेन सहितः क्षितिम् ॥ ४-७८-१८ (३१६५१)
युधिष्ठिराय दास्यामि यातु ते मानसो ज्वरः ।
अभिमन्युना च पार्थेनरौक्मिणेयेन ते शपे ॥ ४-७८-१९ (३१६५२)
सत्यमेतद्वचो मह्यमवैहि त्वमनिन्दिते ।
इत्युक्त्वा तां विसृज्याथ प्रीयमाणो युधिष्ठिरम् ।
अन्वास्त वृष्णिशार्दूलः सह वृष्ण्यन्धकैस्तथा ॥ ४-७८-२० (३१६५३)
काशिराजश्च शैब्यश्च भजमानौ युधिष्ठिरम् ।
अक्षौहिणीभ्यां सहितावागतौ पृथिवीपती ॥ ४-७८-२१ (३१६५४)
अक्षौहिणीभिः पाञ्चालस्तिसृभिश्च महाबलः ।
द्रौपद्याश्च सुता वीराः शिखण्डी चापराजितः ॥ ४-७८-२२ (३१६५५)
धृष्टद्युम्नश्च दुर्धर्षः सर्वशस्त्रभृतांवरः ।
उपप्लाव्यं ययुः शीघ्रं पाण्डवार्थे महाबलाः ॥ ४-७८-२३ (३१६५६)
ततः शतसहस्राणि प्रयुतान्यर्बुदानि च ।
समीपमभिवर्तन्ते योधा यौधिष्ठिरं बलम् ॥ ४-७८-२४ (३१६५७)
समुद्रमिव धर्मान्ते स्रोतःश्रेष्ठाः पृथक्पृथक् ।
आपूरयन्महीपाला यज्वानो भूरिदक्षिणैः ।
वेदावभृथसंपन्नाः शूराः सर्वे तनुत्यजः ॥ ४-७८-२५ (३१६५८)
तानागतानभिप्रेक्ष्य पार्थो ज्ञानभृतां वरः ।
पूजयामास विधिवद्यथार्हं राजसत्तमान् ॥ ४-७८-२६ (३१६५९)
पारिबर्हं ददौ कृष्णः पाण्डवानां महात्मनाम् ।
स्त्रियो वासांसि रत्नानि पृथक्पृथगनेकशः ॥ ४-७८-२७ (३१६६०)
राजानो राजपुत्राश्च निवृत्ते समये तथा ।
यथांर्ह पाण्डवश्रेष्ठैरवर्तन्ताभिपूजिताः ।

आसन्प्रहृष्टमनसः पारिबर्हं ददुस्तदा ॥ ४-७८-२८ (३१६६१)
सर्वेषु समवेतेषु राजभिर्वृष्णिभिः सह ।
विवाहो विधवद्राजन्ववृधे कुरुमात्स्ययोः ॥ ४-७८-२९ (३१६६२)
ततः शङ्खा मृदङ्गाश्च गोमुखा डिण्डिमास्तदा ।
अभिमन्योर्विवाहे तु नेदुर्मात्स्यस्य वेश्मनि ॥ ४-७८-३० (३१६६३)
उच्चावचान्मृगाञ्जघ्नुर्मेध्यांश्च शतशस्तथा ।
भक्ष्यान्नभोज्यपानानि प्रभूतान्यभ्यहारयन् ॥ ४-७८-३१ (३१६६४)
गायनाख्यानशीलाश्च नटा वैतालिकास्तथा ।
स्तुवन्तस्तानुपातिष्ठन्सूताश्च सह मागधैः ॥ ४-७८-३२ (३१६६५)
स्त्रियो वृद्धास्तरुण्यश्च उत्सवे तस्य मङ्गले ।
द्रौपद्यन्तःपुरे चैव विराटस्य गृहे स्त्रियः ॥ ४-७८-३३ (३१६६६)
सुदेष्णां तु पुरस्कृत्य मत्स्यानामपि च स्त्रियः ।
आजग्मुश्चारुपीनाङ्ग्यः सुमृष्टमणिकुण्डलाः ॥ ४-७८-३४ (३१६६७)
वर्णोपपन्नास्ता नार्यो रूपवन्तयः स्वलंकृताः ।
सर्वासामभवत्कृष्णा रूपेण वपुषाऽधिका ॥ ४-७८-३५ (३१६६८)
परिवार्योत्तरां श्लाघ्यां राजपुत्रीमलंकृताम् ।
सुतामिव महेन्द्रस्य पुरस्कृत्योपतस्थिरे ॥ ४-७८-३६ (३१६६९)
भृङ्गारुं तु समादाय सौवर्णं जलपूरितम् ।
पार्थस्य हस्ते सहसा सुतामिन्दीवरेक्षणाम् ।
स्नुषार्थं प्राक्षिपद्वारि विराटो वाहिनीपतिः ॥ ४-७८-३७ (३१६७०)
तां प्रत्यगृह्णाकौन्तेयः सुतस्यार्थे महामनाः ।
सौभद्रास्यानवद्याङ्गो विराटतनयां तदा ॥ ४-७८-३८ (३१६७१)
तत्रातिष्ठद्गृहीत्वा तु रूपमिन्द्रास्य धारयन् ।
स्नुषां तां परिगृह्णानः कुन्तीपुत्रो युधिष्ठिरः ॥ ४-७८-३९ (३१६७२)
द्रुपदश्च विराटश्च शिखण्डी च महाबलः ।
युयुधानश्च शैब्यश्च धृष्टद्युम्नश्च सात्यकिः ॥ ४-७८-४० (३१६७३)
सप्तैतेऽक्षौहिणीपाला यज्वानो भूरिदक्षिणाः ।
पाण्डवं परिवार्यैते निवेशं चक्रिरे तदा ॥ ४-७८-४१ (३१६७४)
तत्रस्थायां तु सेनायां मात्स्यो धर्मभृतांवरः ।
प्रीतो दुहितरं गृह्य प्रददावभिमन्यवे ॥ ४-७८-४२ (३१६७५)
प्रतिगृह्योत्तरां पार्थः पुरस्कृत्य जनार्दनम् ।
विवाहं कारयामास सौभद्रस्य महात्मनः ॥ ४-७८-४३ (३१६७६)
ततो विवाहो ववृधे स्फीतः सर्वगुणान्वितः ।
सौभद्रस्याद्भुतं कर्म पितुस्तव पितुस्तदा ॥ ४-७८-४४ (३१६७७)
धौम्यः शिष्यैः परिवृतो जुहावाग्नौ विधानतः ।
अग्निं प्रदक्षिणीकुर्वन्सौभद्रः पाणिमग्रहीत् ॥ ४-७८-४५ (३१६७८)

ततः पार्थाय संहृष्टो मात्स्यराजो धनं महत् ।
तस्मै शतसहस्राणि हयानां वातरंहसाम् ॥ ४-७८-४६ (३१६७९)
द्वे च नागशते मुख्ये धनं बहुविधं तदा ।
प्रादान्मात्स्यपतिर्हृष्टः कन्याधनमनुत्तमम् ॥ ४-७८-४७ (३१६८०)
पारिबर्हं च पार्थेभ्यः प्रददौ मत्स्यपुङ्गवः ।
कृष्णेन सह कौन्तेयः प्रत्यगृह्णात्प्रभूतवत् ॥ ४-७८-४८ (३१६८१)
कृते विवाहे तु तदा धर्मपुत्रो युधिष्ठिरः ।
ब्राह्मणेभ्यो ददौ वित्तं यदुपाहरदच्युतः ॥ ४-७८-४९ (३१६८२)
गोसहस्राणि वस्त्राणि रत्नानि विविधानि च ।
भूषणानि च सर्वाणि यानानि शयनानि च ॥ ४-७८-५० (३१६८३)
नागरान्प्रीतिभिर्दिव्यैस्तर्पयामास भूपतिः ॥ ४-७८-५१ (३१६८४)
तन्महोत्सवसंकाशं हृष्टपुष्टजनाकुलम् ।
नगरं मत्स्यराजस्य शुशुभे भरतर्षभ ॥ ४-७८-५२ (३१६८५)
पुरोहितैरमात्यैश्च पौरैर्जानपदैः सह ।
विराटो नृपतिः श्रीमान्सौभद्रायाभिमन्यवे ।
तां सुतामुत्तरां दत्त्वा मुमुदे परमं तदा ॥ ४-७८-५३ (३१६८६)
जनमेजय उवाच। ४-७८-५४क्ष् (३३२६)
वृत्ते विवाहे हृष्टात्मा यदुवाच युधिष्ठिरः ।
तत्सर्वं कथयस्वेह कृतवन्तो यदुत्तरम् ॥ ॥ ४-७८-५४ (३१६८७)

इति श्रीमन्महाभारते शतसाहस्त्रिकायां संहितायां वैयासिक्यां विराटपर्वणि वैवाहिकपर्वणि अष्टसप्ततितमोऽध्यायः
॥ ॥ वैवाहिकपर्व समाप्तम् ॥ ५ ॥ ॥ समाप्तं च विराटपर्व ॥ ४ ॥
Mahabharata - Virata Parva - Chapter Footnotes

अतः परमुद्योगपर्व भविष्यति । तस्यायमाद्यः श्लोकः । कृत्वा विवाहं तु कुरुप्रवीरा। स्तदाऽभिमन्योर्मुदिताः सपक्षाः। विश्रम्य रात्रावुषसि प्रतीताः। सभां विराटस्य ततोऽभिजग्मुः ॥
इदं विराटपर्व कुंभघोणस्थेन टीओ आरो कृष्णाचार्येण टीओ आरो व्यासाचार्येण च मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३१ सन १९०९.

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org